इतिश्रुतेः यत्तदोर्नित्य सम्बन्धाद्यच्छब्दोऽध्याहर्तव्यः । यस्मादिदमसत्यमद्वैते मयि सत्यं भाति । तस्माच्छिवोहमस्मिन्नित्यर्थः ॥

Colophon :

इति पञ्चरत्नव्याख्या शङ्कराचर्यैः कृता ॥

17

Sl. No. 37298 **अद्वैतप्रकरणम्** Ms. No. C. 823/6

Beginning:

तदिदं ह्येतं मां यो वेद ब्रह्माहमस्मीति ।
स इदं सर्वं च स्यात्तस्य हि देवाश्च नेशते भूत्यै ।
येषां स भवत्यात्मा योन्यामथ देवतामुपास्ते सः ॥

End :

मानुषमनङ्गश्वसूकरादिष्वनुस्यूतं यः ।
पश्यति जगति दिशं भुङ्क्तेसावद्वयानन्दम् ॥

Colophon :

इत्यद्वैतप्रकरणम् ॥

18

Sl. No. 37299 **अद्वैतप्रकाशप्रकरणम्** Ms. No. P. 4870

Beginning :

अन्तर्यामितया स्वान्ते बहिराचार्यरुपधृत् ।
सर्वेषां प्रेरको यस्य नियन्तारं नमाम्यहम् ॥

वेदशास्त्रपुराणस्मृत्यादिषु यस्सारभूतोऽर्थः तत्सर्वजनानां अवगतार्थं करतलामलकं सद्गुरुशिष्यसम्पादनश्रीमत्परमहंस परिव्राजकाचार्य सम्प्रदायक रघुनाथेन्द्रशिष्यरघुनायकस्यशिष्येण महादेवेन विरचितोऽयं ग्रन्थः ।

तापत्रयार्कसन्तप्तः कश्चिदुर्वग्रमानसः ।
शमादिसाधनैर्युक्तः सद्गुरं परिपृच्छति ॥

End:

इत्यादिश्रुतिप्रमाणत्वेन तैर्यदुक्तं तदेव × × । सः मुमुक्षु उक्तप्रकरेण वा गुरुमुखात् यस्य स्वरूपं जानाति सः सर्व × × नेद-तिष्ठति । स एव शुद्धापरोक्षज्ञानी । स एव लब्धसक्षात्कारवान् । स एव धन्यः स एव कृतकृत्यः इत्यवगन्तव्यम् ॥

Colophon :

इति श्री परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्य रघुनायकशिष्य शिवसुतमहादेवविरचितं सकलवेदान्तशास्त्र × × अद्वैतप्रकाश प्रकरणं समाप्तम् ॥

19

Sl. No: 37301 — अद्वैतभूषणम् — Ms. No. A. 741

Beginning :

यस्मिन्नध्यस्तमेतद्वियदनिलमुखं विश्वमाभात्यबोधा-
त्पातः पूरो गभस्तिश्चवमरुधरणीसंश्रितेष्वब्जबन्धोः ।
तन्मे वेदान्तविद्या हृदि सततलसन्नित्यनिर्द्वन्द्वरत्नं
विद्यैकप्राप्यमाशु स्फुरतु हृदि सुखज्ञानसत्यात्मरूपम् ॥
टीकातन्मूलभाष्यादीन् सम्यक् बोधेन्द्रसंयमभी ।
आलोच्य तत्त्वं संगृह्य करोत्यद्वैतभूषणम् ॥

End :

सर्वत्रेदप्रामाण्यसिद्धमित्यद्वैतस्य निरस्तसमस्तावद्यत्वात्तदेव श्रेयोऽर्थि भिरादरेणोपादेयमिति नवमवर्णकार्थनिरूपणसिद्धम् ।
गुरोस्सूक्तिमाश्रित्य वेदान्तानां विचारणात् ।
निराकृतद्वैतजालमात्मानं समुपास्महे ॥
आशामोदकतप्तानां विज्ञातपरमात्मनाम् ।
आत्मतत्त्वावबोधाय सन्दर्भः समुदाहृतः ॥
नवानां वर्णकानां च अकरोत्सारसंग्रहम् ।
अद्वैतभूषणं नाम विदुषां प्रीतयेऽधुना ॥

Colophon :

बोधेन्द्रयतिना सम्यक् कृतमद्वैतभूषणम् ।
श्री ०प्रीतये भूयाद्विदुषां कर्णभूषणम् ॥
गीर्वाणेन्द्राय यतये गुरवे परमात्मने ।
नमस्तुभ्यं नमस्तुभ्यं श्रेयसे भूयसे हि नः ॥

20

Sl. No. 37303 — अद्वैतभूषणव्याख्या — Ms. No. P. 140

Beginning :

न द्वितीयः हेतूपरागमपेक्ष्यविकारित्वेऽविकारित्वे मृदादिवत् परिणामित्वापत्तिः । विशिष्टस्य ब्रह्मत्वे निर्विकारश्रुतिविरोधः । अब्रह्मत्वे ब्रह्मणः कारणत्वासिद्धि × × धर्मि —

End :

गगनपवनतेजोवारिपृथ्वीहिमांशु +

+ गुरुवशमीशं दक्षिणामूर्तिमीडे ॥

रुचिरकमलनेत्रं सर्वकल्याणपात्रं

परिचितजनमित्रं चन्दनालिप्तगात्रम् ।

करतलधृत ×व देवकीहृद्यपुत्रं

परिहृतरिपुमात्रं भावये न × जाम् ॥

आनन्ददीपिकाग्रन्थपुष्पाञ्जलिसमर्पितः ॥

श्रीकृष्णः प्रीयतां मह्यं सर्वमङ्गळभाजनम् ॥

छाया संश्रिता वामपर्श्वे ×

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीज्ञानेन्द्र श्रीसरस्वतीपूज्यपाद-शिष्य श्रीवासुदेवेन्द्रसरस्वतीविरचितायामानन्ददीपिकायांवेदान्तभूषणव्याख्यायां द्वितीयः परिच्छेदः ॥

श्रीमद्ज्ञानेन्द्रसरस्वतीकृतं वेदान्तभूषणम् ।

श्रीवासुदेवेन्द्रयतिव्याख्या का × × ॥

21

Sl. No. 37307 **अद्वैतमकरन्दः** Ms. No. P. 2359/2

Beginning :

कटाक्षकिरणाचान्तनमन्मोहाब्धये नमः ।

अनन्तानन्दकृष्णाय जगन्मङ्गलमूर्तये ॥

अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।

ब्रह्मैवाहमतस्सिद्धः सच्चिदानन्दलक्षणः ॥

End :

उपशान्तजगज्जीवशिष्याचार्योवरभ्रमम् ।

स्वतस्सिद्धमनाद्यन्तं परिपूर्णमहं महः ॥ २७ ॥

लक्ष्मीधरकवेस्सूक्तिः शारदाम्भोजसंभृतः ।

अद्वैतमकरन्दोऽयं विद्वद्भृङ्गैर्विपीयताम् ॥ २८ ॥

Colophon : — — — —

22

Sl. No. 37312 — अद्वैतमकरन्दः — Ms. No. B. 278/3

Beginning

नित्यं निरन्तरानन्दं चिद्घनं ब्रह्म निर्मलम् ।
तितर्कानुभूतिभ्यामहमस्म्यद्वयं सदा ॥
दृष्टाक्षीकरणं चान्तनमन्मोहाब्धये नमः ।
अनन्तानन्दकृष्णाय जगन्मङ्गलमूर्तये ॥

End :

उपशान्तजगज्जीवशिष्याचार्येश्वरभ्रमम् ।
स्वतस्सिद्धमनाद्यन्तपरिपूर्णमहं महः ॥

Colophon :

लक्ष्मीधरकवेस्सूक्तिश्शरदम्भोजसम्भृतः ।
अद्वैतमकरन्दोऽयं विद्वद्भृङ्गैर्निपीयताम् ॥

23

Sl. No. 37314 — अद्वैतमकरन्दः — Ms. No. C. 3760/5

Beginning :

सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं
विश्वेश्वरं विदितविश्वमनन्तमूर्तिम् ।
निर्मुक्तबन्धनमापरसुखाम्बुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥

End

लक्ष्मीधरकवेः सूक्तिः शरदाम्बोजसंभृतः ।
अद्वैतमकरन्दोऽयं विद्वद्भृङ्गैर्निपीयताम् ॥
त्वयि मयि च गण्यमाने मशकान्माशकोऽहमेव देहदशा ।
विश्वाधिकेशते मे शब्दोथानन्दपूर्णता तुल्या ॥

Colophon :

— — —

24

Sl. No: 37315 | अद्वैतमकरन्दव्याख्या | Ms. No. P. 999/3b

Beginning :

नित्यं निरन्तरानन्दचिद्घनं ब्रह्म निर्भयम् ।
श्रुत्या तर्कानुभूतिभ्यामहस्म्यद्वयं सदा ॥
अम्बागृहीतावामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥
कैवल्यानन्दयोगीन्द्रपादकञ्जरजोरविः ।
राजते मे हृदाकाशे मोहध्वान्तनिबर्तकः ॥

End :

मन्दस्मितानन्दितभक्तजालं
सौन्दर्यसन्तर्पितवामभागम् ।
स्वानन्दसन्तृप्तमन्दहासं
साम्बं भजे चन्द्रकलावभासम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकचार्यश्रीमत्कैवल्यानन्दयोगीन्द्रपादकमलभृङ्गाय माणस्वयंप्रकाशाख्यविरचिता रसाभिव्यञ्जकाख्याद्वैतमकरन्दव्याख्या समाप्ता ॥

25

Sl. No. 37316 | अद्वैतमकरन्दव्याख्या | Ms. No. P. 2293/2

Beginning :

नित्यं निरन्तरानन्दचिद्घनं ब्रह्म निर्भयम् ।
श्रुतितर्कानुभूतिभ्यामहमस्मि लयद्वयम् सदा ॥ (?)
अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम ॥
कैवल्यानन्दयोगीन्द्रपादक × रजोरविः ।
राजते मे हृदाकाशे मोहध्वान्तनिर्वर्तकः ॥
शुद्धानन्दपदाम्भोजचञ्चुं सेवे यदु × वम् ।
निर्वाणरसमास्वाद्य हृष्टाशिष्यालिपङ्क्तयः ॥

सच्चिदानन्दयोगीन्द्रा जयन्ति भुवि केचन ।
यत्कृपाबलतस्तीर्णो मया संसारवारिधिः ॥

इह खलु लक्ष्मीधरो नाम कश्चित् कवीन्द्रः

End :

ब्रह्मानन्दरसास्वादमिच्छद्भिः विबुधोत्तमैः ।
रसा × का ह्येषा परिशील्या सदादरात् ॥

तावत्त्रयार्थसन्तप्ता मोक्षकामा मुदा सह ।
रसाभिज्ञा × × ॥

Colophon :

अद्वैतमकरन्दटीका समाप्ता ॥

26

Sl. No. 37317 अद्वैतमकरन्दव्याख्या Ms. No. P. 2359/2b

Beginning :

नित्यं नित्यतरानन्दचिद्घनं ब्रह्म निर्भयम् ।
श्रुत्या तर्कानुभूतिभ्यां अहमस्म्यद्वयं सदा ॥

इह खलु लक्ष्मीधरो नाम कश्चित् × × ×
किञ्चित्प्रकरणमद्वैताख्यमारभाणः —

End :

यद्यप्यत्र प्रतिश्लोकं बहुवक्तव्यमस्ति, तथापि × ×
उपरतमिति ॥

अद्वैतमकरन्दस्य रसाभिव्यञ्जिका कृता
स्वयंप्रकाशयतिना पुरुषोत्तमशासनात् ॥ +

साम्बं भजे चन्द्रकलावतंसम् ॥

Colo hon :

अद्वैतममकरन्दव्याख्या समाप्ता ॥

27

Sl. No: 37318 अद्वैतमकरन्दव्याख्या Ms. No. P. 5592/42

Beginning :

नित्यं निरन्तरानन्दचिद्घनं ब्रह्म निर्भयम् ।
श्रुत्या तर्कानुभूतिभ्यां अहमस्म्यद्वयं सदा ॥

अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥

सच्चिदानन्दयोगीन्द्राः चीयन्ते भुवि केचन । +

इह खलु लक्ष्मीधरनामावान् कश्चित् कवीन्द्र × निबध्नन्-

कटाक्षकिरणाचान्तनमन्मोहाब्धये नमः ।
अनन्तानन्दकृष्णाय जगन्मङ्गलमूर्तये ॥

End:

लक्ष्मीधरकवेः सूक्तिः शरदम्भोजसम्भृतः ।
अद्वैतमकरन्दोऽयं विद्वद्भृङ्गैःनिपीयताम् ॥ +
अद्वैतमकरन्दस्य रसाभिव्यञ्जिका कृता ।
स्वयंप्रकाशयतिना पुरुषोत्तमशासनात् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकार्य कैवल्ययोगीन्द्रपादकमलभृङ्गायमान स्वयंप्रकाशाख्ययतिना विरचिता रसाभिव्यञ्जिकाख्या अद्वैतमकरन्दव्याख्या समाप्ता ॥

28

Sl. No. 37322 अद्वैतमकरन्दव्याख्या Ms. No. A. 769

Beginning:

× प्राप्तप्रणयनानन्तरपरत्वमिति चेत् मैवम् । युज्यते खल्वनुवाद परिहाराय द्वयोः प्रणयतीति × त्वद्वैतवाक्यविरोधात् न द्वैतवाक्यस्य परमार्थसत्यत्वपरत्वं कल्पयितुं युक्तम् । वैपरीत्यशङ्का × निराकरिष्यते । न चानुवादभयन्मानान्तर × र्थपरत्वम् कल्पयितुं शक्यम् ।

End :

एवं बृह्मणतः प्राप्तप्राबल्येन सुनिश्चतम् ।
वियदादिप्रपञ्चोऽतः तदज्ञानविजृम्भितः ॥
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः । (?)
यासंसरति मित्यादिवाक्यात् परमात्मनः ॥
अज्ञानेनावृताद्विश्वं संभूतमिह भासते ।
अज्ञानावृतशुक्त्यादौ यथा रूप्यमिति स्थितिः ॥

Colophon :

इति श्रीसर्वतोमुखमहाव्रतयाजिश्रीमदाचान्दीक्षितसूनोः विश्वजिद्याजिनः श्रीरङ्गराजदीक्षितस्य कृतौ अद्वैतमुकुरे प्रमाणभावप्रतिफलनं नाम प्रथमः परिच्छेदः ॥

29

Sl. No: 37323 अद्वैतरक्षणम् **Ms. No. B. 76**

Beginning :

बृन्दारण्यनिविष्टं विलुठितमाभीरवारनारीभिः ।
सत्यचिदानन्दघनं ब्रह्म नराकारमालम्बे ॥
निर्जित्य प्रतिपक्षाद्वैतधियो दुष्टतार्किकंमन्यान् ।
अद्वैततत्त्वरत्नं रक्षितुमयमुद्यमः स्यान्नः ॥

ननु प्रत्यक्षाद्यगोचरत्वात् सत्यज्ञानानन्तानन्दात्मस्वरूपमद्वैतं वस्तु—

End:

तस्मात् ज्ञानिनः कर्मभोगार्थं अयोगिनोऽपि कायव्यूहकल्पनं मौढ्यमात्रेणैव । ज्ञानस्य प्रारब्धकर्मानाशकत्वे सूत्रम्- भोगेन त्वितरे क्षपयित्वा सम्पद्यते इति प्रागेवोदाहृतम् ।

अद्वैतरत्नमेतत्तु श्रीविश्वेश्वरपादयोः ।
समर्पितमथैतेन प्रीयतां स दयानिधिः॥

Colophon :

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीविश्वेश्वरसरस्वतीपूज्यपादशिष्य श्रीमधुसूदनसरस्वतीविरचितं अद्वैतरक्षणं समाप्तम् ॥

30

Sl. No. 37327 — अद्वैतरत्नप्रकाशः — Ms. No. B. 528/1

Beginning :

ब्रह्माण्डदेवालयमध्यसंस्थ-
पिण्डाण्डगर्भालयचित्तपीठे ।
विभासमानं चिततं स्वकीय
चैतन्यलिङ्गं शिवमाश्रयामः ॥

महामायागुहालीनमायातीतमहत्तमम् ।
दक्षिणास्याभिधं ज्योतिराविरस्तु ममाग्रतः ॥

देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिने-
त्येवं प्राञ्जलिना मया सविनयं स्वप्नेऽर्थितस्येशितुः ।
यस्य श्रीकरुणाकटाक्षविभवप्राप्तात्मविद्योऽस्म्यहं
तं वन्दे मुनिवन्दनीयचरणं श्री दक्षिणास्यं गुरुम् ॥

End :

सर्वदुर्वासनाजालं पादपस्नुमिव त्यजन् ।
विधूयाज्ञानदुःखौघं मोक्षानन्दं समश्नुते ॥
सर्ववेदशिरोगूढाद्वैतरत्नप्रकाशिका ।
मया कृता शतश्लोकी वीक्ष्यतां वीतमत्सरैः ॥

Colophon :

प्रसादाद्दक्षिणामूर्तान्मया सम्यक्प्रकाशितम ।
गूढमद्वैतसद्रत्नं गृह्यतां ब्राह्मणोत्तमैः ॥
कम्भ पापिकुलोद्भूतेनामरेश्वरशास्त्रिणा ।
प्रसादाद्दक्षिणामूर्तेः कृताऽद्वैतप्रकाशिका ॥

31

Sl. No. 37329 — अद्वैतरत्नाकरः — Ms. No. B. 1051

Beginning :

× प्रमाणं त्रिभुवनजनकं त्रिक्रमाक्रान्तलोकं
त्रैलोक्याकारमेकं हरिमखिलगुरुं घोरसंसारपारम् ।

सर्वक्षेत्रज्ञभावं सततमनुभवानन्दमद्वैत-

× जनकरुणावाप्तमूर्ति स्वसिद्ध्यै ॥

अथातो ब्रह्मजिज्ञासा —

यज्ञार्थैः कर्मभिर्ये हरिमखिलगुरुं देवमाराधयन्तः

त्यक्तशेषार्थकामास्त्वतिविमलधियस्तत्प्रसादान्महान्तः ।

श्रान्ताः संसारधर्मे जनिमृतिभयदे नित्यमेवाप्तकामाः-

पारिव्रज्यं भजन्ते शमदमगुणकाः सद्गुरुं ते भजन्ते ॥

End :

नैकस्मिन्नसंभवात् ।

पूर्वं सौगतसिद्धान्ते निरस्तेऽपि × मिह ।

निरस्ते सविशेषेण सप्तभङ्गीनयोऽधुना ॥

अस्तिता नास्तितैकस्मिन् × ।

× वाच्यतावाच्यते तथा ॥

विरुद्धार्थाञ्जल्पयन्ति भ्रमात् ह्यमुक्तसङ्गैः परं ध्रुवम् ।

द्विरुक्तिरस्य शास्त्रस्य समाप्तिं द्योतयत्यथ ॥ ×

Colophon :

इति श्री शिवरामानन्द पूज्यपादशिष्य श्रीनारायणानन्द तीर्थविरचितोऽद्वैत रत्नाकरः सम्पूर्णः ॥

32

Sl. No. 37331 — अद्वैतरहस्यम् — Ms. No. P. 4731

Beginning :

वेदान्तसागरसुधामयमद्वितीय-

मानन्दवार्धिपरिपूर्णमभीष्टदोहम् ।

स्वाबोधजृम्भिद्गलय कस्ववबोधं (?)

श्रीकालहास्तिनिलयं मह आविरस्मः ॥

इह खलु जगति भगवत्पादमतानुरोधेन अद्वैतप्रतिपादकानि परस्य मीषद्भेदवन्ति (?) बहूनि निबन्धनानि वर्तन्ते ।

End :

तद्द्वारा अद्वितीयानन्तानन्दपरिपूर्णब्रह्मस्वरूपता च गुरुप्रसदा-
द्भविष्यतीति ॥

तस्मादिदं प्रकरणं भवमूलल × पर
दाहादिमोचकमनन्त × ।
मुहुमिराम × रिमिः प्राणाज्ञै (?)
र्भागीरथीपय इव प्रतिपत्तिपूर्वम् ॥
भूषणं विदुषां भूमब्रह्मणः प्रतिपादितम् ।
शुद्धाद्वैत × मुदेस्तु गुरवे × ॥

Colophon :

श्रीनृसिंहार्पणमस्तु ॥

33

Sl. No. 37332 अद्वैतविवेकव्याख्या Ms. No. P. 5779/46

Beginning :

नत्वा श्रीभारतीतीर्थविद्यारण्यौ मुनीश्वरौ ।
मयाद्वैतविवेकस्य क्रियते पदयोजना ॥

End :

असावुक्तप्रकारजीवन्मुक्तिः परा कष्ठा निरतिशयपर्यवसाना भूमिः
जीवद्वैतस्य मनोमयप्रपञ्चस्य विसर्जनात् ×

Colophon .

× अद्वैतसारं समाप्तम् ॥

34

Sl. No. 37335 अद्वैतवेदान्तपरिभाषा Ms. No: P. 326/12

Beginnig :

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानां सच्चिदानन्दविग्रहम् ॥
यदन्तेवासि × × गुरुम् ॥
श्रीमद्वे × × प्रवर्तकम् ।

येन चिन्तामणौ टीका दशटीकाविभञ्जिनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥

पदयोजनया × ।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः ॥

End :

उपासनादिसंसिद्धितोषितेश्वरचोदितम् ।
अधिकारं समाप्यैते प्रविशन्ति परं पदम् ॥

इति एतच्च एकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते । तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया । तदेवं ब्रह्मज्ञानान्मोक्षः । मोक्षश्चानर्थनिवृत्तिः निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ॥

Colophon :

इति धर्मराजाध्वरीन्द्रविरचितायां वेदान्तपरिभाषायां अष्टमः परिच्छेदः समाप्तः । ग्रन्थश्च समाप्तः ॥

35

Sl. No. 37338 **अद्वैतवेदान्तपरिभाषा** **Ms. No: P. 2808/2**

Beginning :

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि पर × विग्रहम् ॥

यदन्तेवासिपञ्चास्यैर्निरस्ता × वारणाः ।
तं नौमि नरसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥

End :

तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया । तदेवं × ज्ञानान्मोक्षः । मोक्षोऽनर्थनिवृत्तिः । निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ॥

Colophon :

इति धर्मराजाध्वरीन्द्रविरचितायां वेदान्तपरिभाषायामष्टमः परिच्छेदः ॥

येन चिन्तामणौ टीका दशटीकाविभञ्जिनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥

टीका शशधरस्यापि बालव्युत्पत्तिदायिनी ।
पदयोजनया पञ्चपादिका व्याकृता तथा ॥

रचिता तेन वेदान्तपरिभाषा यथामति ।
धर्मराजाध्वरीन्द्रेण कुण्डिनेन विपश्चिता ॥

36

Sl. No. 37349 अद्वैतवेदान्तपरिभाष्याव्याख्या Ms. N. P. 2228

Beginning :

यस्याः प्रसादलेशेन मूकोऽपि विबुधायते ।
वेदशास्त्र विनोदां तां × × ॥

× × ×
ज्ञानं विशुद्धं परमात्मरूप ।
× × परम पेरश
वेदान्तवेद्यं तमहं प्रपद्ये ॥

अत्र प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन् निर्विघ्नपरिसमाप्तये इष्टदेवतां नमस्करोति यदविद्येति । यस्य अविद्या यदविद्या —

End :

इत्यादिदूषणं स्यादित्यत आह – तस्मादिति । परिच्छेदार्थमुपसं हरति – तदेवमिति । तरति शोकमात्मवित् इत्यादिश्रुत्या ब्रह्म वेद ब्रह्मैव भवति इत्यादिश्रुत्या च अनर्थनिवृत्यानन्दावाप्त्योः सिद्धं प्रयोजनत्वम् ॥

Colophon :

इति श्रीत्रिवेदीनारायणदीक्षितात्मजेन पेद्दादीक्षितवर्येण विरचितायां वेदान्तपरिभाषाप्रकाशिकायां अष्टमः परिच्छेदः ॥

37

Sl. No. 37351 अद्वैतवेदान्तपरिभाषाव्याख्या **Ms. No. P. 4662/2**

Beginning :

ज्ञानं विशुद्धं परमार्थभूतं स्वयंप्रकाशं जगदेकहेतुम् ।
आनन्दरूपं परमं परेशं वेदान्तवेद्यं तमहम् प्रपद्ये ॥
यत्प्रसादप्लवेनैव शास्त्राब्धिमतरं सुखम् ।
तं धर्मराजाध्वरिणं वन्दे सर्वार्थसिद्धये ॥
\+ \+ \+ \+
पेद्दादीक्षितवर्येण परिभाषाप्रकाशिका ।
क्रियते विदुषां प्रीत्यै बालानां मतिदायिनी ॥

End :

इत्यादिदूषणं स्यादित्यत आह तस्मादिति। परिच्छेदार्थमुपसंहरति तदेव मिति । शोकमात्मविदित्यादिश्रुत्या ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्या च अनर्थनिवृत्त्यानन्दवाप्त्या सिद्धं प्रयोजनत्वम् ॥

Colophon .

इति श्रीमत् त्रिवेदिनारायणात्मजेन पेद्दीक्षितवर्येण विरचितायां वेदान्त-रिभाषाप्रकाशिकायां अष्टमः परिच्छेदः सम्पूर्णः ॥

38

Sl. .No. 37355 अद्वैतवेदान्तपरिभाषाव्याख्या **Ms. No. P. 1930**

Beginning :

नैदाघभानुकिरणेष्विव वारिपूरः
वों विभाति यदबोधवशात् प्रपञ्चः ।
मालाफणीव च निमीलति यत्प्रबोधात्
तद्ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥
\+ \+ \+ \+
वेदान्तपरिभाषाख्यां सोऽहं तातविनिर्मिताम् ।
व्याकरोमि कृतिं सर्वश्रुत्यन्तार्थप्रकाशिकाम् ॥

प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन् निर्विघ्नपरिसमाप्तये मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थे निवध्नाति–यदविद्येति ॥

End :

नेदं रजतमितिवत् नायं मेरीशब्द इति बाधकप्रत्ययाभावेन तस्य भ्रमत्वकल्पनं न युक्तमिति भावः । परमप्रकृतमुपसंहरति—तदेवमिति । प्रत्यक्षप्रमानिरूपणात् तत्करणत्वेन प्रत्यक्षप्रमाणं निरूपितमित्यर्थः ॥

Colophon :

इति श्रीधर्मराजाध्वरीन्द्रात्मज श्रीरामकृष्णाध्वरिविरचिते वेदान्तशिखामणौ प्रत्यक्षपरिच्छेदः ॥

39

Sl. No. 37357 अद्वैतवेदान्तपरिभाषाव्याख्या Ms. No. P. 2808/1

Beginning:

नैदाघभानुकिरणेष्विव वारिपूर-
स्सर्वो विभाति यदबोधवशात् प्रपञ्चः ।
मालाफणीव च निमीलति यत्प्रबोधात्
तत् ब्रह्म नौमि परमद्वयमात्मरूपम् ॥

आसेतोरासुमेरोरपि भुवि विदितान् धर्मराजाध्वरीन्द्रा +
न्वन्देऽहं तत्त्वचूडा × मणिनन क्षीरधींस्तातपादान् ॥ (?)

End :

नान्यदीयसंसारहेत्वावरणशक्तीनामिति व्यवस्थोपपद्यत इत्याह तस्मादिति । परिच्छेदप्रतिपाद्यमर्थं निगमयति तदेवमिति ॥

Colophon :

इति धर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते वेदान्तशिखामणा व ष्टमपरिच्छेदः ॥

40

Sl. No. 37364 अद्वैतसिद्धान्तप्रकाशः Ms. No. P. 4933/1

Beginning :

× दार्थावगमस्यान्वयव्यतिरेकाभ्यां वाक्यार्थावगतिहेतुत्वेन तन्निरूपणस्यावश्यकत्वात् × वदस्य- × ×

× × दिपदानां प्रसिद्धार्थकत्वेऽपि तत्त्वमसीत्यत्र

पदार्थोऽद्वितीय ब्रह्म य वाह्व नीयादिवत् प्रत्यक्षाद्यगो

× गिते लक्षणप्रमाणाभ्यां × मिथ्यैव हेतुना ।

End :

कण्ठचामीकरन्यायेन तदुपपत्तेरुक्तत्वादित्यशेषमतिसमञ्जसमिति संक्षेपः ॥

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।

अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

Colophon :

इति श्रीमदद्वैतसिद्धान्तप्रकाशे द्वितीयः परिच्छेदः ॥

41

Sl. No. 37365 अद्वैतसिद्धान्तविद्योतनम् No. Ms. P. 1984/4

Beginning :

सदानन्दचिदानन्दे जगति × त्र जायते ।

रजतादिव शुक्त्यादौ तदेवाहं परा गतिः ॥

ननु देशान्तरियरज × पत्तौ इदं रजतमित्यादिभ्रमस्थले

× रजताद्युत्पत्तिकल्पने गौरवमिति चेन्न । रजतादौ चक्षुरादे-

स्सन्निकर्ष × पपत्तेः ।

End ;

प्रारब्धभोगतत्तत्कर्मणः देहादिनिवृत्तौ प्रयोजकत्वेन विदेहकैवल्य

मनोवृत्यादिरूपस्य प्रारब्धभोगोपहतस्य सत्वेप्यग्रे तद ×

सत्तायां तत्वप्रमायातत्त्वाज्ञानतत्प्रयुक्तपूर्वावस्थाननियतत्वादिति दिक् ॥

Colophon :

इत्यद्वैतसिद्धान्तविद्योतने परमहंसपरिव्राजकश्रीब्रह्मानन्ददसरस्वती

विरचिते प्रथमः परिच्छेदः ॥

42

Sl. No. 37370 अद्वैतसिद्धान्तविद्योतनम् Ms. No. P. 1888

Beginning :

मायाकल्पितमातृतामुख ×

सस्च्छन्न × शिरोद्धासादधीसूनरः ।

मिथ्याबन्धविधूननेन परमानन्दकतानात्म ×
प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥

End :

अविद्यातत्कार्यात्मकनिविडबन्धव्यपगमे
यमद्वैतं सत्यं प्रततपरमानन्दममृतम् ।
भजन्ते भूमानं भवभयमिदे भव्यमतयः
नमस्तस्मै नित्यं निखिलनिगमेशाय हरये ॥
अनादिसुखरूपतानिखिलदृश्यनिर्मुक्तता
निरन्तरमनन्तता स्मरणरूपता च स्वतः ।
त्रिकालपरमार्थता त्रिविधभेदशून्यात्मता
मम श्रुतिशतार्पिता तदहमस्मि पूर्णो हरिः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीचरणशिष्यश्रीमधुसूदनसरस्वतीविरचितायां अद्वैतसिद्धौ सपरिकरप्रपञ्चमिथ्यात्वनिरूपणं नाम प्रथमः परिच्छेदः ॥

43

Sl. No. 37407 अद्वैतसिद्धान्तविद्योतनम् Ms. No. P 5854/1

Beginning :

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
वैयासिकन्यायमाला श्लोकैः संगृह्यते स्फुटम् ॥
एको विषयसन्देहपूर्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी सङ्गतयः स्फुटाः ॥
शास्त्रेऽध्याये तथा पादेऽध्यायसंगतयस्त्रिधा ।
शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरूह्यताम् ॥

End :

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ।
जगत्स्रष्टृत्वमस्त्येषां योगिनामथ नास्ति वा ।
अस्ति स्वाराज्यमाप्नोति इत्युक्त्यैश्वर्यानवग्रहात् ॥
सृष्टावप्रकृतत्वेन स्रष्टृता नास्ति योगिनाम् ।
स्वाराज्यमी ˘भोगाय ददौ मुक्तिं च विद्यया ॥

Colophon :

इति श्रीमत्परमहंससपरिव्राजकाचार्य श्रीविद्यातीर्थपूज्यपादशिष्य-श्रीभारतीतीर्थमुनिप्रणीतायां अधिकरणरत्नमालायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

44

Sl. No. 37419 अधिकरणरत्नमालाव्याख्या Ms. No. P 8606

Beginning :

सिंहासनपुरस्थाने श्रीरामगुरुसूनुना ।
लिख्यते रत्नमालेयं रामकृष्णाख्यशास्त्रिणा ।

प्रारीप्सितग्रन्थस्याविघ्नेन परिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतातत्त्वगुरुमूर्त्युपाधियुक्त नमस्कृत्य ग्रन्थं प्रतिजानीते ।

End :

ईश्वरोऽप्युपासनया तोषितस्तेषां भोगमात्रसिद्धये स्वाराज्यं ददौ । मुक्तिं च तत्त्वविद्योत्पादनेन दत्तवान् । तस्मात् जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यमस्ति ॥

Colophon :

इति श्रीमपरमहंस परिव्राजकाचार्य भारतीतीर्थमुनिप्रणितायां अधिकरण रत्नमालायां चतुर्थाध्यायस्य चतुर्थपादः । समाप्तञ्चेदं शास्त्रम् ॥

45

Sl. No. 37422 अद्वैतस्तवः Ms. No. C. 4229

Beginning :

जगत्सर्गावनापायहेतवे व्यक्तिमीयुषे ।
गुणत्रयजुषे तस्मै कस्मैचिन्महसे नमः ॥
वायुस्तुत्यावलिप्तानां माध्वानां मतभञ्जनम् ।
करोम्यद्भुतमद्वैतस्तवमीश्वरचोदितः ॥

End :

माध्वा बभूवुः कलिकालयोगात्
पाषण्डिनः केचिद × यमर्थाः ।
किमद्भुतं विष्णुपरश्रुतीनां
कृतोद्धतिः प्राक्कुरुतेऽत्र निन्दाम् ॥

Colophon :

इति श्रीमद्द्वैशुद्धाद्वैतप्रतिष्ठापनैकधुरन्धरमध्वमतकुञ्जरकेसरिशामपण्डि-
ताचार्यविरचिते अ त × ॥

46

Sl. No. 37423 **अद्वैतानुभूतिः** Ms. No. P. 4122/2

Beginning :

अहमानन्दसत्यादिलक्षणः केवलश्शिवः ।
आत्मानन्दादिरुप धत्त × मचलोद्वयः ॥ ९ ॥
अक्षिदोषाद्यथैकोऽपि द्वयवद्भाति चन्द्रमाः ।
ज्ञातेऽप्यात्मा तथा × द्वयवान्मायया मृषा ॥

End ;

द्विपडादिलय भाति यस्मिन् साक्षिणि सत्यमा ।
स एव सच्चिदानन्दलक्षगोऽहं स्वयम्प्रभः ॥

Colophon :

इति श्री परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्य श्रीशङ्करा-
चार्यविरचिता अद्वतानुभूतिस्समाप्ता ॥

47

Sl.No. 37424 **अधिष्ठानविवेकः** Ms. No. P. 4659/3

Beginning :

श्रीकृष्णमच्युतं नत्वा श्रीगुरूंश्च गरीयसः ॥
अधिष्ठानविवोकोऽयं क्रियते बोधसिद्धये ॥
अध्यारोपप बादाभ्यां निष्प्रपञ्चं प्रपञ्चयते ।
इति वृद्धवचनम्—

End :

तथाध्यारोपापवादजनितनिष्प्रञ्चब्रह्मात्मैक्यज्ञानान्मुक्तिरिति सिद्धम् ।
अधिष्ठानविवकप्रकरणं समाप्तम् ॥

Colophon :

इति श्री परमहंसपरिव्राजकाचार्य श्रीमदद्वैतानदसरस्वती पूज्यपाद
शिष्य पूर्णप्रकाशानन्दसरस्वती विरचितं अधिष्ठानविवकेप्रकरणं समाप्तम् ॥

48

SI. No. 37424 अध्यात्मविद्योपदेशविधिः Ms. No. P. 10060/10

Beginning :

यदज्ञानादिदं भाति यद्ज्ञानाद्विनिवर्तते ।
नमस्तत्सच्चिदानन्दवपुषे परमात्मनेऽपि च ॥
सच्चिदानन्दरूपाय सर्वधीबुद्धिसाक्षिणे ।
नमो वेदान्तवेद्याय गुरुवेऽनन्तरूपिणे ॥

अथाध्यात्म विद्योपदेशविधिं व्याख्यास्यामः ।
मुमुक्षवे श्रद्धधानाय । वीरागाय ।
अत्मलाभात्पर लाभावात् ।

End :

ब्रह्मविद्याज्ञानादपि परमपुरुषार्थं दर्शयति । श्रुति × ज्ञानिद्यानन्तरं मोक्षं प्रदर्शयन्ति । किन्तु मध्ये कार्यान्तरं वारयति । श्रुतिस्मृतिश्च । देहान्ते देवः परं ब्रह्मणा--

Colophon :

— -- — —

49

Sl. No. 37425 अध्यारोपापवादप्रकरणम् Ms. No. P. 7441/13

Beginning

ಅಧ್ಯಾರೋಪಾಪವಾದದಿಂದಲೂ ಪ್ರಪಂಚಾತೀತವಾಗಿ ಇರುವಂಥ ಬ್ರಹ್ಮವನ್ನು ತಿಳಿಯಬೇಕು ಎಂದು ಹೇಳಲ್ಪಟ್ಟಿತು.

ಆ ಅಧ್ಯಾರೋಪವೆನು ಎಂದರೇ ವಸ್ತುವಿನಲ್ಲಿ ಅವಸ್ತುವಿನ ಆರೋಪವು ಅಧ್ಯಾರೋಪವು.

End :

ಬ್ರಹ್ಮಜ್ಞಾನದಿಂದ ದೇಹೇಂದ್ರಿಯಾದಿ × ಬ್ರಹ್ಮಜ್ಞಾನದಿಂದ ಆ ಜ್ಞಾನವು ಅಗುತ್ತೀರಲಿಕ್ಕೆ ಆ ಜ್ಞಾಪನಾರ್ಥವಾದ ಸಕಲ ಅರ್ಥವನ್ನು ನಿವೃತ್ತಿಯು ಆನಂದ ಸ್ವರೂಪವಾದ ಬ್ರಹ್ಮಪ್ರಾಪ್ತಿಯೂ ಆಗುವುದು.

Colophon :

इति श्री अध्यारोपापवादप्रकरणं समाप्तम् ॥

50

Sl. No: 37429 **अनुक्रमोपलब्धिनिरसनसमाधिविधिः** Ms. No. P. 8256/3

Beginning :

अनुक्रमोपलब्धितं ।

शरीरेऽस्मिन् विवत्सायां तत्त्वानां पञ्चविंशतिः ।

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चयते ॥

End:

एतत्समाधिरुपेण स्थितौ क्षणमपि स्वयम् ।

प्रारब्धकर्मनिगलात् मुक्तो भवति नान्यथा ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवत्पादकृतौ अनुक्रमोपलब्धिनिरसनसमाधिविधिः सम्पूर्णम् ॥

51

Sl. No. 37430 **अनुभवपञ्चरत्नम्** Ms. No. P. 6053/6

Beginning :

नाह देहो नेन्द्रियाण्यन्तरङ्गं

नाहङ्कारः प्राणवर्गो न बुद्धिः ।

दारापत्यक्षेत्रवित्तादिदूरः

साक्षी नित्यप्रत्यगात्मा शिवोऽहम् ॥ १ ॥

End :

मत्तो नान्यत्किञ्चिदन्यत्र दृश्यं

सत्यं बाह्यं वस्तु मायावाक्लृप्तः ।

आदर्शे × र्भा समानस्य तुल्यं

मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥ ५ ॥

Colophon :

अनुभवपञ्चरत्नप्रकरणं सम्पूर्णम् ॥

52

Sl. No: 37432 अनुभवामृतम् Ms. No. P. 4619

Beginning :

ध्यात्वा श्रीगुरुपादाब्जे नत्वा गणपतिं यतिः ।
नत्वाम्बां शारदाम्बां च लिखत्यनुभवामृतम् ॥
ब्रह्मैवासावेकवक्त्रो विष्णुर्द्विभुज एष कः ।
अत्रिनेत्रापरुद्रोऽयं वेदव्यासोऽस्तु धीप्रदः ॥
ग्रन्थोऽयं प्राकृत इति नोपेक्ष्यास्त्वार्यकोविदैः॥
वस्तुदर्पणमेत्वेति पश्यतां पण्डितैर्द्विजैः ॥
प्राचीनैः पण्डितैरुक्तं वेदान्तार्थं यतिस्स्वयम् ॥

End :

वर्ततां वर्धतां लोके ग्रन्थोऽयं साधुतत्प्रियः ।
गुरुदेवद्विजातीनां आशिषस्सन्तु सर्वदा ॥

Colophon :

इति श्रीमत्परहंसबालकृष्णब्रह्मानन्दयोगिप्रणीते अनुभवामृतग्रन्थे निर्गुणाराधनकथनं नाम त्रयोदशोऽध्यायः ॥

53

Sl. No. 37433 अनुभवामृतम् Ms. No. P. 1035/3

Beginning :

ವಾಸಮುನಿ ಸುಕಮುನಿಗೆ ವರಸಂತೊಂಪದಿಂದಲಿ
ತತ್ವಭೋಧಿಸಲು ವಿಸ್ತರಿಸಿ ಪೇಳಿದನಾತವಿದರೊಲಿಯೆ ।
ಶ್ರೀಮಂದನುಪಮತೆಜನಾತ್ಮಕಾಮಿತಾರ್ಥದಾಯ
ಸೋಮಶೇಖರ ಸುರಮುನೀಂದ್ರಾರ್ಚಿತಪದಾಂಬುಜ
ನಾಮ × ಯ ಸದಾಶಿವವಾಮ ಬಾಗಾಶ್ರಿತ ಭವಾನಿ
ಪ್ರೇಮಶ್ರೀ ಗಿರಿಮಲ್ಲಿಕಾರ್ಜುನ ಸಲಹುಮಾಜಗವಾ

End :

ಶ್ರೀಮದಾಶ್ರಿತಜನಪ್ರೇಮ ಸುಮುನಿವಂದಿತಾಂಘ್ರಿಮಹ್
ಮಾಮಹಿಮ ಮಧುಸೂಧನಪ್ರಿಯ ಮಾರ–ಸಂಧ್ಯದರ
ಕಾಮಶತಸಾಹಸ್ರಸನ್ನಿಭ ರೊಮಕೂಪಾವಗ್ನಭುನ
ಸೋಮಗಿರಿ ಮಲ್ಲಿಕಾರ್ಜುನಸಲಹ ಮಾಜಗವಾ

Colophon :

इति श्रीमत्परमहंसपरिव्राजकचार्य सहजानन्दगुरुवर्यपादकमलभृङ्गायमान सहवासिमहालिङ्गरङ्गविरचितमप्य अनुभवामृतवेंब ग्रन्थदल्लि जीवान्मुक्तिप्रकरण दशमाश्वासं सम्पूर्णम् ॥

54

Sl. No. 37436 अनुभूतिप्रकाशः Ms. No. P. 6408

Beginning :

ऐतरेयेण संप्रोक्ता द्वितीयारण्यकाण्डगा ।
ब्रह्मविद्यासु विस्पष्टं बालबोधाय वर्ण्यते ॥
आत्मैव सृष्टेः प्रागासीत् नामरूपविवर्जितः ।
सोऽप्येक एव नान्योऽस्ति जडं चान्यन्न विद्यते ॥

End ;

अवाङ्मनसगम्यत्वं उपदेशश्च वेदनम् ।
अविरोधेन तत्सर्वं विस्पष्टमिह वर्णितम् ॥
विद्यातलवकाराणां शाखायां श्रूयते स्फुटम् ।
तद्व्याख्यानेन संतुष्यात् विद्यातीर्थमहेश्वरः ॥

Colophon :

इति अनुभूतिप्रकाशे तलवकारविद्याख्या × अध्यायः ॥

55

Sl. No. 37438 अनुभूतिप्रकाशः Ms. No. P. 1125/4

Beginning :

श्रीरामं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वभूतानां कारणं न नमाम्यहम् ॥
अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सिद्धिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥

End :

मन्दस्मितस्फुरितमुग्धमुखारविन्दं
कन्दर्पकोटिशतसुन्दरदिव्यमूर्तिम् ।

3

End :

आताम्रकोमलजटाघटितेन्दुरेखं
× वटतटीनिलयं दयालुम् ॥

C ophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवत्पादपूज्यविरचितमपरोक्षानुभूतिप्रकरणं समाप्तम् ॥

56

Sl. No. 37440 **अपरोक्षानुभूतिः** **Ms. No. P. 6227**

Beginning :

श्रीगुरुं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तन्नमाम्यहम् ॥
अपरोक्षानुभूतिर्हि प्रोच्यते मोक्षसिद्धरूये ।
सद्भिरेषा प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥

End:

अहमिव जनयोगं सर्वदा वर्जयेद्यः
कुणपमिव वसुनारींत्यक्तरामो विरागः ।
विषमिव विषयान्यो मन्यामनो दुरन्तान्
जयति परमहंसो मुक्तभावं समेति ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादशिष्य भगवच्छङ्कराचार्य विरचिता अपरोक्षानुभूतिस्समाप्ता ॥

57

SI. No: 37441 **अपरोक्षानुभूतिः** **Ms. No. P. 8154/4**

Beginning :

शरदिन्दुविकारमन्दहासं
स्फुरदिन्दीवरलोचनाभिरामम् ।
अरविन्दसमानसुन्दरास्या-
मरविन्दानन सुन्दरि स्थै ॥ (?)

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोक ानां कारणं तंनमाम्यहम् ॥

End :

किञ्चित्पक्वकषायाणां हठयोगेन संयतः ।
परिपक्वमनो येषां केवलोऽयं च सिद्धिदः ॥
गुरुदैवतभक्तानां सर्वेषां सुलभो जगत् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकचार्य श्रीमद्गोविन्द भगवपादशिष्य श्रीमच्छङ्कर-भगवत्पादकृतावपरोक्षनुभवप्रकरणं समाप्तम् ॥

58

Sl. No. 37447 — अपरोक्षानुभूतिः — Ms. No. P-39/2

Beginning :

ಶ್ರೀರಾಮಂ ಲಕ್ಷ್ಮೀದೇವಿಗೆ ಮನೋಹರವಾದ್ದಂಥ. ಪರಮಾನಂದಂ ಅಜ್ಞಾನ ವರ್ಜಿತನಾಗಿ ಸುಖಸ್ವರೂಪನಾಗಿದ್ದಂಥ. ಉಪದೇಷ್ಟಾರಂ- ಸಮಸ್ತವನ್ನು ಉಪದೇಶಮಾಡುವಂಥ.

End :

ಅನುಭವಕ್ಕೆ ತಂದುಕೊಂಡು ಇದ್ದರಾದರೆ ಅನೇಕ ವಾಕ್ಯಗಳು ಮುಟ್ಟಿ ತೀರ್ಥಯಾತ್ರೆ ವ್ರತೋಪೋಷ್ಯಗಳು ದಾನಧರ್ಮ ಚಾಂದ್ರಾಯಣವ ಮಾಡಿದರೆಯೂ ಆಗದೇ ಇದ್ದಂಥ ಮೋಕ್ಷವನು ಪಡೆವರು. ಮನೋವಾಕ್ಯದಲ್ಲೂ ಸಂಶಯಬೇಡ ಎಂದು ಗುರುಗಳು ನಿರೂಪಿಸಿದರು.

Colophon :

इति श्रीपरमहंसापरिव्राजकाचार्य श्रीमच्छङ्करचार्यसद्गुरुविरचितं अपरोक्षानुभूत्याख्यं संपूर्णम् ॥

59

Sl. No. 37452 — अवधूतगीता — Ms. No. A 105/1

Beginning :

दत्तात्रेयगीताप्रारंभः—

गोरक्षकस्य माहात्म्यम् दत्तात्रेयस्य वैभवम् ।
संवादमुभयोश्चैव अद्भुतं ब्रह्मनिर्णयम् ॥

अत्रिश्च भगवान् पूर्वमनपत्यस्तपश्चरन् ।
अनिदंरूपमुद्दिश्य पुत्रार्थं भार्यया सह ॥

End :

न जातोऽहं मृतो वाऽपि न मे कर्म शुभाशुभम् ।
विशुद्धं निर्गुणं ब्रह्म बद्धो मुक्तः कथं भवेत् ॥

Colophon :

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे पञ्चमप्रश्नप्रकरणम् ॥

60

Sl. No: 37453 अवधूतगीतव्याख्या **Ms. No. P. 1319**

Beginning :

× दक्षिणामूर्तये नमः ।
गौरक्षस्य महा ×
× भूतं ब्रह्म निर्णयम् ।
तस्य × दिषे ×

End:

अनेन किमुक्तमिति चेत् अनुभवदोषेनात्मादर्शनागतेनात्मदर्शनागतेन उत्थाहिवंगीता प्रलपितं विद्धि । (?) एवमेव सुखेन तिष्ठस्वेत्यर्थः ।

Colophon:

इति भा × परमानन्दतीर्थविरचितटीकासमेता अवधूतगीता समाप्ता —
त्रें × तृतीयप्रकरणं समाप्तम् ॥
अत्रेः पुत्राय हरये लिखितं त्विदम् ॥

61

Sl. No. 37454 अवधूतगीताव्याख्या **Ms. No. A. 105/2**

Beginning :

अथ दत्तात्रेयसंहितायां कथासन्दर्भः—

संवत्सरशतस्यान्ते ब्रह्मादयस्तस्य वरदानाय आगताः । ततो ब्रह्मनिष्ठं पुत्रं प्रार्थयमास ।

End :

अन्यथा ज्ञानरूपत्वान्मुक्तस्त्वहं ब्रह्मास्मीति निश्चयरूपत्वात्। एवं चेन्मुक्तिः तदुभयमपि नास्त्येवेत्यर्थः ॥

Colophon :

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे पञ्चमप्रकरणम् ॥

62

Sl. No. 37456 अविद्यापिशाचीभञ्जनम् Ms. No. B. 527

Beginning :

यत्तत्त्वं निखिलस्य यत्र निवसत्येतत्समस्तं जगत्
यत्सत्वान्वयतोऽस्य सत्वमिव यद्भासाखिलस्यास्य धीः।
यत्साक्षात्कृतरात्मतत्त्वविषयाज्ञानापहारक्षमा
तत्तेजो हृदि भावयेऽहमभयं श्रीदक्षिणस्यं गुरुम् ॥

End:

"ब्रह्मविदाप्नोति परम्, ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतिसिद्ध ज्ञानफलं विचारितम् ॥
इति ब्रह्मज्ञानफलविचारः पञ्चमं प्रकरणम् ॥

Colophon :

इति श्रीसार्वदेवतार्वभौम श्रीमोक्षसम्राज्याधीश्वर श्रीदक्षिणमूर्तीश्वरचरण-प्रणिधानप्रभावपरिलब्धपरमभाग्यसत्फलभूताद्वैतब्रह्मविद्यामहाधनेन कम्भंपाटि कुलजलधिपूर्णसुधाकरेणामरेश्वरशास्त्रिणा स्वानुभवानुरोधेन विरचितमविद्या पिशाचीभञ्जनसमाख्यं वेदान्तप्रकरणं समाप्तम ॥

63

Sl. No: 37457 अविद्यालक्षणोपपत्तिः Ms. No. C. 1253/1

Beginning :

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥

नन्वविद्यायाः किं लक्षणम्। न तावदनादित्वे सति ज्ञाननिवर्त्यत्वं तत्, सादौ शुक्त्यवच्छिन्नचैतन्यावारकाज्ञानेऽव्याप्त्यापत्तेः।

End :

अविद्यागता शक्तिरप्यविद्यैव । यद्वा ज्ञाननाश्यत्वमित्यनेनज्ञाननाश्य शक्तिमत्त्वं विवक्षितम् । अतो न तत्रातिप्रसङ्ग इति सर्वमनाविलम् ॥

Colophon :

इत्यविद्यालक्षणोपपत्तिः समाप्ता ॥

64

Sl. No. 37458 **अविद्याशब्दार्थः** **Ms. No. P. 2212/2**

Beginning :

छान्दोग्यषष्ठाध्यायनिष्ठस्वाज्ञद्वक्प्रसक्तसजातीयविजातीयस्वगतभेदात्यन्ता-भावाद्येकमेवाद्वयमिति श्रुत्या ब्रह्म भावरूपम् ।

ब्रह्मातिरिक्ताविद्यापदात्कार्यजातमभावरूपम् । न तयोराधारधेयता इति प्रतिपादितम् । तत्रैतच्चिन्त्यम् ॥

End :

भावरूपं ब्रह्म तदतिरिक्तमभावरूपम् । न तयोराधाराधेयतेति निरधिष्ठान ब्रह्ममात्रतयावशिष्यत इति फलितोऽर्थः ॥

Colophon :

— — —

65

Sl. No. 37459 **अविद्यासाधनम्** **Ms. No. C. 759/10**

Beginning :

यदज्ञानसमुद्भूतं जगदेतदनेकधा ।
तन्नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥

नन्वज्ञाने किं प्रमाणम् । न तावदहमज्ञो मामन्यं च न जानामीति प्रत्यक्षम् ॥

End :

पीतं शङ्खःमनुभवतापि परं प्रति शङ्ख श्वेतःइत्येवोपदेशाद् यद्यपि तन्मूल भूतं शङ्खः श्वेत इति ज्ञानं तस्यास्तीति वाच्यम् ।

ननु परोक्षप्रत्ययवत् प्रत्यक्षं कुतो नाङ्गीक्रियत इति चेददर्शनादेव ॥

66

Sl. .No. 37461 अष्टावक्रीयम् Ms. No. C. 2010

Beginning :

मुक्तिमिच्छसि चेत्तात विषयान्विषवत्स्य ।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥

न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान् ।
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥

End :

अष्ट × चात्मविश्रान्तौ जीवन्मुक्तचतुर्दश ।
षट् × ख्याक्रमविज्ञाने ग्रन्थैकत्वमतः परम् ॥

× कमि × खण्डैः श्लकैरात्माग्निमध्यमैः ।
अवधूतानुभूते × श्लोकसंख्याक्रमा अमी ॥

Colophon .

इत्यष्टा × श्लो × संख्याप्रकरणम् ॥
अष्टावक्रींयावधूतानुभ × ॥

67

Sl. No. 37463 अष्टावक्रीयम् Ms. No. B. 151/1

Beginning :

ज्ञानज्ञेयात्मकं सर्वं जगदेतच्चराचरम् ।
ज्ञानं ब्रह्मेति निश्चित्य ज्ञेया मायेति निश्चिनु ॥

End :

इदं प्रकरणं नित्यं अनुसंदधते बुधाः ।
अनायासेन मर्त्यत्वं हित्वा यान्ति परां गतिम् ॥

Colophon :

— — —

68

Sl. No. 37467 अष्टावक्रीयम् Ms. No. B. 125/2

Beginning:

अवस्थात्रयनिर्मुक्तमवस्थात्रयसाक्षिणम् ।
तं वन्दे परमानन्दं प्रत्यक्चैतन्यरूपिणम् ॥
प्रणम्य स्वगुरुं भक्त्या श्रीनृसिंहाख्ययोगिनम् ।
असङ्गात्मप्रकरणं व्याकुर्वे बोधसिद्धये ॥

चिकीर्षितस्य ग्रन्थस्य अविघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय च ब्रह्मपदेनेष्टगुरुदेवतानमस्कारलक्षणम् मङ्गलमाचरन् ग्रन्थारम्भं प्रतिजानीते—

End:

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥

इति भगवद्वचनाच्च ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमन्नृसिंहभारतीतीर्थशिष्येण श्रीमच्छंकरभारतीतीर्थेन विरचितमसङ्गात्मप्रकरणं समाप्तमगमत् ॥

69

Sl. No. 37468 अहमर्थनिर्णयः Ms. No. C. 2550/6

Beginning:

× कारोऽपि तस्यापि स्वकारणे लीनत्वेन तदानीं सकलविशेष प्रतिभासाभासात् तत्प्रतिभाने च सुषुप्तिभङ्गप्रसङ्गात् । अतः तस्यामवस्थायां सुषुप्तेः प्रकाशकं अहङ्कारविनिर्मुक्त—

End:

शब्दान्वयव्यतिरेकानुविधायित्वात् इत्याशङ्क्य, केवलव्यतिरेक-लाभात् चिदात्मैवाहंशब्दः इति प्रतिपादयति, सुषुप्तोऽस्मीत्यादिना । एतावन्तं कालं अहं सुषुप्तो ×

Colophon:

— — —

70

Sl. No. 37470 अत्मतत्त्वपरीक्षा Ms. No. P. 3957

Beginning :

ब्रह्मविद्याफलमाविद्यकशरीरेन्द्रियाद्युपाधिवि × × राहित्यरूपं च मोक्षं निरूपयितुमाम्नायते । यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नः रसघन एवै × ह्यः कृत्स्न प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति ।

End ;

कोऽसौ त्वदुक्तार्थज्ञाने विशेष इति शक्तितात्पर्यावधारणप्रयोज्या शाब्दत्वजातिरेव तत्र विशेष इत्यवैहि । तथा च त्वदुक्तार्थं न जानामीत्यस्य शब्दतस्त्वदु × ॥

Colophon :

— — —

71

Sl. No. 37471 अत्मतत्त्वविवेकः Ms. No. C. 4487

Beginning :

यँ ये विद्या जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः ।
ज्योतिःपरस्मिन् युञ्जनास्तस्मै विद्यात्मने नमः ॥

अथ आत्मानात्मविवकः कथ्यते—आत्मा नाम स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः अवस्थात्रयसाक्षी पञ्चकोशविलक्षणः ×

End :

इत्यादिवचनाच्चायमर्थोवसीयते । ओं नमोब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो × ऋषिद्भ्यो नमो महभ्यो नमो गुरुभ्यः सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थोव × वाहमस्मि ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्स्वयंप्रकाशयोगीन्द्रकृत आत्मतत्त्वविवेकः समाप्तः ॥

72

Sl. No. 37473 आत्मत विवेकसारः Ms. No. P. 4168

Beginning :

आधारं जगतामनन्तममलं ब्रह्मैकयोनिं गुरुः
विष्णुब्रह्मशिवादिनामविषयं विज्ञान्तकं संस्मृतेः ।
नत्वा बुद्धिविशुद्धये मुहुरहं वक्ष्ये मुमुक्षोरिमं
ग्रन्थं ¹वात्मविवेकसारसमय श्रीदेशिकस्येक्षणात् ॥

End :

स बु निर्मत्सरी चेदुन्मत्त एव न संशयः ।
नवित्पत्येदमु × गुणी तुष्यतु मातृवत् ॥
बालोक्तदूषणं कोऽपि विधं शक्यं प्रभाषितुम् ।
सारज्ञः सारमादत्ते सारङ्ग इव सर्वतः ।
¹गुरोर्दक्षिणामूर्ते × समर्पितम् ॥

Colophon :

पञ्चदशवर्णात्मविवेकसाराख्यो ग्रन्थः समाप्तः ॥

73

Sl. No. 37475 अत्मदीपिका Ms. No .C. 3717/5

Beginning :

परम्परं स्यात्प्रकृतेरनादिं
एकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थ
त्वामेव विष्णुं शरणं प्रपद्ये ॥

End :

त्रिगुणाचैतन्यात्म-र्दव
निस्थितेऽखिलाधारे ।
कुरुते सृष्टिमविद्या सर्वत्र
स्पृश्यते तया नात्मा ॥

Colophon :

— — —

74

Sl. .No. 37476 अत्मनिर्वेदः Ms. No. . 5779/22

Beginning :

एतस्मात् किमुतेन्द्रजालमपरं यद्गर्भवासस्थितं
रेतश्चेततिहस्तमस्तकपदप्रोद्भिन्नरोमांकुरम् ।
पर्यायेण शिशुत्वया × न चरा वैषैरनेकैर्वत
पश्यत्यन्ते शृणोति जिघ्रति तथा गच्छत्यथागच्छति ॥

End :

संघाते महदादिभिः सह वसन् तस्मात्परः पूरुषः
स्वात्मानां सुखदुःखमोहकलितं मिथ्यैव धीर्जन्यते ।
दाता भोगपरः समग्रविभवो यः शासितां दुष्कृतां
राजस्तत्वमसीति मातृमुखतः श्रुत्वा यदा वत्सतु ॥

Colophon .

— — —

75

Sl. No. 37477 आत्मपुराणम् Ms No. B. 357

Beginning :

शिष्यो गुरुमुखात् श्रुत्वा ब्रह्माहमिति वेदनम् ।
संसारशूलसन्तापनाशनं ह्यदि कारिणम् ॥
अधिकारस्य दौर्लभ्यं दृष्ट्वा प्रायः शरीरिणाम् ।
कृपया परयाविष्टः पुनरित्थमभाषत ॥

End :

ब्रह्मादीनां नामजातं साम प्रोक्तं मनीषिभिः ।
प्रत्येकमक्षराणां हि गोपस्तुतिरथापि वा ॥
सम्प्रसादा हि शरणमक्षराणां तु सामसु ।
× न्यानि समानि महाचक्रस्थितान्यपि ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यनन्दात्मपूज्यपादशिष्येण श्रीशङ्करानन्द भगवता विरचिते उपनिषद्रत्ने तापनीयोपनिषदुक्त उपासनाभागे त्रयस्त्रिंशति तमोऽध्यायः ॥

76

Sl. No. 37478 आत्मबोधः Ms. No. P. 157/1

Beginning:

श्रुतिस्मृतिपुराणानामालयं + लोकशङ्करम् ॥

तपोभिः क्षीणपापनां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्षोयमात्मबोधो विधीयते ॥
बोधोन्यः साधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवद्ज्ञानं विना मोक्षो न सिद्ध्यति ॥

End :

हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोऽपहृत् ।
सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशते ॥

दिग्देशकालाद्यनपेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित् सर्वगतोऽमृतोऽभवेत् ॥

Colophon :

इति श्रीपरमहंस परिव्राजकाचार्य श्रीमच्छङ्करभगवत्पाद विरचितं आत्मबोधप्रकरणं सम्पूर्णम् ॥

77

Sl. No. 37483 आत्मबोधः Ms. No. P. 1125/1

Beginning :

दिने दिने तु वेदान्तश्रवणे भक्तिसंयुतः ।
गुरुशुश्रूषया लब्ध कृच्छ्राशीतिफलं लभेत् ॥

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥

End:

दिग्देशकालाद्यनपेक्षसर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम् ।
यस्त्वात्मतीर्थं भजते विनिष्क्रियः
स सर्वगः सर्वगतोऽमृतो भवेत् ॥

Colophon :

इत्यात्मबोधप्रकरणम् सम्पूर्णम् ॥

78

Sl. No. 37498 अत्मबोधः Ms. No: P. 10060/3

Beginning :

शङ्कराचार्य उवाच —
कस्त्वं शिशो कस्य कुतोऽसि गन्ता
किं नाम ते त्वं कुत आगतोऽसि ।
एतन्मयोक्तं वद चार्भक त्वं
मत्प्रीतये प्रीतिविवर्धनोऽसि ॥

End :

उपाधौ यथा भेदता सन्मणीनां
तथा भेदता बुद्धि भ × ।
यथा चन्द्रिकाणां जले चञ्चलत्वं
तथा चञ्चलत्वं तवापीह विष्णो ॥

Colophon :

— — —

79

Sl. No. 37429 अत्मबोधः Ms. No. · 10060/5

Beginning

वागीशो यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदयं संवित्तं नृसिंहमहं भजे ॥

श्रोतव्यः श्रुतिवाक्येन मन्तव्यश्चोपपत्तिभिः ।
आत्मा च सततं ध्येय इति दर्शनहेतवः ॥

End :

दिग्देशकालाद्यनपेक्ष सर्वगं
शान्तादिहन्नित्यसुखं निरञ्जनम् ।
स्नात्वा तु तीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥

Colophon :

इति श्रीशङ्कराचार्य विरचितं आत्मबोधप्रकरणं सम्पूर्णम् ॥

४०

Sl. No: 37508 आत्मबोधः **Ms. No. C. 4697/1**

Beginning :

वन्दे श्रीशङ्करं देवं गौर्या सहितमीश्वरम् ।
भक्तप्रियं चन्द्रमौलिं भक्तामीष्टप्रदं शिवम् ॥

तस्य प्रसादं सम्पाद्य सदा ध्यानैकनिष्ठया ।
संसारभ्रमनाशाय ज्ञानस्य साधनाय च ॥
आत्मबोधश्च क्रियते मुमुक्षोर्मुक्तिसिद्धये ॥

End:

इदं रहस्यं परमं गुह्यं मुक्तिप्रदायकम् ।
पठतां शृण्वतां चापि मूलाज्ञानविनाशनम् ॥
ज्ञानप्रदं कल्मषघ्नं मायामोहविनाशनम् ।
कृतं शिवप्रसादेन सर्वमस्तु शिवार्पणम् ॥

Colophon:

परमहंसपरिव्राजरचितोयं यथामति ।
इत्यात्मबोधसंज्ञोऽयं पूर्णः ईशप्रसादतः ॥

81

Sl. No. 375 10 आत्मबोधः Ms. No. P. 925/2

Beginning :

तत्र भगवान् शंकराचार्यः उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनां अनुग्रहार्थं सर्ववेदान्तसारसंग्रहामात्मबो धाख्यं प्रकरणं प्रतिपिपादयिषुः प्रतिजानीते । तपोभिरिति ॥

End :

पञ्च प्राणेति । पञ्च प्राणाः एकस्यैव महाप्राणस्य प्राणादयो वृत्तयः ज्ञानेन्द्रियकर्मेन्द्रियभेदेन इन्द्रियाणि दश । मनःशब्देन सङ्कल्पविकल्पात्मकान्त करणवृत्तिः बुद्धिश्च निश्चयात्मा । एतैः संयुक्तमपञ्चीकृतसूक्ष्मभूतेभ्य उत्थ जातम् ॥

Colophon :

— — — —

82

Sl. No. 37516 आत्मबोधः Ms. No. P. 8838/1

Beginning :

तत्र भगवान् शङ्कराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय सदवलोकानासमर्थानां मन्दबुद्धीनामात्मानुग्रहार्थं वेदान्तसिद्धान्तसंग्रहसाधन-मात्मबोधाख्यं प्रकरणं दर्शयिषुः प्रतिजानीते तपोभिरिति ।

End :

अमृतः मुक्तौ × भूतं स्वात्म × दिग्देशकालाद्यनपेक्ष्यैव सर्वगं सत् शीतादिभेददुःखानि हरतीति शीतादिहृत् नित्यसुखं परमानन्द हेतुत्वादत एव निरुत्तमं इतरतीर्थेषु तद्वैपरीत्यं द्रष्टव्यम् । तस्मादात्मतीर्थे रतस्य न किंचिदवशिष्यत इत्यर्थः ॥

Colophon :

इति श्री परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यशिष्य श्रीपद्मपादाचार्येण कृतं वेदान्तसारसं नाम व्याख्यानं समाप्तम् ॥

83

Sl. No. 37520 आत्मबोधव्याख्या Ms. No. C. 2520/2b

Beginning :

शतमखपूजितपादं शतपथमनसोप्यगोचराकारम् ।
विकसितजलजसुनेत्रं सीताछायांकमाश्रये रामम् ॥

इह भगवांच्छङ्कराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयम् निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्तसिद्धान्तसंग्रहमात्मबोध-प्रकरणादि दर्शयिषुः प्रतिजानीते तपोभिरिति ।

End :

यो विनिष्क्रियः परमहंसः स्वात्मतीर्थं भजते ।
सर्ववित्सर्वज्ञः सर्वत्रगतः परमात्मस्वरूपत्वात् ॥
तस्य न किञ्चिदविशिष्यत इति भावः ॥

Colophon :

— — — —

84

Sl. No. 37522 अत्मबोधव्याख्या Ms. No. P. 1539/2

Beginning :

अत्र नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्क-सम्पत्तिः मुमुक्षुत्वं चेति प्रसिद्धम् तपोभिः क्षीणापापानामित्यादिविशेषण चतुष्टयेन बोधितं यत्साधनचतुष्टयं तत्सम्पन्नानामात्मबोधो विधीयते विधिमुखेन प्रतिपाद्यत इति तात्पर्यार्थः ॥

End :

प्रादेशिका मरणधर्माश्च भवन्ति एतत्स्नायी तु तद्विपरीत इति आत्म-तीर्थस्य बाह्यतिर्थस्य च बैलक्षण्यमवसेयम् ।

Colophon :

इति श्रीमत्मपहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादाचार्यशिष्य शङ्कर भगवत्पूज्यपादाचार्य विरचितं सव्याख्यानमात्मबोधप्रकरणम् ॥

85

Sl. No. 37523 अत्मबोधव्याख्या Ms. No. P. 8154/86

Beginning :

कृछ्चान्द्रायणनित्यनैमितिकाद्यनुष्ठानरूपैः तपोभिः क्षीणानि पापानि रागाद्यन्तःकरणदोषाः येषां एवं कुर्वाणो दुरितक्षयादिति वचनात् ॥

End :

नित्यशुद्धविमुक्तेन सत्येकमखण्डानन्दद्वितीयाभावादद्वयं यद्वस्तु × × स्वरूपतत्वं कथितम् । पूर्वश्लोकमात्मज्ञानचिरकालज्ञानात्यस्तं तत्पुरुषार्थं कथं साधयतीत्याह । × × एवमुक्तप्रकारेण ब्रह्मैवाहमस्मीति वासना । अविद्याकृत × ॥

Colophon :

— — —

86

Sl. No. 37524 अत्मबोधव्याख्या Ms. No. • 8845/2

Beginning

अकरणमनिरूपं वन्धमोक्षादिदूरम्
निखिलनिगमवेद्यं नित्यमाद्यन्तशून्यम् ।
निरवधिनिजभासा भासमानं महोहः
विभुमिमनदनन्तं सोहमर्घं प्रपन्नः ॥

ತಪೋಭಿಃ—ನಿತ್ಯನೈಮಿತಕಕರ್ಮಾಂಗಲಿಂದ
ಕ್ಷೀಣಪಾಪಾನಾಂ....ಹೋಗಲುಪಟ್ಟ ಪಾಪಗಳಂಥ ।

End :

ನಿವಾಸ ಸ್ಥಾನದಲ್ಲಿಯು ದೀನವಂತ ನಿಶ್ಚಲವಾಗಿಹಹು ಎಂದು ಅನುಭವಿಗ ಸಿದ್ಧಾಂತವು. ಶುಕ್ಲ ಭಾವರೂಪಾಶ್ರಯವಾದ ಸೂರ್ಯಪ್ರಕಾಶದಿಂದಲು ವಿಲಕ್ಷಣ ವಾದ ಬ್ರಹ್ಮಪ್ರಕಾಶವನ್ನು ಉಪದೇಶಾಭ್ಯಾಸದಿಂದ ತಿಳಿವದು ಎಂದು ಸರ್ವಮತ ದಾತಂ ।

Colophon .

ಇತಿ ಶ್ರೀಮತ್ಪರಮಹಂಸ ಪರಿವ್ರಾಜಕಾಚಾರ್ಯವರ್ಯ ಶ್ರೀ ಗೋವಿಂದ ಭಗವತ್ಪೂಜ್ಯಪಾದರ ಶಿಷ್ಯರಾದ ಶಂಕರಾಚಾರ್ಯರಿಂದ ಲೋಕಾನುಗ್ರಹಾರ್ಥವಾಗಿ ನಿರ್ಮಿತವಾದ ಆತ್ಮಬೋಧಾ ಪ್ರಕರಣಕ್ಕೆ ವ್ಯಾಖ್ಯಾನವು ಅದ್ವೈತ ಬ್ರಹ್ಮವಿದೆಯು ಸಂಪೂರ್ಣವು.

87

Sl. No. 37525 आत्मबोधटीका Ms No. P. 9696/2

Beginning :

वन्दे वरप्रदमहं वरवारणेन्द्र-
वक्त्रं सदा क्षितिभृदीश्वरजातनूजम् ।
विघ्नेश्वरं विबुधवन्दितपादपद्मं
संसारसम्भवभयापहमानतानाम् ॥ १ ॥

× क्षीणपापानां शान्तानां विरागिणां मुमुक्षूणां अपेक्ष्य आत्मबोधाख्यं प्रकरणं दिदर्शयिषुः परमकृपालुराचार्यः प्रतिजानीते—तपोभिरिति । ×

End :

× इदं तु निरुक्तमं यस्मादिति बाध्यतीर्थस्नायिनस्तु क्षेत्रादिपिण्डादि क्रियापेक्षा विद्यते । एतत्स्नायिनस्तु नास्ति । बाध्यतीर्थस्नायी तु किञ्चिज्ञः प्रादेशिको मरणधर्मा च भवति । एतत्स्नायी तु तद्विपूरीत इति बाध्यतीर्थस्य वैलक्षण्यमवसेयम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य गोविन्दभगवत्पूज्यपादशिष्यशङ्कर भगवत्पादविरचितात्मबोधप्रकरणटीका समप्ता ॥

88

Sl. No. 37527 अत्मबोधार्या Ms. No. C. 4286/1

Beginning :

श्री गुरुचरणद्वन्द्वं वन्देऽहं मथितदुःसहद्वन्द्वम् ।
भ्रान्तिग्रहोषिशान्तिं पांसुमयं यस्य भसितमातनुते ॥

End :

अज्ञानान्ध्यविहन्ता विरचितविज्ञानपङ्कजोल्लासः ।
मानसगगनतलं मे श्रीनिवासगुरुभानुः ॥

Colophon :

इति श्रीमत्पमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यकृतं (?)

89

Sl.No. 37528 अत्मबोधव्याख्या Ms. No. C. 4286/2

Beginning :

प्रचण्डपाखण्डविखण्डनोद्यतं
त्रयीशिरोऽर्थप्रतिपादने रतम् ।
बुधैर्नुतं योगकलाभिराद्दतं
नमामि तं शङ्करदेशिकं नुतम् ॥

इह सकलशिष्टाग्रणीर्भगवान् शङ्कराचार्यः जिज्ञासुजनानुकम्पया +

End :

एतावता गुरुदेवतयोरैक्यभावनमेव आत्मप्रकाशसाधनमिति प्रतिपादितं भवति ।

चैतन्यद्युतिरुचिरां गोदूरनिरस्तश्यामतासङ्गः ।
हृदयसरोजे भ्रामति भ्रमरो विलक्षणः कचित् ॥

Colophon :

इति श्रीसच्चिदानन्दसरस्वतीविरचिता आचार्यार्था याख्या समाप्ता ॥

90

Sl. No. 37529 अत्मलिङ्गार्चनम् Ms. No. B. 951/1

Beginning:

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥
निर्मलस्य कुतः स्नानं वासो विश्वोदरस्य च ।
अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ॥

End :

एवं वेदान्तकल्पोक्तस्वात्मलिङ्गप्रपूजनम् ।
कुर्वन्नामरणं वापि क्षणं वा सुसमाहितः ॥

सर्वदुर्वासनाचेलं पदपांसुमुपत्यजेत् ।
विधूयाज्ञानदुःखौघं मोक्षानन्दं समश्नुते ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचितं वेदान्तकल्पोक्तमात्मलिङ्गार्चनविधि-प्रकरणं सम्पूर्णम् ॥

91

Sl. No. 37530 अत्मविद्याविलासः **Ms. No. . 2347/13**

Beginning :

चिन्मुद्रितकरकमलं चिन्तितभक्तेष्टदं विमलम् ।
गुरुवरमाद्यं कञ्चन निरवधिकानन्दनिर्भरं वन्दे ॥
वटतरुनिकटनिवासं पटुतरविज्ञानमुद्रितकराब्जम् ।
कञ्चन देशिकमाद्यं कैवल्यानन्दकन्दळं वन्दे ॥ +
+ श्रीदेशिकपरमशिवादेशवशोद्बुद्धमहिमाहम् ।
स्वात्मनि विश्रान्तिकृते सरसं प्रस्तौ ञ्चिदिदम् ॥

End :

निरवद्याभिरवोचं निगमशिरस्तत्वसारभूतार्थम् ।
गदितमिदमात्मविद्याविलामनुवासरसं × न्विबुधः ॥
परिणतपरमार्थनिधिः प्र × सूते सपदि परमा । ×

Colophon :

आत्मविद्याबिलासं पूर्णम् ॥

92

SI. No. 375532 आत्मविद्याविलासः **Ms. No. B. 287/1**

Beginning :

वटतरुनिरुटनिवासं पटुतरविज्ञानमुद्रितकराब्जम् ।
कञ्चन देशिकमाद्यं कैवल्यानन्दकन्दलं वन्दे ॥
निरवधिसंसृतिनीरधिनिपतितजनकारणस्फुरंनौकम् ।
परमतभेदनघुटिकां परमशिवेन्द्रस्य पादुकां नौमि ॥

End :

गदितमिममात्मविद्याविलासमनुवासरं स्मरन्विबुधः ।
परिणतपरात्मविद्यः प्रपद्यते सपदि परमार्थम् ॥
परमशिवेन्द्रश्रीगुरुशिष्येणेत्थं सदाशिवेन्द्रेण ।
रचितेयमात्मविद्याविलासनामा कृतिः पूर्णा ॥

Colophon :

आत्मविद्याविलासः सम्पूर्णः ॥

93

Sl. No. 37537 आत्मलिङ्गार्चनम् Ms. No. B 297/2

Beginning :

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥
आत्मविद्याविलासस्य टीकां कर्णाटकां शुभाम् ।
श्रीराजयोगिशेषाद्रिशास्त्रिणा तां वितन्वते ॥

ಟೀಕಾ–ಶ್ರೀಸದಾಶಿವಬ್ರಹ್ಮೇಂದ್ರರ ಆತ್ಮವಿದ್ಯಾವಿಲಾಸವೆಂಬ ಗ್ರಂಥವಮಾಡುವಲ್ಲಿ ಪ್ರಥತಃ ಜಗದ್ಗುರುವಾದಂಥ ಶ್ರೀಗುರುದಕ್ಷಿಣಾಮೂರ್ತಿಯನ್ನು ನಮಸ್ಕಾರ ಪೂರ್ವಕವಾಗಿ ಪ್ರಾರ್ಥನೆ ಮಾಡುವ ಪ್ರಕಾರ ।

End :

टी–परमशिवेन्द्रश्रीगुरुशिष्येण – ಪರಮಶಿವೇಂದ್ರರೆಂಬ ಗುರುಗಳ ಶಿಷ್ಯ. ನಾದಂತ ಸದಾಶಿವೇಂದ್ರಣ ಸದಾಶಿವಬ್ರಹ್ಮೇಂದ್ರ, इत्थं – ಈ ಪ್ರಕಾರದಲ್ಲಿ ರಚಿತವಿರಚಿತ ಹೇಳಲ್ಪಟ್ಟು, इयमात्मविद्याविलासनाम कृतिः– ಈ ಆತ್ಮವಿದ್ಯಾ ವಿಲಾಸವೆಂಬ ಹೆಸರುಳ್ಳಂಥ, कृतिः– ಗ್ರಂಥವು, पूर्णः– ಸಂಪೂರ್ಣ. ವಾಯಿತು ಎಂಬ ತಾತ್ಪರ್ಯವು.

Colophon :

आत्मविद्याविलासः सम्पूर्णः ॥

94

Sl. No: 37539 आत्मलिङ्गार्चनम् Ms. No. P. 2737

Beginning :

तरुणतपनवर्णं कर्णलीलावधूतं
भ्रमरनिवहगुञ्जावर्णनोद्घातहर्षम् ।

अमरवरकिरीटस्योष्णपादाब्जमन्तः
स्फुरतु दलितविघ्नं दन्तिवक्त्रं × नः ॥

End :

अभिनहनं बन्धनं पण्डितो वात्यर्थावधारणकुशलो मेधावी ऊहापोह-कुशल इति शिष्यप्रज्ञावश्यकत्वं द्रढयति × त्रगन्धारप्रतिपत्तिदार्ष्टान्तिकत्वेनात्मवेदनं निर्दिशन्ती श्रुतिः विस्मृतकण्ठचामीकरन्यायेनात्मनो ज्ञानमेव-लाभो नान्य × इति ज्ञानलाभ एव आत्मसाम्राज्यलाभ इति सिद्धम् ।

विधूय विमतध्वान्तमान्तरे परिशेषिते ।
प्रतीचि जगदध्यासादध्यारोपोऽत्र दर्शितः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्रामचन्द्रसरस्वतीपूज्यपाद शिष्येण गङ्गाधरसरस्वत्याख्यभिक्षुणा विरचितायां आत्मसाम्राज्यसिद्धिव्याख्यायां कैवल्यकल्पद्रुमाख्यायां अध्यारोपप्रकरणाख्यं पूर्वार्धं सम्पूर्णम् ॥

९५

Sl. No.37540 **आत्मानात्मविवेकः** Ms. No. P. 492/3

Beginning :

तपोभिः क्षीणपापानां नराणां शुद्धचेतसाम् ।
विरक्तानां मुमुक्षूणां शास्त्रार्थानवगाहिनाम् ॥
आत्मानात्मविवेकोऽयं कथ्यते मुक्तिसाधनम् ।
आत्मा चेतनरूपोऽयं अनात्मा जडमेव यत् ॥

End :

निर्विकल्पो निराधारो निराकारोऽहमेव हि ।
ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ॥
अशक्नुवन् भावयितुं वाक्यमेतत्समुच्चरेत् ।
तस्यापि जायते ज्ञानं आत्मानात्मविभेदकम् ॥

Colophon .

इति आत्मानात्मविवेकः समाप्तः ॥

96

Sl. No. 37542 आत्मानात्मविवेकः Ms. No. P 1 ::

Beginning :

ब्रह्मानन्दं परमसुखदं केवलज्ञानमूर्त्ति

विश्वातीतं गगनसदृशं तत्त्वमस्यादिगम्यम् ।

एकं नित्यं विमलममलं सर्वधीसाक्षिभूतं

भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

End :

तितिक्षा नाम शीतोष्णादिद्वन्द्वसहिष्णुता । अपराधसोढृत्वं च । समाधानं नाम निरूपणभेदेन निगृहीतं मनः अनादि सनया विषये गच्छति । अस्मिन् विषये दोषदृष्टिं कृत्वा पुनः पुनः समाधिः । श्रद्धा नाम गुरवेदान्त षा ×

Colophon :

— — —

97

Sl. No: 37543 आत्मानात्मविवेकः Ms. No. P. 2035/9

Beginning :

देहेन्द्रियादेरनात्मन आत्मनश्च वैलक्षण्यं निरूप्यते–देहेन्द्रियादिकमनित्यम् । आत्मा नित्यः ; देहेन्द्रियादिकमशुद्धम्ः आत्मा बोधस्वरूपः + आत्मा एकरूपः ॥

End:

एवं देहेन्द्रियाद्योरात्मवैलक्षण्यं विचार्य स एवात्माहमिति यो जानाति स एव जीवन्मुक्तः इति सर्वं रमणीयम् ॥

Colophon:

इत्यात्मानात्मवैलक्षण्यप्रकरणं समाप्तम् ॥

९४

Sl. No. 37545 आत्मानात्मविवेकः Ms. No. P. 5779/42

Beginning :

यस्य स्मरणमात्रेण क्षीयन्ते भवभीतयः ।
तं सर्वसाक्षिणं यामि शरणं कृपणो ह्ययम् ॥

अत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः अवस्थात्रयस्य साक्षी नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दरूपः ॥ आनात्मा स्थूलसूक्ष्मकारणशरीरी ॥

End :

एतत्सर्वं विविच्य यो जानाति स तु नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दस्वरूपो भवति × तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि इति भगवद्वचनात् ॥

Colophon :

इत्यात्मानात्मविवेकः समाप्तः ॥

९९

Sl. No. 37546 आत्मानात्मविवेकः Ms. No. P. 6228

Beginning :

आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः । अवस्थात्रयस्य कथमात्मैव बाह्येन्द्रिय सापेक्षत्वेन जाग्रदवस्थां वेत्ति । स्वप्नमन्तःकरणवृत्तिद्वारा वेत्ति । सुषुप्तिमन्यनिरपेक्षतया वेत्ति ।

End :

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥
इति श्रुतिस्मृतिपुराणेभ्योयमर्थोत्रसायते ।
नमो ब्रह्मविद्भ्यो नमो ब्रह्मविद्भ्यः ॥

ब्रह्मविद्यापरं नास्ति न भूतं न भविष्यति न भूतं न भविष्यति इति श्रुतेः ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचित आत्मानात्मविवेकः समाप्तः ॥

100

Sl. No. 37552 आत्मानात्मविवेकव्याख्या Ms. No: P. 8714/27d

Beginning :

अस्यार्थः ॥ द्वादशान्तस्थले । द्वादशान्तानां ज्ञानेन्द्रियाणि पञ्च । कर्मेन्द्रियाणि पञ्च । अन्तःकरणमेकं प्राणाः एक सर्वे मिलित्वा साङ्ख्ययोगानुसारिणां वेदान्तानां द्वादशसंख्याकानि स्थलानि भवन्ति ।

End :

द्वादशांगुलस्यादुपरि उपाधिरहिते उपादाकारो चित्तवृत्तिं कृत्वा महदाकाशवत् व्यापकत्वमपि प्राप्य तत्प्रवृत्तीन् मान्यत्वमेव चतुर्थलभ्यम् ॥ एते चतुरो मार्गान् सम्यग्ज्ञात्वा यस्मिन्मार्गे स्वस्य मनो रमते ॥

सूतसंहि तायां—

धातुवादे च विद्याख्ये कौलिके पथि ।

दासीपिण्डे च पुत्राशा तिस्रोह्याशा निरर्थकाः ॥

Colophon :

— — —

101

Sl. No: 37553 अत्मानुचिन्तनम् Ms. No: P. 2466/1

Beginning :

देहो गुरुर्मम त्रिरक्तिविशेषहेतुः

विभृकस (?) सत्वनिधनं सततात्युदर्कम् ।

तत्वान्यनेन विमृशामि यथातथापि

पारक्यमित्यवसितो विचराम्यसङ्गः ॥

End :

जिह्वैकतोमुमपकर्षति कर्हि × ष्या

शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।

घ्राणोऽन्यतश्चपलदृक्क च कर्मशक्ति

र्बह्वयस्सपत्न्य इव गेहपतिं लुनन्ति ॥

Colophon :

— —

102

Sl. No. 37554 अत्मानुभवः Ms. No. C. 4693/4

Beginning :

श्रीशम्भुं सच्चिदानन्दं पञ्चवक्त्रं त्रिलोचनम् ।
दशहस्तं नीलकण्ठं चन्द्रमौलिं जगद्गुरुम् ॥ +

ज्ञानेच्छोर्ज्ञानसिध्यर्थं मुमुक्षोर्मोक्षसिद्धये ।
अथात्मानुभवग्रन्थं कुर्वे विबुधहर्षदे ॥

End:

उमेशमन्दिरस्थेन मौनिना च यथामति ।
परमहंसपरिव्राजस्वामिता कृत उत्तमः ॥

आत्मानुभवग्रन्थस्स्यात् पूर्णः शिवप्रसादतः ।
शिवप्रसादादुत्पन्नं सर्वमस्तु शिवार्पणम् ॥

Colophon :

इत्यात्मानुभवग्रन्थः समाप्तः ॥

103

Sl. No. 37555 अत्मानुभवस्तुतिः Ms. No. P. 246/5

Beginning :

त्वदन्यं नापश्यं परममकुटादिव कनका-
दभिन्नं यत्सर्वं विविधमिव भाति त्वयि सति ।
अस्त्येस्वारूपं विविधमपि नामामतद्दशा
चिदानन्दं तु त्वामवसमहमात्मेत्यनुभवन् ॥

End :

सदेवाग्रे सृष्टेर्विदधतु रूपादि विकृतं
स तस्य ज्ञानाद्भिदितमिति हेमाद्युपमया ।
श्रुतं तस्मात्तत्त्वं पदविहनलक्ष्यार्थघटितात्
परात्स्यैक्यज्ञानात् सद × स्मीत्यनुभवन् ॥

Colophon :

— — —

104

Sl. No. 37556 **अत्मानुभवस्तुतिः** Ms. No. A. 86/7

Beginning :

कारणं स्वादिजगतां मारणार्थमनागसम् ।
वारणाननमात्मानमद्वयं समुपास्महे ॥
परापश्यन्त्यादिदेहां प्रणताभीष्टदायिनीम् ।
सत्यज्ञानानन्दरूपां ध्यायेऽनन्यां सरस्वतीम् ॥
अभिषिच्य कृपावर्षैरात्मानं यः करोति माम् ।
तं सर्वसाक्षिणं वन्दे वासुदेवं जगद्गुरुम् ॥
दृश्यं सर्वमनात्मा स्यात् दृगेवात्माविकारिणी ।
आत्मानात्मविकारोऽयं कथितो ग्रन्थकोटिभिः ॥

End :

साक्षिस्थाः सच्चिदानन्दाः समन्ताद्व्यावहारिके ।
तद्द्वारेणानुगच्छन्ति तथैव प्रातिभासिके ॥
लये फेनस्य तद्धर्माः द्रवाद्यास्तु तरङ्गके ।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा ॥
प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ॥

Colophon :

इत्यात्मानुभवस्तुतिः समाप्ता ॥

105

Sl. No. 37563 **अम्नायपञ्चकम्** Ms. No. · 5779/28

Beginning

मूलेन व्यापकन्यासं कृत्वा प्राणायामं समाचरेत् ।
आपान्तर्यागविधिः मूलादिब्रह्मरध्रान्तन्तुतनीयसी ॥ (?)
उद्यत्कोटीउद्यत्सूर्यप्रभाजालविद्युत्कोटिप्रभामयीम् ।
रुद्रकोटिप्रभाधीवस्त्रैलोक्यैकप्रभामयीम् ॥

End :

किं जातिस्तव भानु × नहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदिवदर्शनविधौ किं ज्योतिराख्याहि मे ।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो ॥

Colophon :

— — —

106

Sl. No: 3765 आर्यास्वात्मानिरूपणम् Ms. No. P. 19(8/4

Beginning :

यस्य प्रसादादात्महसा वीतरागतमोमलः ।
स्वरूपबोधं संप्राप्तः तं गुरुं प्रणतोऽस्म्यहम् ॥

प्रसादादुरुपर्यस्य + प्रणतोऽस्म्यहम् ॥
यदज्ञानादिदं भाति + तस्मै ज्ञानात्मने नमः ॥

इहामुत्र च निर्विण्णो वीतसंसरविभ्रमः ।
मुमुक्षुः साधनैर्युक्तो मुनिं शान्तमभाषत ॥

संरारसर्पदष्टं मां त्राहि त्राहि दयानिधे ।
इत्याचार्यं प्रणम्याथ शिष्यः पृच्छति तं पुनः ॥

End ;

भक्तिश्रद्धाविहीनाय वृथा पण्डितमानिने ।
रागद्वेषाग्नितप्ताय न देयं ज्ञानमात्मनः ॥
रागद्वेषविहीनाय भक्तिश्रद्धानुषङ्गिने ।
मुमुक्षवे विरक्ताय प्रदेयं ज्ञानमात्मनः ॥
यः पठेच्छ्रद्धया चैतद्गुह्यं स्वात्मनिरूपणम् ।
स संसारार्णवं तीर्त्वा सुखमक्षयमश्नुते ॥

Colophon :

इति स्वात्मनिरूपणं सम्पूर्णम् ॥

107

Sl. No. 37566 आर्यास्वात्मनिरूपणम् Ms. No. B. 231/1

Beginning :

श्रीगुरुचरणद्वन्द्वं वन्देऽहं मथितदुःसहद्वन्द्वम् ।
भ्रान्तिग्रहोपशान्तिं पाशमयं यस्य भसितमातनुते ॥
देशिकवरं दयालुं वन्देऽहं निहतसकलसन्देहम् ।
यच्चरणद्वयमद्वयमनुभवमुपदिशति तत्पदस्यार्थम् ॥
संसारदावकसन्तप्तः सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ॥

End :

इत्यात्मबोधलाभं मुहुरनुचिन्त्य मोदमानानाम् (मोदमानेन) ।
प्रारब्धकर्मणोऽन्ते तेन परं प्राप्यते स्म कैवल्यम् ॥
मोहान्धकारहरणं संसारोद्वेलसागरोत्तरणम् ।
स्वात्मनिरूपणमेतत्प्रकरणमकृत दक्षिणामूर्तिः ॥
अज्ञानान्ध्यविहन्ता विरचितविज्ञानपङ्कजोल्लासः ।
मानसगगनतले मे भासयति श्रीनिवासगुरुभानुः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य (श्रीमदानन्द) श्रीमच्छङ्कराचार्यकृतं आर्यावृत्त्या स्वात्मनिरुपणसम्पूर्णम् ॥

108

Sl. No. 37570 अर्यास्वात्मनिरूपणव्याख्या Ms. No. B 233/3

Beginning:

प्रचण्डपाषण्डविखण्डनोद्यतं
त्रयीशिरोर्थप्रतिपादने रतम् ।
बुधैर्नुतं योगकलाभिरावृतं
नमामि तं शङ्करदेशिकं ततम् ॥

इह खलु सकलशिष्टप्राणीर्भगवान् शङ्कराचर्यः जिज्ञसुजनानुकम्पा × आर्यावृत्तद्वयेनाकरोत् श्रीगुरुमिति ॥

End :

एतावता गुरुदेवतयोरैक्यभावनमेवात्मप्रकाशसाधनमिति प्रतिपादितं भवति ॥ १७७ ॥

चैतन्यद्युतिरुचिराङ्गो दूरनिरस्तश्यामतासवः । (?)
हृदयसरोजे विरजे भ्रमति भ्रमरो विलक्षणः कश्चित् ॥

Colophon :

इति श्री सच्चिदानन्दसरस्वतीविरचिता आर्याव्याख्या समाप्ता ॥

109

Sl. No. 37574 अर्यास्वात्मनिरूपणव्याख्या Ms. No. C. 759/11

Beginning :

पूर्णज्ञानाय + ॥
वेदान्तशास्त्रमखिलं यत्तत्वप्रतिपत्तये ।
विवृतं देशिकेन्द्रेण तद्ब्रह्म प्रणतोऽस्म्यहम् ॥
ननु वेदान्तशास्त्रमनारम्भणीयम् । वक्ष्यमाणन्यायेनाश्रयानुपपत्त्या ॥

End :

ननु गगनादिधर्मिकप्रागभावप्रतियोगित्वस्यालीकतया तस्य घटादावारोपोऽसत्यप्रधानशून्यत्वेन न सम्भवतीति तदभावस्तत्र दुर्घट इति चेत् गगनादावपि सुलभः स कथं स्यात् । तथा चासम्भवः ।

Colophon :

— — — —

110

Sl. No. 37575 आसुरवासनाप्रकरणम् Ms. No. P. 2035/17

Beginning :

इदानीमासुरवासनाप्रतिबन्धो निरूप्यते । स च प्रतिबन्धः स्वस्मिन्नविद्यमान इव भासमानोऽपि कदाचित्पराचारदर्शनानन्तरमाक्षेपादिभिः प्रकटीभवति ॥

End :

तदनु तत्प्रतिबन्धविचारं कृत्वा तत्प्रतिबन्धं निराकृत्य श्रवणादिकं कृत्वा ज्ञानं सम्पादितं चेन्मुक्तो भवतीति सकलस्मृतिश्रुतीतिहास-

पुराणा वदन्ति । एवं प्रतिबन्धान्विचार्य प्रतिबन्धनिर्मूलनं कृत्वा श्रवणादि-ज्ञानं यः सम्पादयति स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वं रमणीयम् ॥

Colophon :

इत्यासुरवासनाप्रकरणं समाप्तम् ॥

111

Sl. No. 37578 इष्टसिद्धिः Ms. No. A. 738

Beginning :

यानुभूतिरजामेयानन्तात्मानन्दविग्रहा ।
महदादिजगन्मायाचित्रभित्तिं नमामि ताम् ॥
इष्टानिष्टाप्तिहानीच्छोत्तरसिद्धिर्यदाश्रतेः ।
तस्मात्तत्रेष्टसिद्ध्यर्थं त्रिवृगौम्यात्तनसन्दशे ॥
येति स्वतःसिद्धतां द्योतयति ।

End :

सर्वेष्टं परमानन्दो वेदान्तात्मप्रमाण (प्रकाशकः) कः ।
इत्येषोऽर्थो विशेषेण मयेष्टो वेदविन्मतः ॥
अर्थश्चायमनिर्वाच्या यदविद्या प्रसिध्यति ।
व्यचीचरमविद्यां तामत इष्टार्थसिद्धये ॥

Colophon :

इति श्री परमहंसपरिव्राजकाचार्यस्य श्रीमदव्ययात्मभगवत्पूज्यपाद-शिष्यस्य विमुक्तात्मभगवतः कृताविष्टसिद्धावष्टमोऽध्यायः समाप्तः ॥
समाप्तोऽयं ग्रन्थः ॥

112

SI. No: 37581 इष्टसिद्धिः Ms. No.A. 772

Beginning :

न च ग्रहः स्वतः शुक्तेर्येन दोषात्तदग्रहः ।
स्वतो ग्रहे ग्रहे न स्यात् शैत्यमग्नेरिवान्यतः ॥
मायां किनेति वाक्यशेषः । दशे × शग्रहशक्तिः भ्रन् दोषो भ्रान्तिं करोति चेत् ल × ।
× वान्यथाख्यातावाग्रहः कोपयोक्ष्यते ॥

सर्वेष्ट × दा वेदान्तात्मप्रमाण(प्रकाश)कः ।
इत्येषोऽर्थो विशेषेण मयेष्टो वेदविन्मतः ॥
अर्थश्चायमनिर्वाच्यो यद्यविद्या प्रसिद्ध्यति ।
व्यचीचरमविद्यां तां मत इष्टार्थसिद्धये ॥

Colophon :

इति श्रीमदव्ययात्मभगवत्पूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकस्य विमुक्तात्मभगवतः कृताविष्टसिद्धावष्टमोऽध्यायः समाप्तः ॥

113

Sl. No. 37582 ईक्षत्यधिकरणविचारः Ms. No. C. 759/5

Beginning :

अथातो ब्रह्मजिज्ञासेत्यत्र भोक्त्रात्मनो यत्पारमार्थिकं रूपं ब्रह्मेति निखिलवेदान्तेषु प्रसिद्ध तद्विचार्यमित्युक्तम्। तदेव च स्वरूपतटस्थलक्षणाभ्यां जन्माद्यस्य यत इति सूत्रेण प्रतिपादितम् ।

End :

यदपि आत्मशब्दादिति द्वितीयसूत्रस्य हेतोर्विकल्पेन दूषणम्, तदपि तत्सूत्रव्याख्यानावसरे निरस्तमेव ॥

Colophon :

— — —

114

Sl. No. 37583 ईशाद्युपनिषद्विवरणम् Ms. No. A. 553

Beginning :

ओं श्रीमद्विश्वाधिष्ठान परमहंस सद्गुरु श्री रामचन्द्राय नमः ।
श्री रामचन्द्र परब्रह्मणे नमः ।
ईशाद्यष्टोत्तरशतवेदान्तपटलाशयम् ।
त्रैपदानन्दसाम्राज्यं कलये स्वादशेषतः ॥
नत्वा त्रिपाद्गुरुं सद्यः कैवल्यानन्दमिच्छताम् ।
ईशाद्याष्टोत्तरशतवेदान्तार्थो निगद्यते ॥
लीलाविभूतिनिश्वास निगमान्तार्थसंचयम ।
लीलयाविभूति लिलाविभूतिरेव—

End ;

तस्येति । तस्य ब्रह्मविद्वरिष्ठस्य एषः परमात्मा स्वां तनूं निष्प्रतियोगिक-परमात्मा स्वमात्ममिति स्वकीययाथात्म्यं वृणुते प्रकाशयतीत्यर्थः ज्ञात्मरूपेण ।।

Colophon :

— — — —

115

Sl. No. 37584 | उत्तरगीताव्याख्या | Ms. No. A. 10696/2

Beginning :

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ।।

इह खलु भगवानर्जुनः धर्मक्षेत्रे कुरुक्षेत्रे भगवदुपदिष्टमात्मतत्त्वोपदेशं विषयभोगप्रामाण्येन विस्मृत्या पुनस्तदेव आत्मतत्त्वं भगवन्तं पृच्छति ।

End :

भूतवस्तुनि गतवस्तुनि अशोचित्वे गतमिति दुःखराहित्ये सिद्धे उपलक्षणमेतत् आगामिवस्तुनिरपेक्षत्वे सिद्धे, वर्तमानवस्तुनि लब्धे हर्ष-राहित्ये सिद्धे च पुनर्जन्म न विद्यते ।

आत्मयोगमवोचद्यो भक्तियोगशिरोमणिम् ।
तं वन्दे परमानन्दं नन्दनन्दनमीश्वरम् ।।

Colophon ;

श्री गौडपादाचार्यविरचितायामुत्तरगीताव्याख्यायां तृतीयोध्यायः ।।

116

Sl. No. 37585 | उपदेशपञ्चकम् | Ms. No. P. 6519

Beginning

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतां अपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयतां
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ।।

End :

एकान्ते सुखमास्यतां परतरे चेतस्समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चिति बलानाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥

Colophon :

— — —

118

Sl. No.3759[3] उपदेशपञ्चरत्नव्याख्या **Ms. No. P. 6053/11**

Beginning :

ಭಗವತ್ಪರರಾದ ಶಂಕರಾಚಾರ್ಯರು ಮಂದಬುದ್ಧಿಗಳಾದವರಿಗೆ ಅನುಗ್ರಹಾರ್ಥವಾಗಿ × × ಪಂಚರತ್ನಗಳೆಂಬ ಹೆಸರೊಳ ಪಂಚಶ್ಲೋಕಗಳಿಂದ ನಿರೂಪಿಸುತ್ತಿದ್ದಾರೆ. ಇದಕ್ಕೆ ಅರ್ಥ—ಬ್ರಾಹ್ಮಣನು ಸರ್ವದಾ ವೇದಾಧ್ಯಯನ ಮಾಡಬೇಕು.

End :

ಆವ ಪುರುಷನಿಂತು ಆಚಾರ್ಯರಿಂದ ಮಾಡಲ್ಪಟ್ಟ ಈ ಪಂಚರತ್ನಶ್ಲೋಕಗಳರ್ಥ ವಿಚಾರಿಸಿ ನಾನೇ ಬ್ರಹ್ಮ ಸ್ವರೂಪವೆಂದು ಅರಿವನೊ ಅವನೇ ಮುಕ್ತನು, ಅವನೇ ವಿದ್ವಾಂಸ, ಅವನೇ ಕೃತಕೃತ್ಯನೆಂದು ವೇದಾಂತಸಿದ್ಧಾಂತವು.

Colophon :

पञ्चरत्नप्रकरणं सम्पूर्णम् ॥

119

Sl. No. 37594 उपदेशप्रकरणम् **Ms. No. P. 8106/21**

Beginning :

सर्वश्रुतिशिरोरत्नं प्रान्तचञ्चदचञ्चलम् ।
वटमूलनटत्तेजो भासतां भवतां पुरः ॥
यत्कटाक्षप्रभावेन मुक्तस्त्वं दुःखबन्धनात् ।
तस्य श्रीदक्षिणामूर्तेः श्रीगुरोः पादुकां भजे ॥
कायं संनिहितापायं पश्य विश्वं च चंचलम् ।

End :

पराग्दृष्टिर्हिबन्धाय प्रत्यग्दृष्टिविमु॒ये ।
इति वेदान्तसिद्धान्तः यथेच्छसि तथा कुरु ॥
न नूनमस्ति ते न्यूनं मनो मानातिगेव च ।
दोषव्याध्येकसं × × ॥

Colophon :

— — —

119

Sl. No. 375595 उपदेशसाहस्री Ms. No. B. 2967/2

Beginning :

अथ मोक्षज्ञानोपदेशविधिं व्याख्यास्यामः ।

मुमुक्षूणां श्रद्धानाधानामर्थिनामर्थाय तदिदं मोक्षासाधनं ज्ञानं साधन साध्याद नित्यात् सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंस परिव्राज्य + परीक्ष्यतमवतं ब्रह्मविद्यामिति ।

End :

लोकदुःखेन बाह्यः यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते— इत्यादिश्रुतिभ्यः अनात्मवस्तुनश्च सत्वादिति परमो हेतुरात्मनश्चाद्वयत्वविषयाणि द्वयस्यासत्वार्थानि च सर्वाण्युपनिषद्वाक्यानि विस्तरतस्समीक्षितव्यानि समीक्षितव्यानि ॥

इति परिसंख्यानं तृतीयं प्रकरणम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्य श्रीमच्छङ्कर भगवत्पूज्यपादविरचितमुपदेशसहस्राख्यं प्रकरणं समाप्तम् ॥

120

Sl. No. 37598 उपदेशसाहस्री Ms. No. . 2967/1a

Beginning :

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

समापयति यस्सर्वाः दाराग्न्याधानपूर्विकाः ।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे ॥

End :

अतोन्यथा न गृहनाश इष्यते
विमोहबुद्धेर्गृह एव कारणम् ।
गृहोऽप्यहेतुर्ह्यनलस्त्वनिन्धनो
यथा प्रशान्ति परमां तथा व्रजेत् ॥

विमथ्य वेदोदधितस्समुद्धृतं
सुरैर्महाब्धेस्तु यथा महात्मभिः ।
तथामृतं ज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यः परमीक्षितञ्च यैः ॥

Colophon :

— — — —

121

Sl. No. 37600 उपदेशसाहस्रीव्याख्या **Ms. No. A. 176/1**

Beginning :

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥
चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

End :

विमेथ्य वेदोदधितस्समुद्धृतं
सुरैर्महाब्धेस्तु यथा महात्मभिः ।
तथाऽमृतं ज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यः परमीक्षितञ्च यैः ॥

Colophon :

इति श्रीमद्विद्याधामशिष्येण बोधनिधिना श्रद्धाभक्तिमात्रप्रेरितेन कृतमु पदेशग्रन्थविवरणं समाप्तम् ॥

122

Sl. No. 37608 उपदेशसाहस्रीव्याख्या Ms. No. P. 1796/4

Beginning :

प्रणम्य कृष्णं प्रणतार्तिहारिणं
गुरूनपि स्वान्परमार्थरूपिणः ।
मया सहस्रीविवृतिर्विधीयते
कृतापि मन्दोपकृतिप्रसिद्धये ॥

सकलोपनिषदर्थसारसङ्ग्राहिकामुपदेशसाहस्रीं गद्यपद्यात्मिकां प्रारभमाणो भगवान् भाष्यकारः चिकीर्षितस्य—

End :

सूर्यानलानिलजलेशसुरेशदस्र-
दिग्यज्ञमृत्युपरमेष्ठिशशाङ्करूपैः ।
किं नस्त्वमेव कुरुषे सकलं विधातः
स्थानं कथं भवभयं दधतो मम स्यात् ॥

मनसा चिन्तितं यन्मे वाचा यद्भाषितं पुनः ।
कायेन यत्कृतं कर्म तत्तद्ब्रह्मार्पणं भवेत् ॥

Colophon :

— — —

123

Sl. No.37609 उपदेशसाहस्रीव्याख्या Ms. No. B. 336/2

Beginning :

प्रणम्य कृष्णं प्रणतार्तिहारिणं
गुरूनपि स्वान् परमार्थरूपिणः ।
मया सहस्रीविवृतिर्विधीयते
कृतापि मन्दोपकृतिप्रसिद्धये ॥

सकलोपनिषदर्थसारसङ्ग्राहिकामुपदेशसाहस्रीं गद्यपद्यात्मिकां प्रारभमाणो भगवान् भाष्यकारः × अस्य शारीरकप्रकरणस्य तदीयमेवानुबन्धजातं सूचयति—चैतन्यं ×

End :

उपदेशसाहस्रीयं गद्यपद्यमयी मया ।
व्याकृताप्यन्यै × मन्दानुग्रहसिद्धये ॥
व्याक्रियासत्क्रिया सेयं कुर्वन्ति × विद्यानामाश्रिता पुरुषोत्तम ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छूद्धानन्दभगवत्पूज्यपादशिष्य स्य[ष्येण] भगवदानन्दज्ञानकृता श्रीमदुपदेशाहस्रीटीकासमाप्ता ॥

124

Sl. No. 37613 उपदेशप्रकरणम् Ms. No. P. 2967/1b

Beginning

चैतनमेव चैतन्यं ज्ञप्तिस्वरूपं सर्वगं सर्वविद्यकल्पितदिकालाकाशादि-सर्वं × पश्चात्मकं वन्दे × भक्त्याष्टादशभेदया > ग × नवि × भक्तैर्नवमिवाश्रितम् ॥ +
वेदान्तानां सङ्गतिमाह–समापयतीति ॥

End:

परं ब्रह्मात्मकं तत्वमीक्षितं साक्षादनुभूतं तेभ्यो गुरुभ्यस्सम्प्रदायप्रवर्तकेभ्यो + नमः + इत्येवं वाक्यवृत्त्यनुसारेण ज्वरनाशप्रकरणस्य पदार्थविवरणं कृतं देवतागुरुभक्तिप्रेरितेन मया ।

इति सप्तशतश्लोका यतीन्द्रश्रीमुखोद्गाताः ।
विवृता गुरुभक्तेन मया ब्रह्मात्मबोधकाः ॥
उपास्य श्रद्धया श्रीमद्विद्याधाममुनीश्वरम् । +
तस्मै नमो जनमनोम्बुजदिवाकराय ।
कृत्स्नागमार्थनिलयाययतीश्वराय ॥

Colophon :

इति श्रीमद्विद्याधामशिष्येण बोधनिधिना श्रद्धाभक्तिमात्रप्रेरितेन कृतमुपदेशग्रन्थविवरणं समाप्तम् ॥

125

Sl. No. 37615 उपदेशसाहस्रीव्याख्या Ms. No: C. 781/2

Beginning :

वन्दे वरप्रदमहं वरवारणेन्द्र-
वक्त्रं सदा क्षितिभृदीश्वरजातनूजम् ।
विघ्नेश्वरं विबुधवन्दितपादपद्मं
संसारसंभवभयापहमानतानाम् ॥

शतमखपूजितपादं शतपथमनसाप्यगोचराकारम् ।
सितजलरुहनिभनेत्रं सीतावामङ्कमाश्रये रामम् ॥
चेतनमेव चैतन्यं ज्ञप्तिस्वरूपम् ।

End :

इति समशतश्लोका यतीन्द्रश्रीमुखोद्गताः ।
विवृता गुरुभक्तेन मया ब्रह्मात्मबोधकाः ।
उपास्य शुद्धया + समबुद्धितः ॥
येन मे + + नममामि तम् ॥

यद्भाष्यसागरजमुक्तिमणीन् प्रकीर्णान्
प्राप्याधुना कतिपयान् कवयो भवन्ति ।
तस्मै नमो जनमनोऽब्धिदिवाकराय
कृत्स्नागमार्थनिलयाय यतीश्वराय ॥

Colophon :

इति श्रीमद्विद्याधामशिष्येण बोधनिधिना श्रद्धामात्रप्रेरितेन कृतमुपदेश ग्रन्थविवरणम् समाप्तम् ॥

126

Sl. No: 37624 उपदेशसाहस्रीव्याख्या Ms. No: A. 155/2

Beg nning :

प्रणम्य रामाभिधमात्मधीपदं
जगत्प्रसूतिस्थितिसंयमायनम् ।

तदात्मकान् शंकरपूर्वकान् गुरून्
मयोपदेशार्थविभाग उच्यते ॥

इह भगवत्पादाभिधो भगवान् भाष्यकारः सर्वोपनिषदर्थसारसंग्राहिकां उपदेशसाहस्रीं गद्यपद्यविभागग्रन्थरचनया प्रकटीकुर्वन् ×

End :

हृद्यन्तराविष्कृतरामसूर्तेः
तथागुरूणां विपुलप्रसादात् ।
यथाकथंचिद्रचितेन विष्णुः
अनेन तृप्यत्वखिलान्तरात्मा ॥

Colophon :

इति श्रीशंकराचार्यकृतोपदेशसाहस्र्याः पदयोजनिका नाम टीका कृष्णतीर्थशिष्यरामतीर्थविरचिता समाप्ता ॥

127

Sl. No. 37619 उपदेशसाहस्रीव्याख्या Ms. No. C. 2539/45

Beginning :

यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ।
भाति नो भाति यद्ज्ञानात् तदस्मिन्ब्रह्म चित्सुखम् ॥
चैतन्यं सर्वगं × सर्वविदे नमः ॥

तदेवं सर्वोपनिषदर्थसारसंग्रहं गद्यप्रबन्धेन × उपदिश्य पुनरुप्युक्तमेवार्थजातं पद्यप्रबन्धेन × उपनिबध्नाति–चैतन्यमिति ॥

End :

आदाविवोपसंहारेऽपि देवताचार्यनमस्कारौ तद्भक्तेर्विद्यां प्रत्यन्तरङ्गत्वख्यापनाकार्याविति दर्शयति श्लोकद्वयेन–ज्ञानमित्यादिना ॥ ज्ञानात्मने चिदानन्दरूपायेत्यर्थः ॥ विद्ययेति ॥ अज्ञानसंकुलमितिच्छेदः ॥

इति श्री उपदेशसाहस्र्यां सम्यङ्मतिप्रकरणं समाप्तम् ।

Colophon :

सप्तदशमं विवृतं सम्पूर्णम् ॥

128

Sl. No. 37618 उपदेशसाहस्रीव्याख्या Ms. No: C. 1218/4

Beginning :

हयग्रीवाङ्घ्रिपादाब्जपांसवः पान्तु सन्ततम् ।
अनिशं प्रणतानस्मान् मोक्षयन्तः सुखे पदे ॥
कृष्णतीर्थपदाम्भोजद्वन्द्वं वन्दे × हृदयाम्बुजं ॥
× स्तथाकृति × पञ्चास्यरूपो हरिः ॥
कृपया शङ्करेणादौ उपदेशसहस्रिका × रूपिणा ॥
टीकेयं क्रियते तस्याः पुरुषोत्तम साक्षिणा ।
अव्युत्पन्नप्रबोधाययुता कर्नाटभाषया ॥

ವೇದಾಂತ ತಾತ್ಪರ್ಯ ಪ್ರತಿಪಾದಿಸುವ ನ್ಯಾಯ ಸಂಗ್ರಹ ಉಪದೇಶಸಾಹಸಿ.

End :

ವೇದೋದಧಿಯ ದೆಶೆಯಿಂದ ಜ್ಞಾನಮೃತವು ಆಚಾರ್ಯನಿಂದ ಉದ್ದರಿಸಲು
+ ನಿದಂ ಪರಬ್ರಹ್ಮ ಸಾಕ್ಷಾತ್ಕರಿಸಲು ಪಟ್ಟದು. ಅಂಥ ಗರವು ಮುಖಗಳಗೆ
ನಮಸ್ಕಾರ ॥

Colophon : — — —

129

Sl. No: 37619 उपनिषदर्थप्रकाशः Ms. No: C. 2559

Beginning :

यो वेदान्त × पञ्चास्यरूपो हरिः ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
आदिशन्माधवाचार्या वेदार्थस्य प्रकाशने ।
ये पूर्वोत्तरमीमांसे ते व्याख्याति सदनुग्रहात् ॥
कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ॥

Colophon:

चित्रया यजेत पशुकाम इत्यत्र असति प्रतिबन्धे पशुप्राप्तिरैहिकी अन्यथात्वा मुष्मिकीति चित्रान्यायः। ईदृशफलसिध्यर्थं पुरुषतन्त्रोपासनाश्रयात्र वेदेत्यनेन विधीयते। अत्र मीमांसा चतुर्थाध्यायस्य प्रथमपादे चिन्तितम् ॥

130

Sl. No. 37624 **उपाधिमण्डनम्** Ms. No. C. 2075

Beginning:

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥
वेदान्तशास्त्रमखिलं यत्तत्त्वप्रतिपत्तये।
विवृतं देशिकेन्द्रेण तद्ब्रह्म प्रणतोऽस्म्यहम् ॥
ननु वेदान्तशास्त्रमनारम्भणीयम् वक्ष्यमाणन्यायेन ——

End:

ननु गगनादिधर्मिप्रागभावप्रतियोगित्वस्य अळीकतया तस्य घटादा वारोपोसत्यप्रधानशून्यत्वेन न संभवतीति तदभावस्तत्र दुर्घट इति चेत् गगनादावपि सुलभा स कथं स्यात्। तथा चासंभवः ॥

Colophon:

— — —

131

Sl. No. 37625 **उपासनाप्रकरणम्** Ms. No: C. 2259

Beginning:

अत्र वक्ष्यमाणानां चतुर्दशोपासनानामपि अपरोक्षं ज्ञानं मुक्तिश्च मुख्यं फलम्। नवादौ अस्योपासनस्य पञ्चमहापातकिभिः सहवासोऽपि तत्सह वासजनितपापलेपाभावोऽप्यान्तरं फलम्। तत्रैव अनुसन्धानप्रकारः ॥

End :

अमृतानामपि वेदानां अमृतत्वप्रदातृत्वात् अमृता इति परमादरात् अहरहरनुसन्धेयम् ॥

इतिगुरुप्रसादलाभः समाप्तः ॥

चतुर्दशसरत्नानि येन लब्धानि भारते ।
आदर्शे दृश्यमानानि चतुर्दशजयी स हि ॥

Colophon :

— — —

132

Sl. No. 37627 एकश्लोकप्रकरणम् Ms. No. A; 533/13

Beginning :

नत्वां श्रीवासुदेवेन्द्रं सद्योमुक्तिमभीप्सताम् ।
द्वैताद्वैतपराद्वैत सिद्धान्तार्थो निगद्यते ॥
आविद्यकपदं द्वैतं अद्वैतं तल्लयास्पदम् ।
अविद्यारोपापवादविरलं परमाद्वयम् ॥

End ;

रामचन्द्रेन्द्रगदितश्लोकार्थज्ञानवान् मुनिः ।
स्वातिरिक्तभ्रमं त्यक्त्वा स्वमात्रमवशिष्यते ॥

Colophon :

इति एकश्लोकप्रकरणं समाप्तम् ॥

133

Sl. No. 37628 ऐकश्लोकप्रकरणविवरणम् Ms. No. C. 533/14

Beginning :

यज्ज्ञानाद्वैतविभवं यत्सर्वप्रसनाद्वयम् ।
यज्ज्ञानापह्नवात् सिद्धं सुखं तत् त्रैपदं भजे ॥
नत्वा गुरुं द्वैताद्वैतपराद्वैतसुखार्थिनाम् ।
उपायोपेयभेदात् तत् सिद्धान्तत्रयमुच्यते ॥

इह खलु परमदयापारगाय × लक्षणसम्पन्नं शास्त्रं प्रतिजानीते—नत्वेति ॥

End :

महाभ्रमं दूरतस्त्यक्त्वा निर्विशेषस्वमात्रायमानतुर्यत्रिपाद्रूपावस्थान लक्षणविकलेबरकैवल्यरूपेणावशिष्यते स्वातिरिक्ताखिलापह्नवसिद्धब्रह्ममात्रंभवतीति फलितार्थः ॥

Colophon :

इति श्री बासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिकृतं एकश्लोकप्रकरणविवरणं समाप्तम् ॥

134

Sl. No: 37629 — एकश्लोकी — Ms. No. B. 278/12

Beginning :

किंज्योतिस्तव भानुमानह हि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।

End :

चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो ॥

Colophon .

— — —

135

Sl. No. 37630 — एकादशोत्तरशतवाक्यानि — Ms. No. B. 230/1

Beginning :

शरीरत्रयव्यतिरिक्तावस्थात्रयसाक्षीनित्यनिर्विकारासङ्गस्वप्रकाशापरोक्ष-नित्यमुक्तसर्वान्तरसहितानन्द सर्वगतपरिपूर्णापरिच्छिन्नाद्वितीयशुद्धप्रत्यगात्मा-नुभवः सम्यग्भूयात् ।

End :

'यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च' इत्यात्मस्वरूपं विजानामि तस्य गुरोः पादारविन्दयोरचञ्चला भक्तिर्निरन्तरं सम्यगाविर्भूयात् ।

निरुपमनिगमान्तैर्नेति नेतीतिवाक्यैः

निरवधिकभवाब्धौ नित्यमानन्दयामः ।

अहह किमिति वक्ष्ये भेददुर्बुद्धिमेनां

निमिषमपि पिबन्ती निष्कले किं नु याताम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादविरचितान्येकादशोत्तरशतवाक्यानि सम्पूर्णानि ॥

136

Sl. No. 37632 ऐतरेयानुभूतिप्रकाशिका Ms. No. P. 1814/5

Beginning :

ऐतरेयेण सम्प्रोक्ता द्वितीयारण्यकान्तरा ।

ब्रह्मविद्या सुविस्पष्टं बालबोधाय कथ्यते ॥

अत्रैव × रूपविवर्जितः ।

सोऽप्येक एव नान्योऽस्ति जडं चान्यन्न विद्यते ॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।

इति श्रुत्यन्तरप्रोक्ता माया नान्यत्र तत्त्वतः ॥

End :

यत्प्रज्ञानं स्वात्मरूपं ब्रह्मेति विबुध्यताम् ।

प्र × ब्रह्मवित्सोऽयं तिष्ठेद्ब्रह्मात्मना तदा ॥

जीवन्निव स्थितप्रज्ञो मुक्तः स्याद्वामदेववत् ।

म्रियतां यत्र तत्रास्य वपुः सोऽयं न जायते ॥

ऐतरेयब्रह्मविद्या व्याख्याता सङ्ग्रहादिमाम् ।

सुस्थिरामनुगृह्णातु विद्यातीर्थमहेश्वरः ॥

Colophon :

इति श्रीविद्यारण्यकृतायामैतरेयानुभूति प्रकाशिकायांप्रथमोऽध्यायः ॥

137

Sl. No. 37634 **अनुभूतिप्रकाशः** Ms. No. B. 1814/3

Beginning:

याजुषाख्यां कठशखायां विद्यां नचिकेतसे ।
यमः प्रोवाच तां सर्वसंग्रहेण ब्रवीम्यहम् ॥
नचिकेताः कुमारः सन् स्वपित्रा प्रेषितो यमम् ।
गत्वा तं तोषयित्वा ज्ञानं परमयाचत ॥

End:

विद्यातत्फलयोर्विघ्नशःन्त्यर्थं सह नाविति ।
मन्त्र जपेत्तेन विघ्ना शाम्यन्त्येव न संशयः ॥
वैराग्यं नचिकेतस्य यथा तीव्रं तथा महान् ।
प्राप्नोतु सेवमानः सन् विद्यातीर्थमहेश्वरम् ॥

Colophon:

इत्यनुभूतिप्रकाशे कठवल्लीविवरणो एकादशोऽध्यायः ॥

138

Sl. No. 37365 **करणहसिगे** Ms. No. P. 6992/4

Beginning:

सद्गुरुं परमानन्दं व्यक्ताव्यक्तयास्तुकारणम् ।
आनन्दवारिसम्पूर्णं वन्दे सद्बुद्धिसिद्धये ॥
स्वेष्टमप्रवळयब्रह्मणदेवासुरमहोरगाः । (?)
तेन प्रबोधितास्सर्वे प्रणवेन पुरा ध्रुवम् ॥

End:

वेदादौ प्रणवः प्रोक्तः मन्त्रः प्रणव उच्यते ॥
अधिगतपरमार्थैस्साधुभिर्वक्तुकामाः
निजहृदयसुतुष्टास्साधुवृत्तानुवृत्ताः ।
परमगुणसगुणनां मानसेनातियुक्ताः
य इह विबुधजात्यास्तेन लोके समर्थः ॥

Colophon:

इति पञ्चीकरणं समाप्तम् ॥

139

SI. No: 37636 **कर्तृत्वाकर्तृत्वनिर्णयः** Ms. No. C. 823/7

Beginning :

यद्वत्सूर्येऽभ्युदिते स्वव्यवहारं जनः कुरुते ।
तन्न करोति विवस्वान् कारयति तद्वदात्मापि ॥

End :

गेहान्तर्दैववशात्तस्मिन् चित्समुदिते विपन्ने वा ।
दीपे तुष्यत्यथवा खिद्यति वा तद्वदात्मापि ॥

Colophon .

इति कर्तृत्वाकर्तृत्वनिर्णयस्समाप्तः ॥

140

Sl. No. 37638 **कलातरङ्गमाला** Ms. No. E. 1067

Beginning :

नत्वा त्रिपाद्विभूतीशं + तस्मै नमो नमः ॥
सर्ववेदान्तसंसिद्धप्रत्यग्ब्रह्मैक्यरूपिणे ।
वासुदेवेन्द्रगुरवे परस्मै ब्रह्मणे नमः ॥
सर्ववेदान्तसिद्धान्तब्रह्मप्रणवरूपिणम् + ॥
+ रामचन्दं त्रिपाद्भुतिमहावैकण्ठभूषणम् ॥
गुणसाम्यमहापीठे + । + स्वीयविभूतिभिः ॥
नत्वा श्रीगुरुचरणौ नीतिश्लोकेन यद्वळे ।
कलातरङ्गमालां (?) समङ्गळां रत्नमालिकाम् ॥

End :

इयं त्रिपुटिरित्युक्ता तन्मयं विश्वमीरितम् ।
त्रिपुटिव्यतिरेकेण नान्यदस्ति जगत्त्रये ॥
शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ।
छन्दश्चेतीह वेदानां षडङ्गं परिकीर्तितम् ॥
ऋग्यजुःसमाथर्वाणो वेदाश्चत्वार ईरिताः ॥

Colophon

— — —

141

Sl. No. 37640 **कायशोधः** **Ms. No. A: 86/6**

Beginning :

प्रणम्य सर्ववेदात्मगुरुं वेदान्तसाङ्ख्यतः ।
विमर्शः क्रियते सर्वव्यावृत्तात्मप्रसिद्धये ॥
तमःप्रचुरविक्षेपशक्तितः परमात्मनः ।
अपञ्चीकृतभूतानां पञ्चानामभवज्जनिः ॥
ततोऽन्तःकरणं तेषां सत्त्वांशान्मिलितादभूत् ।
मनो बुद्धिरहंकारश्चित्तं चेति चतुर्विधम् ॥

End :

स एव निरुपाधिः स्यात्स्वात्मसंवेद्य एव सः ।
प्रत्यग्दृशा निर्विकल्पः समाधौ नान्यथा क्वचित् ॥
गर्भाधानादिमृत्यन्तव्याधिदुःखैकभेषजम् ।
नान्यत्स्वसेवासन्तुष्टगुर्वात्मापरोक्षतः ॥
बहुग्रन्थानुसारेण यथामति मया कृतः ।
कायशोधस्तेन मे स्यात्सुप्रीतो गुरुहृद्गतः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छिवकाशीविश्वेश्वरमणिकर्णिकातीरस्थ श्रीजयकृष्णानन्दपादपद्माराधक श्रीवेंकटकृष्णानन्दशिष्येण बालब्रह्मानन्दसूरिणा विरचितः बहुग्रन्थाननुस्मृत्य कायशोधग्रन्थः समाप्तः ॥

142

Sl. No. 37642 **काशीमोक्षनिर्णयः** Ms. No. C. 749

Beginning :

नमस्कृत्य जगन्नाथं मायया चन्द्रशेखरम् ।
गङ्गाधरं गरच्छायानीलकण्ठमुपास्महे ॥
वाराणसीपुरीं पुण्यां येऽधितिष्ठन्ति जन्तवः ।
व्याचष्ट तारकं ब्रह्म रुद्रस्तेषां दयानिधिः ॥

End :

मोक्षस्य निर्णयः काश्यामित्थमेकेन जन्मना ।

सर्वेषामेव जन्तूनां प्रमाणैः प्रतिपादितः ॥

विश्वेश्वरो जयति विश्वविमुक्तिहेतोः

काशीनिवासरसिकः करुणासमुद्रः ।

यत्पादपद्मयुगसौरभवासितस्य

जन्तोर्भवत्यकृतकं शिवसामरस्यम् ॥

Colophon :

इति श्रीसुरेश्वराचार्यविरचितः सकलश्रुतिस्मृतिपुराणवाक्यनिर्धारितः काशीमोक्षनिर्णयः समाप्तः ॥

143

Sl. No. 37645 — केनोपनिषद्दीपिका — Ms. No. P. 1814/8

Beginning :

× × ×

विद्योक्ता तत्र संक्षेपात्तं विस्पष्टमिह ब्रुवे ॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।

इत्यर्जुनाय ×

न चान्यायेन पृच्छतः ।

जानन्नपि तु मेधावी जडवल्लोकमाचरेत् ॥

End :

अवाङ्मनसगम्यत्वमुपदेशश्च वेदनम् ।

अविरोधेन तत्सर्वं विस्पष्टमिह वर्णितम् ॥

विद्यातलवकारणां शाखायां श्रूयते स्फुटम् ।

× नेन सन्तुष्याद्विद्यातीर्थमहेश्वरः ॥

Colophon :

इत्यनुभूतिप्रकाशे तलवकारविद्याख्यो नवमोऽध्यायः ॥

144

Sl. No. 37648 **कोशप्रतिकोशमाहात्म्यम्** Ms. No. P. 7703

Beginning :

कथं कोशात्मकं ज्ञानं प्रतिकोशं कथं प्रभो ।
कोशं कोशात्मिकां चैव कथयस्व महेश्वर ॥

End :

निरालम्बमिदं स्थानं वाच्यं वाचकमपरम् ॥

श्रुतिः—यतो वा इमानि भूतानि जायन्ते + आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति ॥

Colophon .

इति ईश्वरपार्वतीसंवादे कोशप्रतिकोशमाहात्म्यं सम्पूर्णम् ॥

145

Sl.No. 37649 **कौपीनपञ्चकम्** Ms. No. P. 4480/10

Beginning :

मूलं तरोः केवलमाश्रयन्तः
पाणिद्वये भोक्तुमुपक्रमन्तः ।
कन्थामपि स्त्रीमिव कुत्सयन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥

End :

स्वानन्दभावं परिहृत्य × वन्तः
संशान्तसर्वेन्द्रियतुष्टिवन्तः ।
अहर्निशं ब्रह्मणि ये रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥

Colophon :

इति कौपीनपञ्चकम् ॥

146

Sl. No: 37650 कौपीनपञ्चकम् Ms. No. F. 6052/5

Beginning :

स्वानन्दभावे परितुष्टिमन्तः
संशान्तसर्वेन्द्रियवृत्तिमन्तः ।
अशोकवन्तः करुणे हसन्तः
कौपिनवन्तः खलु भाग्यवन्तः ॥

End :

पञ्चाक्षरी पाव + मुच्चरन्तः
पतिं पशूनां हृदि भावयन्तः ।
भिक्षाशाना दिक्षु परिभ्रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥

Colophon .

इति कौपीनपञ्चकं सम्पूर्णम् ॥

147

Sl.No. 37651 खण्डनखण्डखाद्यम् Ms. No. C. 14

Beginning :

अविकल्पविषय एकः
स्थाणुपुरुषः श्रूतोऽस्ति श्रुतिषु ।
ईश्वरसुमय नपरं
वन्देऽनुमयाऽर्पितमधिगतम् ॥ १ ॥

मानापनोदन × सरोजयोस्ते ॥
शब्दार्थनिर्वचन × मातनुध्वम् ॥

अथ कथायां —

End :

ग्रन्थग्रन्थिरिह × सज्जनः ॥
ताम्बूलद्वयमासनं च × भ्युदीयादयम् ॥

Colophon

इति श्रीहर्षकृतानिर्वचनीयसर्वस्वे खण्दनखाद्ये तुरीयः संकीर्णपरिच्छेदः ।

समाप्तः ॥

148

Sl. No. 37652 **खण्डनखण्डखाद्यम्** Ms. No. P. 4569/1

Beginning :

× मपि ताभ्यां सम्भाव्यत इति व्यवहारनियममेव बध्नीतः स च प्रमाणेन तर्केण च व्यवहर्तव्यं वादिना प्रतिवादिनापि कथां तत्वज्ञानविपर्ययलिङ्गं प्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानी प्रदर्शनीय्यम् ॥

End ;

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञंमन्यमाना हठेन पठिती मास्मिन् खलः खेलतु ।
श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिस्समासादय-
त्वेतत्तर्करसोर्मिमज्जनसुखेष्वासज्जनं सज्जनः ॥

Colophon :

इति श्रीहर्षकृतौ अनिर्वचनीयसर्वस्वे खण्डनखण्डने तुरीयः परिच्छेदः॥
ताम्बूलद्वयमासनं च × × अर्हन्तु सन्यतः ॥

149

Sl. No. 37653 **खण्डनखण्डखाद्यम्** Ms. No. C. 1718

Beginning :

यो विश्वोऽकारवाच्यः सकलविषयमृग्भ्रान्तितत्कारणाभ्यां
बद्धः संस्कारमात्रप्रविरचिततनुस्तैजसश्चेत्युवाच्यः ।
प्राज्ञो ज्ञानैकबद्धः सुर × ×
वाक्यार्थो यस्तुरीयो विगलितसकलः सोऽहमेवास्मि भूमा ॥
ग्रन्थारम्भे × × मङ्गलं—

End:

अस्ति च प्रतीयमानव्याप्यविषयानुभवत्वलक्षणमित्यतिव्याप्तिरित्यर्थः । अस्वप्नप्रत्ययेन प्रतीयमानव्याप्यविषयत्वमविसंवादित्वमतो नातिव्याप्तिरित्यत आह ×—

Colophon :

— — —

150

Sl. No. 37655 **गीतासारः** Ms. No. P. 1321/2

Beginning :

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥
इदमप्यपरं भूयः शृणु गुह्यं सनातनम् ।
सर्वेष्वपि च तीर्थेषु पुराणेषु च कृत्स्नशः ॥

यदग्रमपि तं पात्रैसर्वैमुनिनिरैस्सह ।
वर्णत्रयसमायुक्तं ऋग्यजुस्सामलक्षितम् ॥

End ;

इदं शास्त्रं मया प्रोक्तं गुह्यं वेदार्थविस्तरम् ।
यः पठेत्परया भक्त्या स गच्छेद्विष्णुसाम्यताम् ॥
अष्टादशपुराणानि नव व्याकरणानि च ।
निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम् ॥

भारतोदधिकुम्भस्य गीतानिर्मथनस्य च ।
सारमुद्धृत्य कृष्णेन अर्जुनस्य मुखे हुतम् ॥
गीतागङ्गामृतं पीत्वा पुनर्जन्म न विद्यते ॥
पठतां शृण्वतां नित्यं मुक्तिः स्यादनपायिनी ॥

Colophon :

गीतासारः समाप्तः

151

Sl. No. 3765 **गुणात्रयलक्षणम्** Ms. No. P. 5779/3

Beginning :

राजस गुणः
गर्वः क्रोधोऽप्यहङ्कारः सतीसङ्गः प्रलापनम् ।
आक्रम्यं चाथमात्सर्यं राजसस्य गुणाः स्मृताः ॥ १ ॥

End :

सत्यं ज्ञानं तपो मौनं श्रद्धा धर्मतितिक्षणम् ।
उत्साहनिश्चयौ धैर्यं सात्विकस्य गुणाः स्मृताः ॥

Colophon :

— — —

152

Sl. No. 37658 गुरुशिष्यपरम्परा Ms. No. C. 2562/3a

Beginning :

यमुपासमानजनता यमपाशं मन्यते तृणाय धिया ।
प्रणमत्राणप्रवणं प्रणमामि तमात्मवाचकं प्रणवम् ॥
सत्वमिति सर्वगूढं सत्वविशुद्धान्तरङ्गसत्त्वानाम् ।
सत्वन्ततानयतस्तं सत्वमुनिं सत्वशुद्धये वन्दे ॥

End :

आनन्दशब्दादिसरस्वतीनां परम्परां देशिकपुङ्गवानाम् ।
प्राकाशयद्भक्तिभरेण शुद्धपदादिमानन्दसरस्वतीमाम् ॥

Colophon :

— — — —

153

Sl. No. 37659 गुरुशिष्यपरम्पराव्याख्या Ms. No. C. 2562/3b

Beginning :

अथ तत्र भवान् श्रीमत्परमहंसपरिव्राडवधूतशिरोमणिः श्रीमच्छुद्धानन्दसरस्वत्यभिधानः + + प्रणवस्य नमस्कारात्मकमङ्गलमाचरन् शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति ॥

End :

कृतं स्तोत्रं निगमयन् स्वकीर्त्यनुवृत्तये स्वनाम निर्दिशति । आनन्देति । + अविच्छिन्नशिष्यसन्ततिं भक्तिभरेण भक्त्यतिशयेन प्राकाशयत् । प्रकाशितवान् ॥

Colophon :

— — —

154

Sl. No. 37667 चतुश्लोकी Ms. No: B. 938/1

Beginning:

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया ॥
अहमेवासमेकोऽग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च यो वा शिष्येत सोऽस्म्यहम् ॥

End:

यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ञास्यं तत्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥

Colophon:

— — —

155

Sl. No: 37669 चतुश्लोकी Ms. No: C. 2034

Beginning:

सत्यं विज्ञानमानन्दं ब्रह्म यत्केवलं परम् ।
अद्वितीयमनाद्यन्तमद्वयं समुपास्महे ॥
चतुःश्लोकीं भागवतीं परतत्वप्रकाशिनीम् ।
व्यख्यास्यामो मुमुक्षूणं स्वतत्वप्रतिपत्तये ॥
मुमुक्षूणामात्मबोधोत्पत्तश्चित्तशुद्धिरेव कारणम् ।

End:

सर्वमात्मानं पश्यति । विपापो विरजोऽमृतो भवतीति सर्वमनवद्यम् ।
अनल्पबुद्धेरनल्पोक्त्या तत्वं तत्वंपदेरितम् ।
पुण्यश्लोकचतुःश्लोक्या जगाद जगदीश्वरः ॥

अपुनर्भवकामानां स पुनर्भगवान्स्वयम् ।
चतुष्टयेन श्लोकानां तत्त्वमाचष्ट आत्मनः ॥
पुण्यश्लोकैरेवेक्ष्येयं चतुःश्लोकी विचक्षणैः ।
यद्वीक्ष्या मुमुक्षूणां मोक्षः करफलायते ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमदानन्दात्मसरस्वतीशिष्य श्रीमच्छंकरानन्दसरस्वतीकृतचतुःलोकीव्याख्या संपूर्णा ॥

156

Sl. No. 37670 **चित्तनिषेधप्रकरणम्** **Ms. No. P. 2035/24**

Beginning :

मन अतिचञ्चलं भवति–एकत्र क्वचिदपि स्थले न तिष्ठति वेगतीदीष्टवायुर्यथा निरोद्धुमशक्यः + तथैव मनो निरोद्धुमशक्यमिति भगवद्गीतायां प्रतिपादितम् ॥

End :

एवं विचार्य वैराग्यं सम्पाद्य वैराग्यपूर्वकतया श्रवणादिकं कृत्वा यः शास्त्रं सम्पादयति स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वं रमणीयम् ॥

Colophon :

इति चित्तनिरोधप्रकरणं समाप्तम् ॥

157

Sl. No. 37672 **चिदद्वैतकल्पवल्ली** **Ms. No. B. 153/1**

Beginning:

साङ्ख्यं भवति प्रकृतेः पुरुषस्य च विभागविज्ञानम् ।
एतच्छ्रवणं नाम वदन्ति वेदान्तशास्त्रतत्त्वज्ञाः ॥ +
एवं क्रमेण चित्तं ब्रह्मात्मैक्ये यदा लयं याति ।
अमनस्कं तं योगं कथयन्त्युन्मन्यवस्थां च ॥

End :

प्रारब्धं कर्म यावत्तावन्न्यायेन दग्धवस्त्रस्य ।
व्यवहारः प्रतिभासो जीवन्मुक्तस्य पुरुषस्य ॥

Colophon :

— — —

158

Sl. No: 37673 चिदद्वैतकल्पवल्लीव्याख्या Ms. No:B. 153/2

Beginning :

व्या—ननु लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायेन लक्षिते लक्षणं कथं एतेषां योगविशेषाणां साधनत्वेन ज्ञानमित्यत आह—साङ्ख्य मिति ।

End :

तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिरुद्धवस्तुरिति । तस्मात्साधूक्तं दग्धपटन्यायेन जीवन्मुक्तस्य व्यावहार प्रतिभासमात्र मिति ॥

Colophon :

— — —

159

Sl. .No. 37674 चैतन्यभेदविचारः Ms. No. P. 2035/10

Beginning :

इदानीं चैतन्यभेद उच्यते ।
शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च ॥

End :

प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥
एवमुपाधिवशादेकोप्यात्मा अनेकविध इति ज्ञात्वा उपाधीन्परित्यज्य अद्वितीयपरिपूर्णात्माहमिति योऽभिजानाति स एव जीवन्मुक्त इति सर्वं सुन्दरम् ॥

Colophon :

इति चैतन्यभेदप्रकरणं प्रकरणं समाप्तम् ॥

160

Sl. No. 37676 **छान्दोग्यभाष्यटीका** **Ms. No. C. 3260**

Beginning :

नमो जन्मादिसम्बन्धविध्वंसहेतवे । (?)
हरये परमानन्दवपुषे परमात्मने ॥
नमस्त्रयैन्तसन्दोहसरसीरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥

छन्दोगानां उपनिषद्भेदैः व्याचिख्यासु + + मङ्गलाचरणं सम्पादयन् व्याख्येयस्वरूपं दर्शयति ओमित्येतदिति ।

End :

तस्मादिति महावाक्यस्योक्तया × यार्थ × परत्वासम्भ वाद्बिकारेऽनृताभिसन्धिकृतोऽयं जीवात्मेत्येवंरूपंयन्मिथ्याज्ञानं तस्य संनिधानस्य निवर्तकमेवेदं तत्वमसि वाक्यं न त्वभूतप्रादुर्भावफलमित्येवं जीवब्रह्मणोरैक्यं सर्वोपनिषत्सारभूतं स्थितमित्यर्थः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजक श्रीशुद्धानन्दपूज्यपादशिष्य भगवदानन्द-ज्ञानकृतायां श्रीशङ्करभगवत्कृतछान्दोग्यभाष्यटीकायां षष्ठोऽध्यायः समाप्तः ॥

161

Sl. No. 37677 **जगत्तत्त्वहेतुत्वनिर्णयः** **Ms. No. P. 4933/2**

Beginning:

वागीशाद्यास्सुमनसर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्या:स्युस्तं नमामि गजाननम् ॥

× × श्चत्कुतश्चित् भाग्योदयाद्विर्य × × राधिताराध्यपादभगवदनुग्रहात् अतिविमलमानसःस्वयमेव × × जगत्तत्व-मालोचयति—ननु—

End :

सुषुप्तितदभावेऽपि तदनुभवस्य सर्वसंमतत्वात् अतोऽविद्याप्रतिबन्धादेव तदनुभव इत्य × × प्रकाशप्रत्यग्रूपतया आस्ते ×

प्रकाशत इति व्यवहारसामग्र्यां असत्यामपि नास्ति प्रकाशत इति व्यवहारयोग्यत्वमेव । ननु तद्योग्यताप्यवि × कृतावरणजन्ये ×

162

Sl. No. 37678 जगत्सत्यत्वानुमानखण्डनम् Ms. No. C. 2200

Beginning :

मृषाजगदधिष्ठानसच्चिदानन्दमूर्तये ।
निरस्तद्वैतवादाय दक्षिणामूर्तये नमः ॥
द्वैतवादिमतध्वान्तविध्वंसनविचक्षणम् ।
वन्दे त्र्यम्बकमार्तण्डं सर्वशास्त्राब्धिपारगम् ॥

विमतं सत्यं प्रमाणदृष्टत्वात् ब्रह्मवत् इति चेन्न, साध्यानिरुक्तेः । तथा हि—सत्यत्वं सत्ताजातिमत्त्वं वा,—

End :

यदि विश्वं सत्यं स्यात्तर्हि ब्रह्मवज्ज्ञानानिवर्त्यं स्यात्, तथा चानिर्मोक्षप्रसङ्गः । यदि प्रपञ्चः स्यात्तर्हि सुषुप्तावपि भासेत, सत्यस्य सर्वदा भाननियमात् इत्यत्रानुमानम् । तस्मान्मृषैव जगदिति सिद्धम् ॥

Colophon :

इति श्रीमद्भगवत्पादचरणानुग्रहलब्धविमतनिरसनधौरन्धर्यस्य रामसूरेः कृतिषु सत्यत्वानुमानखण्डनम् ॥

163

Sl. No. 37679 जन्माद्यधिकरणविचारः Ms. No. P. 3061

Beginning :

मानसे घनसंसारबन्धमुच्छेतुमिच्छतः ।
रामचन्द्रपदाम्भोजयुगळी निगळायिता ॥

अथातो ब्रह्मजिज्ञासेत्यत्र ब्रह्मज्ञातुकामेन ज्ञानोपायभूतमिदं विचारशास्त्रं श्रोतव्यमिति जिज्ञासापदस्य ज्ञानेच्छालक्षणस्वार्थापरित्यागेनान्तर्नीतविचारलक्षणत्वात् ।

End :

एकत्वब्रह्माख्ययोः प्रतिपाद्यत्वादिति चेन्मैवम् आद्ये कारणत्वं तटस्थ-
लक्षणं चेत्युभयोः × द्वितीये कारणमनूद्य एकत्वविशिष्टं ब्र ×

Colophon :

— — —

164

Sl. No. 37680 **जाबालोपनिषद्व्याख्या** **Ms. No. P. 5772/29**

Beginning

जाबालोपनिषद्व्याख्यां ख्यापयन्तं सुधानिधिम् ।
करिष्ये प्रीयतां देवः विमुक्तोऽयं परेश्वरः ॥
सन्न्यासां उपनिषदां सङ्गतीर्थजन्मनां (?)

End:

करोति × स्वल्पमधिकं वा कालमनुव्यासपरमहंसशब्दाभिधेयः
नाम निश्चितं इतीति उपनिषत्समाप्ता ॥
इति चतुर्थखण्डः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्य आनन्दात्मपूज्यपादशिष्यस्य श्री
शङ्करानन्दभगवतः कृतिः जाबालोपनिषद्दीपिका समाप्ता ॥

165

Sl. No. 37682 **जीवन्मुक्तिविवेकः** **Ms. No. C. 745**

Beginning :

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
वक्ष्ये विविदिषान्यासं विद्वन्न्यासं च भेदतः ।
हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च वै क्रमात् ॥ २ ॥

End :

तथाच स्मर्यते—

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किञ्चित् कर्तव्यं अस्ति चेन्न स तत्त्ववित् ॥
जीवन्मुक्तिविवेकेन बन्धं हार्दं निवारयन् ।

Colophon :

इति जीवन्मुक्तिविवेकः समाप्तः ॥

166

Sl. No. 37684 जीवप्रबोधः Ms. No. P. 1968/5

Beginning

विजानामि परं बुद्धेः वीतसंसारविभ्रमः ।
प्रसादाद्यस्य विज्ञानं तस्मै श्रीगुरवे नमः ॥
प्रसादाद्यस्य + प्रणतोऽस्म्यहम् ।
सद्रूपं सर्वभूतस्थं + नतोऽस्म्यहम् ॥
तापत्रयाग्नितप्तानां भवाम्भोधौ निमज्जताम् ।
शरण्यो विष्णुरेवेति प्राहुरार्याः सनातनाः ॥
तमीशं सर्वभूतस्थमजानानः पुनः पुनः ।
निमज्जामि भवाम्भोधावहो पश्य ममाज्ञताम् ॥

End

स्वात्मतीर्थं परित्यज्य अहो नित्यमखण्डितम् ।
इदं तीर्थमिदं तीर्थमिति मुह्यन्ति साधवः ॥
मनोमयानि तीर्थानि विहाय सकलात्मके ।
अहं तु स्वात्मतीर्थे वै विमज्जामि पुनः पुनः ॥
इमं जीवप्रबोधं यः पठेच्छ्रद्धासमन्वितः ।
वीतसंसारसन्तापः स सुखं समवाप्नुयात् ॥

Colophon :

इति जीवप्रबोधः समाप्तः ॥

167

Sl. No. 37686 जीवब्रह्मैकत्वम् Ms. No. P. 10060/4

Beginning :

नत्वाचार्यात्मानं श्रीशं मत्वा जीवब्रह्मैकत्वम् ।
ह्यष्याम्यद्वैतस्वाराज्ये तद्ब्रह्माहं मोहातीतम् ॥
यत्र स्त्रीत्वेनादिभ्रान्त्या विश्वं नानारूपं भाति ।
सिन्धौ यद्वत्फेनोर्म्यादिस्त × ॥

End :

जीवब्रह्मैकत्वख्याते ग्रन्थे चित्तं यः सन्धते ।
हित्वा मोहं वीतक्लेशः सम्प्राप्नोतिब्रह्मैकत्वम् ॥

Colophon :

— — —

168

Sl. No.37687 जीवब्रह्मैकत्वम् Ms. No. E. 526

Beginning :

यत्सत्त्वं निखिलस्य यत्र निवसत्येतत्समस्तं जगत् ।
यत्सत्त्वान्वयतोऽस्य सत्वमिह यद्भासाखिलस्यास्य धीः ।
यत्साक्षात्कृतिरात्मतत्त्वविषयाऽज्ञानापहारक्षमा
तत्तजो हृदि भावयेऽहमनिशं श्री दक्षिणास्याभधम् ॥
जीवबन्ध परिमोचनार्थिभिः
जीवजन्मफललिप्सुभिर्बुधैः ।
जीवराज्यसुखदो मयोदितो
जीवराज्यविजयो विचार्यताम् ॥

End :

देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिने
त्येवं प्राञ्जलिना मया सविनयं स्वाग्रेऽर्थितस्येशितुः ।
यस्य श्रीकरुणाकटाक्षविभवप्राप्तात्मविद्योऽस्म्यहं
वन्दे मुनिवन्दनीयचर श्रीदक्षिणास्यंणं गुरुम् ॥
जीव × विचार्यताम् ॥

Colophon :

इति श्रीसर्वदेवतासार्वभौमश्रीमोक्षसाम्राज्याधीश्वरश्रीदक्षिणामूर्तीश्वर-चरणप्रभावपरिलब्धपरमभाग्यसत्फलभूताद्वैतब्रह्मविद्यामहाधनेन कर्म्मपापिकुल-जलधिपूर्णसुधाकरेणामरेश्वरशास्त्रिणा स्वानुभवानुरोधेन विरचितं बन्धमोक्ष-विचाररूपं जीवराजविजयसमाख्यं वेदान्तप्रकरणं समाप्तम् ॥

169

Sl. No: 37688 जीवेश्वरप्रकरणम् Ms. No. P. 2035/12

Beginning :

तत्त्वमस्यादिवाक्यार्थज्ञानेच्छूनां अबोधे तत्त्वं पदार्थत्वं जीवस्वरूपं विविच्यते। तत्र जीवो नाम अन्तःकरणान्तःकरणाधिष्ठानचैतन्यान्तःकरणप्रति-बिम्बचैतन्यमेव । तत्र यं मिलित्वा जीव × व इत्युच्यते ॥

End :

इत्येवं जीवेश्वरस्वरूपं विचार्य एतौ जीवेश्वरौ मायाकल्पिताविति निश्चित्य जीवेश्वराधिष्ठानभूतः निर्विकारः निरवयवः असङ्गः परिपूर्णः स्वप्रकाशः सर्वसाक्षी प्रत्यगात्माहमिति यः निश्चिनोति स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वं रमणीयम् ॥

Colophon :

इति जीवेश्वरप्रकरणम् ॥

170

Sl. No. 37689 ज्ञानतत्त्वकारिका Ms. No. C. 4721/10

Beginning :

तयोपायतया वा केवलस्य दर्शनस्य विधानायोगात् द्रष्टव्य इत्यनेन ध्यानगतदर्शनसमानाकारतैव विधीयते । न च लक्षणा दोषः । उक्तरीत्या दर्शनस्य विधानानुपपत्त्या तस्याः प्रामाणिकत्वात् ॥

End:

यत्र नान्यत्पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमेति तदुत्तर-वाक्यादवसीयते । तत्र हि कृत्स्नस्यापि वस्तुजातस्य शरीरभूतविभूत्यन्तर्ग-तत्वात् ऐश्वर्यापरपर्याय × ॥

Colophon :

— — —

171

Sl. No: 37691 ज्ञानवासिष्ठसंग्रहः Ms. No. P. 447/1

Beginning :

नित्याय परिपूर्णाय निर्विकारचिदात्मने ।
अखण्डानन्दरूपाय दक्षिणामूर्तये नमः ॥
कटाक्षवीक्षाक्षपितशिष्यसङ्घतमस्ततिम् ।
वन्दे वन्दितमौनीन्द्र × शिवं गुरुम् ॥
सारः संगृह्यते ज्ञानवासिष्ठेऽनुभवार्थिनाम् ।
जीवन्मुक्तिसुखानन्दमकरन्दरसाश्रयः ॥

End :

भूमिका त्रितयं त्वेतद्राम जाग्रदिति स्मृतम् ।
.थावद्भेदबुध्येवं जाग्रज्जाग्रति दृश्यति ॥
एतत्पूर्वोक्तं भूमिकात्रितयं जाग्रदिति स्मृतं × अस्यां भूमिकात्रितयां जाग्रदिव स्पष्टं भेदबुध्यनुवर्तमानात् । भूमिकेति लोकत्रयं व्याख्यम् ॥

Colophon :

— — — —

172

Sl. No: 37692 ज्ञानवासिष्ठसंग्रहः Ms. No. P. 9817/1

Beginning :

हृदाकाशे चिदादित्यो सदा भाति निरन्तरम् ।
नोदकैर्जायते सन्ध्या न मन्त्रोच्चारणं विधिः ॥
साधीयते परातत्वे सा सन्ध्या विधिरुच्यते ।
अहोरात्रद्वयोर्मध्ये ब्रह्मसञ्चारिणी कला ॥

End :

अज्ञानकार्यरहितं आद्यन्तं सन्तसावृतम् ।
एकपीठं जगत्सर्वं एकमाकाशमालयम् ॥
ईश्वरस्य गृहं विश्वं कुतः श्रीमा + लम्बनम् ॥

Colophon :

इति श्रीशङ्कराचार्यविरचिते ज्ञानसन्यासविधिः समाप्तः ॥

173

SI: No: 37693 जीवप्रबोधः Ms. No. P. 8366

Beginning :

सङ्गमेनाञ्जसा युक्तिर्लभ्यते मुच्यते यथा ।

शिखिध्वजः —

अहोनुमोदितोऽस्मद्यचिरात्सुरसुत त्वया ।
मौर्चात् दार्य समसंगमुत्त्वा हेमवसंवने ॥

End :

हहोनुमेक्षयं या × मन्ये पापमशेषतः । (?)
एतत्संक्षेपतः प्रोक्तं मयालोच्य पुनः पुनः ।
अस्मिन् शास्त्रार्थसर्वस्वे श्रद्धां कुरुत सज्जनाः ॥
प्रमादादप्रमादाद्वा यदज्ञानान्मयेरितम् ।
तत्क्षम्यन्तु नमन्तो × पण्डितास्समदर्शिनः ॥

Colophon :

इति श्री नृसिंहविरचिते ज्ञानसर्वस्वप्रकरणं द्वादशं समाप्तम् ॥

174

SI. No: 37695 जीवप्रबोधः Ms. No. C. 2033

Beginning :

यस्यादिशेषार्यगुरोः प्रसादा-
दहं विमुक्तोऽस्मि शरीरबन्धात् ।
अखण्डसच्चित्सुखदायकस्य
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

यस्याचार्यस्य प्रसादादनुग्रहात् शरीरबन्धादहं विमुक्तोऽस्मि तस्या-
खण्डसच्चित्सुखदायकस्य आदिशेषार्यगुरोरङ्घ्रिपद्मं नित्यं प्रणतोऽस्मीत्यन्वयः ।

End:

इति परमरहस्यं वेदवेदान्तसारं
हृतभवभयबाधं ज्ञानसर्वस्वरूपम् ।

गुरुवरपदभक्त्या प्राप्तविद्याय देयं
विरहितघनभक्तिश्रेयसे नैव देयम् ॥

एतत्संक्षेपतः प्रोक्तं मयालोच्य पुनः पुनः ।
अस्मिंछास्त्रार्थसर्वस्वं श्रद्धां कुरुत सज्जनाः ॥

प्रमादादप्रमादाद्वा यदज्ञानान्मयोदितम् ।
तत्क्षाम्यन्तु समालोक्य पण्डिताः समदर्शिनः ॥

Colophon :

इति श्रीनृसिंहविरचिते ज्ञानसर्वस्वसङ्ग्रहे स्वरूपानुसन्धानप्रकारमङ्गळाचरणं नाम प्रकरणं द्वादशम् ॥

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्मते ।
पूर्णस्य पूर्णमादाय पूर्णमेमावशिष्यते ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । वंशर्षिभ्यो नमो गुरुभ्यः ॥

175

SI. No: 37696 ज्ञानसर्वस्वसंग्रहव्याख्या **Ms. No. B. 544/2**

Beginning :

यस्य आचार्यस्य प्रसादात् अनुग्रहात् शरीरबन्धात् संसारबन्धात् अहं विमुक्तोऽस्मि, तस्य अखण्डसच्चित्सुखदायकस्य आदिशेषार्यगुरोः अङ्घ्रिपद्मं नित्यं प्रणतोऽस्मीत्यन्वयः ॥

End:

एतत्संक्षेपतः प्रोक्तं मयालोच्य पुनः पुनः ।
अस्मिन् शास्त्रार्थसिद्धान्ते श्रद्धां तु कुरु सज्जनाः ॥
प्रमादादप्रमादाद्वा यदज्ञानान्मयेरितम् ।
तद् क्षाम्यन्तु समालोक्य पण्डिताः समदर्शिनः ॥

Colophon :

— — —

176

Sl. No. 37697 ज्ञानाङ्कुशः Ms. No. P. 6237

Beginning:

महात्मनां सत्ववशाद्व्यवस्थिति-
र्द् × परिज्ञानसमाहितात्मनाम् ।
परापवादेष्वपि माद्दगात्मन-
स्समानये कल्पनया नयाङ्कुशम् ॥

End :

सर्वतः परिधावन्तं मनोमत्तमतङ्गजम् ।
ज्ञानाङ्कुशवशं नीत्वा पुनः पन्थानमानयेत् ॥
विषयान्प्रति भो विप्र सर्वानेव हि सर्वदा ।
अनास्था परमायैषा सा युक्तिर्मनसो जये ॥

Colophon :

इति ज्ञानांकुशश्लोकाः ॥

177

Sl. No. 37699 ज्ञानाङ्कुशः Ms. No: P: 4659/7

Beginning :

ज्ञानाज्ञाने विचार्येते कारणे चलमोक्षयोः ।
अनुग्रहार्थं लोकानां मया शास्त्रप्रदर्शिते ॥

ज्ञानाज्ञानस्वरूपमिदानीं विचार्यते । ज्ञानं च स्वस्वरूपयथार्थज्ञानम् । स्वस्वरूपयथार्थाज्ञानमज्ञानम् । किञ्च, अहं ब्रह्मास्मीत्यनुभवः–

End :

एवं विचार्थ अद्वितीयः असङ्गी अपरिच्छिन्नः अकर्ता अभोक्ता यः स एवाहमिति यो जानाति स एव मुक्त इति सकलवेदान्तसिद्धान्त इति सर्वं रमणीयम् ॥

Colophon :

इति श्री आदिशेषार्य गुरुविरचितम् ज्ञानाज्ञानप्रकरणं समाप्तम् ॥

178

Sl. No: 37700 **ज्ञानामृतम्** Ms. No: P. 1968/7

Beginning :

देहेन्द्रियगुणातीतं सर्वप्रत्ययसाक्षिणम् ।
भावयन्तं स्वमात्मानं शिवरामगुरुं भजे ।
दृग्रूपेण + + । + + ॥ + + ।
+ + वासुदेवाय ते नमः ॥
सर्वेषामात्मलाभाय सर्वभूतात्मवेदनम् ।
यदहं तत्प्रवक्ष्यामि लोकालोकप्रकाशकम् ॥
घटोऽयं पट इत्येतज्ज्ञानमर्थप्रकाशकम् ।
सर्वलोकप्रसिद्धत्वान्नेति वक्तुं न शक्यते ॥

End :

संकल्परहितं ज्ञानं नित्यमेकं निराश्रयम् ।
अखण्डमनिदं सत्यं स एवात्मेति गीयते ॥
अज्ञेयमिति संकल्पं त्यक्त्वा भावप्रकाशकम् ।
विशुद्धं चिन्मयं नित्यं वासुदेवं सदा भजे ॥
एतज्ज्ञानामृतं लोके यः पिबत्याशु विज्वरः ।
स संकल्पगुणातीतं पदमेकं प्रपद्यते ॥

Colophon :

इति ज्ञानामृतं समाप्तम् ॥

179

Sl. No. 37701 **णत्वदर्पणम्** Ms. No. B. 837/1

Beginning :

नारायणं नमस्कृत्य तत्र णत्वस्य दर्पणम् ।
यावद्बोधोदयं साधु करिष्यति नृकेसरी ॥
नारायणशब्दो विष्णुवाचीति निर्विवादम् ।

लिङ्गपुराणे विष्णुरुवाच—

शिवाय शिवलिङ्गाय व्यापिने व्योमव्यापिने ।
जलाय जलभूताय नमस्ते जलव्यापिने ॥

End :

न तारा बाधित नारायणपदेप्सु नेत्यर्थः । नारायणपदं वैकुण्ठं तस्य न तारां बाधितत्वं न दास्यामि इति प्रतिषेधाविषयत्वमितिद्रष्टव्यम् ॥

Colophon :

इति नरसिंहशास्त्रिकृतणत्वदर्पणं सम्पूर्णम् ॥

180

Sl. No. 37703 तत्त्वकौस्तुभः Ms. No. P. 3004

Beginning

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्ति बरीभर्ति संजरीहर्ति लीलया ॥
केलदीवेंकटेन्द्रस्य निदेशाद्विदुषां मुदे ।
ध्वान्तोच्छित्तौ पटुतरस्तन्यते तत्त्वकौस्तुभः ॥
फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
शांकरादथ भाष्याब्धेस्तत्त्वकौस्तुभमुद्धरे ॥
इह खलु केचन पाञ्चरात्राद्यागमांस्तदनुसारिपुराणभागांश्चोपजीव्य—

End :

एवं स्थिते सति श्रीशंकरभगवत्पादकृ तं निरु र्ोज्वलं वाचस्पति मिश्रप्रभृतिभिः पण्डितवरैर्निष्कर्षं प्रापितं शारीरमेव भाष्य × .तः ॥

Colophon :

इति श्रीमद्विद्वन्मकुटमाणिक्यलक्ष्मीधरभट्टसूनु भट्टोजिभट्टविरचिते तत्त्वकौस्तुभे द्वितीयपरिच्छेदे चतुर्थाध्यायस्य चतुर्थः पादः ॥

181

Sl. .No. 37707 तत्त्वकौस्तुभः Ms. No. C. 4501

Beginning :

फलमाकलप्रत्ययव्यलीकं विषये स्याद्विषमेपि यः प्रयासः ।
पणितः चरणारविंक्षेणु त्रसरेणुर्यदि सर्वमङ्गलायाः ॥ (?)

\+ इह खलु प्रपञ्चस्य तत्वमासंसारं सर्वानुभवसिद्धं ×
यदनुरोधादौपनिषदैरपि व्यावहारिकं सत्वमुपागम्यते । परन्तु –

End :

परमतदूषणपरस्य सूत्रस्य प्रतिपादकत्वेन व्याख्यातस्यात्यन्तनमवितथत्त्वाच्च ।
एतेन संसतिवाक्ये × व्यर्थक्रियाकारित्वादिविशेषणं नि ×
तव्यसमानयोगक्षेमत्वात् ॥

Colophon :

— — —

182

Sl.No. 37712 तत्त्वनिरूपणम् **Ms. No. A. 3763**

Beginning :

× त्वादिविरुद्धधर्मलिङ्गकानुमानेन तत्सहकृतया द्वासुपर्णेत्यादि
श्रुत्या च विरोधेन तत्वमसीत्यादिवाक्यात्तदभेदप्र × ब्रह्मणोऽपि
न सुखत्वम् कोशे 'स्यादानन्दथुरानन्द' इति पुंस्त्वाभिधानादुक्तश्रुतावानन्द
मिति क्लीबत्वस्य अर्शआदित्वकल्पनेन मत्वर्थीयाच्प्र × नेव निब
द्धतया अनन्दवत्वस्यैव सिद्धेः ।

End :

तदुक्तं वार्तिकामृते —

तत्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ।
अविद्यासहकार्येण नासीदस्ति भविष्यति ॥
× सच्चिदानन्दैकरसप्रत्यग्ब्रह्मस्वरूपावस्थानलक्षणो मो × ॥

Colophon :

× × ×

× पादपाथोजपरिचरणपरायणेन श्रीमद्राघवानन्दसरस्वतीपूज्यपाद
शिष्ये × निरूपणं संपूर्णम् ॥

183

Sl. No. 37720 तत्त्वबोधः Ms. No. P. 2100/4

Beginning :

संसारं तर्तुमिच्छूनां प्रस्थानानधिकारिणाम् ।
गुरुं विनायकं नत्वा तत्त्वबोधो विधीयते ॥

साधनचतुष्टयं नाम–नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषङ्कसम्पत्, मुमुक्षुत्वं च ॥ नित्यानित्यवस्तुविवेको नाम— सच्चिदानन्दस्वरूपमेकं ब्रह्मैव नित्यम् ।

End:

चिन्मात्रस्वरूपमेवाहमिति यो जानाति स एव मुक्तः इति सिद्धान्तः ॥
स्थूलसूक्ष्मादिदेहानां आत्मन्यारोप एव च ।
अपवादस्तथाऽन्येषां सम्यगत्र प्रदर्शितः ॥

Colophon :

— — —

184

Sl. No. 37721 तत्त्वबोधः Ms. No. C. 445

Beginning :

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ।
मुमुक्षूणां हितार्थाय तत्त्वबोधो विधीयते ॥ १ ॥

साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनभूतं तत्त्वविवेकप्रकारं वक्ष्यामः । साधनचतुष्टयं किं नित्यानित्यवस्तुविवेकः × मुमुक्षुत्वं चेति ॥

End ;

तथाच । आत्मवित् संसारं तीर्त्वा ब्रह्मानन्दमिहैव प्राप्नोति च । तरति शोकमात्मवित् इत्यादिश्रुतिः ॥
तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा ।
ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगताशयः ॥
इति स्मृतिः ॥

Colophon :

इति तत्वबोधः सम्पूर्णः ॥

185

Sl. .No. 37723 तत्त्वबोधावमर्शः Ms. No. C. 7982/15

Beginning :

स्वप्रकाशशिवमूर्तिरेकिका
तद्विमर्शतनुरेकिका तयोः ।
सामरस्यवपुरिष्यते परा
पादुका परशिवात्मने गुरोः ॥ १ ॥

End :

सर्वतः स्फुरणमेव संविद-
श्चामरं विधूतचामरक्रमम् ।
विश्वदुर्लभविचित्रनिर्वृतेः
वीक्षणेक्षणभवो भवस्तपः ॥ २ ॥
× षणत्रयवतश्च वर्पणो
स्तत्त्वसञ्चय × ॥

Colophon :

— — —

186

Sl. No. 37724 तत्त्वबोधोपनिषत्प्रकरणम् Ms. No. B. 375/3

Beginning

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ॥
मुमुक्षूणां हितार्थाय तत्वबोधो विधीयते ॥
साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनभूतं तत्वविवेकप्रकारं वक्ष्यामः ॥

End :

ज्ञानिदेहं गङ्गायां वा चण्डालवाटिकायां वा यदि पतति तदा मुक्ता एव यथा ज्ञानं प्राप्य तथैव सर्वकर्माणि कृत्वा मुक्तः सन् आनन्दो भूत्वा कृतार्थो भवति ॥

Colophon :

इति श्री परमहंसपरिव्राजकाचार्य श्रीवासुदेवेन्द्र तत्त्वबोधप्रकरणं समाप्तम् ॥

187

Sl. No. 37725 तत्त्वमसिप्रबोधः Ms. No. P. 5793/8

Beginning :

श्रीगुरुचरणद्वन्द्वं वन्देऽहं महितदुस्सहद्वन्द्वम् ।
भ्रान्तिग्रहोपशान्तिं पांसुमयं यस्य भसितमातनुते ॥ १ ॥
देशिकवरं दयालुं वन्देहं निहतसकलसन्देहम् ।
यच्चरणद्वन्द्वमनुभवमुपदिशति तत्वमस्यर्थम् ॥ २ ॥

संसारदावपावकसन्तप्तस्सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणैर्वाक्यैश्शिष्यः प्रबोध्यते गुरुणा ॥ ३ ॥
अस्ति स्वयमित्यस्मिन्नर्थे कस्यापि संशयः पुंसः ।
तत्राब्रह्मेऽपि संशयश्चेत्स × स्स एव भवसि त्वम् ॥ ४ ॥

End:

विद्यास्थितये प्राज्ञैः साधनभूताः प्रयत्ननिष्पाद्याः ।
लक्षणभूताः पुरुषाः स्वतश्च स्थिताः स्थितप्रज्ञैः ॥ १६१ ॥
स्वात्माववोधपू × वारितरङ्गवदैक्यं
× स्वान्ते पश्यन्ति पूर्णबोधेन ॥

Colophon :

— — —

188

Sl. No. 37727 तत्त्वमसिसिद्धान्तः Ms. No. C 2292

Beginning :

ते पिता पुत्राख्यायिका विया × सारि × दर्शन
× श्वतकेतुरिति × त्वाय पौत्र आसव × य मा
× योग्यै विद्याभाजकैः मन्वाना त × कालाय × तकेतो
× ह्य च ×

(६ तमे पत्रे) तत्र प्रथमं श्रीरामानुजाचार्यमतखण्डनम् तथाहि ।
विकारो वा + गालम्बनमा ं नामधेये +

End :

अनेन च जीवानां अदाह्यत्वं अच्छेद्यत्वं च दर्शितं पितुः सकाशतः श्वेत × विजज्ञाविति। द्विरुच्चारणे तु परस्वस्वरूपरूपज्ञानाभिप्राय × म × ज्ञः ॥

Colophon :

इति श्रीसिद्धिश्रीमहाराजा × जा श्रीमहाराज श्रीराजबहादु श्रीसीतारामचन्द्रकृपा × रि विश्वनाथसिंहकृतछान्दोग्यो × वार तत्वमस्यर्थसिद्धान्तस्समाप्तः ॥

189

Sl. No. 37729 तत्त्वयाथार्थ्यदीपनम् Ms. No. C. 3910/2

Beginning :

पुरुषः स जयत्याद्यः सा प्रकृतिरीश्वरी ।
याभ्यां संयुज्य सृज्यन्तेऽनन्तब्रह्माण्डकोटयः ॥
कपिलासुरिपञ्चशिखान् गुरून् विज्ञानाचार्यवर्यांश्च ।
प्रणमामि गणेशः कुरुते तत्वयाथार्थ्यदीपनम् ॥

End :

स्वतन्त्रत्वात्स एवैकः कर्ता गोपालबालकः ।
श्रीकृष्णाख्यो महेशानो दारुयन्त्रंसमस्त्वहम् ॥
पुराणार्थबुभुत्सूनां बोधायैव मयेरितम् ।
तेभ्यः समर्पितं चैतत्तेनापि प्रीयतां हरिः ॥

Colophon :

इति श्रीभामगव(?)स्वनाथदीक्षितसूनुगणेशविरचितं तत्वयाथार्थ्यदीपनं सम्पूर्णम् ॥

190

Sl. No. 37732 तत्त्वयाथार्थ्यदीपनम् Ms. No. P. 2883/1

Beginning :

विश्वस्य योनिं विश्वेशं विज्ञानानन्दविग्रहम् ।
नरकेसरिणं वन्दे प्रत्यक्षं पुरुषोत्तमम् ॥

साक्षात्कृतब्रह्मभासा + । + वन्दे यवीयांसं जगत्पतिम् ॥
गुरुणा करुणापूर्वमुपदिष्टाद्वयात्मकः ।
कुर्वे तत्त्वविवेकं तं वीक्षतां नरकेसरी ॥

इह खलु कश्चिद्भाग्योदयात् निर्व्यलीकं नित्यादिभिराराधिताराध्यपाद भगवदनुग्रहादतिविमलमानसः स्वयमेवेत्थं जगत्तत्त्वमारचयति ।

End :

तस्मात्सिद्धं जीवस्याद्वैतब्रह्मसाक्षात्कारात् भेदभ्रमनिवृत्त्या सच्चिदानन्दावाप्तिरिति ।

जिज्ञासितव्यमनवद्यपुमर्थचित्तैः
प्रज्ञासुखं स्वमहिमानमशेषयोनि ।
शास्त्रैकहृद्गतमशेषविधेयशेषि
श्रेयोऽस्तु तन्नरमृगाकृति मङ्गलाब्धि ॥
तुष्यन्त्यव्यक्तमनसो मुग्धस्य पितरो ननु ।
मम त्वत्प्रीतये भूयात् वागियं नरकेसरिन् ॥
क्वाहं महीयसाशास्यं वात्सल्यं क्व गुरोरिदम् ।
अपि चण्डालकलशे काशते खलु चन्द्रमाः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीजगन्नाथाश्रमपूज्यपादशिष्य श्रीनृसिंहाश्रममुनिविरचिते तत्त्वबिवेके द्वितीयः परिच्छेदः ॥
समाप्तश्च ग्रन्थः ॥

191

Sl. No. 37738 तत्त्वयाथार्थ्यदीपनव्याख्या Ms. No. P. 2883/2

Beginning :

यदालिङ्ग्य प्रमाणानि बोधयन्त्यात्मनः स्फुटम् ।
प्रमेयं प्रचुरानन्दं तं वन्दे नृहरिं गुरुम् ॥

प्रेक्षावत्प्रवृत्त्यर्थं अभिधेयादि दर्शयन्नेव निर्विघ्नपरिसमाप्तिकामनया कृतं मङ्गळं शिष्यशिक्षायै ग्रन्थतो निबध्नाति विश्वस्येति । प्रत्यञ्चं पुरुषोत्तमं वन्द इत्यनेन जीवब्रह्माभेदस्तत्त्वमसीतिवाक्यार्थः प्रकरणप्रतिपाद्यो दर्शितः ।

End :

स्वस्येदं सामर्थ्यं गुर्वायत्तमिति दर्शयन् गुरुं महीकरोति—काहमिति ।
(यदीक्षणेन सन्नुन्ना) यदि क्षणेन सन्नाम मायाविक्रीडितं जगत् ।
श्रीनृसिंहस्य तस्यैषा कृतिः कल्याणदास्तु नः ॥

अरुचिरिह न कार्या साधवः साध्वसाधु-
प्रकटनपटुचेतो मत्सरो वो यदि स्यात् ।
न हि कुशलपरीक्षादत्तचित्ताः कथंचि-
च्छतमखमणिमालां काचबुद्ध्या त्यजन्ति ॥
(बुद्ध्योत्सृजन्ति पाठः)

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीजगन्नाथाश्रमपूज्यपादशिष्य श्रीनृसिंहाश्रममुनिविरचिते तत्त्वविवेकदीपने द्वितीयः परिच्छेदः ॥ समाप्तश्च ग्रन्थः ॥

192

Sl. No. 37744 तत्त्वविवेकदीपनव्याख्या Ms. No: P. 431

Beginning :

× चित्ते हरिं चिन्तये ॥
सौदामिनी ततिपिशङ्गजटाकलापं
धीमुद्रिका कलित ×
पदारविन्दं वन्दामहे बोधमरन्दसान्द्रम् ॥
× अद्वैतरत्नं व्याकरोम्यशेषान् प्रकाशमालोक्य मुदे बुधानाम् ॥
प्रत्यगभिन्नब्रह्मानुचिन्तनरूप–

End:

जीवत्वपरमात्मत्वयोरेव तथात्वाभ्युपगमादित्यत्राह—मतान्तरइति । जीवत्वं आश्रयोपाधिरेव न तु विशेषणम् । इति स्फारे × तथोक्त-मित्यर्थः ॥

Colophon :

इति प्रथमः परिच्छेदः ॥

193

Sl. No. 37745 तत्त्वविवेकदीपनव्याख्या Ms. No. P. 2243

Beginning:

अपरोक्षार्थविषयकत्वेनाप्यपरोक्षरूपतया ततोऽविद्यानिवृत्त्यसम्भवेन अखण्डस्य ब्रह्मणः प्रतिवद्धप्रकाशत्वेन स्फुरणाभावात्तेन प्रहसन्मुखपङ्कज-स्फुरणसहकृततया × रविद्यानिवर्तनक्षमत्वं वेदान्तिभिरङ्गीकृतमिति ॥

End :

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीमत्स्वयंप्रकाशसरस्वतीपूज्य-पादशिष्याखण्डानन्दसरस्वतीविरचितायामद्वैतरत्नकोशदीपिकायां प्रथमः परिच्छेदः ॥ + +

तत्वमस्यादिश्रुतिप्रमाणानुसारेणेत्यर्थः । वस्तुतद्भेदेति । तन्मते भेदाभेदयोः वस्तु ×

Colophon :

— — —

194

Sl. No. 37747 तत्त्वविवेकदीपिनव्याख्या Ms. No. P. 2108

Beginning :

अनिर्वचनीयस्वगुण × पद्यतां शुक्तिरजतादिवत् किमविद्यावृत्ति-कल्पनयेति चेत् न—अनिर्वचनीयस्थाणुत्वादेः शुक्तिरजतादाविव दि × यात्मकस्मरणप्रसङ्गात् ।

End :

परमतसिद्धमायास्वस्वातन्त्र्यनिरासाय सदधिष्ठानत्वोक्तिरिति सर्वं सुस्थम् ॥

गम्भीरभावटीकेयं व्याख्याता बालभावतः ।
किञ्चिद्विजृम्भितं चात्र तद्गृह्णन्तु विमत्सराः ॥
मत्कृतिर्दोषकीर्णाऽपि ज्ञानेन्द्रानतिपूर्विका ।
महन्निबन्धसम्बद्धा प्राप्स्यति प्रचयं भुवि ॥
कृत्यानया रघुपतिः परात्मा कुलदैवतम् ।
सन्तुष्यतु शुकालापे तत्पोषकजनो यथा ॥

Colophon :

इति श्रीमद्ज्ञानेन्द्रसरस्वतीचरणारविन्दनिषेवकनिषेविणा श्रीरामान्वय-प्रसूतद्वादाशाहेज्यसूनुनाग्निहोत्रमनीषिणा विरचितायां तत्वविवेकटिप्पण्यां अद्वैतरत्नकोशपूरण्यां द्वितीयः परिच्छेदः ॥ समाप्तश्च ग्रन्थः ॥

195

Sl. No: 37749 **तत्त्वविवेकदीपिनव्याख्या** Ms. No: P. 3407

Beginning :

यद्वीक्षा जगदुत्पत्तिस्थितिसंहारकारणम् ।
यदात्मकमिदं वन्दे श्रीरामं तं पतञ्जलिम् ॥
ज्ञानेन्द्रापरनामानं + नमामि परमं गुरुम् ॥
भक्तभीतिकरं + पतञ्जलिमहं भजे ॥
श्रीज्ञानेन्द्रकृपापात्रं + संकलये गुरुम् ॥
नत्वा गुरून् नयसर्तॄन् द्वादशाहेज्यसूनुना ।
विविच्यतेऽग्निहोत्रेण टीका तत्वविवेचनी ॥

नृहरिमिति ॥ विग्रहविशेषोपहितस्वेष्टदेवतावाचकपदेन जगत्कारणं ब्रह्म लक्षयति । गुरुं नृहरित्वेनोपास्यमित्यर्थः ।

End :

ननु तच्छास्त्रं न प्रपञ्चात्यन्ताभावब्रह्मसम्बद्धं बोधयति, किन्तु तत्स्व-रूप × त्वात्यनिरासाय × धिष्ठानत्वोक्तिरिति सर्वं सुस्थम् ॥ +

कृत्वानया रघुपतिः परात्मा कुलदैवतम् ।
सन्तुष्य × शुका × षकजनौ यथा ॥

Colophon :

इति श्रीज्ञानेन्द्रसरस्वतीचरणारविन्दनिषेवकनिषेविणा श्रीरामान्वय-प्रसूतद्वादशप्राज्यसूनुना अग्निहोत्रमनीषिणा विरचितायां तत्वविवेकटिप्पण्यां अद्वैतरत्नकोशपूरण्यां द्वितीयः परिच्छेदः ॥

196

Sl. No. 37751 तत्त्वविवेकदीपनव्याख्या Ms. No: P. 3338

Beginning:

प्रणम्य दक्षिणामूर्तिं रघुनाथाश्रमान् गुरून् ।
भावप्रकाशिकाद्वैतरत्नकोशस्य रच्यते ॥

यदालिङ्ग्येति । यदित्यव्ययम् । यमित्यर्थः । यद्वा तमित्यत्र विधेयप्राधान्यात्पुल्लिङ्गनिर्देशः ॥ प्रमाणं प्रत्यक्षादिप्रमितिः तत्करणं वा । आलिङ्गनं आश्रयता विषयता च ।

End:

आत्मनः आकाशवैलक्षण्यमाह – आनन्दात्मेति । न चैवं दुःखप्रागभावार्थिनः प्रायश्चित्ते प्रवृत्तिर्न स्यादिति वाच्यम्, दुरितध्वंसार्थिन एव तत्र प्रवृत्तेः । अत एवेष्टसाधनताज्ञानमेव सर्वत्र प्रवर्तकम् । यद्वा यद्व्यतिरेके चासत्त्वमित्यत्र कादाचित्काभावो विवक्षितः प्रायश्चित्तानुरोधादिति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीरघुनाथाश्रमपूज्यपादशिष्य श्रीकाळहस्तीश्वर यज्वकृतायामद्वैतरत्नकोशभावप्रकाशिकायां द्वितीयः परिच्छेदः ॥

197

Sl. No. 37753 तत्त्वविवेकदीपनव्याख्या Ms. No. P. 385

Beginning:

वन्दे यशोदया श्लाध्यं सत्यान × पदैरितम् ।
नारायणानन्दकृष्णं नरत्राणपरायणम् ॥
श्रीमद्रामाध्वरीन्द्रेण कृष्णयज्वेन्द्रसूनुना ।
अद्वैतरत्नकोशस्य विवृतिः क्रियतेऽधुना ॥
प्रेक्षावत्प्रवृत्त्यर्थं —

End:

स्वेष्टदेवतानुसरणार्थम् । तथा च प्रत्यगभिन्नसकलदुःखनिर्मुक्तचैतन्यात्माखण्डानन्दोऽस्माकमभिव्यज्यतामिति प्रार्थनार्थः ॥

Colophon:

इति श्रीमद्रामाध्वरीन्द्रेण विरचितायां अद्वैतरत्नकोशपालिन्यां द्वितीयः परिच्छेदः समाप्तः ॥

198

Sl. No. 37758 — तत्त्वविवेकदीपनव्याख्या — Ms. No. A. 806

Beginning:

श्रीनृहरिं पुराणपुरुषं श्री श्रीनिवासं पतिम्
हस्त्यद्रीश्वरमादिमध्यरहितं रामं घनश्यामलम् ।
कृष्णं वृष्णिपतिं हयाननमहं विद्याविलासाननं
विष्वक्सेनमशेषविघ्नशमनं देवीं भजे शारदाम् ॥

× न्वैशपयोनिधिविधुकमलावासदेशिकसुतमहोबलावासम् । +
× श्रीनृसिंहाकृतिः सः ॥
श्रीमत्तत्त्वविवेकस्योपन्यासः क्रियते मया ।
साद्वैतरत्नकोशस्य नृसिंहस्तेन तुष्यतु ॥

End:

× × दूषणानां समुद्धृतिम् ।
× रयन्नन्तरात्मा मे नृसिंहः हर्षयेद्बुधान् ॥

इह खलु कश्चिद्द्विपश्चित्कुतश्चिद्भाग्योदयान्निर्व्यळीकं नित्यादिभिराराधिताराध्यपादभगवदनुग्रहा × मानसः—

न च मोक्ष इति वाच्यम्, × एव भावात् । तथाहि— उपासनार्थानो ब्रह्मणि किं वेदान्ताः प्रमाणं किं वान्यत् । नाद्यः । विधिपदात्तदन्यसि +

Colophon:

— — —

199

Sl. No. 37762 — तत्त्वविवेकदीपिनव्याख्या — Ms. No. C. 1829

Beginning:

ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रवर्तितम् ।
श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुम् ॥

देहो नाहं श्रोत्रवागादिकानि
नाहं बुद्धिर्नाहमध्यासमूलम् ।
नाहं सत्यानन्दरूपश्चिदात्मा
मायासाक्षी कूटस्थ एवाहमस्मि ॥

अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वात् तस्य च पदार्थज्ञानाधीनत्वात् तदर्थे तत्पदार्थं निरूपयामः ॥

End:

श्रीमत्स्वयंप्रकाशाख्यगुरुणा करुणावशात् ।
उपदिष्टपरात्मैक्यं तत्त्वमविदितं मया ॥
+ । + ॥ + । + । + ॥ + । + ॥
परमसुखसमुद्रे मज्जनात्तन्मयोऽहं ।
गळितनिखिलभेदः सत्यबोधैकरूपः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्य भगवन्महादेवसरस्वतीविरचितं तत्त्वानुसन्धानं समाप्तम् ॥

200

Sl. No. 37763 तत्त्वानुसन्धानव्याख्या Ms. No. C. 734/6

Beginning :

यश्चिन्तयाप्ताः परमात्मभावमज्ञानतत्कर्मनिवर्तनेन ।
त्यक्तैषणाः संयमिनो महान्तस्तं कृष्णमाद्यं शरणं प्रपद्ये ॥

ब्रह्मसाक्षात्काराद्विदेहमुक्तिरेकैव भवति । न जीवन्मुक्तिः । तत्र प्रमाणाभावात् ।

End:

तदिदमाह । अपरोक्षेत्यादिना । असत्वेति विषयस्यासत्त्वमापादयन्ति असत्वव्यवहारं जनयतीत्यसत्वापादकं नास्तीति व्यवहारकारणं तच्च तन्मोक्षहानं चेति तथा असत्वावरणं शक्तियुक्तमोक्षाज्ञाननिवृत्तिरित्यर्थः नामविषय सत्ताव्यवहारशून्यत्वं ततश्च षड्विधप्रमानिरूपणमर्थवदिति भावः ।

Colophon :

— — —

201

Sl. No. 37765 | तत्त्वोपदेशः | Ms. No. B. 763/3

Beginning :

ओंनमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मूलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥

\+ + +

वेदान्तैः सच्चिदानन्दस्वरूपमिति कीर्तितम् ।
व्याप्तमाकाशवत्सूक्ष्मं प्रत्यक्ज्योतिः प्रकाशताम् ॥

End :

प्रत्यग्ज्ञानमहाम्भोधेर्ज्ञानामृतमुपाहृतम् ।
पिबन्तः परमां सिद्धिं लभन्ते शिवयोगिनः ॥

तत्त्वोपदेशं शुकवच्च × चित्तोपि यः पठेत् ।
सतां सभां प्रविष्टोसौ सर्वज्ञ इति भाष्यते ॥

Colophon :

इति तत्त्वोपदेशे षष्ठोऽध्यायः समाप्तः ॥

202

Sl. No. 37766 | तप्तचक्रधारणनिषेधः | Ms. No. P. 3303/1

Beginning :

अत्र केचित् पाञ्चरात्रप्रामाण्यमङ्गीकुर्वाणाः तदुक्ततप्तचक्रधारणानु-
तप्तचक्रधारणे श्रुत्यादीन् प्रमाणयन्ति । तत्र च तासां श्रुतीनां श्रुतित्वा-
भावमाशङ्क्य प्रत्यक्षवेदपठितानां वेदपाठादेव श्रुतित्वं ×

End :

एवमादिभिरनेकैर्वचनैर्निषिद्धं चक्रधारण × स्मार्तपौराणनिषेध
प्राबल्यात्पाञ्चरात्रविधिदौर्बल्याच्च नानुष्ठेयं चक्रधारणम् ॥

Colophon :

— — —

203

Sl. No. 37765 **तप्तमुद्राविद्रावणम्** Ms. No. P. 657/2

Beginning:

ब्रह्मविष्णुमहेशानां कारणं परमेश्वरम् ।
साम्बं नौमि शिवं दिव्यं मायाकल्पितविग्रहम् ॥
× कर्मविपाकाद्यैरपरामृष्टमीश्वरम् ।
गुरूणां च गुरुं वन्दे विष्णुमोङ्कारशब्दितम् ॥

End:

भगवद्गीतास्वपि—

तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥

इति शास्त्रो × जीवनेनैव सर्वेषामाचार्याणां अनुष्ठितत्वप्रतिपादनाच्च । तस्मात् वैदिकैः तप्तमुद्रा न धार्येति सिद्धम् ॥

Colophon:

इति श्रीमद्धारीतान्वयजलधिपूर्णचन्द्र श्रीमदुमामहेश्वराध्वरितनूज भास्करदीक्षितविरचिते तप्तमुद्राधारणविद्रावणे द्वितीयः परिच्छेदः ॥

204

Sl. No. 37768 **तलवकारोपनिषद्भाष्यटिप्पणम्** Ms. No. C. 3246

Beginning:

यच्छ्रोत्रादेरधिष्ठानं चक्षुर्वागाद्यगोचरम् ।
स्वतोऽध्यक्षं परं ब्रह्म नित्यमुक्तं नमामि तत् ॥

केनेषितमित्यादिकां तवलकाराशाखोपनिषदं व्याचिख्यासुः भगवान् भाष्यकारोऽहंप्रत्ययगोचरस्यात्मनः + व्याख्येयत्वं प्रतिजानीते— केनेषितमित्याद्येति ॥

End:

सगुणविद्यायाः क्रममुक्त्यर्थत्वात् क्रमेण प्राप्यं यत्कैवल्यं + तत्पूर्वोक्तमिहोपसंह्रियत इत्याह ॥ यो वै एतामित्यादिना ॥

योऽसौ सर्वेश्वरो विष्णुः सर्वात्मा सर्वदर्शनः ।
शुद्धबोधाम्बुधिः साक्षात्सोऽहं नित्योऽभयः प्रभुः ॥

End:

इति श्रीशङ्कराचार्यविरचितस्य तवल्कारो [केनो] पनिषद्भाष्यस्य टिप्पणं सपाप्तम् ॥

205

Sl. No. 37770 दशोपनिषद्रहस्यम् Ms. No. P. 2035/15

Beginning;

इदानीं तादात्म्यत्रयं निरूप्यते—तादात्म्यं त्रिविधम्—सहजकर्मज—तान्त्रिकभेदात्। तत्र सहजतनादात्म्यं निरूप्यते—चितः अहङ्कार प्रतिबिम्बे चिदहङ्कारयोःतप्ताय: पिण्डवदेकरूपतया प्रतीयमानत्वेन तत्प्रति बिम्बयुक्ताहङ्कारतत्प्रतिबिम्बतादात्म्यं सहजतादात्म्यमित्युच्यते ॥

End ;

एवं तादात्म्यत्रयं विचार्य एतत्तादात्म्यत्रयमहङ्कारस्यैव न तु साक्षिणो निरवयवस्यासङ्गस्य न इति यो निश्चिनोति स एव जीवन्मुक्त इति सर्ववेदान्त इति सर्वं हृद्यम् ॥

Colophon :

इति श्रीमदपादिशेषार्यविरचिते मजने तादात्म्यत्रयप्रकरणं समाप्तम् ॥
इदानीं तापत्रयस्वरूपमुच्यते—

206

Sl. No. 37771 दत्तात्रेयगोरक्षकसंवादः Ms. No. P. 2035/13

Beginning :

तापास्त्रिविधः—आध्यात्मिकाधिभौतिकाधिदैविकभेदात्। तत्र शरीराश्रिततक्षयरोगज्ञान ज्वरतापज्वरसन्निपातोदरशूलकर्णरोगप्रमुखरोगजन्यदुःख सन्ताप आध्यात्मिकः ॥

End :

इत्येवं विचार्य × तापत्रय × रीरस्यैव न हि देहेन्द्रियाद्यवस्थासाक्षिणो ममेति यो जानाति स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वं रमणीयम् ॥

Colophon :

इति तापत्रयप्रकरणं समाप्तम् ॥

207

SI. No. 37772 तैत्तिरीयानुभूतिप्रकाशिका Ms. No. P. 1814/4

Beginning :

ब्रह्मवल्यां ब्रह्मविद्यां तित्तिरिः प्राह यामिमाम् ।
वक्ष्ये सुखाववोधाय क्रीडन्त्वत्र मुमुक्षवः ॥
दर्शादिपितृमेधान्तैः कर्मभिर्बहुजन्मसु ।
अनुष्ठितैर्विविदिषा जायतेऽन्तिमजन्मनि ॥
ततो योगं समभ्यस्य संहितोपासनादिभिः ।
एकाग्रे साधितेऽथास्य विद्यां सूचयति श्रुतिः ॥

End :

स चोत्तरायणे प्रेत आदित्यं प्राप्यमुच्यते ।
अयने दक्षिणे प्रेतश्चन्द्रं प्राप्य विमुच्यते ॥
तैत्तिरीयकविद्यायाः प्रकाशेनोपसेवितः ।
मुमुक्षूननुगृह्णातु विद्यातीर्थमहेश्वरः ॥

Colophon :

इति श्रीविद्यारण्यकृतायां तैत्तिरीयानुभूतिप्रकाशिकायां द्वितीयोऽध्यायः ॥

208

Sl. No. 37773 त्रिपात्तत्त्वविवेकः Ms. No. A. 533/1

Beginning :

यत् सर्वशास्त्रसिद्धान्तं यन्नानामतसंमतम् ।
यदविद्यापदग्रासं तत्त्रिपाद्वैभवं भजे ॥
नत्वा श्रीदेशिकं मुक्तिमिच्छतां तत्प्रसिद्धये।
स्वेतरानेकभिद्ग्रास त्रिपाद्याथात्म्यमुच्यते ॥
खण्ड मतान्तरं किं स्यात् सर्वं त्रैपदमेव हि ॥

End :

वासुदेवेन्द्रसच्छिष्य रामचन्द्रेन्द्रयोगिना ।
तत्त्वं करेणोपदिशन्तमद्वयं × ॥

त्रिपात्तत्त्वविवेकोऽयं कृतः तुष्यन्तु पण्डिताः ॥
त्रिपात्तत्त्वविवेकोऽयं द्व्यशीतिग्रन्थसंमितः ॥

Colophon :

इति त्रिपात्तत्त्वविवेकः समाप्तः ॥

209

Sl. No. 37774 त्रिपात्तत्त्वविवेकविवरणम् Ms. No. A. 533/2

Beginning :

स्वाविद्यापदतत्वार्थकल्पनोन्मुक्तवैभवम् ।
ब्रह्ममात्रतया शिष्टं रामाख्यं त्रैपदं भजे ॥
नत्वा गुरुं निर्विशेषप्रबोधफलमिच्छता ।
तदुपायं त्रिपात्तत्त्वविवेकार्थो निगद्यते ॥

End :

पण्डा - परमाद्वैतावगतिः। तया इताः संयुताः पण्डिताः । ब्रह्मविद्या-वरिष्ठाः इत्यर्थः । अस्य ग्रन्थसंख्यां दशयिति—त्रिपादिति ।
श्रीवासुदेवेन्द्रशिष्योपनिपद्ब्रह्मयोगिना ।
लिखितेयं त्रिपात्तत्त्वविवेकविवृतिर्मुदा ॥

Colophon :

इति त्रिपात्तत्त्वविवेकविवरणं समाप्तम् ॥

210

Sl. No. 37776 त्रिपाद्वैभवम् Ms. No. P. 2212/1a

Beginning :

यत्सर्वशास्त्रसिद्धान्तं यन्नानामतसम्मतम् ।
यदविद्यापदग्रासं तत्त्रिपाद्वैभवं भजे ॥
नत्वा श्रीदेशिकं मुक्तिमिच्छतां तत्प्रसिद्धये ।
स्वेतरानेकचिद्ग्रासरतिपान्नारायणात्मनि ।

End:

द्वताद्वैतमिदास्पृष्टत्रिपान्नारायणात्मनि ।
तदशैश्चतुरंशाढ्यविद्यापादः प्रकल्पितः ॥

End :

निर्बीजब्रह्मविज्ञानसमकालं महामुनिः ।
निर्बीजसं—सामान्यब्रह्मैव भवति श्रुता ॥
श्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रयोगिना ।
उपेयश्रीरामनामपरमार्थो निरूपितः ॥

य इत्थं रामंनामार्थं ज्ञात्वा रामं स्मरेत्सदा ।
स याति परमाद्वैतमहासाम्राज्यवैभवम् ॥
सप्ताशीतिग्रन्थयुता श्रीरामार्थविवेकवित् ।
चिदिहास्तीति चिन्मात्रं इदं चिन्मयमेव च ।
चित्वं चिदहमेते च लोकाश्चिदिति भावयेत् ॥

Colophon :

— — —

211

Sl. No. 37777 त्रिपाद्वैभवव्याख्या Ms. No: P: 2212/1

Beginning :

स्वाविद्यापदतत्कार्य कलनोन्मुक्तवैभवम् ।
ब्रह्ममात्रतया शिष्टं रामाख्यं त्रैपदं भजे ॥
नात्वा गुरुं निर्विशेषप्रबोधफलमिच्छता ।
तदुपायत्रिपात्तत्वविवेकार्थो निगद्यते ॥

इह खलु स्वांशजप्राणिपटलस्वपद प्रापकोपायप्रदानपरमदयारूपेयं भवति त्रिपाद्विभूतिः + अशेषार्थप्रतिपादकं परमाद्वैतशास्त्रं प्रतिजानीते — यदित्यादि द्वाभ्याम् ॥

End :

ग्रन्थसङ्ख्यां विशदयति— सप्ताशीतीति ॥
श्रुतित एव तत्प्रकरणस्यापि चित्वमुपपद्यत इत्यर्थः । +
उपेयनामव्याख्येयमशीत्यधिशतत्रयम् ।

End :

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
उपेयनामविवेकव्याख्येयं लिखिता मुदा ॥

212

Sl. No. 37778 दक्षिणामूर्तिस्तोत्रव्याख्या Ms. No. P. 1781/1

Beginning :

कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरौ ।
नत्वाऽऽरभे लघुव्याख्यां दक्षिणाशामुखस्तुतेः ॥ +

इह खलु सर्वज्ञो भगवान् भाष्यकारो लोकानुग्रहैकप्रयोजनोपात्तदिव्य मङ्गळविग्रहो निखिलवेदान्तदुग्धाब्धेर्न्यायमन्तरेण + दक्षिणाशामुखं परमेश्वरं मनसा पूजयति विश्वं दर्पणेत्यादिना ।

End :

पुनः भूयोऽपि अष्टधा परिणतं मायापरिणामरूपमैश्वर्यं च अणिमादिक × दप्रतिहतं सिद्ध्येत् । स एकदाभवति त्रिनिधो भवति यदि नित्यलोककामो भवति । सङ्कल्पादेव तस्य पितरः × इत्यादि श्रुत्युक्तं सर्वं फलं भवतीत्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्स्वयंप्रकाशा × पूज्यशिष्य पुरुषोत्तमानन्दमुनिविरचित श्रीमच्छङ्करभगवत्पादीय दक्षिणामूर्ति- × सम्पूर्णमस्तु ॥

213

Sl. No. 37780 दक्षिणामूर्तिस्तोत्रव्याख्या Ms. No. P. 720/1b

Beginning :

मङ्गळं दिशतु मे महेश्वरो मङ्गलं दिशतु मे विनायकः ।
मङ्गळं दिशतु मे सरस्वती मङ्गळं दिशतु मे महेश्वरी ॥

आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविस्तौति स्वात्मानं परमेश्वरम् ॥

End :

प्रकाशात्मिकया शक्त्या स्वप्रकाशो दिवाकरः ।
प्रकाशयति यो विश्वं प्रकाशोऽयं प्रकाश्यताम् ॥

अन्तर्लक्ष्यविलीनचित्रपवनो योगी सदा वर्तते
यावन्निश्चलतां गमिष्यति तदा स्वात्मन्यकम्पोच्यते ।
मुद्रां सैव च खेचरीति कथिता यस्य प्रसादाद्गुरोः
भावाभावविवर्जितं स्फुरति तत्तत्वं भजे शाङ्करम् ॥

Colophon :

इति श्रीमच्छङ्करभगवत्पादाचार्यकृतदक्षिणामूर्तिस्तोत्रभावार्थवार्तिकं मानसोल्लासाख्यं सुरेश्वराचार्यकृतं समाप्तम् ॥

214

Sl. No. 37784 दक्षिणामूर्तिस्तोत्रव्याख्या Ms. No. P. 2347/8

Beginning :

आत्मलाभात्परो ला × स्तीति कवयो विदुः ।
तल्लाभार्थं कवि × ति स्वात्मानं परमेश्वरम् ॥

चित्रं वटतरोमू × गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥

स्वेच्छया सृष्टमाविश्य विश्वं योऽहमिति स्थितः ।
स्तोत्रेण स्तूयतेऽनेन स एष परमेश्वरः ॥

End :

राहुग्रस्तमिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

Colophon :

— — —

215

Sl. No. 37786 दक्षिणामूर्तिस्तोत्रवार्तिकव्याख्या Ms. No. P. 720/2

Beginning :

प्रोद्यच्छाखमहावटद्रुमतळे योगासनस्थं प्रभुं
प्रत्यक्तत्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननम् ।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं
हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्तिकम् ॥

नत्वाद्यान् शङ्कराचार्यमुख्यान् सर्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥

इह हि भगवान् भाष्यकारः × मङ्गळाचरणद्योत्योयमाद्यः श्लोकः—मङ्गलं दिशत्वित्यादि ॥

End :

यस्य दे × त्वं तात्पर्यतो व्याख्याय ग्रन्थप्रचयविघ्नप्रशान्तये शिष्टाचारलक्षणमङ्गळ × माचरति प्रकाशात्मिकयेति । आदित्यादिप्रकाशानामपि प्रभाकर इत्यर्थः । स्वयमेव प्रकाश्यतामित्यर्थः । दशमश्लोकव्य × त्यादि ॥

Colophon :

इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥
अनेन भगवान् श्रीमद्दक्षिणा × ज्ञानप्रदः सताम् ॥
इति श्रीदक्षिणामूर्ति × ख्यप्रबन्धे × सः समासः ॥

216

Sl. No. 37785 दक्षिणामूर्तिस्तोत्रव्याख्या Ms. No. P. 900/1

Beginning

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
+ + नम इदं श्रीदक्षिणामूर्तये ॥

कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरौ ।
नत्वाऽऽरभे लघुव्याख्यां दक्षिणाशामुखस्तुतेः ॥

इह खलु सर्वज्ञो भगवान् भाष्यकारः—

End:

सर्वात्मत्वमिति स्फूटीकृतमिदं + चैश्वर्यमव्याहतम् ॥
सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रत्युक्त सर्वं भवेदित्यर्थः ॥

एवमेषा कृत ।व्याख्या दक्षिणाशामुखस्तुतेः ।
यथामति तया तुष्टः दक्षिणामूर्तिरस्तु नः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री कैवल्यानन्दयोगीन्द्रकरकमल-
भृङ्गा।यमाणेन स्वयंप्रकाशयतिना विरचिता तत्त्वसुधाव्याख्या समाप्ता ॥

217

Sl. No. 37788 दक्षिणामूर्तिस्तोत्रव्याख्या Ms. No. P. 3965/2

Beginning :

कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरम् ।
नत्वारभे लघुव्याख्यां दक्षिणशामुखस्तुतेः ॥

इह खलु सर्वज्ञो भगवान् भाष्यकारः—
दुग्धोदधेर्न्यायमन्दरेण विचारनिर्मथना दाविर्भूताद्वैतामृतस्य +

End :

+ अव्याहतं क्वचिदप्यप्रतिहतं सिध्येत् , स एकधा भवति ×
स्य पितरः समुत्तिष्ठन्तीत्यादिश्रुत्युक्तं सर्वं भवतीत्यर्थः ।

एवमेषां कृताव्याख्या दाक्षणा + तथामति तथा तुष्टो दक्षिणा-
मूर्ति ×

यथामति तथा तुष्टो दक्षिणामूर्ति × ॥

वामेन सीतां परिरभ्य बाहुना
वामाङ्कलग्नां दशिमुद्रयान्वितम् ।

हनूमते + भजे ।

साम्बं चन्द्रार्धमौलिं स्फटिकमरकतानन्दमूर्तिं भजामि ॥

Colophon :

इति श्रीमत्परमहंस परिव्राजकाचार्य कैवल्यानन्दयोगि +

+ गायमाण स्वयंप्रकाशयतिना विरचिता दक्षिणामूर्ति स्तोत्रव्याख्या समाप्ता ॥

218

Sl. No. 37790 दत्तात्रेयगोरक्षकसंवादः **Ms. No. C: 2145/1**

Beginning :

तत्र कश्चित्प्रभुस्तेषां महात्मा विनयान्वितः ।

सर्वलक्षणसंपन्नः सर्वावयवसुन्दरः ॥

शन्ताकृतिः शान्तमनाः कम्बळ प्रोन्नतासनः ॥ (?)

गोरक्षक इति ख्यातः पापभीरुर्महद्गुणः ॥

End ;

विन्दति विन्दति न हि न हि मन्त्रं

छन्दो न हि न हि लक्षणतन्त्रं ।

समरसमग्नो भावितपूतः

प्रलपितमेतत् कथमवधूतः ॥

Colophon :

इत्यवधूतग्रन्थे दत्तात्रेयगीपेरक्षकसंवादे प्रथमप्रकरणं समाप्तम् ॥

Extra information :

दुर्मतिनामसंवत्सरमाघशुद्ध अष्टमी बुधवासरे वेदान्तसारसर्वस्वं सच्चिदानन्दपादशिष्य श्रीब्रह्मानन्देन बोधितं दत्तात्रयगोरक्षकसंवादे प्रथम प्रकरणंसमाप्तम् ॥

219

Sl.No. 37791 **दत्तात्रेयगोरक्षसंवादः** Ms. No. C. 2145/2

Beginning :

इति विचिन्वानः कश्चिदपि दृष्टश्चेत्पश्यामि । वर्णेषु लिङ्गेष्वाश्रमादिषु अन्यजातिभेदेषु लीलया पश्यामीति तस्माद्विनिर्गत्य प्रथमं दक्षिण दिशं विचिन्वानो नापश्यदधिकारिणम् ।

End :

कथं वा उच्यते नेत्येव, आत्मानोऽन्यस्यासत्यत्वात् हे गोरक्षकः ।

एकरसे एतत्क्षणमारभ्य मन्त्रमपि त्यज तन्त्रमपि त्यज सर्वं त्यज सुखी भवेत्युपदेशः एवं तिष्ठस्वेत्यर्थः ॥

अवान्तरप्रकरणं पष्ठमं समाप्तम् ॥

Colophon :

श्री भारतीर्थशिष्य परमानन्दतीर्थ विरचित गीतादिकं प्रथमप्रकरण समाप्तम् ॥

220

Sl. No: 37793 **दशश्लोकी** Ms. No: P. 6226

Beginning :

ब्रह्माण्डदेवालयमध्यसंस्थं
खण्डाण्डचित्तालयगर्भवीरे ।
विभासमानं विततं स्वकीय
चैतन्यलिङ्गं शिवमाश्रयामः ॥

सर्वदुर्वासनात्यागप्रकारो मनसोऽधुना ।
ब्रह्मविश्रान्तिसिध्यर्थं दशश्लोक्या विचार्यते ॥

प्रातर्वैदिककर्मतस्तदनु सद्वेदान्तसच्चिन्तया
पश्चाद्भारतमोक्षधर्मकथया वासिष्ठरामायणात् ।
सायं भागवतार्थतत्वकथया रात्रौ निदिध्यासनात्
कालो गच्छतु नश्वशरीरभरणं प्रारब्धकर्मार्पितम् ॥

End :

धैर्यैरावतशान्तिधेनुदमसन्मन्दारबृन्दं सदा
मैत्र्योद्यप्सरसं विवेकतुरगं सन्तोषचिन्तामणिम् ।
आत्मज्ञानमहामृतं समरसं नैराश्यचन्द्रोदयम्
वेदान्ताश्रयवन्ननुदिनं सेवेस्व मुक्तिश्रियम् ॥

प्रसादाद्दक्षिणामूर्तांच्छुत्याचार्यप्रभावतः ।
दुर्वासनाप्रतीकारदशकं रचितं मया ॥

Colophon :

— — —

221

Sl. No. 37796 दशश्लोकीव्याख्या Ms. No. P. 326/1

Beginning :

श्रीशंकराचार्यनवावतारं
विश्वेश्वरं विश्वगुरुं प्रणम्य ।
वेदान्तशास्त्रश्रवणालसानां
बोधाय कुर्वे कमपि प्रयत्नम् ॥

इह खलु साक्षात्परंपरया वा सर्वान् जीवान् समुद्दिधीर्षुर्भगवान् शंकरोऽनात्मभ्यो विवेकेनात्मानं नित्यशुद्धबुद्धमुक्तस्वभावं संक्षेपेण बोधयितुं दशश्लोकीं प्रणिनाय ॥

End :

इत्यादेरविषयत्वमात्मनो दर्शयति तदेवं वेदान्तवाक्यजन्याखण्डाकारवृत्या अविद्यानिवृत्तौ तत्कल्पितसकलानर्थनिवृत्तौ परमानन्दरूपस्सन् कृतकृत्यो भवतीति सिद्धम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीविश्वेश्वरसरस्वतीभगवत्पूज्यपादशिष्य श्रीमधुसूदनसरस्वतीविरचितः सिद्धान्तबिन्दुः समाप्तः ॥

222

Sl. No. 37803 दशश्लोकीव्याख्या Ms. No. C. 1565

Beginning :

नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसौदामकणकामुकगेहिने ॥
अद्वैतसिद्धेष्टीकायास्तदीयायाश्च सङ्ग्रहात् ।
विचित्ररचना काचिद्ब्रह्मानन्देन रच्यते ॥
शंकरोक्तिसुधाम्बोधेर्गुरूणामुपदेशतः ।
उद्धृतां प्रकटीकुर्वे न्यायरत्नावलीमिह ॥

तत्राद्वितीयस्वप्रकाशनिरतिशयानन्दस्वरूपयोर्जीवब्रह्मस्वरूपयोरैक्यमुक्तानन्दरूपं वोधयदहं–

End :

अत्र ग्रन्थे सौष्ठवं गुणवत्त्वम् । बलभद्रस्य स्वसेवकब्रह्मचारिणः–
श्रीनारयणतीर्थानां गुरूणां चरणाम्बुजम् ।
नमामि वाङ्मनःकायैरनन्यशरणैस्सदा ॥
भजे श्रीपरमानन्दसरस्वत्याः पदाम्बुजम् ।
यदेवालम्ब्य संसारसागरो गोष्पदे(दी)कृतः ॥

Colophon :

इति श्रीब्रह्मानन्दसरस्वतीविरचिता सिद्धान्तबिन्दुटीका न्यायरत्नावली समाप्ता ॥

223

Sl. No. 37804 दशोपनिषद्रहस्यम् Ms. No. C. 3165

Beginning:

श्रीरामो लक्ष्मणाय स्वतरणचरणायोंच एतद्रहस्यं
निष्कामैः कर्मभिः स्वैर्भवति भुवि मनो यस्य सोत्राधिकारी ।
प्राप्य श्री दैशिकास्यात् श्रुतिशिर उदितैः तत्त्वमस्यादिवाक्यैः
स्वात्मब्रह्मैक्यबोधं जनिमृतिरहितो मोदते नित्यमुक्तः ॥

श्रीरामाङ्घ्र्यब्जभृङ्गो गुरुचरणकृपापाङ्गलब्धबोधः
श्री सिद्धेशसूनुः विरचितममुतारामचन्द्राभिधेन ।
यच्छ्लोकैः पङ्क्तिसंख्यैः इदमुपनिषदां सद्रहस्यं दशानां
ज्ञात्वार्थं सम्पठेद्योऽनुभवति स सुखं सद्गुरोः सम्प्रसादात् ॥

Colophon :

— — —

224

Sl. No. 37805 दहरब्रह्मविद्याप्रकाशिका Ms. No. P. 1216/1

Beginning :

नत्वा गणेश्वरं स्कन्दं साम्बं सद्गुरुमेव च ।
दहराख्य × ध्यान × प्रकाश्यते ॥

End :

दहरार्थयोगशिवयोः स श्रेयांसि तनोतु नः ।
दुष्प्रापमपि यत् स्मृत्या जनः कैवल्यमश्नुते ॥

एषा त्र्यम्बकमखिना श्री रामन्द्रस्य शङ्करनारायणमखिवरस्य चाभ्यर्थनावशाद्रचिता ॥

Colophon :

इति श्रीमत् परमहंस परिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतिपूज्यपादशिष्य श्रीमत् परमशिवेन्द्रसरस्वति निरचिता दहरविद्याप्रकाशिका समाप्ता ॥

225

Sl. No: 37088 दुर्जनमुखचपेटिका Ms. No: C. 735

Beginning :

या विश्वं वितनोति पालयति या संहर्ति कल्पक्षये
ब्रह्माण्डं च हरिं हरं च मनसैवोत्पादयन्ती गुणैः ।

सवित्रीं च रमामुमां च तनुजां तक्षादले × भ्य: पृथक्
जुष्टा पश्यति दृश्यते च सकलं तां नौमि विश्वेश्वरीम् ॥

End:

वायुपुराणे--

अरण्ये प्रान्तरे वापि जले वापि स्थलेऽपि वा ।
व्याघ्रतुंबीरमूलेभ्यो जयस्थाने विशेषत: ॥
आधिष्वपि च सर्वेषु देव्या नामानि कीर्तयेत् ॥

इत्यनेन देवीनामान्यस्य यस्य कस्यापि कीर्तनेन भयनिवृत्तिरुक्ता । इत्यलं विस्तरेण ॥

Colophon:

इति श्रीमद्भट्टापरनामक जयरामभट्टसुतकाशीनाथभट्टविरचिता दुर्जनमुखचपेटिका समाप्ता ॥

226

Sl. No. 37818 दृग्दृश्यविवेक: Ms. No. P. 955/5

Beginning:

दृश्यं सर्वमनात्मा स्याद्दृगेवात्मा विकारिणी ।
आत्मानात्मविवेकोऽयं कथितो ग्रन्थकोटिभि: ॥
रूपं दृश्यं लोचनंदृक् तु मानसम् ।
दृश्या धीवृत्तय: साक्षी दृगेव न तु दृश्यते ॥

End:

लये फेनस्य तद्धर्मा द्रवाद्या स्युस्तरङ्गके ॥
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा ॥
प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तल्लये सच्चिदानन्दा: पर्यवस्यन्ति साक्षिणि ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीशङ्करभगवत्पादाचार्यकृतौ वाक्यसुधा प्रकरणं समाप्तम् ॥

227

Sl. No. 37815 **दुर्जनमुखचपेटिका** Ms. No: P. 4664/2

Beginning :

× देहेन्द्रियादि लक्षणा ।
इत्यादि बृहदारण्यके ।
दृश्यं सर्वमनात्मा स्यात् दृगेवात्माविकारिणी ।
आत्मानात्मविवेकोऽयं कथितो ग्रन्थकोटिभिः ।
रूपं दृश्यं लोचकं दृक् च दृश्यं दृक्तुमानसम् ॥
दृश्यधीर्वृत्तयो दृश्या दृगेव न तु दृश्यते ॥

End:

सर्वबन्धविनिर्मुक्तोऽपि वेदान्तार्थावलोकनात् ।
चातुर्मास्यमहापाशादात्मनिष्ठोऽपि बध्यते ॥
विरिञ्चादिभिराम्नातस्वानुभूतिरसार्णवे ।
मज्जनात्स्वप्रकाशाख्यान्मया प्रभो ॥ (?)
प्रमादादप्रमादाद्वा यदज्ञानान्मयेरितम् ।
तत्क्षाम्यन्तु समालोक्य पण्डितास्समदर्शिनः ॥
ओं तत्सत् ।

Colophon :

— — —

228

Sl. No: 37816 **दुर्जनमुखचपेटिका** Ms. No. A. 4687/2

Beginning :

ज्योतिश्शान्तमनन्तमेकमजरं भूयाति ग × पाशकं
नित्यं निर्विषयं निरन्तरसुखं यत्तत्पदं धीमहि ।
यन्मायागुणसंवृतं त्रिविधतामसाद्य जीवत्रयं
लोके भाति विचारतस्तु सकलं रामान्न किञ्चित्परम् ॥

End :

लये फेनस्य तद्धर्मा द्रवाद्यास्तु तरङ्गके ।
तस्यापि विलये नीरे तिष्ठन्त्ये यथा पुरा ॥

प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ॥

Colophon :

— — —

229

Sl. No. 37826 दृग्दृश्यविवेकव्याख्या Ms. No. A. 206

Beginning :

कारणं भादिजगतां मारणार्थमनागसम् ।
वारणाननमात्मानमद्वयं समुपास्महे ॥
परापश्यन्त्यादिदेहां प्रणताभीष्टदायिनीम् ।
सत्यज्ञानानन्दरूपां ध्याये नान्यां सरस्वतीम् ॥
नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
मया वाक्यसुधाटीका यथामति विरच्यते ॥

End :

इत्यादिश्रुतिप्रामाण्यात् परमार्थदृष्ट्यनुसारेण मामाश्रयत्वादिविदेहमुक्त्वान्तं समस्तव्यवहारातीतत्वं च प्रत्यगभिन्नसच्चिदानन्दलक्षणस्य अद्वितीयस्य अवाङ्मनसगोचरस्य ब्रह्मण एवोपपद्यते ॥

अतएव × तात्पर्यविषयत्वेन पिण्डितोऽर्थः । तस्मात् सर्वमनवद्यम् ॥

Colophon :

इति श्रीमत्परमहंसपव्राजकाचार्यश्रीरामानन्दीयभारतीमुनिवर्य शिष्य ब्रह्मानन्दभारतीमुनिप्रक्लृप्ता वाक्यसुधाटीका समाप्ता ॥

230

Sl. No. 37827 दृग्दृश्यविवेकव्याख्या Ms. No. P. 4687/3

Beginning :

प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये प्रचयगमनाय शिष्टाचारानुपालनाय च केवलकूटस्थप्रत्यग्बोधरूपपरमात्मानुसरणलक्षणं मङ्गलमाचरन्सच्चिदानन्द —

End :

व्यावहारिकजीवजगदादिसृष्टिः पूर्वं प्रलयानन्तरं च विद्यमानत्वात्त-जत्त्वात्तत्स्थितत्वात्तल्लयत्वाच्च तत्पदलक्ष्यार्थभूतब्रह्माभिन्नसाक्षिव्यतिरेकेण-व्यावहारिकजीवजगदादिवस्तु नास्तीत्ययमेव सर्ववेदान्तेषु निर्णीतोऽर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्विद्यारण्यभारतीतीर्थगुरुविरचित दृग्दृश्यविवेकप्रकरणं सविवरणं समाप्तम् ॥

231

Sl. No. 37828 दृग्दृश्यविवेकव्याख्या Ms. No. P. 492/2

Beginning :

स्वामिन् ! सांसारिकबहुविधदुःखैः सुखाभासैः आत्मसुखसंरोधकै तन्मूलभूतात्मानात्माविवेकान्नितरां दुःखितोऽस्मि । × संक्षेपेणोपदिशति—

दृश्यं सर्वमनात्मा स्यात् दृगेवात्माविकारिणी ।
आत्मानात्मविवेकोऽयं कथितो ग्रन्थकोटिभिः ॥

End :

माधुर्यद्रवशैत्यादिजलधर्मास्तरङ्गके ।
तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ॥

सच्चिदानन्दादयो धर्माः साक्षिणि × तिष्ठन्ति । तदा द्वितीया-भावात् केवलं ब्रह्मैव भवति । अयमेव सर्ववेदान्तसिद्धान्तः ॥ × जीवन्मुक्तो भवति कृतकृत्यो भवति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य जगद्गुरु श्रीमच्छङ्कराचार्यकृतौ वाक्य-सुधा समाप्ता ॥

232

Sl. No. 37831 दृग्दृश्यविवेकव्याख्या Ms. No. P. 5779/41b

Beginning ;

व्योमातीतमनन्तमेकमजरं मायातिगं शाश्वतं
ज्ञानं निर्विषयं निरन्तरसुखं यत्तत्पदं धीमहि ।

यन्मायागुणसंवृत्तं त्रिविधतामासाद्य जीवत्रयं
लोके भाति विचारतस्तदखिलं रामान्न किञ्चित्परम् ॥

इह लोके सांसारिकतापत्रयोपतापितान्तकरण: कश्चिदाब्रह्मलोकात् + स गुरुः सर्ववेदान्तार्थतत्वं वाक्यसुधाख्यं प्रकरणमुपदेक्ष्यमाणः आदौ तद्बुद्धिपरीक्षणार्थं संक्षेपेणोपरहति दृश्यमिति ॥

End :

अयमेव सर्ववेदान्तसिद्धान्तः ।

एतत्प्रकरणं यः सम्यगालोचयति मुमुक्षुः सन् स जीवन्मुक्तो भवति कृतकृत्यो भवति इति ॥

Colophon :

इति श्रीपरपरमहंसपरिव्राजकाचार्य श्रीशङ्कराचार्यकृतौ वाक्यसुधावृत्तिः समाप्ता ॥

233

Sl. No. 37836 **दृग्दृश्यविवेकव्याख्या** Ms. No. C. 3437/24b

Beginning :

वन्देऽहं बालचन्द्रं तं चन्द्रशेखरनन्दनम् ।
वन्दारुजनमन्दारं तुन्दिलं सिन्धुराननम् ॥ +

ಲೋಕದಲ್ಲಿ ಪರಮ ಕೃಪಾಳುಗಳ ವಶದ ವಿದ್ಯಾರಣ್ಯಸ್ವಾಮಿಗಳವರು ಮುಮುಕ್ಷುಗಳಾದವರನ್ನು ಉದ್ದೇಶ ಮಾಡಿ + ವಾಕ್ಯಸುಧೆಯೆಂಬ ಪೆಸರುಳ್ಳಂಥ ನಿಧಿಧ್ಯಾಸ ಗ್ರಂಥವನ್ನು ಮಾಡಿದ್ದರೆ ಆ ಗ್ರಂಥಕ್ಕೆ ರಾಮಾನಂದ ಭಾರತಿಗಳಿಗೆ ಶಿಷ್ಯರಾದ ಬ್ರಹ್ಮಸಂದರವರು ವ್ಯಾಖ್ಯಾನವನ್ನು ಮಾಡಿದ್ದಾರೆ. ಆ ಗ್ರಂಥಾರ್ಥವನ್ನು ಭಾಷೆಯಿಂದ ಹೇಳುವುದಕ್ಕೋಸ್ಕರ ಆದಿಯಲ್ಲಿ ವಿಘ್ನೇಶ್ವರನನ್ನು ನಮಸ್ಕಾರ ಮಾಡುತಲಿದ್ದೇನೆ.

End :

ಬಾರಯ್ಯ ಶಿಷ್ಯನೆ ಈ ಹೇಳಲ್ಪಟ್ಟಂತ ಲಕ್ಷಣಗಳುಂಟಾಗಿ ಕರ್ತನಾದಂಥಾ, ಅಹಂಕಾರಕ್ಕೆ ಚಿಚ್ಛಾಯೆಯೊಡನೆ ಬಂದ್ಯುದ್ದೇಶ ಕ್ರಮದಿಂದ ಮೂರು ಪಥಗಳಾದಂತೆ.

Colophon : — — —

234

Sl. No. 37838 **दृग्दृश्यविवेकव्याख्या** Ms. No. C. 1252

Beginning :

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥
नत्वा श्रीभगवत्पादप्रमुखान् देशिकोत्तमान् ।
स्फुटीकरोमि दृग्दृश्यसम्बन्धानुपपन्नताम् ॥

ननु दृग्दृश्ययोस्संयोगादिसम्बन्धासम्भवेऽपि विषयविषयिभावसम्बन्ध एवास्तु । यथाहि गुणगुणिनोस्संयोगासम्भवे समवायस्तत्र च यत्सन्निकृष्टेण करणेन यत्सन्निकर्षसहकृतेन यज्ज्ञानं जन्यते तत्वं तज्ज्ञानविषयता ।

End :

सम्बन्धत्वात्संयोगवदिति पक्षतावच्छेदकावच्छेदेन साध्यावगाह्यनुमित्या सकलसम्बन्धानां सम्बन्धत्वसिद्धिरिति । तदसत्, तादृशानुमितेः प्रमात्वे मानाभावादन्यथोक्तरीत्या पर्वतो वह्निमानित्यनुमित्या निखिलपर्वतानामेव वह्निमत्त्वसिद्धिप्रसङ्गात्प्रमाणान्तरविरोधेन तन्निरासश्चेद्युक्तिविरोधात्प्रकृते तुल्यमिति सर्वं चतुरश्रम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पूज्यपादचरणानुग्रहलब्धब्रह्मविद्यावैशद्यस्य श्रीमद्ब्रह्मानन्दसरस्वतीसारस्वतीसारस्वतसाम्राज्यानुभवसमेधमानयुक्तिशतधारोत्सारितविपक्षगिरिनिचयस्य भट्टत्र्यम्बकस्य कृतिषु दृग्दृश्यसम्बन्धानुपपत्त्यादिप्रकाशः ॥

235

Sl. No. 37839 **दृश्यत्वानुमानम्** Ms. No. C. 759/8

Beginning

पूर्णज्ञानाय + + ।
अस्पृष्टनिखिलानर्थमाश्रये नृहरेः पदम् ॥
सत्यज्ञानानन्दलक्षणपरिभेदविवर्जितम् ।
विमतं मिथ्या दृश्यत्वाद्यदित्थं तत्तथा यथा संप्रतिपन्नम् ॥

End :

गतिसामान्यादित्यन्योक्तव्याख्यानमनुपपन्नमिति चाग्रिमाधिकरणे—

सप्रपञ्चमुपपाद्यते । एवं श्रुतत्वाच्चेत्याह —

Colophon :

— — —

236

Sl. No. 37841 द्वासुपर्णेतिश्रुत्यर्थः Ms. No. A. 86/4

Beginning :

द्वा सुपर्णेति जीवेशभेदे यन्मानमिष्यते ।
नाशास्यं तदपीत्येवं श्रुतिस्मृत्यादिनोच्यते ॥

जीवेश्वरभेदवाचकं किं प्रमाणमित्यद्वैतवादिप्रश्ने पृष्टेनागम एवादौ वक्तव्य इति नीत्या द्वासुपर्णेत्यादिश्रुतिरेव प्रमाणमिति द्वैतवादिनो वदन्ति । अत्राहुरद्वैतवादिनः-भेदवाचिका श्रुतिरानीयते चेत्तर्हि चतुर्धा नेया ।

End :

तस्माद्भारतवाक्यस्योक्तरीत्यानुकूलत्वेन प्रातिकूल्यस्य प्रदर्शितरीत्या विप्रलम्भमूलत्वान्न तद्विरोधगन्धोऽपीति सर्वं चतुरश्रम् ॥ तस्मान्न द्वासुपर्णे-त्यनया श्रुत्या जीवेश्वरभेदपरमार्थसिद्धिरिति स्थितम् ॥

द्वासुपर्णेत्यादिमन्त्रवर्णाद्यर्थविचारतः ।
प्रीयतां मे गुरुस्सर्वहृदयाम्भोजविष्टरः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छिवकाशीविश्वेश्वरमणिकर्णिका-तीरस्थ श्रीजयकृष्णानन्दपदपद्माराधकश्री वेंकटकृष्णानन्दशिष्येण बालब्रह्मानन्द-सूरिणा विरचितः द्वासुपर्णेति श्रुत्यर्थविचारः समाप्तः ॥

237

Sl. No. 37841 द्वासुपर्णेतिश्रुत्यर्थः Ms. No. C. 508

Beginning :

द्वासुपर्णेति जीवेश्वरभेदे यन्मानमिष्यते ।
नाशास्यं तदपीत्येवं श्रुतिस्मृत्यादि सूच्यते ॥

जीवेश्वरभेदवाचकं किं प्रमाणमित्यद्वैतवादिप्रश्न पृष्टेनागम एवादौ वक्तव्य इति नीत्या द्वा सुपर्णेत्यादि श्रुतिरेव प्रमाणमिति द्वैतवादिनो वदन्ति। अत्राहुरद्वतवादिनः—

End :

तस्मात् द्वा सुपर्णेत्यनया श्रुत्या जीवेश्वरपरमार्थभेदसिद्धिरिति स्थितम् ।
द्वासुपर्णेत्यादिमन्त्रवर्णाद्यर्थविचारतः ।
प्रीयतां मे गुरुः सर्वहृदयाम्भोजविष्टरः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्विद्यारण्यकृतः द्वासुपर्णेत्यादि श्रुत्यर्थविचारः ॥

238

Sl. No. 37848 **नामामृतरसायनम्** Ms. No. P. 2113

Beginning :

सदा सर्वेष्टदं जन्तोः सर्वारिष्टनिवारकम् ।
श्रीरामनाम जयतु श्रेयोहेतुशिखामणिः ॥
श्रीरामस्य कृपादृष्ट्या तन्नामस्मृतिलब्धया । +
रच्यते श्रीभगवतो नामामृतरसायनम् ॥

End ;

× प्रसन्नाखिललोकरक्षा × स्वहेतुः ।
रामो महेशो रमणीयकीर्तिः दयासुधाब्धिः दयतां ममाशु ॥
श्रीराम सुकृपादृष्ट्या तन्नामस्मृतिलब्धया ।
कृत × या नामामृतरसायनम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्विश्वाधिक × महामुनि परमपादपरागोपजीविना श्रीबोधेन्द्रयतिना कृतं नामामृतरसायनं सम्पूर्णम् ॥

239

Sl. No. 37850 **नामार्थविवेकः** Ms. No. A. 533/1[k]

Beginning :

स्वाविद्यापदतत्कार्यज्ञानारोपापवादधीः ।
यस्मिन् विराममगमत् तत्त्रिपादस्मि रामचिन् ॥

गुरूनत्वा ब्रह्ममात्रावशेषसुखमिच्छता ।
तत्प्राप्त्युपायदिव्यश्रीरामनामार्थ उच्यते ॥

End:

निर्बीजब्रह्मविज्ञानसमकालं महामुनिः ।
निर्बीजसत्तासामान्यब्रह्मैव भवति श्रुतिः ॥
श्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रयोगिना ।
उपेयश्रीरामनामपरमार्थो निरूपितः ॥
सप्ताशीतिग्रन्थयुता श्रीनामार्थविवेकचित् ॥

Colophon:

इति नामार्थविवेकः समाप्तः ॥

240

Sl. No. 37853 | नामार्थविवेकः | Ms. No. C. 2417

Beginning:

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यः ॥

श्रितानां सर्वमज्ञानं पादेनाक्रम्य यो विभुः ।
चिन्मुद्रया बोधयति तत्त्वं तं नौमि शङ्करम् ॥
शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सुरेश्वरं सुरश्रेष्ठं प्रणतोऽस्मि गुरुत्रयम् ॥

+ + +

End:

पुण्ड्रान्तरं धरिष्यन्ति सेवन्ते देशिकान्तरम् ।
गुणदोषौ न जानन्ति मोहिता बुद्धिवर्जिताः ॥
हन्ताहं किमु वक्ष्यामि कलेर्माहात्म्यमद्भुतम् ।
ज्ञात्वापि दुष्टमाचार्यं मतं सेवन्ति सर्वदेति ॥

नन्वेतावता माध्वरामानुजीयानामेव पूर्वाचारपरित्यागपूर्वकमाचारान्तरग्रहणात्पतितत्वापत्तिरिति चेत् स्वयमेव विभावयेदित्यलं पल्लवितेन दुष्टनिन्दादोषपरिहारार्थम्सद्गुरूपदिष्टसर्वोपनिषत्सारभूतं मन्त्रमाश्रयामि । ओं सर्वोपप्लवरहितप्रज्ञानघनप्रत्यगर्थो ब्रह्मैवाहमस्मीति ॥

Colophon :

इति श्रीनृसिंहदेशिकचरणानुग्रहसमासादितसकलविद्येन पाण्यकुलतिलक सुब्रह्मण्यतनूभवेन भट्टश्रीरामेश्वरेण विरचिता निगमार्थदीपिका समाप्ता ॥

241

Sl. No. 37851 **नामार्थविवेकविवरणम्** Ms. No. A. 533/12

Beginning :

सर्वापह्नवतः शिष्टपरमाद्वैतवैभवम् ।
उपेयदिव्यश्रीरामचन्द्रनामा चिदस्म्यहम् ॥

नत्वा श्रीदेशिकं सद्यः कैवल्यसुखमिच्छताम् ।
उपेयनामविवेकव्याख्येयं सम्प्रणीयते ॥

End :

ग्रन्थसंख्यां विशदयति–सप्ताशीतीती ।
चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ।

चित्त्वं चिदहमेते च लोकश्चिदिति भावय ॥
इत्यादिश्रुतितः एतत्प्रकरणस्यापि चित्त्वं उपपद्यते इति अर्थः ॥

Colophon :

इति श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना विरचिता उपायनामविवेकव्याख्या समाप्ता ॥

242

Sl. No. 37855 **निरालम्बोपनिषत्सारः** Ms. No. P. 7979/4

Beginning :

× ष्टं शरीरिणां अधिगम्य तत्त्वमसि सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन इत्यादि महावाक्यार्थानुभवज्ञानात् ब्रह्मैवाहं निश्चित्य निर्विकल्पकसमाधिना स्वतन्त्रो यश्चरति स मुक्तः ॥

निर्ममो निरहङ्कारो भूत्वा ब्रह्म × च । देशकालवस्तुपरिच्छेदराहित्यमित्रात्मस्वरूप × ग्राह्यम् । अग्राह्य-

मिति च। स्वस्वरूपव्यतिरिक्तमायामनोमयबुद्धीन्द्रिय × जगत्सत्य-
त्वचिन्तनमग्राह्यम् ॥

Colophon :

इति विरालम्बो × ॥

243

Sl. No. 37856 तत्त्वचन्द्रिका Ms. No. P. 4107

Beginning :

हस्ताभ्यां पुस्तकं शस्तं व्याख्यामुद्रां च बिभ्रतम् ।
जटाधरन्तपोनिष्ठं मुञ्जिकेशमुनिं भजे ॥
+ + +
उमामहेश्वरज्ञेन वेल्लालकुलजन्मना ।
क्रियते निर्गुणब्रह्ममीमांसातत्त्वचन्द्रिका ॥
+ + +
भगवत्पूज्यपादीया व्याकृतिः परिदृश्यते ॥
ओं अथातो ब्रह्मजिज्ञासेत्यारभ्य —

End :

+ भगवत्पादीयविवरणस्यैवातिरमणीयत्वात् अथातो ब्रह्मजिज्ञासे-
त्यारभ्य अनावृत्तिः शब्दादित्येवमन्तं कृत्स्नब्रह्ममीमांसाशास्त्रं जीवब्रह्माभेदजग
न्मिथ्यात्वपरमिति सिद्धम् ॥

Colophon :

इति वेल्लालकुलसंभूतेन उमामहेश्वरेण विरचितायां तत्त्वचन्द्रिकायां
फलाध्यायविचारो नाम द्वादशोल्लासः ॥

244

Sl. No. 37859 निर्गुणब्रह्मलक्षणम् Ms. No. P. 5779/2

Beginning :

अस्थि मांसं त्वचो नाडी रोमाणि काठिनांशके ।
क्षितेः पञ्चगुणाः प्रोक्ताः निर्गुणात्मा सदाशिवः ॥

End :

शोकहर्षभयं लज्जामोहश्चैव तु पञ्चमम् ।
नभः पञ्चगुणाः प्रोक्ताः निर्गुणात्मा सदाशिवः ॥

Colophon :

— — —

245

Sl. No. 37860 निर्गुणवादार्थः Ms. No. P. 945/1

Beginning;

× वैषम्यं सुवचम् । नित्यसंसारिसद्भावमनङ्गीकृत्य सर्वमुक्तिमभ्युपगच्छतां अस्मदीयानां मतेऽपि प्रकृतेः नाशस्य अभ्युपगन्तव्यत्वात् ॥

End:

× स्वप्नादिवदिति सूत्रे महता यत्नेन स्वाप्नपदार्थवैषम्यस्योपपादितत्वात् । कयाचन विवक्षया प्रत्यक्षाविरुद्धमिथ्यात्वप्रतिपादने अनुपपत्त्यभावादित्यलमतिचर्चया ॥

Colophon:

— — — —

246

Sl. No: 37861 निर्गुणाराधनम् Ms. No. A. 86/5

Beginning :

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥
निर्मलस्य कुतः स्नानं वासो विश्वोदरस्य च ।
अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ॥
निर्विशेषस्य का भूषा कालंकारो निराकृतेः ।
निर्लेपस्य कुतो गन्धः पुष्पं निर्वासनस्य च ॥

End :

समस्तभ्रान्तिविक्षेपरहितानात्मनिघ्नता ।
समाधिरात्मनो नाम नान्यच्चित्तस्य विभ्रमः ॥

एवं वेदान्तकल्पोक्तस्वात्मलिङ्गप्रपूजनम् ।
कुर्वन्नामरणं वाऽपि क्षणं वा सुसमाहितः ॥

सर्वदुर्वासनाजालं पादपांसुमिव त्यजन् ।
विधूयाज्ञानदुःखौघं मोक्षानन्दं समश्नुते ॥

Colophon :

इति श्रीमत्कपिलगीतायां निर्गुणाराधनं समाप्तम् ॥

247

SI. No. 37864 — निर्वाणदशकम् — Ms. No. P. 8747/2

Beginning :

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः ।
अनेकात्मकत्वात्सुषुप्त्येकसिद्धः
तदेकोऽविशिष्टः शिवः केवलोऽहम् ॥

End :

न चकं तदन्याद्द्वितीयं कुतः स्या-
न्न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न च शून्यमद्वैतकत्वा-
त्कथं सर्ववेदान्तसिद्धं ब्रवीषि ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचितं निर्वाणदशकं सम्पूर्णम् ॥

248

SI. No: 37866 — निःश्रेयसविद्या — Ms. No: P. 4644/1

Beginning :

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाश्रयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

\+ \+ \+

विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः ।
नाज्ञानस्य प्रहाणाय रागद्वेषक्षयो भवेत् ॥

रागद्वेषक्षयाभावे कर्मदोषोद्भवं ध्रुवम् ।
तस्मान्निश्रेयसार्थाय विद्यैवात्र विधीयते ॥

End :

ममाहमित्येतदपोह्य सर्वतो
विमुक्तदेहं परमं हरोपमम् ।
सुदृष्टशास्त्रानुमितिभ्य ईरितं
विमुच्यतेऽस्मिन्निति निश्चितो नरः ॥

Colophon :

नान्यदन्यप्रकरणम् ॥

249

Sl. No: 37867 नृसिंहतापनीदीपिका Ms. No: P. 1814/9

Beginning :

आथर्वणे तापनीये उत्तरस्मिन् प्रजापतिः ।
देवानब्रूवुधन्मन्त्रराजप्रवणमार्गतः ॥
मन्त्रराजं पूर्वतापनीये श्रुत्वा ततो धिया ।
ध्यायन्तः सगुणं ब्रह्म देवाद्वियाप्नुवन् ॥ (?)
ततस्ते निर्गुणं ब्रह्म पप्रच्छुश्शुद्धबुद्धयः ।

End :

परः प्रविश्य देहेषु मायया मूढवत् स्थितः ।
द्वैतस्य मायिकत्वेन तत्त्वमद्वैतमिष्यताम् ॥
सन्मात्रो नित्य इत्यादि श्रुत्या तत्तु स्फुटीकृतम् ।
अथर्वणास्मिन् कैवल्यप्रमुखाः श्रुतयः स्फुटाः ॥
तिव्याख्यानतस्तुष्याद्विद्यातीर्थमहेश्वरः ।

Colophon :

इत्यनुभूतिप्रकाशे देवविद्याख्यः दशमोऽध्यायः ॥

250

Sl.No. 37868 नृसिंहतापनीदीपिका Ms. No. C. 2507/1

Beginning :

ऐतरेयेण सम्प्रोक्ता द्वितीयारण्यकाङ्गता ।
ब्रह्मविद्या सुविस्पष्टबालबोधाय वर्ण्यते ॥

आत्मैव सृष्टेः प्रागासीन्नामरूपविवर्जितः ॥
सोप्येक एव नान्योऽस्ति जडश्चान्यन्न विद्यते ॥

End :

श्रुतिस्मृतीतिहासानामभिप्रायविदव्ययः ।
श्रुतिव्याख्यानतः तुष्याद्विद्यातीर्थमहेश्वरः ॥ ५४ ॥
अनेन लिखितसम्पूर्णग्रन्थेन प्रीयतां नृसिंहः ॥
इत्यनुभूतिप्रकाशे देवविद्याख्यो नाम विंशोऽध्यायः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्विद्यारण्यमुनिविरचिते अनुभूतिप्रकाशे आथर्वणीयनृसिंहतापनीयाख्योपनिषद्विवरणे देवविद्याख्यो नाम विंशतितमोऽध्यायः ॥

समाप्तोऽयमनुभूतिप्राकाशाख्यो ग्रन्थः ॥

Extra information:

भूमिशय्या ब्रह्मचर्यं कृशत्वं लघुभोजनम् ।
सेवकस्य यतेस्तुल्यं विशेषः पुण्यपापजः ॥ १ ॥
यतो यतो निवर्त्तेत विमुच्येत ततस्ततः ।
निवर्त्तनाद्विसर्वम्मादाने स सुखमश्नुते ॥ २ ॥ (?)

किं वेदैः स्मृतिभिः पुराणपठणैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविश्रमैः ।
हित्वैकं बहुदुःखभाररचनाविध्वंसिकालानलम्
स्वात्मानन्दपदप्रकाशमनघं शेषा वणिग्ग्रन्थयः ॥

251

Sl. No. 37872

नृसिंहतापनीदीपिका

Ms. No: A; 183

Beginning :

अप्पय्यदीक्षितकृत चतुर्मतसारसंग्रहः ॥

श्री नानाभाप्यशम्भोदितफलविततिः प्रौढनानारसाढ्या
यस्मिन्मूलं निगूढं फलमधिकतरं स्वाद्वनारूहलभ्यम् ।

यस्य प्रेक्षे च देहद्वयतदनुगतप्रत्ययगर्थो विधत्ते
सूत्रात्मा पारिजातः सकलमभिमतं मह्यमर्थं स दद्यात् ॥
आदावानन्दतीर्थीयामनुसृत्य मतस्थितिम् ।
न्यायमुक्तावली रम्या विशदार्था विरच्यते ॥

End :

जगद्व्यापारवर्ज्यं प्रकरणादसन्निहितत्वाच्च ।
यदि निरवग्रहमीश्वरतागुणमभ्युपगन्छसि विश्वपतौ भवति सतृनिसीति
समाश्रयणात्तदुपासनसिद्धजने श्रुतिरपि तस्य विभूतिमनेकविधा ॥ (?)
न यदुपलभ्यमुपासनया कृतयापि न तल्लभते पुरुषः ।
प्रभवति तत्र साम्बशिवः परमेश्वर एव महामहिमा ॥
क.विराजविराजितम् ॥ (?)

Colophon :

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य श्रीरङ्गराजाध्वरि-
वरसूनोरप्पय्यदीक्षितस्य कृतौ चतुर्मतसारसङ्ग्रहे नयमञ्जर्याख्ये चतुर्थपरिच्छेदे
चतुर्थाध्यायस्य चतुर्थः पादः ॥

252

Sl. No. 37875 पञ्चकोशप्रकरणम् Ms. No. P. 5779/20

Beginning :

शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च ।
प्रमाता च प्रमाणं च प्रमेयं च फलं तदा ॥
इति सप्तविधं त्वेकं भिद्यते व्यवहारतः ॥

End ;

कदाचित्तत्त्वतो नात्मा तथानन्दमयो व्ययम् । (?)
बीजभूतो य आनन्दः आत्मासौ सर्वदा स्थितः ॥

Colophon :

इति पञ्चकोशप्रकरणं समाप्तम् ॥

253

SI. No. 37876 पञ्चकोशप्रकरणम् Ms. No. P. 5779/44

Beginning :

शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च ।
प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥
इति सप्तविधं त्वेकं भिद्यते व्यवहारतः ।
मायौपाधिविनुर्मुक्तं शुद्धमित्यभिधीयते ॥

End :

कदाचित्तत्त्वतो नात्मा स्यादानन्दमयोऽप्ययम् ।
बिम्बभूतो य आनन्दः अत्मासौ सर्वदा स्थितः ॥

Colophon :

इति पञ्चकोशप्रकरणं समाप्तम् ॥

254

Sl. No. 37877 पञ्चदशी Ms. No. P. 83/4

Beginning :

नत्वा श्री भारतीतीर्थविद्यरण्यमुनीश्वरौ
क्रियते चित्रदीपाख्य व्याख्या तात्पर्यबोधिनी ॥

चिकीर्पितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय × मङ्गलमाचरन् अस्य ग्रन्थस्य वेदान्तप्रकरणत्वात् तदीयैरेव विषयादिभिः × सदृष्टान्तं प्रतिजानीते ।

यथा चित्रपटे दृष्टं अवस्थानां चतुष्टयम् ।
परमात्मनि विज्ञेयं तथावस्थाचतुष्टयम् ॥

End :

प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति—

जगच्चित्रपट × न्ये पटे चित्रमिवार्पितम् ।
मायया तदुपेक्ष्यैव चैतन्ये परिशिष्यताम् ॥

तथा च भू × फलमाह—

चित्रदीपमिमं नित्यं येऽनुसन्दधते बुधाः ।

पश्यन्तोऽपि जगच्चित्रं न ते मुह्यन्ति पूर्ववत् ॥

Colophon :

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीभारतीतीर्थ विद्यारण्यमुनीश्वर × ॥

255

Sl. No. 37879 पञ्चदशी Ms. No. P. 4189/1

Beginning :

यथाचित्रपटेवृष्टमवस्थानां च तुष्टयम् ॥

यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।

चिदन्तर्यामी सूत्रात्मा विराट्चात्मा तथेर्यते ॥

परम.त्मनि विज्ञेयं तथावस्था च तु ष्टयम् ॥

End :

ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमोऽध्याय ईरितः ।

विषयानन्द एतेन द्वारेणान्तः प्रविश्यताम् ॥

प्रीयाद्धरिर्हरोऽनेन ब्रह्मानन्देन सर्वदा ।

पायाच्च प्राणिनः सर्वान्स्वाश्रितञ्छुद्धमानसान् ॥

Colophon :

[इति विद्यारण्यमुनिविरचितायां ब्रह्मानन्दे विषयानन्दः समाप्तः ॥]

256

Sl. No. 37884 पञ्चदशी Ms. No. P. 9260/6

Beginning;

ब्रह्मानन्दं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ।

ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायते ॥

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ॥

End :

ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमाऽध्याय ईरितः ।

विषयानन्द एतेन द्वारेणान्तः प्रवेश्यताम् ॥

प्रीयाद्धरिहरो येन ब्रह्मानन्देन सर्वदा ।
प्रीणयेत्प्राणिनः सर्वान् आश्रितान् बुद्धमानसान् ॥

Colophon :

इति श्री पञ्चदश्यां विषयानन्दः समाप्तः ॥
आनन्दपञ्चकं सम्पूर्णम् ॥

257

Sl. .No. 37890 पञ्चदशी Ms. No. C. 4548

Beginning :

परमात्माद्ययानन्दः पूर्वं सृष्टेः स्वमायया ।
स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः ॥
विष्ण्वाद्युत्तमदेहेषु प्रविष्टो देवताभवत् ।
सूर्याद्यधमदेहेषु स्थितो भजति देवताम् ॥

End :

इत्थं जागरणे तत्त्वविदो ब्रह्मसुखं सदा ।
भाति तद्वासनाजन्ये स्वप्ने तद्भासते सदा ॥
अविद्यावासनाप्यस्तीत्यतः तदुप्रसनोत्थिते ।
स्वप्ने मूर्खवदेवैषः सुखं दुःखं च वीक्षते ॥
ब्रह्मानन्दाभिधे ग्रन्थे ब्रह्मानन्दप्रकाशकम् ।
योगप्रत्यक्षमध्याये प्रथमेऽस्मिन्नुदीरितम् ॥

Colophon :

इति पञ्चदशप्रकरणे ब्रह्मानन्दः समाप्तः ॥

258

Sl. No: 37893 पञ्चदशी Ms. No: C. 4667/4

Beginning :

नत्वा श्रीभारतीतीर्थविद्यार यमुनीश्वरौ ।
मयाद्वैतविवेकस्य क्रियते पदयोजना ॥
ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते ।
विवेके सति जीवेन हेयो बन्धः स्फुटीभवेत् ॥

End :

दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।
यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मविस्स्वयम् ॥ ६७ ॥
जीवन्मुक्तो पराकाष्ठा जीवद्वैतविवर्जनात् ।
लभ्यते सावतोत्रेदमीशद्वैताद्विवेचितम् ॥६९ ॥

Colophon :

इति पञ्चदश्यां द्वैतविवेकः समाप्तः ॥

259

Sl. No. 37899 पञ्चदशी Ms. No. A. 4375/2

Beginning :

× कार्यसूनृतत्वे मृत्सुवर्णायोरूपदृष्टान्तत्रयमुक्तवानित्यर्थः ।
किमर्थ वं दृष्टान्तत्रयमुक्तवान् इत्याशङ्क्याह—
अतोऽपि वासयेत् कार्यानृतत्वं सर्ववस्तुषु ।
इति × ऐवं बहुषु मृदादिषु कार्यानृतत्वमुपलब्धं अतो भूतभौतिकरूपेषु सर्वेषु वस्तुषु—

End :

फलितमाह—
निरूपाधिब्रह्मतत्वे भासमाने स्वयंप्रभे ।
अद्वैते × इति ॥
त्रिपुटीभानाभावात् भूमानन्द इत्युच्यते इत्यर्थः । ग्रन्थमुपसंहरति—
ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमोऽध्याय ईरितः ।
विषयानन्द एतेन द्वारेणान्त × ॥

Colophon :

इति ब्रह्मानन्दे विषयानन्दो नाम पंचमोऽध्यायः ॥

260

Sl. No. 37900 पञ्चदशी Ms. No. P. 8691

Beginning :

यस्य स्मरणमात्रेण विघ्ना दूरं प्रयान्ति हि ।
तं वन्देऽहं दन्तिवक्त्रं वाञ्छितार्थप्रदायकम् ॥

नत्वा श्रीभारतीतीर्थ विद्यारण्यमुनीश्वरम् ।
क्रियते चित्रदीपस्य व्याख्या तात्पर्यदीपिका ॥
चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय + प्रतिजानीते ।
यथेति—

End:

विधिवच्छास्त्रोक्तप्रकारेण मनः समाधाय स्थिरीकृत्य विगलितसंसृति-
बुधो परोक्षा × वृवृत्त × सन् परं पदं निरतिशयानन्दरूपं न
चिरा × प्राप्नोति × आनन्दलक्षणं ब्रह्मैव भवतीत्यर्थः ।

Colophon;

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमद्भारतीतीर्थ विद्यारण्यमुनिवर्यकिङ्करेण
विरचिता तात्पर्यदीपिका समाप्ता ॥

261

Sl.No. 37901 पञ्चदशीव्याख्या Ms. No. P. 9627/1

Beginning

विद्यारण्यमुनीश्वरस्य महतो विख्यातकीतेरहो
श्रीमत्पञ्चदशात्मकप्रकरणैः × णः कटाक्षोपमैः ।
कारुण्यं करूणानिधेः स्वविषयान् कृत्वा विपश्चिद्वरान्
संसारो - तमःप्रभेदनविधौ मार्ताण्डतां गाहते ॥

नत्वा श्री भरतीतीर्थविद्यारण्यमुनीश्वरौ ।
क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ॥
चिकीर्षितस्य ग्रन्थस्य ×

End:

प्रकरणस्य तात्पर्यं संक्षेपेण दर्शयति ।
जगच्चित्रं स्वचैतन्यपटे चित्रमिवार्पितम् ।
मायया तदुपेक्ष्यैव चैतन्यं परिशिष्यताम् ॥

ग्रन्थाभ्यासफलमाह—
चित्रदीपमिदं नित्यं येऽनुसन्दधते बुधाः ।
पश्यन्तोऽपि जगच्चित्रं ते मुह्यन्ति न पूर्व

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री भारतीतिर्थ विद्यारण्यमुनि श्रीचरणशिष्येण रामकृष्णाख्य विदुषा विरचितं तात्पर्यबोधिनीनामकं चित्रदीप व्याख्यानं समाप्तम् ॥

262

Sl.No. 37902 | पञ्चदशीव्याख्या | Ms. No. P. 7645/2

Beginning

नत्वा श्रीभारतीर्थ विद्यारण्यमुनीश्वरौ ।
क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय परमात्मनीति पदेनेष्टदेवता तत्त्वानुसन्धानलक्षणं + + सदृष्टान्तं प्रतिजानीते यथेति-

End:

फलितमाह निरुपाधीति । त्रिपुटीभानाभावात् भूमानन्द इत्युच्यत इत्यर्थः ।

ग्रन्थमुपसंहरति ब्रह्मानन्देति । स्पष्टत्वान्न व्याख्यायते ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री भारतीर्थ विद्याण्ययमुनि श्रीचरणशिष्येण रामकृष्णाख्यविदुषा विरचितं तात्पर्यबोधिनीनामकं चित्रपटदीपव्याख्यानं समाप्तम्॥

इति ब्रह्मानन्दे विषयानन्दो नाम पञ्चमोऽध्यायः ॥

263

Sl. No. 37914 | पञ्चभूतलक्षणम् | Ms. No. P. 5779/40

Beginning :

पृथिव्यादिपञ्चभूतलक्षणगुणलक्षणपञ्चकम् ।
आस्थिमांसत्वचानाडी रोमाणि कठीनांशके ॥
क्षितिः पञ्चगुणाः प्रोक्ताः निर्गुणात्मा सदाशिवः ॥

End :

हर्षशोकभयं लज्जामोहश्चैव तु पञ्चकम् ।
नभः पचगुणाः प्रोक्ताः निर्गुणात्मा सदाशिवः ॥

Colophon :

आत्मनि पृथिव्यादीपञ्चभूतलक्षणगुणलक्षणपञ्चकनिरूपणम् ॥

264

Sl. No. 37915 पञ्चभ्रमविचारः Ms. No. P. 2035/11

Beginning:

इदानीं पञ्चभ्रमनिरूप्यते—तत्र प्रत्यात्ममात्मापरमेश्वराद्भिन्न इत्येको भ्रमः। आत्मनि प्रतीयमानकर्तृत्वादिकं वास्तवमिति द्वितीयो भ्रमः॥

End:

एते पञ्चभ्रमनिवर्तकाः। एते पञ्च भ्रमाः अज्ञानेन प्राप्ता इतिविचार्य-पञ्चभ्रमनिवर्तकं ज्ञानं यस्तु सम्पादयति स एव जीवन्मुक्त इति सर्वशास्त्र सिद्धान्त इति सर्वमप्रत्यूहम् ॥ ?

Colophon:

इति पञ्चभ्रमप्रकरणम् ॥

265

Sl. No: 37918 पञ्चश्लोकी Ms. No. A. 5592/40

Beginning:

भूतस्य जात इति वारिरुहासनस्य
जातो बृहन्निति हरीश्वजनिप्रसिद्धा । (?)
यस्मादजात इति मन्त्रवरोपदिष्टात्
तं रुद्रमेव जनितश्चकितः प्रपद्ये ॥

एत्वा प्रसूतिमजशौरिहरीश्वराणां
संसूच्य दीपकसहोक्तिभिरस्य निघ्नाम् ।
तां सन्यवारयदथर्वशिखा हि यस्य
तं सर्वकारणमनादिशिवं प्रपद्ये ॥

End:

आस्तां सूक्ष्मं लिङ्गरूपत्वलिङ्गं
स्याद्ब्रह्मेशानाख्ययैवाल्पमातः ।
यतो वेना वेदयन्सूत्रकारः
यं ब्रह्माख्या तं प्रपद्ये महेशम् ॥

Colophon: — — — —

266

Sl. No. 37919 | पञ्चश्लोकीप्रकरणम् | Ms. No. P. 6262

Beginning;

शिवस्य जगत्कारणत्वादिलिङ्गैः परब्रह्मभावं प्रसाधयितुं कृतस्य पञ्चश्लोकीरूपस्तोत्रस्यायमाद्यः श्लोकः—भूतस्य ॥

End :

शब्दादेवेत्येवकारो न निर्णायकान्तरद्योतनीयः + तस्मात् उदाहृतमन्त्रगतेन प्रसिद्धतरशिवरूपकेन ईशानशब्देनैव निर्णयो विवक्षित इति सर्वं समञ्जसम् ॥

Colophon:

इति श्रीमदद्वैतविद्याचार्यरङ्गराजाध्वरिसूनोः अप्पयदीक्षितस्य कृतौ पञ्चश्लोकीविवरणम् समाप्तम् ॥

267

Sl. No: 37920 | पञ्चीकरणम् | Ms. No: P. 10647

Beginning :

सद्गुरुं परमानन्दं व्यक्ताव्यक्तस्य कारणम् ।
आनन्दवारिसम्पूर्णं वन्दे सद्बुद्धिसिद्धये: ॥
स्वेष्टमपृच्छन्ब्रह्माणं देवासुरमहोरगाः ।
तेन प्रबोधितास्सर्वे प्रणवेन पुरा ध्रुवम् ॥

End ;

अधिगतपरमार्थैः साधुभिर्वक्तुकामा
निजहृदयसुतुष्ट्या साधुवृत्तानुवृत्त्या ।
परगुणसुगुणानां मानसेताभियुक्ता
य इह विबुधजात्यास्ते न लोके समर्थाः ॥

Colophon :

इति श्रीरङ्गबोधविरचिते पञ्चीकरणं आत्मकाभिधं सम्पूर्णम् ॥

268

Sl. No. 37921. पञ्चीकरणम् Ms. No. P. 984/3

Beginning :

यद्बोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥
पञ्चीकृतमहाभूतानि तत्कार्यं च सर्वं विरडित्युच्यते ॥

End :

चित्तस्य तदाकारवृत्तिविशेषाव स्थापनं संप्रज्ञातसमाधिरिति । ×
\+ वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः
× समाधिरभिधीयते इति ॥
पाहि पाहि तपस्सिन्धो दीनबन्धो दयानिधे ।

Colophon :

— — —

269

Sl. No. 37922 पञ्चीकरणम् Ms. No. P. 8747/2

Beginning :

श्रीरामभद्रयोगीन्द्र यतिचन्द्र नमोऽस्तु ते ॥
ओं कारः सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तसमाधानं मुमुक्षूणामपे क्षुति ॥ (?)

End :

इप्रकरण यस्माद्र ज्ञातव्यं भगवत्तमैः ।
अमानित्वादिसंनेमैर्गुरुभक्तिप्रसादतः ॥
इमां विद्यां प्रयत्नेन योगीसन्ध्यानुसर्वदा ।
सम भासेदिह भोगानासक्तधीस्सुधीः ॥

Colophon :

इति श्रीमद्भगवत्पादविरचितं पञ्चीकरणं समाप्तम् ॥

270

Sl. No. 37923 पञ्चीकरणम् Ms. No: C. 3166

Beginning:

अथ श्रीमच्छङ्कराचार्यकृतपञ्चीकरणम् ॥

सच्छब्दवाच्यमविद्याशबलं ब्रह्म ब्रह्मणोऽव्यक्तम् । अव्यक्तान्महत् महतोऽहङ्कारः । अहङ्कारात् पञ्च तन्मात्रेभ्यः पञ्च महाभूतानि ॥

End:

किन्तु नित्यशुद्धबुद्धमुक्तसत्यस्वभावं परमानन्दानन्ताद्वयं ब्रह्मैवाह मस्मि अहं ब्रह्मास्मि इत्यभेदेन अवस्थानं समाधिः । अयमात्मा ब्रह्मेत्यादिश्रुतिभ्यः ॥

Colophon:

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीशङ्कराचार्यकृतपञ्चीकरणं समाप्तम् ॥

271

Sl. No. 37924 पञ्चीकरणम् Ms. No. P. 955/7

Beginning:

ज्ञानस्समानवायुश्च श्रोत्रशब्दनमेवच । (?)
पणिपञ्चिमिदं प्रोक्तं इत्येते व्योमपञ्चकम् ॥ (?)
मनसाव्यानवायुश्च त्वक्स्पर्शनमे वच ।
पणिः पञ्चमिदं प्रोक्तमित्येते वायुपञ्चकम् ॥ (?)

End:

धावनं चलनं कम्पमाकुञ्चनप्रसारणम् ।
वायुः पञ्चगुणं प्रोक्त + + ।
कामक्रोधस्तथा लोभभयमोहनमेव च ॥
आकाशस्यगुणं प्रोक्त समांशपरिकीर्तितम् ।

Colophon:

— — —

272

Sl. No. 37925 **पञ्चीकरणम्** Ms. No. P. 5943/25

Beginning :

सर्गादौ तस्य सान्निध्यात् जातौ प्रकृतिपूरुषौ ।
प्रकृतेः पुरुषज्ञो मा महते वाप्यजायते ॥
प्रकृयिर्महतः तोभात् अहङ्करौप्यजायते ॥ (?)

End :

अधिभूतं तदित्युक्तमृत्युस्तत्राधिदैवतम् ।
उपस्थेन्द्रियमध्यात्मंस्त्रियाद्यानन्दकारणम् ॥
अधिभूतं तदित्युक्तं अधिदैवं प्रजेश्वरम् ॥

Colophon :

— — —

273

Sl. No. 37926 **पञ्चीकरणम्** Ms. No. P. 8154/2

Beginning

शरीरेस्मिन् विवित्सायां तत्त्वानां पञ्चविंशतिः ।
अध्यारोपो प वा दाभ्य. निष्प्रपञ्च प्रपञ्चते ॥

End :

यस्य ब्रह्मानुसन्धान वर्तते सार्वकालिकम् ।
शिखी मुण्डी जटी वतपि मुच्यते नात्र संशयः ॥

Colophon :

पञ्चीकरणपूर्वकं पञ्चविंशतितत्त्वज्ञान प्रकरणं सम्पूर्णम् ॥

674

Sl. No. 37928 **पञ्चीकरणभावप्रकाशिका** Ms. No.P10825/1

Beginning :

× सृष्टि प्रकारं वक्तुं प्रतिदानीते । अथ विस्तरेण वेदान्तशास्त्र-
निर्माणनन्तरं प्रकरणं पञ्चीकरण नामकं प्रकरणम् ।

End :

× वोत्तीर्णो मया संसारवारिधिः ।
दयासिन्धुं चिदानन्दं तं गुरुं प्रणतोऽस्म्यहम् ॥
सत्वानन्दस्वरूपं यत्स्वप्रकाशच्चिदात्मकम् ।
अद्वितीयमसन्तं तद्वदामि आत्मानिर्भयम् ॥ (?)

Colophon :

इति परमहंस परिव्राजकाचार्य श्रीरामानन्दतीर्थपूज्यपादशिष्य श्री बालकृष्णानन्दतीर्थकृतौ पञ्चीकरणभावप्रकाशिका समाप्ता ॥

275

Sl. No. 37933 पञ्चीकरणवार्तिकम् Ms. No. C. 3999/3

Beginning :

ओंकारः सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तसमाधानं मुमुक्षूणां प्रकाशते ॥
आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम् ॥

End :

प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते ।
इदं प्रकरणं यत्नाद्ज्ञातव्यं भगवत्तमैः ॥ +
अमानित्वादिनियमे गुरुभक्तिप्रसादतः ।
इ। ।विधां प्रयत्नेन योगी सन्ध्यासु सर्वदा ॥
समभ्यसेदिहामुत्र भोगानसक्तधीः सुधीः । +
रागद्वेषादिरहितः स्वात्मानं चिन्तयेत्सदा ॥

Colophon :

इति श्रीसुरेश्वराचार्यकृतं पञ्चीकरणवार्तिकं सम्पूर्णम् ॥

276

Sl. No. 37936 पञ्चीकरणवार्तिकम् Ms. No. P. 3541/8

Beginning :

यदबोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

अतीतानेकजन्मसु कृतसुकृतप्रसादासादितशुद्धबुद्धीनां विवेकवैराग्य-शमादिसाधनसम्पन्नानां परित्यक्तसर्वकर्मणां स्थूलप्रपञ्चमुपन्यस्यति–पञ्चीकृतेति ॥

End :

+ तत्कारणकर्मात्मनाऽवस्थिताविद्यातत्कार्यनिवृत्तेर्वस्तुनः स्वरूपेणैव परिशेषात्प्रत्यगात्मा सच्चिदानन्दात्मकः सत्यज्ञानानन्दस्वरूपं ब्रह्मैवेति सिद्धम् ॥

षड्विधं लिङ्गमाश्रित्य वेदान्ता यत्र निष्ठिताः ।
विधानप्रतिषेधाभ्यां तं वन्दे पुरुषोत्तमम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशुद्धानन्दपूज्यपादशिष्य श्री भगवदानन्दज्ञानकृता पञ्चिकरणव्याख्या समाप्ता ॥

277

Sl. No. 37942 परमपदनिर्णायकप्रकरणम् Ms. No. C. 4548

Beginning :

यं ध्यायन्ति यतीश्वाः स्वहृदये मायाप्रहाण्यै सदा
श्रौतस्मार्तवचः कदम्बमवलम्ब्यारात्तमोनाशकम् ।
विष्णवादेर्जगतोऽस्य साक्षिणमुमाकान्तं महेशं शिवं
हृत्पद्मे सततं मुदा परमया ध्यायामि तं श्रेयसे ॥

इह श्रीमत्साम्बसदाशिवाङ्घ्रिपद्मानुसन्धानपरायणो यतिरमृतानन्द तीर्थः परमपदनिर्णायकं प्रकरणं चिकीर्षुर्निर्विघ्नेन परिसमाप्तिप्रचयगमनार्थं—

End :

इदानीं प्रकरणमुपसंहरन् स्वस्य तत्करणप्रवृत्तौ हेतुं शिवकृपैव स्वप्रवृत्तिप्रयोजनं च दर्शयति—

+ + +

यद्वाग्वज्रवरप्रहारदलितस्वान्ता निपेतुर्भृशं
शृङ्गिध्वान्तमुखा अवैदिकमताभ्यासात्तदुर्बुद्धयः ।
शैवा यद्वचनामृतं श्रुतिपुटैः पीत्वाऽऽप्लवन्तः शिवं
तस्मा अप्पयदीक्षितकृतिमने साम्बाय नित्यं नमः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजक श्रीमद्ब्रह्मानन्दयतिवरशिष्यामृतानन्द-तीर्थस्य कृतौ परमपदनिर्णायकप्रकरणं समाप्तम् ॥

278

Sl. No. 37953 परमाक्षरविवेकः Ms. No. A. 533/5

Beginning :

यत्र प्रत्यक्परचितोः भेदाभेदभ्रमो न हि ।
अनाधेयमनाधारं तं रामं प्रणतोऽस्म्यहम् ॥
नत्वा श्रीदेशिकं मुक्तिमिच्छतामकुतोभयम् ।
स्वान्यभिन्नदासपरमाक्षरयाथात्म्यमुच्यते ॥

End :

निर्बीजब्रह्मविज्ञानात् निर्बीजं स्यादितिश्रुतेः ।
रामचन्द्रेन्द्राविर्भूत परमाक्षरदर्शनम् ॥
योजानात्यर्थतः सोऽपि परमाक्षरतामियात् ।
ग्रन्थाष्टाविंशतियुतं परमाक्षरदर्शनम् ॥

Colophon :

इति परमाक्षरदर्शनविवेकः समाप्तः ॥

279

Sl. No. 37944 परमाक्षरविवेकविवरणम् Ms. No. A. 533/6

Beginning :

यत्रान्योन्यं न शृणोति यत्रान्योन्यं न पश्यति ।
यत्रान्योन्यं न जानाति तं भूमानं हरिं भजे ॥
नत्वा गुरुपरम्पराद्वैतमहासाम्राज्यमिच्छताम् ।
परमाक्षरविवेकव्याख्येयं संप्रणीयते ॥

इह खलु अखिललोकहितकारिणी भगवती × प्रतिजानीते— यत्रेति ।

End

य एवं निर्बीजं वेद निर्बीज एव भवति इति श्रुतिः निर्बीजशब्देन निर्विशेषं ब्रह्मोच्यते । तद्ज्ञानं तत्प्रापकमित्यर्थः । अस्य ग्रन्थस्य लीला विभूतिप्रणीतत्वं प्रकरणार्थचिन्तकानां परमफलं चाह—रामेति ॥ ग्रन्थसंख्यां दर्शयति ग्रन्थेति ॥

Colophon :

इति वासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिविरचिता परमाक्षरविवेकव्याख्या समाप्ता ॥

280

Sl. No. 37945 **परमाद्वैतसुदर्शनम्** Ms. No. A. 533/3

Beginning :

सत्यज्ञानसुखाकारं स्वाविद्यातमसः परम् ।
निगमान्तालिसञ्चारं नौमि रामनिशाकरम् ॥
नत्वा श्रीदेशिकपदं कैवल्यानन्दमिच्छताम् ।
तत्प्राप्त्युपायपरमाद्वैतदर्शनमुच्यते ॥

End :

आह ह्येवं श्रुतिततिः द्वैताद्वैतविलक्षणम् ।
वासुदेवेन्द्रसच्छिष्य रामचन्द्रेन्द्रयोगिना ॥
परमाद्वैतसाम्राज्य दर्शनं सम्यगीरितम् ।
चतुस्त्रिंशद्ग्रन्थयुतं परमाद्वैतदर्शनम् ॥

Colophon :

इति परमाद्वैतसुदर्शनं समाप्तम् ॥

281

Sl. No: 37946 **परमाद्वैतसुदर्शनविवरणम्** Ms. No: A. 533/1

Beginning :

निर्विशेषस्वान्तमौनि महासमतयोज्ज्वलम् ।
परमाद्वैतसाम्राज्यालङ्कृतं राममाश्रये ॥

नत्वा गुरुं निर्विशेषब्रह्मयाथात्म्यमिच्छताम् ।
क्रियते परमाद्वैतदर्शनस्य विवेचनम् ॥
इह खलु परमदयाकलेबरेयंलीलाविभूतिः + +
प्रतिजानीने—सत्येति ॥

End :

लीलाविभूतिनिःश्वासवत् अप्रयत्नाविभूतेशाद्यष्टोत्तरशतवेदान्तपटलं द्वैताद्वैततत्कार्यनिरूपनिलयमेव लक्षणं यस्य तत्परमेवाद्वैतं निर्विशेषं ब्रह्म तत्प्रतिपादकं दर्शनमेवं—प्रकरण ग्रन्थसंख्यां दर्शयति—चतुरिति ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं परमाद्वैत सुदर्शनविवेचनम् ॥

Colophon :

द्वै
परमा त दर्शनव्याख्यानं सम्पूर्णम् ॥

282

Sl. No. 37948 — परमार्थसारः — Ms. No. P. 6262

Beginning ;

परं परस्याः प्रकृतेरनादिमेकं निर्दिष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं त्वामेव विष्णुं शरणं प्रपद्ये ॥
आत्माम्बुराशौ निखिलोऽपि लोको मग्नोऽपि नाचामतिनेक्ष × ।
आश्चर्यमेतन्मृगतृष्णिका भे × राशौ रमतेमृचै × ॥

End ;

महताकालेन पुमान्मानुषं प्राप्य योगमभ्यस्य
प्रा × ति दिव्यममृतं यत्तत्परमं पदाविष्टाः ।
वेदान्तशास्त्रादखिलं विलोक्य शेषस्तु जगदाधरः ।
आर्यापञ्चाशीत्या बबन्ध परमार्थमिदम् ॥

Colophon :

इत्यादिशेषकृतमार्यारूपं प्रकरणं समाप्तम् ॥

283

Sl. No. 37949 **परमार्थसारव्याख्या** Ms. No. P. 4018/2

Beginning :

विघ्नपांसुमवधूय वायु ×

भक्तहृद्गगनदीप्तिदायिनम् ।

विस्फुरत्कळभवक्त्रविग्रहं

विश्वनाथमनिशं भजामहे ॥

अमलकमलमध्ये × भवतु भवभय × भारती नः ॥

अशेषोपनिषत्सिद्धवस्तुतत्त्वानुगामिनी ।

राघवानन्दमुनिना शेषार्येह विमृश्यते ॥

परमार्थसार × ग्रन्थं चिकीर्षुः अचार्यः × अनुबन्धचतुष्ट यमाविष्करोति—परं—

End :

प्रकाशवपुषो दीपस्य स्वप्रकाशनेऽन्यापेक्षा यथा नास्ति तद्वच्चिद्रूपेण-स्वयमेव प्रकाशमानत्वान्नान्यापेक्षेत्यर्थः ॥

देहेन्द्रियादिसंबन्धाभावादेव नास्य दर्शनादिकर्तृत्वमपीत्याह—द्रष्टा श्रोता—

Colophon :

— — —

284

Sl. No. 37952 **परोक्षपरोक्षप्रकरणम्** Ms. No. P. 2035/23

Beginning

लोके केचित् × ज्ञाः सकलवाक्यानि परोक्षज्ञानजनकान्येव अपरोक्षज्ञानजनकानि न भवन्ति, सर्वदा अपरोक्षज्ञानविषयः × आत्मा × आत्मा परोक्षज्ञानविषयः कथं भवति । तस्मात् शास्त्रजन्यज्ञान-विषयो न भवति ॥

तथा च दशमस्त्वमसीति दृष्टान्तेन तत्त्वमस्यादिवाक्यानां अपरोक्ष-ज्ञानजनकत्वं आत्मनः परोक्षापरोक्षज्ञानविषयत्वं स्वप्रकाशस्यात्मनः ज्ञाना-ज्ञानाश्रयत्वं च सर्वमुपपन्नमेवेति सर्वं रमणीयम् ॥

Colophon :

— — —

285

Sl. No. 38953 **पञ्चरात्रप्रामाण्यनिरासः** Ms. No. P. 3303/2

Beginning :

अथ पाञ्चरात्रप्रामाण्यं निरस्यते—पविमित्यादीनां चक्रधारणपरत्वं दक्षिण × वे विप्रइत्यादीनां श्रुतित्वं मन्त्रत्वं × स च विनियोगः पाञ्चरात्रप्रामाण्याधीनः । पाञ्चरात्रप्रामाण्ये निरस्ते सर्वं निरस्तमेवेत्यर्थः ।

End :

तेन कारणानुवादेन ध्यानविधिः । ननु ध्यानविधानाभावे कथम × अथर्वशिरोनाम्न्यां पूर्वोपनिषदि अद्वितीय— ×

Colophon :

— — —

286

Sl. No. 37956 **पुत्रनिमित्तदुःखप्रकरणम्** Ms. No. P. 2035/25

Beginning :

लोके वेदान्तशास्त्राभिज्ञव्यतिरिक्तजनास्तार्किकलौकिकपामरा विधवा प्रभृतयः आभासशास्त्रपुराणानि श्रुत्वा अपुत्राणामैहिकामुष्मिकसुखं नास्ति पुत्रवतामैहिकामुष्मिकसुखमस्तीति वदन्ति ॥

End :

दुःखपरदारादिचारित्रं कुटुम्बिनः ।
पित्रोर्दुःखस्य नास्त्यन्तो धना चे यते तदा ॥ (?)
एवं विविच्य पुत्रादौ ज्ञातिं × ॥
इति निश्चित्य परमां प्रीतिं × देवमहनिशम् ॥

इति सुस्थम् ॥

Colophon :

इति पुत्रनिमित्तदुःखप्रकरणं समाप्तम् ॥

287

Sl. No. 37967 **पुत्रनिमित्तदुःखप्रकरणम्** Ms. No. C. 1200/1

Beginning :

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।

अत्रानुव्याख्याने ब्रह्मणो जगदुपादानता प्रतिषिद्धा। प्रतिषेधे अविकारोऽक्षरः शुद्ध इति श्रुतिर्मानमित्युक्तम् ।

अत्रविचार्यते—

अविकार इति विकारसामान्याभावः प्रतिपाद्यते। विकारश्चान्यथाभावः, स एव परिणाम इति रीत्या तावत्त्वया नोपादानता निराकर्तुं शक्यते । +

End :

इदं च ज्ञानेन मायिकद्वैतस्यैव कुतो न ब्रह्मणोऽपि निवृत्तिरिति शून्यवादिशङ्कापनयादधिष्ठानस्यापि कल्पितत्वे आत्माश्रयादिना कल्पनायोगात् निवर्त्यनिवर्तकभावानुपपत्तेश्चेत्यादिकमूहनीयम् ॥

Colophon:

— — — —

288

Sl. No: 37968 **प्रणवनिर्णयः** Ms. No: P. 3336/1

Beginning :

अव्यक्ते जगति व्यक्तं व्यक्तेऽव्यक्तं च यन्महः ।

अज्ञाते जगदज्ञातं ज्ञाते ज्ञातं तदस्म्यहम् ॥

End :

तथाचोक्तं तुरीयखण्डे तृतीयपर्यायेऽनुज्ञायां वाग्वा ओंकार इत्यस्य व्याख्यानसमय इत्यादि । अन्यथा अनुज्ञाया अनुज्ञातुः सकाशादान्तरत्वानुपपत्तेरिति ॥

Colophon:

— — —

289

Sl. No. 37970 प्रणवनिर्णयव्याख्या Ms. No. P. 3336/2

Beginning :

कामक्रोधादिदूराय कल्याणगुणशालिने ।
कृष्णानन्दसरस्वत्यै करवै गुरवे नमः ॥

\+ + +

नत्वा श्रीरामभद्रार्यभगवत्पादपादुकाम् ।
तत्सूक्ति × प्रणवनिर्णयं विवृणोम्यहम् ॥

End

तद्व्याख्या मम देशिकेन्द्रकरुणापीयूषसिक्ताक्षरा
सद्भिः सूक्तिदुरुक्तिदुर्व्यसनितामुत्सृज्य संसेव्यताम् ।
वाचालयति यः सर्वं सर्वभूतगुहाशयः ।
वासुदेवो निबन्धं मे स क्षमात्मा स × ॥

Colophon

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीकृष्णानन्दभगवतः कृतौ प्रणव-निर्णयप्रकाशे तृतीय उद्भेदः समाप्तः ॥

290

Sl.No. 37972 प्रणवार्थसुधोदयः Ms. No. P. 338/2

Beginning

चिन्मुद्रितकराम्भोजं श्रीकृष्णं गुरुरूपिणम् ।
स्तुत्वा ध्यात्वा मुहुर्नत्वा मुमुक्षूणां हिताय च ॥
श्रुत्यागमपुराणाभियुक्तवाक्यानुसारतः ।
वीणयन्नसुधीः कुर्वे प्रणवार्थसुधोदयम् ॥
प्रकर्षान्नवरूपत्वात्प्रणवः परिकीर्तितः ।
इतिज्ञापयितुं तारन्नवायनमुच्युते ॥

End:

ब्रह्मणस्साक्षिरूपत्वात् यदिति हि श्रुतिः ।
एवं ध्यानपरस्साक्षाच्छिव एव न चान्यथा ॥
× × से हरिः ।

अनेन सदृशो लोके नास्ति ब्रह्मविदां वर ।
इत्यादि सूतसंहितावचनरीत्या स एव शिव इत्यर्थः ॥
अथाव-योगिनामेव कुले महति धीमातम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥
इत्यादि गीतावचनरीत्या स एव दुर्लभ इत्यर्थः ।

Colophon :

इति प्रणवार्थसुधोदयग्रन्थः समाप्तः ॥

791

Sl. No. 37975 प्रतिवन्धत्रयप्रकरणम् Ms. No.P 2035/14

Beginning :

आत्मतत्त्वज्ञानप्रतिबन्धकीभूतं प्रतिबन्धत्रयमिदनीं निरूप्यते—
प्रतिवन्धस्त्रिविधः–भूतवर्तमानभाविभेदात् ॥

End

अत एव विद्यारण्यस्वामिभिः प्रतिबन्धत्रयं निरूप्य तन्निवृत्तिप्रकारश्च
पञ्चदशप्रकरणे निरूपितमिति सर्वं रमणीयम् ॥

Colophon :

इति प्रतिबन्धत्रयप्रकरणं समाप्तम् ॥

292

Sl. No.37977 प्रधन्वत्रयप्रकरणम् Ms. No. P. 3614

Beginning :

सच्चिदानन्दरूपाय सृष्टिस्थित्यन्तहेतवे ।
प्रत्यग्रूपाय शुद्धाय श्रीरामब्रह्मणे नमः ॥
नत्वा रामेन्द्रचरणौ वक्ष्ये मोक्षैकसाधनीम् ।
वेदान्तसारमुद्धृत्य प्रत्यक्तत्वप्रकाशिकाम् ॥
न ख्यातिपूजालाभेच्छा ग्रन्थसंग्रहणे मम ।
न विद्वत्तावलं चात्र मुक्तिरेव हि कारणम् ॥
तत्रादावुपोद्घातः प्रदर्श्यते ।—

आकाशपुष्पमिव विश्वमिदं निरीक्ष्ये

संसारसागरसुदुर्गमपारमाप्य ।

प्रत्यञ्चमद्वयमखण्डसुखैकबोधं

साक्षात्कृतोऽस्मि पदभावनया गुरूणाम् ॥

श्रीरामेन्द्रगुरोः पादमेव निर्मलचेतसा ।

वासुदेवेन्द्रयतिना कृता तत्त्वप्रकाशिका ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीरामेन्द्रगुरुचरणारविन्दभृङ्गायमान श्रीवासुदेवेन्द्रयतिना संग्रहीतप्रत्यक्तत्त्वप्रकाशिकायां प्रणवोपासनादिसर्वसंग्रह-प्रकरणं नाम चतुर्थोऽध्यायः ॥

293

Sl. No. 37980 प्रतिबन्धत्रयप्रकरणम् Ms. No: C. 1814

Beginning:

स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्याततद्वैभवो

यः पाञ्चाननपाञ्चजन्यवपुषा व्यादिष्टविश्वात्मकः ।

प्रह्लादाभिहितार्थतत्क्षणमिलद्दृष्टप्रमाणं हरिः

सोऽव्याद्वः शरदिन्दुसुन्दरतनुः सिंहाद्रिचूडामणिः ॥

नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने ॥

अथ कोऽयं स्वप्रकाशशब्दार्थः ? किं स्वश्चासौ प्रकाशश्च स्वप्रकाशः,

End :

+ प्रारब्धकर्मव्यतिरिक्तकर्मतत्कार्ययोरवस्थानाधिगमाच्च तद्वास्य विजज्ञाविति विस्पष्टज्ञानोपजन्याश्चर्यवत्प्रतिपादनान् परोक्षज्ञानविषयत्वानुप-पत्तेरन्यथा श्रुतिवाक्यस्य परोक्षज्ञानस्या ×

Colophon :

[इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्य श्रीचित्सुख-मुनिविरचितायां तत्त्वप्रदीपिकायां लक्षणभंगो नाम द्वितीयपरिच्छेदः समाप्तः ॥]

294

Sl. No: 37982 प्रबोधसुधाकरः Ms· No. P. 579 3/7

Beginning :

नित्यानन्दैकरसं सच्चिन्मात्रं स्वयं ज्योतिः ।
पुरुषोत्तममजमीशं तं वन्दे यादवाधीशम् ॥ १ ॥
यं वर्णयितुं साक्षात् यतिरपि मूक इव मौनमावहति ।
सोऽस्माकं मनुजानां किं वाचां अगोचरो भवति ॥ २ ॥

पुंसो विना विरागं मुक्तेरधिकारिता न स्यात् ।
वैराग्यमात्मबोधो भक्तिश्चेति त्रयं गदितम् ॥
मुक्तेस्साधनमादौ तत्र विरागो वितृष्णैव ॥

End:

एवमपि विरहितानां तत्वमसीत्यादिवाक्यचिन्तनया ।
प्रतिभात्येष परोक्षवदात्मा शश्वत्प्राकाशमानोऽपि ॥ २३ ॥
तस्मात्पदार्थशोधनपूर्वं × —

Colophon :

[इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्कराचार्यविरचिते प्रबोध-सुधाकरे स्वरूपावास्थितिर्नाम पञ्चदशतमं प्रकरणम् ॥]

295

Sl. . No. 37985 प्रमाणतत्त्वम् Ms. No. C. 1200/2

Beginning :

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशंकररूपाय श्रीपरब्रह्मणे नमः ॥

ननु वेदान्तशास्त्रमनारम्मणीयमाश्रयाऽनुपपत्याऽज्ञानासंभवेनाज्ञातस्य विषयस्याज्ञानिनोऽधिकारिणश्चासंभवात्–नैवं शुद्धचित्त एवाज्ञानाश्रयत्वविषयत्त्वसंभवात्। तदुक्तम्—

अश्रयस्त्वविषयस्त्वभागिनी निर्विशेषचितिरेव केवलेति ।

End :

वाचस्पतिमते तु जीवाश्रितैवाविद्या । न चाविद्यायाः सिद्धावाश्रयासिद्धिस्तां विना जीवेशविभागायोगात् । निर्विभागचिदाश्रितत्त्वे च जीवाश्रिताविद्येति मतहानिरिति चेन्न–अविद्यायास्तत्प्रयुक्तस्य विषयाश्रय भेदस्य तदाश्रयस्य ×

Colophon :

— — —

296

Sl. No. 37986 प्रमाणमाला Ms. No. P. 1773/3

Beginning :

आनन्दमात्मानमस × तेदं
प्रणम्य विज्ञानतन्तुं मुकुन्दम् ।
प्रसाधने तस्य सदोपयुक्तां
प्रमाणमाल रचयामि रम्याम् ॥

End :

प्रमाणमाला गुणसङ्गतेयं
अपेतदोषा विहितादरेण ।
प्रसाधयन्ती परमं पुमांसं
प्रकल्प्यतां प्रार्थितसिद्धये नः ॥
स्वात्मस्वभावमधिकृत्य मुकुन्दमेषा
माना × धानवररत्नमनोज्ञमाला ।
आनन्दबोधयतिना विधिना गुणानां
आनन्दसेतुरकलङ्कधिया व्यधायि ॥

Colophon :

समासेयं प्रमाणमाला ॥

297

Sl. No. 37987 प्रलयप्रकरणम् Ms. No. P: 2035/20

Beginning :

इदानीं प्रलयस्वरूपं निरूप्यते—

प्रलयः पञ्चविधः—नित्यावान्तरदैनन्दिनब्राह्मात्यन्तिकभेदात् ॥

End :

एते पञ्च प्रलया अन्योन्यव्यावृत्ततया अनात्मस्वरूपाः। एतत्प्रलयाधारः प्रलयानुस्यूत अस × स्माहमिति यो जानाति स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वं रमणीयम् ॥

Colophon:

इति प्रळयप्रकरणम् ॥

298

Sl. No: 37988 प्रवृत्तिनिवृत्तिविचारः Ms. No: C. 3999/2

Beginning :

आचार्यचतुष्टयी—

जात्या यद्यपि गौरमेव वदनं रूपस्य नास्ति क्षतिः
तत्किं कज्जलकालिमा मुखतले संज्ञापनीयो बुधैः ।
अस्तु ब्रह्मविदः कृतैरपि न तैर्दुष्कर्मभिश्चेत्क्षतिः
किं कामादिकदर्थना वरमहो निःसंगसौख्यं वरम् ॥

End :

अत्र द्विभार्याशास्त्रार्थे विषयोऽयं व्यवस्थितः ।
निवृत्तिवनितां त्यक्त्वा प्रवृत्तो नरकं व्रजेत् ॥
प्रवृत्तिवनितां त्यक्त्वा निवृत्तो मोक्षमश्नुते ।
विषमोऽप्येष शास्त्रार्थः प्रमाणं व्यासवाक्यतः ॥

Colophon:

इति प्रवृत्तिनिवृत्तिशास्त्रार्थविवरणम् ॥

299

Sl.No. 37989 | प्रश्नोत्तरमालिका | Ms. No. B. 274/6

Beginning

प्रणिपत्य महादेवं प्रश्नोत्तररत्नपद्धतिं वक्ष्ये।
नागनरामरवन्द्यं सर्वज्ञं मोक्षदं शान्तम् ॥ २ ॥
कः खलु नालङ्क्रियते दृष्टा दृष्टार्थसाधनं पटीयान् ।
अमुया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया ॥ २ ॥

End:

कण्ठगता विमला प्रश्नोत्तरमालिका येषाम् ।
ते मुक्ताभरणादपि विभान्ति विद्वत्समाजेषु ॥
रचिता शङ्करगुरुणा विमला विमलेन रत्नमालेयम् ।
प्रश्नोत्तररत्नमयी कण्ठगता कं न भूषयति ॥ ३७ ॥

Colophon :

इति श्री शङ्कराचर्य विरचिता प्रश्नोत्तरमालिका सम्पूर्णा

300

Sl. No. 37993 | प्रारब्धत्रयप्रकरणम् | Ms. No. P. 2035/18

Beginning :

इदानिं प्ररब्धत्रयं निरूप्यते—

प्ररब्धं त्रिविधम्—इच्छानिच्छपरेच्छा भेदात् । एतत्प्रारब्धत्रयं विवेकिनां समानमेव । तथापि भेदोऽस्ति ॥

End :

तस्मादेवं विचार्य एतत्प्रारब्धानुभवोऽहङ्कारस्यैव ? न त्वहङ्कार साक्षिणः इति यो जानाति, स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वमुपपन्नम् ॥

Colophon :

इति प्रारब्धत्रयप्रकरणं समाप्तम् ॥

301

Sl. No: 37984 प्रारब्धध्वान्तसंहृतिः Ms. No. B. 223

Beginning :

श्रीमच्चन्द्रार्धचूडाङ्घ्रिनखचिन्मणिदीधितिम् ।
ध्यात्वाऽभिधास्ये धीशुध्यै प्रारब्धध्वान्तसंहृतिम् ॥ १ ॥

नन्वत्र प्रारब्धस्य ध्वान्ताभिधसमिद्धान्धकारसधर्म्यमभिदधता भवत तस्य वस्त्वावरकत्वमवश्यं वाच्यम् ॥

End:

आसीत् श्रीगुरुकृपया प्रारब्धध्वान्तसंहृतिः पूर्णा ।
अनया तुष्यतु भगवान् श्रीमद्रघुवीरसद्गुरुः स्वात्मा ॥ ३ ॥
श्रीमन्नारायणगुरुः श्रीमहादेवदेशिकान् ।
श्रीमद्रघूत्तमाचार्यान् प्रणमामि मुहुर्मुहः ॥ ४ ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणक्षीरार्णवविहरण श्रीमद्द्वैतविद्येन्दिरारमण श्रीमन्नारायणशास्त्रिचरणारविन्दद्वन्द्वदिन्दिन्दायमानसस्य मेतोपाह्वयस्य अच्युत-शर्मणः कृतौ प्रारब्धवादध्वान्तसंहृतिः सम्पूर्णा ॥

302

Sl. No. 37995 प्रारब्धध्वान्तसंहृतिः Ms. No. C. 2035/8

Beginning :

मैत्रेयी ब्रह्म वा अरे जाया पत्युः प्रियाप्रिया भवतीत्यादिनारभ्य न वा अरे सर्वस्य प्रियाय सर्वं प्रियं भवतीत्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यादिना सर्वान् + आत्मनः प्रियतमत्वं निरूपितम् ॥

End :

एवं सम्यग्विचार्य पुत्रमित्रकलत्रदेहेन्द्रियादिकं सर्वं दुःखरूपमिति बुध्वा तदभिमान त्यक्त्वा स्वस्मिन्नेव प्रीतिं कृत्वा स एव प्रियतमोऽहमेमिति जानाति स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वं रमणीयम् ॥

Colophon:

इति प्रियतमत्वप्रकरणम् ॥

303

Sl. No. 37996 बालबोधिनी Ms. No: B. 231/2

Beginning :

प्रणम्य परमानन्दं मोहान्धतिमिरापहम् ।
तत्प्रसादबलेनैव क्रियते बालबोधिनी ॥
यस्य प्रसादलेशेन क्षीयन्ते भवभीतयः ।
तं सर्वसाक्षिणं यामि शरणं कृपणो ह्यहम् ॥

भो भगवन्नयमात्मा कीदृशः ।

सद्रूपं सर्वदा भावरूपम् । चिद्रूपं विशुद्धबोधैकरूपम् । आनन्दं सुखरूपम् ।

End :

ततः प्रारब्धभोगक्षये शरीरपातादिदेहकैवल्यं भवतीति परमपुरुषार्थसिद्धिः ॥

विशुद्धबुद्धयो धीराः ज्ञानदीपकराः करे ।
पश्यन्ति मणिवत्क्षिप्त्वा तमो ब्रह्म परं हि तत् ॥

Colophon

इति श्रीशंकराचार्यविरचिता बालबोधिनी समाप्ता ।।

271

Sl. No. 37978 बिम्बप्रतिबिम्बवादः Ms. No. A. 766/1

Beginning :

अथ बिम्बप्रतिबिम्बवादः—

ननु को जीवः, कः परमेश्वरः य उपदेश्यः यश्चोपदेष्टा । अत्र प्रकटार्थविवरणानुसारिणस्त्वाहुः–अनादिरनिर्वाच्या भूतप्रकृतिः चिन्मात्रसम्बन्धिनी माया × तस्याः प्रतिबिम्ब ईश्वरः–

End :

उद्यत्वादिविशिष्टतया उ नभोगतादित्यस्यैव वा रिस्वत्त्या (?) भेदसिद्धेरित्यर्थः ।

प्रतिबिम्बोपाधित्वमिति चैतन्ये बिम्बप्रतिबिम्बभेदनिमित्तत्वमित्यर्थः ॥

Colophon ;

इति बिम्बप्रतिबिम्बवादः समाप्तः ॥

305

Sl. No. 37998 **बोधसारः** Ms. No. C. 1802

Beginning :

चण्डमुण्डाहरा चण्डी सर्वद्वन्द्वहरो गुरुः ॥
दास्यन्ति देवतास्तुष्टा धनमायुस्सुतान्यशः ।
ज्ञानं के नाम दास्यन्ति ऋते श्रीगुरुपादुकाम् ॥

End :

नाडिं प्रविश्य यदि जीवति भीतभीतः
प्रान्ते च खादति मृतिश्चिरजीवनं किम् ।
देहात्मभावरहितः परमात्मभावे
तिष्ठन्मृतिं जयति चेच्चिरजीवनं तत् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यापरोक्षसाक्षात्कारमाधवाचार्यविरचिते बोधसारस्सम्पूर्णः ॥

306

Sl. No. 37999 **बोधसारः** Ms. No.C 3910/1

Beginning :

किंचित्कुतूहलेनैव विदुषां प्रियकाम्यया ।
मङ्गलाचरणं कृत्वा बोधसारो निरूप्यते ॥ +
अथातो ब्रह्मजिज्ञासा जिज्ञास्यं ब्रह्म केवलम् ।
तटस्थलक्षणं स्यात स्वरूपस्य च लक्षणैः ॥

End :

बहिरन्तः हरिं पश्येन्मायां पश्यन् जगन्मयीम् ।
विस्मयं परमं यासि मार्कण्डेय इवात्मनि ॥
इति प्रश्नामृतनवकम् ॥

अ शिष्यं प्रतिवचनम् ।

श्रीगुरो स्वानुभावानां करुणापूर्णचेतसाम् ।
श्रीमतां कृपया नूनमस्माकं किमु दुर्लभम् ॥

Colophon :

— — —

307

Sl. No. 38002 — बोधसारः — Ms. No. P. 6492/1

Beginning :

यस्त्वाङ्कुशाग्रेण विकृष्य विद्वान्
बध्वाथ पाशेन रदाग्रभिन्नान् ।
कृत्वा निजेभ्यो निजमोदद्दायी
स मे गणेशः कुरुतात् शुभानि ॥

वेदान्तदुग्धाब्धिविचारमन्था-
दुद्भूतमाचार्यहरिप्रदत्तम् ।
बोधामृतं कर्णपुटैः पिबन्तु
× परानन्दकरं भयघ्नम् ॥

End :

नाम × यश्च शिवा मुनिश्च विभवं मन्त्रस्य शम्भ × खलु
क्षान्तेर्वेद × रोः शुवेमुनिवधुः देवः कथाया विधिः ।
सत्यस्यासुरनायको जलनिधिः कोपस्य कामस्य सा
× भक्ताधिगतिं पतञ्च शबरी तामेव जानाम्यहम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवय × श्रीमद्रामब्रह्मानन्दसरस्वत्याख्यशिष्येण विरचिते बोधामृते जीवन्मुक्तिस्वरूपनिरूपणं नाम विंशतितमो विवेकः ॥

308

Sl. No. 38002 बोधार्या Ms. No. B. 837/2

Beginning :

अखिलनिगमान्तदेशिकमागमगूडार्थदर्शकं प्राज्ञम् ।
आनन्दपूर्णसागरमनिशमहं नौमि शङ्कराचार्यं ॥
शरणं स भवति जननी नपितनसुरानसोदरानान्ये ।
परमं शरणमिदं मे चरणं मम शिरसि देशिकन्यस्तम् ॥

End:

तारुण्यसारसान्द्राः तां क्षितिवरदान × विशेषाः ।
श्रीगुरुकटाक्षपाताः शिवशिव शमयन्तु चित्तसन्तापम् ॥

Colhphon :

इति श्रीमद्विद्यारण्यगुरुस्वामिविरचिताः अष्टाविंशद्बोधार्याः समाप्ताः ॥

309

Sl. No. 38003 बोधार्या Ms. No. C. 3437/2

Beginning

अखिलपरमहंसदेशिकमागमगूढार्थदेशिकं प्राज्ञम् ।
आनन्दपूर्णसागरमनिशमहं नौमि शङ्कराचार्यम् ॥ +
+ + +
तदिदं तादृशमीदृशमेतावत्तावदिति च यन्न भवेत् ।
ब्रह्म तदित्यवधेयं नो चेद्विषयो भवेत्सरोहं च ॥

End :

कारूण्यसारसान्द्राः काङ्क्षितवरदाः कल्पितविशेषाः ।
श्रीगुरुकटाक्षरूपाः ताश्शिव शमयन्तु चित्तसन्तापम् ॥

Colophon :

इति श्रीसदाशिवब्रह्मेन्द्रविरचिता बोधार्याष्टाविंशच्छ्लोकाः सम्पूर्णाः ॥

310

Sl. No. 38006 ब्रह्मतत्त्वविवेकः Ms. No. P. 4106/2a

Beginning :

अर्जुन उवाच–

यदेकं निष्कळं ब्रह्म व्योमातीतं निरञ्जनम् ।
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ॥
कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम् ।
हृदयाम्बुजमध्यस्थं ज्ञानज्ञेयस्वरूपकम् ॥
तत्क्षणादेव मुच्येत यज्ज्ञानाद्ब्रूहि केशव ॥

End :

यो वेदादौ स्वरः प्रोक्तः वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

Colophon :

— — —

311

Sl. No. 38007 ब्रह्मतत्त्वविवेकव्याख्या Ms. No. P. 4106/2

Beginning :

अखण्डसच्चिदानन्दं आदिमध्यान्तवर्जितम् ।
आत्मानमखिलाधारं आश्रयेऽभीष्टसिद्धये ॥

इह खलु अर्जुनः धर्मक्षेत्रे कुरुक्षेत्रे भगवदुपदिष्टमात्मतत्वोपदेशं विषयोपभोगप्रावण्येन विस्मृत्य पुनस्तदेवात्मतत्वं ज्ञातुं भगवन्तं पृच्छति— अर्जुन उवाच—

End :

आत्मतत्वापरोक्षानुभवात् पूर्वं यावान् साधनप्रयासः कृतः ज्ञाते च तस्मिन् अनुभवेन कर्तव्य इति सदृष्टान्तमाह—नावाथी ॥ तु ×

Colophon :

— — —

312

Sl. No. 38008 ब्रह्मतत्त्वसुबोधिनी Ms. No: P. 2767

Beginning:

निर्मलाय प्रजाताय भक्तानां मुक्तिदायिने ।
सच्चिदानन्दरूपाय श्रीरामाय नमो नमः ॥

लोके तावत् निष्कामनया अनेकजन्मकृतसुकृतपरिपाकवशात् परिशुद्धान्तःकरणानां केवलमोक्षमात्रलिप्सूनां + ब्रह्मतत्त्वनिरूपणार्थं तावदध्यारोपापवादप्रकारं निरूपयामः ।

End:

प्रारब्धभोगशेषस्य सङ्क्षयो वेदनं तरं । (?)
प्रारब्ध × भवति ॥

अत्र प्रमाणम्—

ब्रह्म वेद + वैष्णवं पदमश्नुत

इति नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दानं × तच्चैतन्यं परब्रह्मैवाहमस्मीति यस्तिष्ठति स ब्रह्मैव भवतीति सकलवेदान्तसिद्धान्तः ॥

Colophon:

इति श्रीब्रह्मतत्त्वसुबोधिन्यां जीवन्मुक्तप्रकरणम् ॥

313

Sl. No. 38009 ब्रह्मलक्षणम् Ms. No. P. 5779/26

Beginning:

पद्योक्तं द्विदलाकारं चक्षुर्नामेति कथ्यते ।
तन्मध्ये सर्वसारं च दर्शयित्वा महामुने ॥

अतिविषयगुहायां तत्त ब्रह्म साक्षात्
नयनवदनकराद्यष्टपुष्पाङ्गरूपम् ।
विगलितपरिवृद्धिक्षीणमाद्यन्तशून्यं
सहजमनुजलिङ्गं कीलितं तत्त्व × तत् ॥

End:

यदण्डमण्डान्तरगोचरणि य-
द्दशोत्तराण्यावरणानि यनि च ।
गुणाः प्रधानं पुरुषः परं पदं
परात्परं ब्रह्म चिदेकभूतयः ॥

Colophon :

— — —

314

Sl. No. 38011 ब्रह्मविद्यासुधार्णवः Ms. No. P. 5742

Beginning :

र्म अघटितघटनापटीय्यसीमाया अ × लिङ्गि × मया-
गुणसंयोगं गुणातीतं × निर्गुणशुद्धावि × माय × अविद्यानिद्य-
शक्ति × स्वानुभवरहस्य × नानामतकल्पित × वृष्टि ।

End:

निष्कर्माणि परे नत्वेको न रज्येत पण्डितः
अनि × नक ज्ञा × नं पञ्च स्वरूपम् ।
स्वात्मारामस्सुप्रसन्नश्चिदात्मा प्रारब्धान्तं सन्तरन् यत्न कुत-

Colophon :

— — —

315

Sl. No. 38017 ब्रह्मसूत्रपादसङ्गतिः Ms. No. B. 1110/14

Beginning :

ज्ञानी लोके राजते निर्मलात्मा +
शास्त्रेऽध्याये तथा पादे न्यायसङ्गतयस्त्रिधा ।
शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरूह्यताम् ॥ १ ॥
शास्त्रं ब्रह्मविचाराख्यं अध्यायस्युश्चतुर्विधाः ।
समन्वयविरोधौद्वौ साधन च फलं तथा ॥ २ ।

End :

तृतीये तिरतिस्तत्त्वं पदार्थपरिशोधनम् ।
गुणोपसंहृतिज्ञान बहिरङ्गादिसाधनम् ॥ ५ ॥
चतुर्थे जीवतो मुक्तिः उत्क्रान्तिर्गतिरुत्तरा ।
ब्रह्मप्राप्तिः ब्रह्मलोकस्थितिः पदार्थससंग्रहः ॥ ६ ॥

Colophon :

— — —

316

Sl. No: 38023 ब्रह्मसूत्रपादसङ्गतिः Ms. No. P. 2266

Beginning :

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषमिणोः तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके +

End :

इमं मानवमावर्तं नावर्तन्ते इत्येवमादिभ्यः शब्देभ्यः अन्तवत्त्वेऽपि चैश्वर्यस्य यथानावृत्तिस्तथा वर्णितं कार्यात्यये तदध्यक्षेण सहातः परमित्यत्र। सम्यग्दर्शनविध्वस्ततमसां नित्यसिद्धनिर्वाणपरायणानां सिद्धेरनावृत्तिः । तस्माद्यदाश्रयणेनैव हि सगुणशरणानामप्यनावृत्तिसिद्धिरिति इति अनावृत्ति शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥

Colophon :

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीशङ्करभगवत्पादकृतौ चतुर्थाध्यायस्य चतुर्थः पादः ॥

317

Sl. No. 38045 ब्रह्मसूत्रभाष्यवार्तिकम् Ms. No. A. 367

Beginning :

ब्रह्मोपासकानामपि जगद्व्यापारवर्जं सावग्रहमैश्वर्यं न्येनावधारयिष्यते ॥

End :

अभिध्योपदेशाच्च +
तत्र सोऽकामयत इत्यनेन स्वातन्त्र्यं लक्ष्यते बहु ।
स्वामीत्यनेन चोपादानत्वमिति + ॥

Colophon :

[इति श्रीमत्परमहंस परिव्राजकाचार्यश्रीगोविन्दानन्दसरस्वतीपूज्यपाद-शिष्यनारायणसरस्वतीकृतौ श्रीमच्छारीरकभाष्यवार्तिके प्रथमाध्यायस्य तृतीयः पादः] ॥

318

Sl. No. 38047 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. P. 994

Beginning

शङ्कराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावये ॥
वेन्दान्तनिकुरुम्बेण तात्पर्येण प्रकाशिता ।
स्वात्मानन्दैकरस्येन कल्याणाय शिवोऽस्तु नः ॥

अथातो ब्रह्मजिज्ञासा । अनेन सूत्रेण साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्म जिज्ञासितव्यमिति प्रतिपाद्यते ।

End :

एतदधिकरणे पूर्वपक्षे उपक्रमोपसंहाराम्नातातत्तद्गुणविशिष्टब्रह्मपुच्छानन्दमयोपासना तत एव च मोक्षाख्यं फलमिति सिध्यति । सिद्धान्ते तु निर्विशेषपरमेव कृत्स्नं प्रमाणं तद्विज्ञानादेव मोक्ष इति सिद्ध्यति ॥

Colophon :

इत्यानन्दमयाधिकरणम् ॥

319

Sl. No. 38051 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. C. 28

Beginning :

शुतराश्लेषविलसदानन्दामृतनिर्भराम् । (?)
विश्वोत्तंसित × ब्रह्मविद्यां विभावये ॥

रामानन्दमुनिं मुनीन्द्रनिकरैः × बोधासये
सदा चेतो मे कुरुतादलंकृतमति स्वच्छैस्स्वपादाम्बुजैः ॥

End :

एतेन स र्वे व्याख्याता इत्यादावध्यायपरिसमाप्तिद्योतनाय पदमेवाभ्यस्यते। कृत्स्नसूत्राभ्यासस्तु शास्त्रपरिसमाप्तिं द्योतयतीत्याह सूत्राभ्यास इति ॥

मध्येपलाशविपिनमध्यासीनं सहोमया ।
ओंकारस्वरसंवेद्यं भावयामि सदाशिवम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य × अद्वैतानन्दसरस्वतिना विरचितायां × ब्रह्मविद्याभरणाभिधायां चतुर्थाध्यायस्य चतुर्थः पादः । शास्त्रं च परिसमाप्तम् ॥

320

Sl. No. 38052 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. C. 4062

Beginning

अतिदेशाधिकरणे प्रधानव × शब्दत्वं परमाण्वादीनामपीत्युक्तम्। सम्प्रति प्रधानस्य वैदिकशब्दवत्त्वाभावेऽपि स्मृतिरूपशब्दवत्त्वमाशंक्य परिहरति-स्मृतीति ।

End :

सर्वविषयज्ञानाभावे कथं कारयितृत्वं तत्राह कर्मेति । तथापि सर्वत्र × न्निध्याभावे कारयितृत्वासिद्धिस्तत्राह सर्वेति । तथापि तत्ज्ञानाभावे तदसिद्धिस्तत्राह—

Colophon :

— — —

321

Sl. No: 38053 ब्रह्मसूत्रभाष्यव्याख्या Ms. No: C. 2222

Beginning :

अध्यस्तान्ध्यमपूर्वमर्थधिषणैः ग्राह्यं पुमर्थास्पदं
लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकम् ।

आम्नायान्तविभातविश्वविभवं सर्वाविरुद्धं परं
सत्यज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा ॥
श्रद्धाभक्तिपुरोधाय विधायागमभावनाम् ।
श्रीमच्छारीरके भाष्ये करिष्ये न्यायनिर्णयम् ॥

End :

वैश्वानराग्निशब्दाख्यादन्तः प्रतिष्ठानोक्त्या चेति शेषः। तत्रापि कुतो द्युमूर्धत्वादिसिद्धः तत्राह—तस्मादिति । अपिरीश्वरस्य दृष्टान्तार्थः । इमां पृथिवीमुतद्यामपि द्यावापृथिव्यामेव रोदसि यो भानुरूपेण ततान व्याप्तवान् ×

Colophon :

[इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशुद्धानन्दपूज्यपादशिष्य भगवदानन्दज्ञानविरचिते श्रीशारीरकभाष्यन्यायनिर्णये प्रथमाध्यायस्य प्रथमः पादः॥]

322

Sl. No. 38056 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. C. 3915

Beginning :

पूर्वाध्यायान्तिमाधिकरणे मोक्षे नियमाभावो दर्शितः ।
संप्रति मोक्षौपयिकविद्यासाधनेषु श्रवणादिष्वावृत्त्यनुष्ठानप्रतिनियमं दर्शयत्यावृत्तीति पूर्वोत्तराध्याययोः सम्बन्धं हेतुहेतुमद्भावं वक्तुं तार्तीयमर्थमनुद्रवति—तृतिय इति साधनाधीनत्वात् फलसिद्धेस्तद्विचारयोरपि युक्तं पौर्वापर्यमित्याशयवानाहावृत्तीति ॥

End :

वक्तव्यानवशेषात्परिसमापगस × तरु × त्वं श्रयन्ती
शुद्धानन्दांघ्रियुग्मस्मृतिभरनिभृतप्रौढगाढोक्तिरूढा ।
नन्दज्ञानप्रणीता जगति मुदमियद्दिश्यां संविधत्ताम् ॥
सन्त्येव बहुलानीह व्याख्यानानि महाधियाम् ।
व्याख्या तथापि सौख्येन व्याख्या × मया कृता ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्द × कृते श्रीमच्छारीरकभाष्यविभागे न्यायनिर्णये चतुर्थः पादः ॥

323

Sl. No. 38058 ब्रह्मसूत्रभाष्यव्याख्या Ms. No: P. 3441

Beginning :

यत्साक्षात्सच्चिदानन्दं प्रत्यगक्रियमद्वयम् ।
तन्नमामि नृसिंहस्य योगगम्यं परं पदम् ॥
सम्प्रदायविदामुक्ति संकलय्याभिधीयते ।
मुनिना चित्सुखाख्येन भाष्यभावप्रकाशिका ॥

नाना निवद्धपदलब्धसदर्थमाना
सत्सम्प्रदायपदवीरनुवर्तमाना ।

End :

वाचस्पतेरपि वचांसि विवर्तयन्ती
वागीश्वरीव बिदुषां कृतिरिष्टदैषा ॥

सगुणब्रह्मविदामपि ब्रह्मलोकं गतानां पक्षोपपन्नसम्यग्दर्शनप्रसादादेव मुक्तिरित्यप्यवगमात् सम्यग्दर्शिनामनावृत्तिः सुतरां सिध्यतीत्याह—तदाश्रयणेनैव हीति । सूत्रा(त्व्य)भ्यासस्य प्रयोजनमाह—'अनावृत्तिश्शब्दादनावृत्तिः शब्दादिति' सूत्रभ्यासश्शास्त्रपरिसमाप्तिं द्योतयतीति ॥

Colophon:

इति चतुर्थाध्यायः समाप्तः ॥

324

No 38060 ब्रह्मसूत्रभाष्यव्याख्या Ms. No: B. 75/1

Beginning;

अनाद्यानन्तकूटस्थज्ञानानन्तसदात्मने ।
अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥
नमः + प्रणमामि मूर्ध्ना ॥
पदादिवृन्तभारेण गरिमाणं बिभर्ति यत् ।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्या श्रद्धयारभे ॥

युष्मदस्मत्प्रत्ययगोचरयोः + इति । एतच्च तस्माद्ब्रह्म जिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं प्रदर्शयिष्यामः ॥

End :

यथा देहे विशिष्टजातीये तद्व्यतिरिक्तस्याहंकारेहंमानबन्धः कल्पितोऽपि स्वनिबन्धनलोकशास्त्रव्यवहारो यथावगतिहेतुः तथायं कल्पितो ऽपि अलौकिकात्मस्वरूपप्रतिपत्तेः प्राक् प्रमाणं निश्चिततत्त्वप्रत्ययोत्पादनात् बाधानुपलब्धेश्चेति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यपद्मपादाचार्यविरचितायां पञ्चपादिकायां समन्वयसूत्रं समाप्तम् ॥

325

Sl. No. 38061 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. C. 652

Beginning :

अनाद्यानन्दपूराय ज्ञानानन्तसदात्मने ।
अभूनद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥
× शिरः पद × मार्तण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥

End :

स सर्वैस्तदर्थ एवेति भवत्ययमर्थक्रमः तन्महिमाधिगतः । एवं सूत्रस्यादित्वेन कारणेन सूत्रतया च विषयप्रयोजनं तत्सिद्धिकरं चाविद्याख्यं बन्धं तत्सामर्थ्यावगतमापाद्य सूत्रसामर्थ्यं दर्शयितुं प्रतिपदव्याख्यामारभते ॥

Colophon :

पञ्चपादिकाप्रथमवर्णकं समाप्तम् ॥

326

Sl. No. 38065 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. B. 75/2

Beginning :

पालने विमलसत्त्ववृत्तये
जन्मकर्मणि रजोजुषे लये ।

तामसाय जगतः पराकृत-
द्वैतजालवपुषे नमस्स्तते ॥

विदितसकलवेद्यैर्न प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलसमेऽस्मिन् वाग्व्ययेऽहं प्रवृत्तः
स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः ॥

प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचार परिपालनाय + नमः श्रुतिशिरःपद्मेत्यादिभिस्त्रिभिःश्लोकैः ॥

End :

तस्मिंश्चापरोक्षेऽवभासमाने प्रमात्रादिबाधात्सर्वो व्यवहारो निवर्तत इति श्लोकार्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्यानुभवपूज्यपादशिष्यस्य प्रकाशात्मभगवतः कृतौ पञ्चपादिकाविवरणे समन्वयसूत्रं समाप्तम् । समाप्तं च विवरणम् ॥

327

Sl. No. 38066 ब्रह्मसूत्रभाष्यव्याख्या Ms. .No. P. 219

Beginning :

यद्बोधसमुद्भूतं यद्बोधात्प्रविलीयते ।
नामरूपात्मकं विश्वं तस्मै पूर्णात्मने नमः ॥

जटाजूटं + नृत्यतु वागजस्रम् ।

नानाविधनिबन्धाह्व प्रसूनरसमादरात् ।
निबद्धमधु संगृह्य क्रियते तत्त्वदीपनम् ॥

पञ्चपादिकां व्याचिख्यासुर्ग्रन्थकरणयोग्यतार्थं परां देवतां प्रार्थयते— आद्यश्लोकेन ॥

End :

सूत्रार्थस्य—प्रतिपदव्याख्यामारभते भाष्यकार इत्युक्तम × लक्षणत्वादित्याशयेनाह तत्राथशब्द इति ॥ बन्धस्याध्यासात्मकत्वात्प्रत्यग्र तत्क्षणे विषयो × प्रथमवर्णकं सिद्धम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य ×

328

Sl. No. 37068 **ब्रह्मसूत्रभाष्यव्याख्या** **Ms. No. P. 3050/21**

Beginning :

विचारविद्ध्यपेक्षितविषयफलाधिकार्यनुबन्धानां मध्ये विषयफले तावत्प्रतिपादिते । अर्थादधिकार्यपि सिद्ध एवेति किं सिद्धैव ननु ब्रह्मजिज्ञासेत्यादिना । न च विचारविषयप्रतिपादनार्थं वर्णकान्तरारम्भ इति शङ्क्यम् । असन्दिग्धतया अप्रतिपाद्यत्वात् ।

End :

मन्त्रादेः प्रामाण्याभावे आनर्थक्यं स्यादिति शङ्कायां गतिप्रदर्शनार्थमधिकरणारम्भो युक्त इति शङ्कते—स्तावकत्वेति ।

अथापि पूर्वपक्षाभावन्नाधिकरणारम्भ इत्याह—नावेति । तस्मादगतार्थत्वाद्वेदान्तमीमांसाशास्त्रमारम्भणीयमिति सिद्धम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्याखण्डानुभूतिपूज्यशिष्येणाखण्डानन्दमुनिना विरचिते तत्त्वदीपने द्वितीयवर्णकं समाप्तम् ॥

329

Sl. No. 38071 **ब्रह्मसूत्रभाष्यव्याख्या** **Ms. No. A. 813**

Beginning :

यदध्यासेन निखिलं विश्वं सद्व्यवहारभाक् ।
तदस्म्यहं परं ब्रह्म सच्चिदानन्दविग्रहम् ॥
योगिनां गति × । × ॥ × द्वाचस्पतेः परः ।
+ ॥ + । + नतोऽस्म्यहम् ॥

तर्कचूडामणिर्नाम टीका येन मणौ कृता ।
टीका शशधरस्यापि परिभाषा तथात्मनि ॥
तेन कंडरमाणिक्यग्रामरत्ननिवासिना ।
धर्मराजाध्वरीन्द्रेण टीकाभावः प्रकाश्यते ॥
[असम्यगू विवृतापूर्वैरा + कृपालेशाद्विवृणोम्यात्मशुद्धये]
प्रेक्षावत्प्रवृत्त्यङ्गं विषयप्रयोजने दर्शयन् निर्विघ्नपरिसमाप्त्यर्थं मङ्गळ-माचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—अनादीति ।

End :

इष्टापत्तिमाशङ्क्याह - सा चेति । उत्तरत्वेति । अर्थवादाधि-करणादावित्यर्थः । उपसंहरति अत इति । पूर्वोक्तेति । किमग्नि-होत्रादिर्धर्म उत चैत्यवन्दनादीति भट्टोक्तप्रकारेणेत्यर्थः ॥

Colophon :

इति श्रीधर्मराजाध्वरीन्द्रविरचितायां टीकापदयोजनायां द्वितीयवर्णकं समाप्तम् ॥

330

Sl. No. 38072 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. P. 3526

Beginning

यस्य निःश्वसितं वेदाः + महेश्वरम् ॥
स्वमाययानन्दवदत्र जन्तून्
सर्वात्मभावेन तथापरत्र ।
यच्छङ्करानन्दपदं हृदब्जे
विभ्राजते तद्यतयो विशन्ति ॥
भाष्यटीकाविवरणतन्निबन्धनसङ्ग्रहः ।
व्याख्यानव्याख्येयभाव क्लेशहानाय रच्यते ॥

End :

तस्मात् धर्मब्रह्मभेद देव अनयोः मीमांसयोः भेदः × तदेवं विधि-शङ्काया अप्यभावान्निर्विघ्नो ब्रह्मणि वेदान्तानां समन्वय इत्यशेषमतिमङ्गलम् ॥

संगृहीतं विवरणं शुश्रूषान्या न रोचते ।
तदस्त्वेषा भवेत्प्र न्यै × तीर्थपादयोः ॥

Colophon :

इति विवरणप्रमेयसङ्गहे चतुर्थसूत्रे द्वितीयवर्णकं समाप्तम् ॥
समाप्तः विवरणप्रमेयसङ्ग्रहः ॥

331

Sl. No. 38073 **ब्रह्मसूत्रभाष्यव्याख्या** Ms. No. P. 3721/

Beginning

अपरे पुनः शरीरेन्द्रियमनोविज्ञानशून्यव्यतिरिक्तं स्थापितं संसारिणं कर्तारं भोक्तारमात्मानमाहुः । न च शून्येऽहंप्रत्यय उपपद्यते । वन्ध्यापुत्रादावपि तत्प्रसङ्गात् ॥

End :

× देवानयोर्मीमांसयोर्भेदः । तदेवं निधिशङ्काया अप्यभावान्निर्विघ्नब्रह्मणि वेदान्तसमन्वय इत्यशेषमतिमङ्गलम् ॥

× × नैः ।
टीकायासं विना लोकाः क्रीडन्त्वत्र यथासुखम् ॥
महतां हृदयं बोद्धुमशक्तोऽप्यतिभक्तिनः ।
अकार्षं ग्रन्थमे × ।
× शुश्रूषान्या न रोचते ॥
तदस्त्वेषा भ × विद्यातीर्थपादयोः × ॥

Colophon

इति विवरणप्रमेयसंङ्ग्रहे चतुर्थसूत्रे द्वितीयवर्णकं ॥

332

Sl. No. 38076 **ब्रह्मसूत्रभाष्यव्याख्या** Ms. No. C. 1126

Beginning :

स्वमात्रयानन्दयदत्र जन्तून्
सर्वात्मभावेन तथापरत्र ।
यच्छंकरानन्दपदं हृदब्जे
विभ्राजते तद्यतयो विशन्ति ॥

भाष्यटीकाविवरणतन्निबन्धनसङ्ग्रहः ।
व्याख्यानव्याख्येयभावक्लेशहानाय रच्यते ॥
नित्यस्वाध्यायविधितोऽधीत्य वेदान्तमस्य ये ।
संशेरतेऽर्थे ते सूत्रभाष्यादिष्वधिकारिणः ॥
नित्यो हि स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः —

End :

तदुपायमन्तर्णीतविचारमुपलक्ष्य ब्रह्मज्ञानं प्रत्यदृष्टस्यापि साधनत्वाद्विधिमुपपद्येष्टसाधनताविधिपक्षं स्वीकृत्य मुमुक्षुणा ब्रह्मानुभवाय विचारः कर्तव्य इति श्रौतो वाक्यार्थः कथनीयः । कथिते च तस्मिन् संबन्धविषयप्रयोजनान्यर्थादवगम्यन्त इति स्थितिः ॥

Colophon:

इत्याचार्यवर्यविद्यारण्यमुनिकृते विवरणप्रमेयसङ्ग्रहे तृतीयवर्णकं समाप्तम् ॥

333

Sl. No. 38077 		ब्रह्मसूत्रभाष्यव्याख्या 		Ms. No. P. 3951

Beginning ;

× क्तप्रत्ययवशात्तस्य × एव कल्प्यमित्याशंक्याह—उपसंअहारइति । अध्यासभाष्यावसाने ताव × एवं चाध्यासविषयोपक × श्यामिदं तद्वारा विषयप्रयोजनपरमेकं वाक्यम् ।

End:

प्रत्युतानुगुणमेव । तदुक्तं अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखमितीति भावः । एवं सूत्रस्य तात्पर्यमुपवर्ण्य अक्षरव्याख्यानाबाऽद्यप्रघट्टकं तदवसरज्ञापनाय वृत्तानुवादपूर्वकमवतारयति—एवमिति ।

Colophon :

इति श्रीमत्परहंमसपरिव्राजकाचार्य श्रीजगन्नाथाश्रमपूज्यपादशिष्य श्रीमन्नृसिंहाश्रममुनिविरचितायां पञ्चपादिकाटीकायां प्रथमवर्णकं समाप्तम् ॥

334

Sl. No. 38078 **ब्रह्मसूत्रभाष्यव्याख्या** Ms. No. A. 547

Beginning :

यत्सत्यचैतन्यसुखानुलिप्तं
विश्वं हितं सत् स्फुरतीव भाति ।
समां निरस्ताखिलभेद आत्मा
जीयादबोधात् द्विपदो नृसिंहः ॥

\+ \+ \+

श्रीमद्गुरुकृपालेशात् अद्वैतब्रह्मगोचरे ।
क्वचित् क्वचिद्विवरणे गूढो भावः प्रकाश्यते ॥

End :

आद्यं यतो-व्यावृत्तं तस्यैव अत्यन्ताभावप्रतियोगित्वात् केवलान्वयित्वं न चेत् अत्यन्ताभावप्रतियोगित्वं सर्वत्रास्तीति तदेव केवलान्वयीति चेन्न स्वसादेव व्यावृत्तत्वात् ॥

Colophon :

— — —

335

Sl. No. 38085 **पञ्चपादीकाटीका** Ms. No. P. 9722

Beginning :

अनुवादपूर्वकं सङ्गतिमाह—एवमिति । पर्यवसानमुक्तमित्यन्तश्शास्त्रयेनित्वसमन्वयसूत्रार्थानुवाद इत्युक्तमित्यन्तः जन्मादिसूत्रार्थानुवादः । ततश्च त्रिसुत्र्या जगत्कारण—

End :

सम्प्रसादपदेन व्यवहृतो न जीव एव ग्रहीतुमुचितः । एवं च पूर्वपक्षेपि जीवो × सिद्धान्तिनः न काचित्क्षतिः । परं तु श्रुतौ प्राणपदस्य जीवलक्षणाग्राहकप्रमाणा ×

Colophon :

[इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्भूमानन्दसरस्वती चरणानुग्रहलब्धसारस्वतिपदस्य निरतिशयौदासीन्यादि गुणरत्नखचितयतिकुलोत्तंस श्रीमद्रामानन्दतीर्थमुखारविन्दनिर्गतशरीरकभाष्यव्याख्यायां ब्रह्मविद्याभरणाख्यायां प्रथमस्याध्यायस्य तृतीयः पादः ॥]

336

No. 38092 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. C. 3242/2

Beginning:

यमिह कारुणिकं शरणं गतोऽ–
प्यरिसहोदर आप महत्पदम् ।
तमहमाशु हरिं परमाश्रये
जनकजाङ्कमनन्तसुखाकृतिम् ॥
श्रीशङ्करं भाष्यकृतं प्रणम्य
वाग्जालबन्धच्छिदमभ्युपायम् ॥

End :

नानाविधग्रन्थजातं वीक्ष्य सम्यग्यशामति ।
शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ॥

वक्षस्यक्ष्णोश्च पार्श्वे करतलयुगले कौस्तुभाभां दयां च—भाष्यरत्नप्रभाख्या
स्वात्मानन्दैक लुब्धा रघुवरचरणाम्भोज युग्मं प्रपन्ना ॥

Colophon :

इति श्रीमद्गोपालसरस्वतीपूज्यपादशिष्यगोविन्दानन्दभगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

337

Sl. No: 38094 ब्रह्मसूत्रभाष्यव्याख्या Ms. No: C. 3599

Beginning:

ब्रह्मविष्णुमहेशाख्यमूर्तिभिर्यो गणाधिपः ।
जगत्सर्गादि तनुते तं वन्दे विघ्नशान्तये ॥ १ ॥

ओतं प्रोतमिदं सर्वं यस्मिन्सच्चित्सुखात्मके ।
पर्यवस्यन्ति वेदान्ता यत्र चाहं तदक्षरम् ॥

जिज्ञासासूत्रमारभ्य प्रागानन्दमयोक्तितः ।
भाष्यरत्नप्रभानाम्नीं व्याकुर्वे भक्तितः कृतिम् ॥

श्रीमत्स्वयंप्रकाशाख्यगुरोर्लब्धात्मवेदनं ।
सुशोधयितुमारब्धा व्याख्येयं नान्यहेतुतः ॥

प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यादिसिद्ध्यर्थं मङ्गळमाचरति-

End:

सगुणवाक्यविचारापवादसङ्गत्या च आनन्दमयाद्यधिकरणेषु निर्गुण विचारप्रवृत्तिरिति निर्गुणविचारस्यापि करिष्यमाणस्यास्मिन्नध्याये नासङ्गतिरिति सर्वमनवद्यम् ॥

338

Sl. No. 38095 ब्रह्मसूत्रभाष्यव्याख्या **Ms. No. C. 1498**

Beginning :

भाष्यरत्नप्रभाभागो व्याख्यातो यो विवक्षितः ।
श्रीकृष्णचरणद्वन्द्वे भूषणायास्त्वियं कृतिः ॥

या प्रपन्ना जगन्नाथं लेभे वस्त्रपरंपराम् ।
कृष्णा पार्थस्य महिषी तं प्रपद्ये हरिं सदा ॥

ओं यमिहेति । इह व्यवहारभूमावित्यर्थः । अपिशब्दस्य व्युत्क्रमेणान्वयः । अरिसहोदरो विभीषणः । मोक्षलङ्कासाम्राज्यादिरूपं महत्पदमाप प्राप्तोऽभूदिति क्रियाकारकयोजना । अनन्तसुखाकृतिमित्यनेन स्वरूपलक्षणम् । इतरेण तु तटस्थलक्षणं चोक्तमिति भावः ॥

End :

स्वाभिमतेष्टदेवतानामोच्चारणपूर्वकं फलितं समन्वयार्थमाह–रामनामेति ॥

नमस्तेभ्यो गुरुभ्यो यैरयमर्थः प्रबोधितः ।
परनिष्ठैः परात्मज्ञैः परसंतुष्टमानसैः ॥

अभिव्यक्ता हि या भृङ्गसेवाद्वारा विलेपतः ।
प्राप्ताभूत्कृष्णपादाब्जे प्रसिद्धानन्दवाञ्छया ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदद्वैतानन्दपूज्यपादशिष्यपूर्ण-प्रकाशानन्दसरस्वतीविरचिता चतुस्सूत्रीभाष्यरत्नप्रभाव्याख्या अभिव्यक्तयाख्या समाप्ता । नवमवर्णकं समाप्तम् ॥

339

Sl. No. 38098 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. P. 3603/2

Beginning :

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥

द्वितीयतृतीयाध्याययोः हेतुहेतुमद्भावलक्षणसंबन्धं दर्शयन् सुखाव-बोधार्थं अर्थसंक्षेपमाह—द्वितीयाध्याय इति ॥

End :

येनानित्यत्वं स्यादित्याह-नित्यसिद्धेति ।
भङ्क्त्वा वाचसुरेन्द्र + को मत्सरः॥
अज्ञानसागरं तीर्त्वा + मनोरथः ॥
तस्मिन् महीपे महनीयकीर्तौ
श्रीमन्नृगेऽकारि मया निबन्धः ॥

Colophon:

इति वाचस्पतिमिश्रविरचित श्रीशारीरकभगवद्भाष्यविभागे भामत्य चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

340

Sl. No.38100 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. B. 879

Beginning

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोऽबवनयः ।

यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥
नत्वा विशुद्धविज्ञानं शंकरं करुणाकरम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥
आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥
अथ यदसन्दिग्धमप्रयोजनं—

End:

वाक्यान्तरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात्तदनूद्याप्राप्तोपासना भावार्थो विधेयस्तस्य च भेदाद्विधावृत्तिलक्षणो वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्घाटितः, स्वव्याख्यानोक्तप्रायत्वादिति सर्वमवदातम् ॥

Colophon :

इति श्रीमदाचार्यवाचस्पतिमिश्रविरचिते भगवत्पादीयभाष्यविभागे भामत्यां प्रथमस्याध्यायस्य प्रथमः पादः ॥

341

Sl. No: 38105 ब्रह्मसूत्रभाष्यव्याख्या **Ms. No: P. 505**

Beginning:

विश्वं × ज्ञान × लासजातं
विज्ञानतो यद्विषय × वृत्तम् ।
आनन्दरूपं हरिमद्वयं तं
वेदान्तवेद्यं विधितो भजामः ॥
श्रीम × श्रीनलवंशजनितः श्रीकाळहस्त्यध्वरी
यज्ञाम्बा च यमात्मजं प्रसुषुवे श्रीरङ्गनाथाभिधम् ।
सोऽयं सम्प्रति साधनोज्वलमनाः प्राग्जन्मपुण्योदयात्
प्राप्याखण्डयति × ॥
सोऽयमखण्डयतिराट–इम्मडि जगदेरिरायभूपेन ।
संप्रार्थितोऽद्दित सम्यग्वाचस्पत्यस्य कुर्विति व्याख्याम् ॥
सकल्पकतरोर्विहाय क्वचित् क्वचित् । (?)
करोत्यखण्डयतिराड्व्याख्यां वाचस्पतेः कृतेः ॥

End :

ब्रह्मणि सर्वेषां वेदान्तानां समन्वयमुक्तं निगमयति । एवं कार्यान्वयं विनेत्यादिना । प्रसाधिते × न स्वयमित्येतत् पुरुषार्थ इत्यनेन सम्बध्यते तथा च स्वयं पु × र्थे इत्यर्थः ॥

Colophon :

इति श्रीमद्राणावंशपयोधिचन्द्रेण वृद्धजगद्देवानुजश्रीमदङ्कुशरायतनूजेन धनासायानुजेन श्रीमदिम्मडिजगदेकरायभूपेन सम्पादितस्य श्रीमत्स्वयंप्रकाशसरस्वतीपूज्यपादशिष्यस्य अखण्डानन्दसरस्वत्याख्यस्य यतिकृतौ वाचस्पत्यव्याख्यायां ऋजुप्रकाशिकायां चतुस्सूत्री सम्पूर्णा ॥

342

Sl. No. 38108 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. P. 3606/1

Beginning :

यदज्ञातं जीवैर्बहुविधं जगद्विभ्राम धरम्
विियद्यद्वह्मालैस्तलमलिनतायोगि कलितम् ।
तदु × दज्ञानप्रततसुखसद्ब्रह्म परमम्
नमस्यामः प्रत्यक् श्रुतिशशिकृतोर्मिभिः प्रकटीम् ॥ (?)

\+ + +

संसारार्कोपतापप्रशमननिपुणः तन्यते कल्पवृक्षः ॥

श्रीमच्छारीरकमीमांसाव्याख्यायाः प्रारीप्सितायाः अविघ्नपरिसमाप्त्यादि × दये × विषयादिनिर्दिशति—अनिर्वाच्येति—

End :

शास्त्रं बुधैः परागगताद्विजेन्द्राः (?)
चन्द्रादय × तत्ववाग्मिकरवारिराशेः ।
ज्ञातं न पारं प्रभवन्ति तस्मिन्
कृष्णक्षितीपे भुवनैकवीरे ॥

भूमहादेवनृपेण साक्रान्तातिक्षितिम् प्रगिवधर्मसूनुः ॥ (?)

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदनुभवानन्दपूज्यपादशिष्य भगवद्अमलानन्दस्य व्यासाश्रमि × पर न × स्य× वेदान्त-कल्पतरौ चतुर्थपादः ॥ समाप्तश्चाध्यायः ॥

343

Sl. No: 38118 ब्रह्मसूत्रभाष्यव्याख्या **Ms. No. B. 873**

Beginning :

गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः ।
अवलम्ब्य शिवमधीयन् यथामति व्याकरोमि कल्पतरुम् ॥
कल्पकतरुमुपकुर्या + ॥ + ददाति पुष्पकवत् ॥
इत्यहमिहातिगभीरे + कतिपयरत्नग्रहादीवा ॥
यदिति । अत्र प्रत्यगिति—

End :

निश्चितस्यापि नित्यविभुत्वादिना सन्दिग्धतया विषयत्वं स्यादिति वाच्यम् । सिद्धान्ते तन्निश्चयस्य मोक्षफल × गीकारादिति भावः ॥

Colophon :

— — —

344

Sl. No. 38123 ब्रह्मसूत्रभाष्यव्याख्या **Ms. No. B. 878**

Beginning :

पुरुषार्थोऽतश्शब्दादिति बादरायणः ।
पूर्वपादेनावसरसंगतिं दर्शयन् पादार्थमाह पूर्वमिति—

End :

अयमर्थो भाष्यकाराणामिमां श्रुतिं भोगसाम्यार्थत्वेनोदाहृतवतामाश-यस्थो न भवतीति स्वयमन्यथा व्याचष्टे तं ब्रह्मलोकगतंमित्यादिना ॥

Colophon :

इति श्रीभरद्वाजकुलजलधिकौस्तुभ श्रीमदप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

345

Sl. No: 38124 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. P. 3607

Beginning :

दैत्येन्द्रं वरदर्पितं सम्भ्रमं हित्वाऽट्टहासे कृते
दृष्ट्वा कं कमलालयाकुशलं नेत्रश्रियाऽलङ्कृतम् ।
संहृष्टा परिषस्वजे सुरगणैस्संस्तूयमानं विभु
तं लक्ष्मीकुचकुङ्कुमाङ्किततनुं लक्ष्मीनृसिंहं नुमः ॥
महीधरकुलोत्तंसः + लक्ष्मीनृसिंहः कुरुते कल्पवृक्षप्रदीपिकाम् ॥
+ आभोगोऽयं प्रकाश्यते ॥
आचार्यश्रीकीर्षितस्य + यदज्ञातमिति ॥

End :

उप × अङ्गनिप्रळय × नानान्निबिड × मघानां
तद्वत् गम्भीरनादमित्यर्थः । स्वस्य प्रतिवादिप्रयुक्तभयाभावायनिर्भय—

Colophon :

[इति श्रीमन्महीधरकुलजलधिकौस्तुभ कोण्डुभट्टमहोपाध्यायतनुभवेन श्रीमन्नारायणेन्द्रगुरुचरणकटाक्षनिक्षेपकोशगृहायमानेन श्रीमन्नारयणेन्द्रगुरुचरण कटाक्षनिक्षेपकोशगृहायमाने नलक्ष्मीनृसिंहचरणारविन्दचञ्चरीकेण लक्ष्मीनृसिंहेन विरचितायां कल्पवृक्षप्रदीपिकायामाभोगाख्यायां द्वितीयस्याध्यायस्य प्रथमः पादः ॥]

356

Sl. No. 38125 ब्रह्मसूत्रभाष्यव्याख्या Ms. .No. C. 1161

Beginning :

यद्वेदान्तपयोनिधावमृतमित्याहुर्गिरामप्यसौ
दूरे यन्महिमा जनुप्रभृतयो दोषा न यत्रासते ।
जन्मादिर्जगतो यतो नतिरियं तस्मै सुखाम्बोधये
सर्वस्मै सकलागमाशयविदां स्वस्मै परस्मै सते ॥
पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशंकररुपाय श्रीपरब्रह्मणे नमः ॥

भास्वद्भाष्यमयूखमालिनि भिदापाण्डित्यसाहंकृति
ध्वान्तध्वंसविधायिनं श्रुतिशिरःकंजातनिद्राभिदि ।
जाग्रत्यद्वयशासनासहजडध्वान्तोक्तिमात्रेण यो
मन्दानामजनि भ्रमस्तदधुना भङक्तुं श्रमोऽयं मम ॥

युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यं श्रीमद्भाष्यमस्यानर्थहेतोः + नार्थ यत् ॥

End :

+ समावेशदर्शनात् त्वां प्रति सद्विलक्षणत्वमात्रस्य साध्यतया दृष्टान्ते साध्यवैकल्याभावाच्च । न च शशशृङ्गमित्यादिप्रतीत्या असतोऽपि सत्त्वेन ×

Colophon :

— — —

347

Sl. No. 38129 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. C. 4586/1

Bginning :

छिन्नमूलत्वेन न बन्धाय भवतीति भाष्ये छिन्नाविद्याख्यमूलत्वेनेत्यर्थः उक्तः । स एवेह दूषयितुमुचितः । तथापि वासनाकार्यत्वकथनाद्वासनाया एव मूलत्वं वक्तव्यमिति तथोक्तमिति द्रष्टव्यम् ॥

End :

परमसाध्य एव हेतुतया तृतीयसूत्रं योजितमिति द्रष्टव्यं यथा सोम्य मधु इत्यादि मधुकृता मक्षिकाः मधुस्तिष्ठति उत्पादयन्ति नानात्ययानां नानादिका वकुलस्य रसः इति एव सदैकीभूता अपि प्रयोजनविवेकं लभन्त इत्यर्थः ॥

आनन्दमयो भ्यासात् ॥

Colophon

— — —

348

Sl. No. 38130 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. C. 4691/1

Beginning :

× ह पदार्थेषु जीवेश्वरजगद्रूपेष्वनादरात् सरसा ये प्रकारा नानाविधाः परस्परविरुद्धाः दर्शिताः अनादरादित्यनेन परस्परविरुद्धेषु जीवैकत्वनानात्व तत्प्रतिबिम्बत्वादिरूपाः प्रकर्षव्यापारेष्वभिनिवेशवतामाचार्याणां भेदवादिनामिव

माचार्याणां भेदवादिनामिव अनाप्तत्वं स्यादिति शङ्कानिराकृता भवति । +
तदुक्तं सुरेश्वराचार्यैः—

यथा यथा भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥ इति ॥

End :

तच्चासामानाधिकरण्यं अज्ञानाश्रये विषयचैतन्ये वृत्तिज्ञानस्य संसर्ग रूपम् । स च संसर्गे वृत्तिर्निर्गमाधीन इति भावः । एवं विषयचैतन्य-गताज्ञाननिवृत्तिरनिर्गतवृत्त्या ॥

Colophon :

— — —

349

Sl. No. 38131 ब्रह्मसूत्रभाष्यार्थसंग्रहः Ms. No. B. 1110/15

Bginning :

सूत्रकारोऽपि भगवान् बादरायणः अथातो ब्रह्मजिज्ञासेति त्रिविध-परिच्छेदशून्य प्रत्यगभिन्नब्रह्मणः मुमुक्षुपुरुषविचार्यत्वं प्रतिज्ञाय जिज्ञास्यं ब्रह्म किंलक्षणं प्रमाणं इत्याकाङ्क्षायां जन्माद्यस्य यतः उपन्यस्य + ॥

End :

सकलविद्याफलं च ब्रह्मलोकैश्वर्यमुपपाद्य तेषां सगुणविदुषां अन्ते अनावृत्तिः शब्दादनावृत्तिश्शब्दादिति ब्रह्मोपदेशेन मुक्तिं प्रदर्शयामास ॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ १ ॥

Colophon :

— — —

350

Sl. No. 38132 ब्रह्मसूत्रविषयवाक्यार्थः Ms. No. C. 1501

Beginning : :

अथातो ब्रह्मजिज्ञासा 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितोलोकः क्षीयते॥ यथा इह भूलोके कर्मणा चितः सम्पादितः पुत्रमित्र-

कळत्रादिलक्षणो लोकः जनः क्षीयते नश्यति एवमेवामुत्र स्वर्गलोकेष्वपि पुण्य चितः पुण्येन सम्पादितः पुत्रमितकळत्रादिलक्षणो लोकः जनः क्षीयत इत्यर्थः।

End :

तासां धानानां मध्ये एकां भिन्धीत्यर्थः। न किंचन भगव इति श्रुत्या वटबीजावयवदृष्टान्तेन आसां सूक्ष्मपरमाणूनां जगत्कारणत्वं प्रतिपाद्यत इति नैय्यायिका वदन्ति, तदसङ्गतम् : बहुश्रुत्यनुमारेण वटबीजावयववत् इन्द्रियाग्राह्यस्याकाशवत्सर्वव्यापकस्य परमात्मनः अनया श्रुत्या जगत्कारणत्वं प्रतिपादयतीति भावः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रस्वामिविरचिते ब्रह्मसूत्रविषयवाक्यविवरणं समाप्तम् ॥

351

Sl. No. 38133 ब्रह्मसूत्रवृत्तिः Ms. No. C. 3987/1

Beginning :

× म्येकोपपत्तेः प्रवाहरूपेण वेदानां नित्यता। द्वितीयं वर्णकमाह। शास्त्रयोनित्वात्। ब्रह्म मानान्तरवेद्यं न भवति। कुतः शास्त्रयोनित्वात्। शास्त्रं वेदः योनिः प्रमाणं यस्य तथात्वादित्यर्थः ॥

End ;

मुक्ताः पुरुषाः निर्विशेषं ब्रह्म प्रतियन्ति। बद्धपुरुषास्तु सविशेषम्। अत × प्स यत्र हेतुरुपन्यासादिभ्य इति। मुक्तो जीवः स्वेन ब्राह्मेण रूपेण अभिनिष्पद्यते ॥

Colophon :

इति ब्रह्मसूत्राणुव्याख्याने प्रथमोऽध्यायः समाप्तः ॥

इति ब्रह्मसूत्र द्वितीयाध्यायस्य तृतीयः पादः।

शोभनकृन्नामसंवत्सरे मधौहरिपण्डितेन कृतोनंभट्टकृतवृत्तिसङ्ग्रहः समाप्तः ॥

इति चतुर्थाध्यायस्य तृतीयः पादः ॥

352

Sl. No. 38134 ब्रह्मसूत्रवृत्तिः Ms. No. P. 202

Beginning;

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥
यस्याहुरागमविदः परिपूर्णशक्ते–
रंशे कियत्यपि निखिलं (?) × ममुं प्रपंचम् ।
तस्मैं तमालरुचिभासुरकन्दराय
नारायणीसहचराय नमःशिवाय ॥

End :

सृष्टिपूर्वभावित्वेन श्रवणे सृष्टेः प्रागपि × णकारणात्मना स्थिते × तस्यैव ब्रह्मणा सृष्टः स्थलरूपावच्छेदमात्रं तत्सृष्टेत्यादिनोच्यते । न तु प्राक्तत्रासतस्तस्य स्वरूपेण शरीरावच्छिन्नरूपेण ×

Colophon:

— — —

353

Sl. No. 38137 ब्रह्मसूत्रवृत्तिः Ms. No. P. 2804

Beginning: :

प्रथमे पादे स्पष्टब्रह्मलिङ्गानि वाक्यानि निर्णीतानि ।

अथास्पष्टब्रह्मलिङ्गानि वाक्यानि निर्णेतुं पादान्तरारम्भः । इदं च तत्र तत्राधिकरणे स्फुटीकरिष्यते । जन्मादिसूत्रे निर्णीतं ब्रह्मणो जगत्कारणत्वं तदाक्षिप्तं सर्वज्ञत्व सर्वात्मत्वं नित्यत्वमित्यादयो धर्माः इह सिद्धवद्ब्रह्मलिङ्गत्वे-नोपादीयन्त इति प्रथमपादोपजीवित्वात्तदानन्तर्यम् ॥ सर्वत्र प्रसिद्धोप देशात् ॥

End:

मायिकविकाराणां नाविकनिर्विकारत्वाप्रतिक्षेपकत्वस्य गाधिवृत्तान्त लवणोपाख्यानादिषु लोके च प्रसिद्धतरत्वात । तस्मात्सिद्धं ब्रह्म जगतो निमित्तमुपादानं चेति युक्तं ब्रह्मणो लक्षणम् ॥

End :

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य श्रीविश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनोः श्रीमदप्पयदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमस्याऽध्यायस्य चतुर्थः पादः ॥

354

Sl. No. 38138 — न्यायरक्षामणिः — Ms. N: P. 3608/1

Beginnig :

उद्घाट्य योगकलाय हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ १ ॥

अथातो ब्रह्मजज्ञासा ॥
अत्र शास्त्रारम्भोयोगिब्रह्मात्मैक्यलक्षणविषयप्रयोजनविरोधिनः—

End :

'प्राणो ब्रह्मे' ति ब्रह्मदृष्टिविशेषितहिरण्यगर्भोपासनायाश्च विधानेन वाक्यभेदावश्यम्भावाच्च ब्रह्मोपासनाप्रकरणमध्येऽपि उपासनान्तरविधयस्स्वीकृताः। न चेह तथा अनन्यथासिद्धिमनेकविद्यासमुच्चयवचनमस्ति । तस्मात् ज्ञेयब्रह्ममात्रपरमेवेदं प्रकरणमिति सिद्धम् ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य श्रीविश्वजिद्याजि श्रीरंगराजध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमाध्यायस्य प्रथमः पादः ॥

355

Sl No. 38141 — ब्रह्मसूत्रभाष्यव्याख्या — Ms. No. P. 3609/1

Beginning :

उद्घाट्य योगकल्या हृदयब्जकोश
धन्यैश्चिरादापि यथारुचि गृह्यमाणः ।

यः प्रस्फुरत्यविरतं परिपूर्णरूपः

श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥

\+ \+ \+

एनां पुराणपदवीमनुसृत्य सत्या-

मत्यादरेण महितैरनुपाल्यमानाम् ।

शारीरकाभरणनावजुषां नयानां

रक्षाकरं मणिमनाविलमुल्लिखामि ॥

\+ \+ \+

अथातो ब्रह्मजिज्ञासा ॥ अत्र शास्त्रारम्भयोगिब्रह्मा—

End :

प्रकृतस्य हेतुत्वाभिधायिना तच्छब्देन वक्तुं शक्यः । यद्यप्यानन्तर्याभिधानमुखेन साधनचतुष्टयस्य हेतुत्वमथशब्देनैव लब्धम्, तथापि अथशब्दलब्धहेतुत्वस्यैव पुनः परामर्शरूपाद्यत्नान्तरान्नित्यानित्यविवेकाद्यसम्भवशङ्कानिराससूचनेन तद्धेतुत्वमेव प्रतिष्ठाप्यते ॥

Colophon :

— — —

356

SI. No. 38144 ब्रह्मसूत्रवृत्तिः Ms. No. P. 384/2

Beginning :

विद्यारत्नं मया प्राप्तं यत्कृपापारवारिधेः ।

तं वं × नन्दं गुणरत्नाकरं गुरुम् ॥

हरिहरलीलावपुषौ परमेशौ व्यासशङ्करौ नत्वा ।

वाचस्पतिमतिबिम्बितमादर्शनं प्रारभे विपुलम् ॥

अथातो ब्रह्मजिज्ञासा ॥

ब्रह्म विचिन्त्यं न वेति संशयः ॥

End :

न चोपासनं मङ्गमित्युक्तं पृथग्ध्य × ×
× रङ्गस्यावश्यमृत्विग्भिर्निर्वर्त्यत्वेन तदाश्रितस्यव्यापाररूपस्य पृथक्प्रयोगायोगात् ॥

Colophon :

— — —

357

Sl. No. 38145 ब्रह्मसूत्रवृत्तिः Ms. No. P. 2522/1

Beginning :

× × वारिधिम् ।
× भवानन्दं गुणरत्नाकरं गुरुम् ॥
× लीलावपुषं परमेश्वरम् शङ्करौ नत्वा ।
वाचस्पतिमतबिम्बितमर्थं प्रारभे विमलम् ॥
अथातो ब्रह्मजिज्ञासा ॥
ब्रह्म विचार्यं न वेति सन्देहः । तद्विचारस्य—

End :

ईश्वरस्यैवात्मन आकाश इत्यादौ जगत्स्रष्टृत्वश्रुतेः तत्तेजोऽसृजतेति जगत्सर्गे सदेव सौम्येदमित्यादिना तस्यैव प्रक्रमादीश्वराधीनत्वाभ्युपगम एव एकत्वलाभाच्च । अतो + निरङ्कुशमिति सिद्धम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजक नुभवानन्दस्य कृतौ शास्त्रदर्पणे चतुर्थोऽध्यायः ॥

358

Sl. No. 38148 ब्रह्मसूत्रवृत्तिः Ms. No. C. 4105

Beginning :

जीवोपकरणभूत भौतिकजन्मादिनिरूपणानन्तरं तदुपहितस्य जीवस्य संसारप्रकारं निरूपयितुं देहान्तरारम्भे भूतसूक्ष्मपरिष्वक्तस्यैव गमनमिति तावदाह तदन्तरेति ॥ हेतुहेतुमद्भावसम्बन्धमध्याययोर्वक्तुं पूर्वाध्यायार्थं संक्षिपति द्वितीय इति ॥

End:

कस्यचिन्निर्गुणविद्यावतः पुरुषस्य गतिः फलमिति यावत्। तत्र न्यूनाधिकभावाभावे हेतुमाह सति हीति। पुनरुक्तेरर्थवत्वमाह तदवस्थेति॥

तदेवं मुक्तेर्निरतिशयत्वान्न कर्मसाध्यतेति युक्तं पुरुषार्थाधिकरणमिति भावः॥

Colophon :

इति श्रीमत्परमहंसपरिव्राचकाचार्य श्रीशुद्धानन्दपादशिष्य भगवानन्दज्ञानकृते श्रीमच्छारीरभाष्यविभागन्यायनिर्णये तृतीयाध्यायस्य चतुर्थः समाप्तः॥

359

Sl. No. 38149 ब्रह्मसूत्रवृत्तिः Ms. No: P. 2811

Beginning :

पुरुषाय पुराणाय कृष्णाय परमात्मने।
पुण्यश्लोकाय पूर्णाय ज्योतिषां पतये नमः॥
प्र × कौण्डिन्येन विपश्चिता।
बादरायणसूत्रेषु ज्ञानकाण्डस्य दीपिका॥

स्वाध्यायोऽध्येतव्य + धायवेदाध्ययनस्य नित्यतया विहितत्वादधीतसाङ्गस्वाध्यायस्यार्थावबोधौपयिकन्या + पादनपरं

End :

महत्वाधिकारात् तदप्रकृतग्रह × नम्य × इडत्वं भविष्यति मन्यते अत इदमुच्यते ज्योति × तिक्षेपार्थः। नात्र महत्तत्वात्मिका × न्ता प्रकृतिर्गृह्यते॥

Colophon :

प्रथमे तृतीयपादसमापनवाक्यं यथा—

इति मीमांसाशास्त्रे कौण्डिन्यविरचितायां विद्याकाण्डवृत्तौ प्रथमस्याध्यायस्य तृतीयः पादः॥

360

Sl. No. 38151 ब्रह्मसूत्रवृत्तिः Ms. No: P. 1554/1

Beginning :

श्रीरामपद्माश्रमपादपद्मं
वन्दारुबृन्दारकवृक्षतुल्यम्।

प्रणम्य सद्यः सकलार्थसिद्ध्यै
लिखामि पाराशरसूत्रवृत्तिम् ॥

अथातो ब्रह्मजिज्ञासेति । अत्राथशब्देन साधनचतुष्टयसम्पत्त्या नन्तर्यमुच्यते । +

End :

अत्राध्यायचतुष्टयार्थः सूचितः ।
विदुषां कण्ठभूषेयं मया वृत्तिः कृता प्रभो ।
व्यासवाङ्मणिसन्दब्धा प्रीतये तेऽस्तु सर्वदा ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमुकुन्दाश्रमश्रीचरणशिक्षितस्य श्रीमहोपाध्याय श्री श्रीरामचन्द्रार्यप्रेमास्पदशिष्यस्य तिरुमलार्यतनूजस्य धर्मा॥ भट्टस्य कृतौ वेदान्तसूत्रस्य ब्रह्म मृतवर्षिण्यां चतुर्थाध्यायस्य चतुर्थः पादः ।

361

Sl. No. 38151 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. P. 2179

Beginning

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

श्रीरामभद्राश्रमपादपद्मं
वन्दारुवृन्दारकवृक्षतुल्यम् ।
प्रणम्य सद्यः सकलार्थसिद्ध्यै
लिखामि पाराशरसूत्रवृत्तिम् ॥

अथातो ब्रह्मजिज्ञासेति । अत्राथशब्देन साधनचतुष्टयसम्पत्त्या-नन्तर्यमुच्यते ।

End:

कृत्वा केवलहानश्रवणोपसंहार उक्तः ।
इदानीं विद्यायाः कर्महानि × नास्तीत्याक्षेपात् सङ्गतिः ।
पर्यङ्कस्थब्रह्मोपासकस्य देह ×

Colophon:

इति श्रीधर्मभट्टकृतौ ब्रह्मामृतवर्षिण्यां तृतीयाध्यायस्य द्वितीयः पादः ॥

362

No. 38156 ब्रह्मसूत्रवृत्तिः Ms. No: C. 1771

Beginning;

श्रीवासुदेवाश्रमपादपद्मं
वन्दारुवृन्दारकवृक्षतुल्यम् ।
प्रणम्य सद्यःसकलार्थसिद्ध्यै
लिखामि पाराशरसूत्रवृत्तिम् ॥
श्रीरामचरणद्वन्द्वमद्वन्द्वानन्दसाधनम् ।
नमामि यद्रजोयोगात्पाषाणोऽपि सुखं गतः ॥
नित्याध्ययनविधिना अधीतस्वाध्यायमापातज्ञानवन्तं—

End:

तस्माद्ब्रह्मविदां निरस्तानर्थव्रातानां स्वप्रभनिरतिशयानन्दात्मनाऽवस्थितिरिति सिद्धम् ॥
सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्था ॥
यस्सर्वश्रुतिवन्दिवन्दिततनुर्मायात्मनिद्रां गतः
सुप्तोऽस्मिन्भवपट्टणे परिमिते कल्पान्ततल्पान्तरे ।
यस्सर्वापरिपन्थिनाङ्गनयजाप्रज्ञाप्रवातान्तज-
प्रज्ञालभ्यसुखाकृतिः कृतिमिमां रामः स गृह्णातु नः ॥
अत्राध्यायचतुष्टयार्थः सूचितः ॥
विदुषां कण्ठभूषेयं मया वृत्तिःकृता प्रभो ।
व्यासवाङ्मणिसंदृब्धा प्रीतये तेऽस्तु सर्वदा ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमुकुन्दाश्रमश्रीचरणशिक्षितस्य श्रीमहोपाध्यायश्रीरामचन्द्रार्यप्रेमास्पदशिष्यस्य तिरुमलार्यतनूजस्य धर्मभट्टस्य कृतौ ब्रह्मामृतवर्षिण्यां चतुर्थस्याध्यायस्य चतुर्थः पादोऽध्यायश्च समाप्तः ॥
सत्सङ्गात् निस्पृहगुरु + ॥

393

Sl. No. 38157 ब्रह्मसूत्रवृत्तिः Ms. No. P. 4950

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥

अनुष्ठितधर्मविदलितान्तःकरणस्याधिकारिणः पुरुषस्य तरति शोकमात्मवित्, ब्रह्म वेद ब्रह्मैव भवतीत्यादिवेदान्तवाक्येषु संशयो भवति—

End :

ब्रह्मणा सह तेषामपि सगुणब्रह्मविदुषां तत्समीपं प्राप्तानां महाप्रलये ब्रह्मात्मैकत्वज्ञानात् क्रममुक्तिशास्त्रसिद्धादमृतत्वेऽनावृत्तेः कार्याध्यक्षेण सहातः इत्यत्रोपपादितत्वाच्च । अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥

Colophon :

इति श्रीराजाधिराजपरमेश्वरगजमृगयाधिराज श्रीवीरप्रतापप्रौढदेवरायमहाराजकृतौ पम्पायां ब्रह्मसूत्रवृत्तौ चतुर्थस्याध्यायस्य चतुर्थ पादः । समाप्तश्चायं ग्रन्थः ॥

364

Sl. No. 38158 ब्रह्मसूत्रवृत्तिः Ms. No. P. 1667

Beginning :

चरणौ तरणीकुर्मः श्रीमन्नारायणप्रभोः ।
अपि श्रीविश्वनाथस्य परमानन्दरूपिणः ॥

भाष्यार्थो निरणायि यश्श्रुतिपथन्यायाम्बुधेः पारगैः
विज्ञैर्निर्णयदर्पणप्रभृतिषु ब्रह्मापरोक्षान्वितैः ।

तं बुध्वा तनुते गुरुप्रणतिभिस्तन्मात्रचेतोगति
ब्रह्मानन्दसरस्वती श्रुतिशिरःसूत्रेषु मुक्तावलिम् ॥

अथेयं शारीरकमीमांसानारम्भणीया, कर्तृत्वादिबन्धस्य समूलस्य सत्यतया ज्ञानानिवर्त्यत्वात् तन्निवृत्तेः फलस्य —

End :

इहेत्यस्य संसारमात्रार्थत्वे बाधकाभावादत एव इममित्यस्यापि द × जाजियार्थत्वद्वर्तमानकल्पार्थकत्वेऽपि प्रातिकल्प × पुरुषान् प्रति वर्तमानकल्प × तेस्य प्राप्ते प्रति × अस्यान्ते कृतात्मानः प्रविशन्ति × कैवल्यबोधनेन तेषामनावृत्यावश्यकत्वाच । आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेत्यादेरप्यश्वमेधादि न प्रा ×

Colophon:

× परमहंसपरिव्राजकाचार्यपरमानन्दस्वतार × र्थ तीपूज्यपाद सरस्वतीशिष्यब्रह्मानन्दसरस्वतीरचिते वेदान्तसूत्रमुक्तावल्यां चतुर्थोऽध्यायस्स माप्तः । समाप्तश्च सूत्रमुक्तावळिः ॥

365

Sl. No. 38160 ब्रह्मसूत्रवृत्तिः Ms. No. C. 4094/3

Beginning :

प्राग्ज्योतिस्वरूपं तं अवाङ्मनसगोचरम् ।
श्रीवासुदेवं साष्टाङ्गं प्रणम्य सकलेष्टदम् ॥
× व्याससूत्राणां वृत्तिर्भाष्यानुसारिणी ।
आनन्दाश्रमपादाब्जपरागाणां कृपाबलात् ॥
लिख्यते रङ्गनाथेन विद्वज्जनमनोहरा ॥

End :

सूत्राभ्यासः शास्त्रसमाप्तिद्योतनार्थः । गुरूणां चरणाम्भोजकृपया + म्भोजकृपया लिखिता या वृत्तिः श्रीव्याससूत्राणां प्रीत्यै सास्तु जगद्गुरोः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री आनन्दाश्रमचरणारविन्दसेवा परायणेन रङ्गनाथेन विरचितायां व्याससूत्रवृत्तौ चतुर्थाध्यायः समाप्तः ॥

366

Sl. No. 38163 ब्रह्मसूत्रवृत्तिः Ms No P 3858

Beginning :

आम्नायान्तैकसंसिद्धमादिमध्यान्तवर्जितम् ।
आनन्दघनमापूर्णं किञ्चिन् ज्योतिरुपास्महे ॥

श्रीमद्देशिकपादाब्जपरिचर्याबलादहम् ।
भाष्यानुगां ब्रह्मसूत्रवृत्तिं कुर्वे यथामति ॥

इह खलु भगवान्बादरायणः प्रेक्षावत्प्रवृत्त्यौपयिकमापाततस्त्वय्यन्त-वचोभिः प्रतिपन्नमनुबन्धजातं न्यायतो निर्णेतुमिदमारचयाञ्चकार—

End :

निर्गुणब्रह्मविदां त्वावृत्तिशंकैव नास्ति यतः सगुणविदामपि × अनावृत्तिः शब्दादितिसूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्थः ॥

जडः क्वाहं बालः क्व च गहनवेदान्तसरणि-
स्तथाप्याम्नायार्थं परमशिवयोगीन्द्रकृपया ।
विजानन्व्याख्यानं व्यरचयमहं वेदशिरस-
स्तदेतत्क्षन्तव्यं मयि सदयदृष्ट्या बुधजनैः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्परमशिवेन्द्रसरस्वतीपादाब्ज सेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां ब्रह्मसूत्रवृत्तौ ब्रह्मतत्व प्रकाशिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ॥
समाप्ता शरीरमीमांसा ॥

366

SI. No. 38166 **ब्रह्मसूत्रवृत्तिः** Ms No B. 1118/3

Beginning :

वेदान्तसूत्रग्रथितैः श्रुतितात्पर्यमौक्तिकैः ।
भूषितं दक्षिणामूर्तेः चरणद्वन्द्वमाश्रये ॥
सूत्रकृद्भाष्यकृद्रूपौ नत्वा हरिहरौ गुरू ।
वेदान्तसूत्रसिद्धान्ततात्पर्यं लिख्यते मया ॥

End :

कुतः सर्वत्र सर्वेषु वेदान्तेषु यत्र सिद्धं जगत्कारणं ब्रह्म तदेवात्र सर्वं खल्विदत्यादिनोपदेश्यते न जीव इति ॥

विवक्षितगुणोपपत्तेश्च ॥ उपासनाय विवक्षिताः सत्यसङ्कल्पत्वादयो ये गुणाः तेषां ब्रह्मण्येवोपपत्तेः ॥

Colophon :

इति श्री सदाशिवब्रह्मेन्द्रकृतौ वेदान्तसूत्रवृत्तौ प्रथमाध्यायस्य प्रथमः पादः ॥

मनोमयः × ण्येवोपपत्तेः ॥

368

Sl. No. 38167 ब्रह्मसूत्रवृत्तिः Ms. No. C. 3851/2

Beginning :

× × मयं जगत् ।

नृसिंहाख्यं परं ब्रह्म भावयामि तदात्मकः ॥ १ ॥

शङ्करभगवत्पाद × जगति यद्यशोऽन्जस्य ।

वन्दे गोविन्दशङ्करौ क्रमशः ॥ २ ॥

तत्रेदानीं जिज्ञासूनां सुखबोधाय सूत्रभाष्यसंग्रहः क्रियते ॥

End :

त्रिवृत्करणे पृथिव्यादिभूयस्त्वात्तद्वादः पार्थिवादिव्यपदेशः इत्यर्थः । तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायसमाप्त्यर्थः ॥

Colophon :

इति श्री लक्ष्मीनरहरिसूरिसूनुना हरिदीक्षितेन विरचितायां ब्रह्मसूत्र-वृत्तौ द्वितीयाध्यायः ॥

369

Sl. No. 38168 ब्रह्मसूत्रवृत्तिः Ms. No. C. 3851/4

Beginning :

पूर्वार्धं समाप्तम् ॥

यस्मिन्यन्मायया दृश्यं एतद्यदनुविद्धया ।

कल्पितं सत्यवद्भाति तस्मै नृहरये नमः ॥

द्वितीये अध्याये वेदान्तैः प्रतिपादिते ब्रह्मदर्शने स्मृतिश्रुतिन्याय-विरोधोऽस्य परिहृतः ॥

End :

× अनावृत्तिः तदाश्रयणेनैव हि सगुणशरणानामपि अनावृत्तिसिद्धि-रिति । अनावृत्तिः शब्दादिति सम्पूर्णसूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योत-यतीति सर्वमवदातम् ॥

Colophon :

इति श्री लक्ष्मीनरहरिसूनुहरिदीक्षितस्य कृतौ ब्रह्मसूत्रवृत्तौ चतुर्था-ध्यायस्य चतुर्थः पादः ॥

व्यासं वसिष्ठनप्तारं × अनुग्रहाद्धरेः ॥

370

Sl. No. 38172 ब्रह्मसूत्रार्थचिन्तामणिः Ms. No. A. 408/1

Beginning :

ब्रह्मानन्दचिदात्मकं श्रुतिशिरोवेद्यं जगत्कारणं
नित्यं स्वप्रभमद्वयं सुविमलं जीवो यदंशः श्रुतिः ।
कर्तृत्वादिमतिस्तु दोषजनिता बुद्ध्यात्मभेदाग्रहो
दोषस्तस्य निवृत्तयेऽस्य सततं कुर्याद्विचारं सुधीः ॥

End :

मुो योगी भोग्यसृष्टौ स्वतन्त्र
स्वाराज्यादीन् भुङ्क्त ईशप्रसादात् ।
क्षित्यादीनां सृष्टिहेतुः परात्मा
सर्वज्ञोऽसौ पालकस्साम्बमूर्तिः ॥

Colophon :

— — —

371

Sl. No. 38173 ब्रह्मसूत्रचिन्तामणिव्याख्या Ms. No. A. 408/2

Beginning :

वन्दे ढुण्ढिं महालिङ्गं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासार्यहोबलाख्य गुरूत्तमान् ॥
× श्रीवाञ्छेश्वरनामासौ शिष्टोऽहोबलवेङ्कटः ।
× सब्रह्मसूत्रसिद्धान्तान् संगृह्णाति यथामति ॥

× अत्र ब्रह्मशब्देन बृहतेर्धातोर्निष्पन्नेन जगद्व्याप्तत्वरूपं बृहत्त्वं च प्रतिपाद्यते ॥

End :

तस्माज्जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगेषु स्वातन्त्र्यमिति शिवम् ॥

शास्त्रार्थस्सङ्गृहीतो माधवाचार्यैः–

शास्त्रं बहुविखाराख्यमध्यायाः स्युश्चतुर्विधाः ।

चतुर्थे जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तमा ॥

ब्रह्मप्राप्तिर्ब्रह्मलोकादिति पादार्थ सङ्ग्रहः ॥

Colophon :

इति श्रीवाञ्छेश्वरविरचिते सूत्रार्थचिन्तामणौ निर्गुणसगुणब्रह्मोपासकानां मुक्तिब्रह्मलोकप्राप्तिनिरूपणं नाम षोडशं प्रकरणम् ॥

चतुर्थाध्यायसूत्रार्थः ।

372

Sl. No. 38175 ब्रह्मसूत्रवृत्तिः Ms. N: C. 3961

Beginnig :

अथातो ब्रह्मजिज्ञासा ।

अथ साधनचतुष्टयानन्तरं तद्यथेह कर्मचितो लोकः क्षीयत इति श्रुतेः यतः ब्रह्मभिन्नस्य सर्वस्यानित्यत्वं अतः कारणात् ब्रह्मविज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति सूत्रार्थः ।

End :

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

तयोर्ध्वमायन्नमृतत्वमेतीत्यादिशब्दात् अनावृत्तिः । सम्पूर्णसूत्राभ्यासः शास्त्रसमाप्त्यर्थः ॥

लक्ष्मीनरहरिपुत्रो हरियज्वा नृसिंहः भावुकस्तस्य ।

कृतिरणुवेदान्ताख्या भवतादियं बालबोधाय ॥

Colophon :

इति श्री हरिदीक्षितकृतेऽणुवेदान्ते ब्रह्मसूत्रार्थसंग्रहे चतुर्थोऽध्यायः समाप्तः ॥

373

Sl. No: 38179 **ब्रह्मसूत्रार्थसारसंग्रहः** Ms. No: C. 1489

Beginning :

अथातो ब्रह्मजिज्ञासा ॥

शान्तो दान्त इत्यादिश्रुतेः आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतेश्च । अथ साधनचतुष्टयसम्पत्त्यनन्तरं, अतः अधिकारस्य सम्पूर्णत्वात् ब्रह्मजिज्ञासा कर्तव्या, ब्रह्मविचारः कर्तव्य इत्यर्थः ।

End :

न च गङ्गाशन्तनुचक्रवर्तिप्रभृतीनां ब्रह्मलोकवासिनामपि हिरण्यगर्भ शापवशात् भूलोकं प्रत्यावृत्तिः पुराणादिषु प्रतिपाद्यत इति वाच्यम्, + भूलोके अनुभूय पुनर्ब्रह्मलोकं गतानां शन्तनुचक्रवर्तिप्रभृतीनां ब्रह्मणा सह मुक्तेस्तेष्वेव पुराणेषु प्रतिपादितत्वेन न विरोधादिति भावः ॥

Colophon :

इति ब्रह्मसूत्रवृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः ।

अनावृत्तिपादः समाप्तः ॥

374

Sl. No. 38182 **ब्रह्मोद्दीपनिषपिका** Ms. No. B. 1655/3

Beginning :

ब्रह्मोपनिषदं नाम ब्रह्मात्मैक्यावबोधिनीम् ।

व्याकरिष्यामि तेनेदं ब्रह्म तुष्यतु सर्वगम् ॥

त्वं ब्रह्मासीत्युक्ते अधिकारिणः कर्तृत्वादिविपरीतज्ञानवतो योग त्वेन न तद्बोधो जायते ।

End :

उपनिषद् ब्रह्मज्ञानं तस्य पदं विषयः । ब्रह्मज्ञानैकचोद्यमित्यर्थः । तद्ब्रह्मोपनिषदं व्याख्यानं पदाभ्यास उपनिषदर्थपरिसमाप्त्यर्थः । इति उपनिषत्समाप्त्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतिः ब्रह्मोपनिषद्दीपिका समाप्ता ॥

375

Sl. No. 38183 **भक्तिविवेकः** Ms. No. A, 533/1

Beginning :

अमलकमलनेत्रं भावितानन्दगात्रं
शशधरनिभवक्त्रं योगिनां ध्यानपात्रम् ।
जितदशमुखगोत्रं मोक्षमार्गैकसूत्रम्
दशरथहितपुत्रं नौमि सीताकलत्रम् ॥
रमते यत्र कैवल्यानन्दश्रीः स्वात्मरूपिणी ।
तद्ब्रह्मसत्तासामान्यं श्रीरामानन्दईरित ॥

End :

इत्यादिश्रुतिसाहस्रवर्तमानप्रयोगतः ।
शास्त्रज्ञानसमकालं कैवल्यं याति नन्यथा ॥
श्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रयोगिना ।
उपेयभक्तेर्विवेकः कृतो गुरुकटाक्षितः ॥
सप्तदशाधिकशतग्रन्थो भक्तिविवेकः ॥

Colophon :

इति भक्तिविवेकः समाप्तः ॥

376

Sl. No. 38184 **भक्तिविवेकप्रकरणम्** Ms. No: B. 533/10

Beginning:

स्वाविद्यापदगान्धालिलदनप्राणिसन्ततिः ।
यद्भक्तितो याति मुक्ति तं सूनृतगिरं भजे ॥
नत्वा श्रीगुरुमुपेयभक्तिसाम्राज्यमिच्छताम् ।
उपेयभक्तिविवेकव्याख्येय संप्रणीयते ॥

End:

आदिशब्देन ब्रह्मवेद ब्रह्मै भवति इत्यादि महावक्यरत्नावलिस्थित फलवाक्यजातं विदेहमुक्तिवाक्यमपि गृह्यते । सर्वत्र वर्तमानप्रयोगमहिम्ना शास्त्रज्ञानसमकालं मुनिः कैवल्यं यात्येव । अन्यथासंशयो न कार्यः इत्यर्थः ।
+ दर्शवति सप्तदशेति ॥

Colophon :

इति श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना विरचितं उपेयभक्तिविवरणं समाप्तम् ॥

377

Sl. No. 38187 भगवद्गीताव्याख्या **Ms. No. P. 4137**

Beginning

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥
मूर्तयेऽखिललोकानां प्रहतप्रणतार्तये ।
पूर्तयेऽखिलविद्यानां दक्षिणामूर्तये नमः ॥
भगवत्पादभाष्यार्थमालोच्यातिप्रयत्नतः ।
प्रायः प्रत्यक्षरं कुर्वे गीतागूढार्थदीपिकाम् ॥

End :

श्रीगोविन्दमुखारविन्दमधुना मिष्टं महाभारते
गीताख्यं परमं रहस्यमृषिणा व्यासेन विख्यापितम् ।
व्याख्यातं भगवत्पदैः प्रतिपदं श्रीशंकराख्यैः पुन-
र्विस्पष्टं मधुसूदनेन मुनिना स्वज्ञानशुध्यै कृतम् ॥
इह योऽस्ति विमोहयन्मनः परमानन्दघनः सनातनः ।
गुणदोपभृदेष एव नस्तृणतुल्यो यदयं स्वयं जनः ॥
श्रीरामविश्वेश्वरमाधवानां प्रसादमारुह्य मया गुरूणाम् ।
व्याख्यानमेतद्विहितं सुबोधं समर्पितं तच्चरणाम्बुजेषु ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपूज्यपादशिष्य श्रीमधुसूदनसरस्वतीविरचितायां श्रीभगवद्गीतागूढार्थदीपिकायामष्टादशोऽध्यायः ॥

378

Sl. No. 38188 भगवद्गीताव्याख्या **Ms. No. P 7124**

Beginning :

प्रणम्य कृष्णमीशानं श्रीनृसिंहं गिरं गुरून् ।
गीताशास्त्रार्थतत्त्वज्ञांस्तद्‌दुष्कृतीः परिभाव्य च ॥

सन्मुमुक्षुचकोराणामलसानां बहूक्तिषु ।
विरच्यते मुदे गीताशास्त्रतत्त्वार्थचन्द्रिका ॥

अथ स भगवान् श्रीवासुदेवः सर्वज्ञः सर्वशक्तिरजोऽव्ययः सृष्ट्वेदं जगत्तस्य च स्थितिं +

End :

सङ्कल्पप्रभवान्कामन् विनियम्य समन्ततः ॥
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥

सङ्कल्पप्रभवान् सङ्कल्पः शोभनाध्यासः प्रभवो हेतुर्येषां ते सङ्कल्पप्रभवाः तान् सर्वान्कामानशेषतो निःशेषं निर्लेपेन त्य ×

Colophon :

— — —

379

Sl. No. 38189 भगवद्गीताव्याख्या Ms. No. P. 321

Beginning :

श्रीरामादि दशावतारसमये रक्षोवधं कुर्वता
कृष्णे जन्मनि राजगोपाललनासक्तन यल्लम्पटम् ।
तन्मोक्तुं हरिरेवजीवकलया सानन्दमाविर्बभौ
ब्रह्मानन्दसरस्ववतीति यतिराट्तद्दासदासोऽस्म्यहम् ॥

वासुदेवः कुरुपाण्डवयुद्धे धनञ्जयस्याहवोत्पादनव्याजेन लोकानुग्रहार्थं परमपुरुषार्थलक्षणतया योगमवतारयामास +

End :

अनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यस्त्वयोक्तं वचस्तेन मोहोयं विगतो मम ॥

न तदस्ति विना य ×

Colophon :

— — —

380

Sl. No. 38190 भगवद्गीताव्याख्या Ms. No. P. 1724

Beginning;

शेषाशेषमुखव्याख्याचातुर्यं त्वेकवक्त्रतः ।
दधानमद्भुतं वन्दे परमानन्दमाधवम् ॥

श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् ।
तद्भक्तियन्त्रितः कुर्वे गीताव्यां सुबोधिनीम् ॥

End :

स्वप्रागल्भ्यबलादिलोड्य भगवद्गीतां तदन्तर्गतं
तत्त्वं प्रेप्सुरुपैति किं गुरुकृपापीयूषदृष्टिं विना ।
अम्बु स्वाञ्जलिना निरस्य जलधेरादित्सुरन्तर्मणी-
नावर्तेषु न किं निमज्जति जनः सत्कर्णधारं विना ॥

Colophon :

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे योग-शास्त्रनिर्णयसन्यासादितत्त्वनिर्णये सुबोधिन्यां टीकायां श्रीधरस्वामिकृतायां मोक्षयोगो नाम अष्टादशोऽध्यायः ॥

381

Sl. No. 38192 भगवद्गीतव्याख्या **Ms. No. P.** 4067

Beginning :

णम्य परमात्मानं कृष्णं तद्भक्तियन्त्रितः ।
गीताव्याख्यामहं कुर्वे ब्रह्मतत्त्वप्रकाशिनीम् ॥
भाष्यकारमतं सम्यक् तद्व्याख्यातृगिरस्तथा ।
यथामति समालोड्य गीताव्याख्यां समारभे ॥

इह खलु सकललोकहितकृतावतारः परमकारुणिकोभगवान्देवकीनन्दन-स्तत्त्व +

End :

प्राचामाचार्यपादानां पदवीमनुगच्छता ।
हरिप्रीत्यै कृता व्याख्या ब्रह्मतत्त्वप्रकाशिनी ॥

ओं तत्सदिति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां श्रीभीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु परब्रह्मविद्यायां + सकलशास्त्रपर मार्थतत्त्वनिर्णयसाक्षान्मोक्षयोगो नामाष्टादशोऽध्यायः ॥

Colophon :

ओं तत्सदिति श्रीमहाभारते शतसहास्रिकायां संहितायां वैयासिक्यां श्रीभीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु परब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रीभगद्गीताव्याख्यायां ब्रह्मतत्त्वप्रकाशिन्यां सकलशास्त्रपरमार्थतत्त्वनिर्णयसाक्षान्मोक्षयोगो नामाष्टादशोऽध्यायः ॥

382

Sl. No. 38193 भगवन्नामकौमुदी Ms. No. P. 3612

Beginning :

× अंहस्संहरदखिलं सकृदुदयादेव सर्वलोकस्य ।
तरणिरिव तिमिरजालं जयति जगन्मङ्गलं हरेर्नाम ॥
चेतश्चकोरसन्तोषपीयूषाम्बुधिवृद्धये ।
इयं विस्तार्यते श्रीमद्भगवन्नामकौमुदी ॥

End:

येन भागवतव्याख्या कृताऽमृततरङ्गिणी ।
अद्वैतमकरन्दश्च सोऽकरोन्नामकौमुदीम् ॥

Colophon

इति श्रीमदनन्तानन्द रघुनाथपरमहंसपरिव्राजकाचार्य पदोपजीविनः श्रीमन्नृसिंहसूनोः लक्ष्मीधरस्य कृतौ श्रीभगवन्नामकौमुद्यां तृतीयः परिच्छेदः ॥

383

Sl. No. 38194 भगवन्नामचिन्तामणिः Ms. No. P. 4792

Beginning :

श्रीमन्ति यस्य ना × सर्वमीप्सितम् ।
ददत्यस्मै रङ्गधाम्ने गोपालब्रह्मणे नमः ॥
धर्मार्थकाममोक्षाख्याः पुरुषार्थाश्चतुर्विधाः ।
सिध्यन्ति भगवन्नामकीर्तनात् प्राणिनामिह ॥

End :

स्वतन्त्रप्रपत्तिस्तु साक्षादेवेति सुमतिभिरूहनीयमित्यलं विस्तरेण ।
एवं तावदभ्युदये नि × हेतुरिति स्थित ×
तस्मादस्यवि × मुक्तिश्चाभ्युदयाय च ।
कीर्तनं भगवन्नाम्नां कार्यमित्यास्थितिम्सताम् ॥

Colophon :

इति श्रीमद्वेङ्कटनाथसूरिणा विरचिते भगवन्नामचिन्तामणौ निःश्रेय-सहेतुत्वसमर्थनं नाम चतुर्थं प्रकरणम् ॥

384

Sl. No. 38195 भगवन्नाममाहात्म्यम् Ms. No. C. 2530/13

Beginning :

कृतानि तदानुगुण्येनैव महान्ति प्रायश्चित्तानि कर्तव्यानीति मतिमन्त-मवलोक्य अत्यन्तसारमनेकापायनिर्वर्तकमल्पायासविधानोपपत्तेः ॥

End :

काश्यपपञ्चरात्रे नारदं प्रति श्रीभगवद्वाक्यम् ॥

ये गृह्णन्ति निरन्तरं समपदं रामेति भक्तोत्तमाः
अन्तःसम्भृतहर्षजातपुलका जातप्रमोदाश्रवः ।
ते निस्तीर्य भवार्णवं सुतकलत्राद्यैस्तु नक्रैर्युतं
तृष्णावारिसुदुस्तरं मयि पुनः सायुज्यमायान्ति वै ॥

वामन × × ॥ २७ ॥

Colophon :

— — —

385

Sl. No. 38196 भगवन्नामामृतरसोदयः Ms. No. P. 3613

Beginning :

भगवन्नामसाम्राज्यलक्ष्मीसर्वस्वविग्रहम् ।
श्रीमद्बोधेन्द्रयोगीन्द्रदेशिकेन्द्रमुपास्महे ॥

सदानन्दः श्रीमान् अनवधिककारुण्यविवशो
जगत्क्षेमाय श्रीहरिगिरिशरूपं विधृतवान् ।
अपर्याप्तं रूपं तन्नगदवत एतत्पुनरिति
प्रभुर्जागर्ति श्रीहरिगिरिशनामात्मकतया ॥ + +

श्रीरामस्य कृपादृष्ट्या तन्नामस्मृतिलब्धया ।
रच्यते श्रीभगवतो नामामृतरसायनम् ॥

इह खलु सकलजगदुदयस्थितिलयकारणस्य शिवस्यावताररूपैः श्रीशङ्करभगवत्पादाचार्यैः जगदीश्वरस्य नामकीर्तनस्य वेदविहितत्वं + नामसहस्रभाष्यगीताभष्यादौ च सम्यगवधारितम् । + कदाचित्संशयो भविष्यतीति तद्भक्त्याभासनिष्ठाभासत्व × द्ष्यितुं ग्रन्थोऽयमारभ्यते ॥

End :

ऐहिकफलानि यानि च मोक्षान्तसकलामुष्मिकफलानि तत्सकलफल-साधनत्वं भवत्येवेति + वेदोक्त सर्वधर्मोत्कृष्टत्वञ्च × भिरपि वैदैरव वारितमिति सर्वं सुस्थम् ॥

Colophon :

इति श्री परमहंसपरिव्राजकाचार्य श्रीमद्विश्वा × न्दसरस्वती श्रीचरणानां शिष्येण श्रीबोधेन्द्रसरस्वतीमुनिना प्रकाशिते भगवन्नामामृतरसोदये पञ्चमोल्लासस्सम्पूर्णः ॥

386

Sl. No. 38197 भर्जुप्रकरणम् Ms. No. P. 2035/26

Beginning :

लोके श्रुतिस्मृतीतिहासपुराणवाक्यैस्तत्त्वमस्यादिभिर्बहुधा जीवब्रह्मैक्ये बोधितेऽपि गुरुभिस्त्वं ब्रह्मेत्यादिभिः, श्रुतिभिः उक्तानुभवैः बहुप्रकारमुपदिष्टेऽपि ईश्वरगुरुकटाक्षरहितानां पापात्मनां बुद्धिमार्गोपदेशतः सच्चिदानन्दस्वरूपमा-त्मानमपरिगृह्य देहेन्द्रियादिसङ्घातमात्मत्वेन गृह्णातीत्ययमर्थो दृष्टान्तपुरस्सरं निरूप्यते । तथाहि——

लोके धर्मगुप्तनामकः कश्चिद्राजा स्थितः + कञ्चित्कालं गमयामास ॥ तदनरं भर्जुनामकः कश्चित्पापात्मा तस्य राज्ञः प्रधानामात्यो-भूत् ॥

End :

अत एवोक्तं सङ्क्षेपकाचार्यैः पुरुषापरा ... लिना धिषणा ख + चक्षुषा + दयापि य + नि + यऽ भर्जुर्विषयोऽभूत् । इति श्रुतिसम्भ वापि तु तथा + निधिरिति ॥

Colophon :

इति भर्जुप्रकरणं समाप्तम् ॥

387

Sl. No: 38200 **भारतीमननम्** Ms. No: B. 275/6

Beginning:

आत्मेति परमात्मेति जीवात्मेति त्रिधाभिधम् ।
आनन्दं वृत्तिभेदेन विजानीयाद्विचक्षणः ॥

End:

सम्यक् स्वसिद्धान्तमिदं ज्ञात्वा हृदि निधाय च ।
अन्यमतं च सन्त्यज्य विचरस्व यथासुखम् ॥
देवरूपेण चोत्पत्तिः विनाशश्च पुनः पुनः ।
चतुष्टयानां भूतानां स्वभावादेव जायते ॥

Colophon:

षष्ठोपदेशः ॥

388

Sl. No. 38205 **भाष्यविवरणसङ्ग्रहः** Ms. No. P. 3721/1

Beginning:

भाष्यं गम्भीरभावं विकटतरपदाटोपभावस्य टीका
तस्याः प्राणापमाना विवरणसरणी विस्तरेणास्तगाहा ।
व्याख्याव्याख्येयभावस्सकलजनमनःखेदहेतुश्च तेषां
तेनाहं सारमात्रं विशदतरपदैः संग्रहीष्यामि किंचित् ॥

अथ टीकाकारो भाष्यं व्याख्येयत्वे प्रत्यज्ञास्तदेतद्विकटमिव प्रतिभाति युष्मदस्मदित्यादेरभाष्यत्वात् न च भाष्यकारकृतत्वेन भाष्यत्वम्, तदीय श्लोकादौ व्यभिचारात् ।

End:

अविनाशी वा अरे अयमात्मा इत्यादिश्रुत्यन्तरेण विरोधात् । विशेष विज्ञानाभावमात्रगोचरत्वाच्च । एवं + सुखमस्वाप्समिति परामर्शोऽपि ना + सुषुप्ते स्वरूपचैतन्यस्यैव मूलभूतसुखानुभवत्वात् । तस्मान्न शून्यमात्मदेहादिव्यतिरिक्तः कर्ता भोक्ता चेत्यपरे ॥

Colophon:

— — —

389

Sl. No. 38206 **भाष्यसारार्थसंग्रहः** Ms. No. P. 30/1

Beginning :

आत्मानं विशदानन्दं ×

यस्याः प्रसादादनधीतशास्त्रनिरूपणे सत्कवयः क्षमन्ते ।
अनेकरूपान्तरवर्त्मनाह सरस्वती × ब्रह्मात्मभावावधौ
ब्रह्मानन्दमयाम्बुधौ च चतुरं सुक्रीडितुं मन्मनः ॥

End :

अहं मनुष्य इनि प्रत्ययस्य भेदाभेदविषयत्वात् × हेतुरिति तर्हि शरीरात्मसम्बन्धोऽपि गुणगुण्यादिवद्भेदाभेदनिमित्तं स्यादन्यथा—

Colophon :

— — —

390

Sl. No. 38207 **भाष्यहृदयम्** Ms. N: P. 3375

Beginning :

यन्मयं च यदाधारं यदात्मकमिदं जगत् ।
तन्मङ्गळं परं ब्रह्म सोऽहमस्मीति भावये ॥

जिज्ञासाधिकरणन्यायेन मुक्तौ ब्रह्मज्ञानं साधनम् । तत्र च श्रवणादिकं साधनम् । तत्र च साधनचतुष्टयसम्पन्नः अधिकारीति स्थितिः ।

End :

लक्षणया विचारलक्षणं वेदान्तश्रवणं कर्तव्यम् । तत्र वेद.न्तश्रवणे साधनचतुष्टयसम्पन्नः अधिकारीति. ब्रह्मज्ञानान्मुक्तिः तत्र च श्रवणं स.धनम् । तत्र च साधनचतुष्टयसम्पन्नोऽधिकारीति जिज्ञासाधिकरणे सिद्धान्तितम् ॥

Colophon :

इति श्रीवत्सगोत्रतिरुमलाम्बधानीपुत्रवेंकटम्मातनयताम्रपर्णीत.र आतूरुग्रामवासिना ब्रह्मज्ञानिवेंकटेश्वरशास्त्रिणा सुकृते भाष्यहृदयग्रन्थे माया निरूपणप्रकरणं सम्पूर्णम् ॥

391

Sl. No. 38208 भेदधिक्कारः Ms. No. P. 634/1

Beginning

वेदान्तवनसञ्चारि नीलाचलगुहाशयम् ।
ज्योतिर्विराजतेऽध्यस्तमायावरणवारणम् ॥ +
+ हृदयालयमालम्ब्य करुणारससुन्दरम् ।
गुरूणां चरणाम्भोजं कुर्वे भेदस्य धिक्कृतिम् ॥

End :

आस्तामन्यप्रमाणत्वमभेदे सर्ववस्तुनः ।
भेदप्रमाणमेवैतदद्वैतं साधयेत् स्फुरम् ॥
गुरुचरणसकाशाद्धृद्गतं निर्गतं त
द्द्विगुणमनुगुणं वाविक्षतां तत्क्षयात्मा ।
अपि विसृजति कश्चित् काचमालावमत्या
शतमखमणिमालां शारदाकाशनीलाम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य जगन्नाथाश्रमपूज्यपादशिष्य श्रीमन्नृसिंहाश्रममुनिविरचितः भेदधिक्कारः समाप्तः ॥

392

Sl. No. 38 12 भेदधिक्कारः Ms. No. P. 4789

Beginning :

यस्मिन्भानुमरीचिका जलसमं विश्वं जगत्कारणे
वेदान्तप्रतिपाद्यमानपरमार्थानन्दबोधात्मनि ।
अध्यस्तं सदिव प्रकाशत इवाभाति स्वयं मायया
ध्यायन्तस्तदपास्तदोषममलं सच्चित्परं शाश्वतम् ॥
श्रीमन्मौद्गल्यगोत्राम्बुनिधिहिमकरो रम्यतोण्डीरदेशे
ग्रामश्रेष्ठं महान्तं मुसलमुरुगुणैर्भापितं सूरिमुख्यैः ।
अध्यासीनं समृद्धं विविधगुरु ×
× मुनिरचितं भेदधिक्कारमेतम ॥
श्रीमद्वेङ्कटनाथाख्यो राजराजप्रतिष्ठितः ।
ग्रामे नल्लगुलाख्येऽहं कुर्वे – करुं – ।

End :

अन्यथा घटभूतल × मणीनामिन्द्रनीलमणीनां मालामिन्द्रनील रत्नमालां न काचिद्धानिः । किन्तु अन × स्तं महिमा तथैव वर्तत इति सिद्धमिति ।

नेदं भुवनं जातं सच्चिदानन्दलक्षणः ।
सोऽनन्तः परमात्मानः पायान्नरमृगाकृतिः ॥

Colophon :

इति श्रीम × गोत्रपयोनिधि बालेन श्रीमद्वेङ्कटनाथ भट्टेन विरचिते न्यकारहुंकारे भेदधिक्कारप्रकाशे प्रमेयखण्डनरूपः द्वितीयः परिच्छेदः परिपूर्णः॥

393

Sl. No. 38219 भेदधिक्कारप्रकाशः Ms. No. C. 1730

Beginning :

मृषामायाशक्त्याऽऽवृतमहिमनि ब्रह्मणि परे
जगज्जालं जातं स्फुरति वियतीवोरुनगरम् ।
विरिञ्चिश्रीशेशत्रिदशनरतिर्यग्गतभिदा
कुतोऽतो भूमाहँ निरवधिसदाघनचित् ॥

काशते कलितं यस्य पदं वैदिकमस्तकैः ।
भक्तमुक्त्यै समीहन्तं तं नृसिंहगुरुं भजे ॥
गभीरभावभारेण दुर्वहा गौरवी कृतिः ।
तथापि भेदधिक्कारासत्क्रियां श्रद्धयारभे ॥

यद्यपि श्रुतिस्मृतीतिहासपुराणागमैः—

End :

स्वच्छामिन्द्रनीलमणिमालां कश्चिदविचार्य काचमणिमालाभ्रान्त्या त्यजत्यपि । नैतावता सा प्राज्ञैरुपेक्ष्यत इत्यर्थः ॥

वेदान्तबृन्दविपिने विततं विशुद्ध-
म ैतमार्गमपवर्गपदाधिरोहम ।
श्रीमद्गुरूक्तनयनुन्नसमस्तशङ्का-
मास्थाय यान्तु पदमुत्तममस्तदोषा ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रम श्रीचरण परिचरण निरत नारायणाश्रमविरचिता भेदधिक्कारसत्क्रिया ॥

394

Sl. No. 38221 **भेदनिरासः** Ms. No. P. 1835/1

Beginning

यस्याः प्रसादलेशेन मूकोऽपि विबुधायते ।
कमलासनकान्तां तां वाग्विभूत्यै नमाम्यहम् ॥

तत्र तावत् सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् इति श्रुति-प्रतिपन्नमद्वैतं भेदग्राहि—

End :

तस्मात् अविद्यया अभेदानुपलम्भसंभावना × अद्वैतश्रुतेरनुपलब्धि-विरोधः । संभवैतिह्ययोर्मानोन्तरत्वेऽपिनाद्वैत बाधकत्वम् । तस्मात् अद्वैत श्रुतीनां न प्रमाणान्तरविरोधगन्धोऽ सर्ववद्यम् ॥

Colophon :

इति श्रीमहोपाध्याय श्रीमदद्वैतविद्याचार्य श्रीराघवसोमयाजि कुलावतंस श्रीतिरुमलाचार्यवर्यस्य सूनोः अन्नंभट्टस्य कृतिषु भेदनिरासप्रकरणम् समाप्तम् ॥

395

Sl. No. 38222 **भेदभेदिनी** Ms. No. P. 3957/2

Beginning :

यस्मा × मद्द × वना × भवनानुभवात्सुशब्दे (?)
विश्वं × मनु त्रारिरसं × ।
स्वालये निखिल × मङ्गळा × पुण्यवपुः
प्र × तु ममार्ध × ॥

श्रीमद्गुरुपदद्वन्द्वध्याननिर्धूतकल्मषः ।
कुर्वे तदा × कां भेदभेदिनीम् ॥

End :

नन्विदं ब्रह्मविषयमिति चेन्न × पक्रमे × सूत्रं ×
स्तात्सदक्षिणा × तस्म विदं सर्वमिति × ध × व ×
निर्दिष्टत्वात् ॥

अत्र नवीनाः ॥

Colophon :

— — —

396

Sl. No. 38228 मध्वमुखभङ्गः Ms. No. A. 2247/1

Beginning :

शिवं वा विष्णुं वा यदभिदधति शास्त्रस्य विषयः,
तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म × भजतः ।
विरोधो नातीव स्फुरति नहिनिन्दा नयविदां,
न सूत्राणामर्थान्तरमपि भवद्वार्यमुचितम् ॥

तथाप्यानन्दतीर्शीयमतम × त्यादा × ।
× × भूयस्याकुलतां गता ॥
अतः पञ्चाधिकरणीं लक्षीकृत्यैव तन्मते ।
क्षूप्यस्थलानि सर्वत्र सूच्यन्ते सुधियां मुदे ॥

End :

विद्वद्गुरोः विहितविश्वजिदध्वरस्य
श्री सर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलिः
अप्पय्यदीक्षित इति प्रथितस्तनूजः ॥

सोऽयं मितपदमकरोन्महितार्थं मध्वशास्त्रमुखभङ्गम् ।
प्रीत्यै पुरा पुरातेः श्रीकामाक्षीसमेतस्य ॥

Colophon :

— — —

397

Sl. No. 38234 मध्वतन्त्रमुखभङ्गव्याख्या **Ms. No: P. 3881/2**

Beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥

मध्वतन्त्रमुखमर्दनं मया
यत्कृतं प्रकरणं मिताक्षरम् ।
पद्यरूपमनतिस्फुटाशयं
तत्सुखावगतमे विविच्यते ॥

आनन्दतीर्थप्रवर्तित शारीरकशास्त्र प्राथमिकपञ्चाधिकरणप्रक्रियां प्राय-
स्तन्मतमर्यादयैवप्रकरणमारभमाणः—

End :

तस्मान्मते सृष्टिवाक्यानामनुमान विशेषवचनानुसारेणानेकसृष्टृपरत्वं भवेदेवेति न पूर्वपक्षोपन्यस्तानुमानदूषणं युक्तमिति भावः ॥

Colophon :

इत्यप्पयदीक्षितकृतौ कृतिनां मतेऽस्मि-
न्नानन्दतीर्थकृतशास्त्रमुखावमर्दे ।
एतत्तृतीयमधिकृत्य नयं प्रवृत्तं
दोषप्रदर्शनमुपस्करणीयमार्यैः ॥

398

Sl. .No. 38235 मध्वमुतन्त्रखभङ्गव्याख्या **Ms. N. P. 4135/2**

Beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥

मध्वतन्त्रमुखमर्दनं मया
यत्कृतं प्रकरणं मिताक्षरम् ।
पद्यरूपमनतिस्फुटाशयं
तत्सुखावगतये विविच्यते ॥

आनन्दतीर्थप्रवर्तित शारीरकशास्त्र + वस्तुतो निर्विशेषे ब्रह्मणि + चेत्तदिष्टमेव ॥

End :

असुराः खलु वैरोचनीमुपनिषदमाश्रीता देहात्मवादिनः प्रकृताः परेऽपि जीवस्यैव करचरणादिसकलकर्मज्ञानेन्द्रियसहितदेहरूपत्वं तेनैव देहेन स्वप्ने मुक्तौ व्यवहारानपि वदन्तो देहात्मवादिन इति साम्येनासुरशब्देनातिशयोक्त्या परे निर्दिष्टाः मुख्याः मुखे वदने भवाः सेनामुखवर्तिनश्च ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य श्रीविश्वजिद्याजि श्रीरङ्गराजगुरो ×
× हितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥
सोऽयं मितपदमकरोन्महितार्थं मध्वशास्त्रमुखभङ्गम् ।
प्रीत्यै पुरामरातेः श्रीकाक्षीसमेतस्य ॥

399

Sl. No. 38238 मध्वमतखण्डनम् Ms. No. C. 4230

Beginning :

अथ मध्वमतखण्डनं अप्पय्यदीक्षितकृतम् ॥
श्रीगणेशगिरौ लक्ष्मीनृसिंहं शङ्करं यतिम् ।
नत्वानूद्य निराकुर्वे मध्वसिद्धान्तपद्धतिम् ॥
तत्र तावत्तत्त्वं द्विविधं स्वतन्त्रं पतरन्त्रं चेति ॥
क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम् ।
तन्महापातकं हन्ति तमः सूर्योदयो यथा ॥

शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः ।
यथोत्तरं न पश्यामि तथा मे स्वस्तिरायुषः ॥

Colophon :

इत्यप्पय्यदीक्षितकृतं मध्वमतखण्डनं समाप्तम् ॥

400

Sl. No. 38239 मध्वमतचपेटा Ms. No. P. 3313/1

Beginning :

रसनारङ्गभूमौ मे या नरीनर्ति भारती ।
लीलयेदं बरीभर्ति सा चरीकर्तु शं शिवा ॥
रामकृष्णाख्यभट्टोऽहं तातं तिरुमलाभिधम् ।
नत्वा सद्युक्तिभिः कुर्वे मध्वतन्त्रचपेटीकाम् ॥

End :

इत्थं पञ्चाधिकरणीं प्रस्तुत्येह विचारितम् ।
अन्येष्वप्याधिकारेषु माध्वतीर्थप्रसङ्गतः ॥
संक्षेपतो यथाबुद्धि रामकृष्णाख्यसूरिणा ।
विद्वत्स्वकारि विज्ञप्तिस्तेन तुष्यतु शंकरः ॥

Colophon :

— — —

401

Sl. No. 38240 मध्वमतचपेटाव्याख्या Ms. No. P. 3313/2

Beginning :

त्रिमूर्तिभिन्नं शिवमव्ययं च श्रुत्यन्तवेद्यं निखिलप्रपञ्चे ।
सृष्ट्यादिहेतुं सततं नमामो विघ्नौघशान्त्यै सकलैश्शरण्यम् ॥
वेंकटाद्रिकुलोत्पन्नतिर्मलार्यस्य सूनुना ।
चपेटायाः प्रदीपोऽयं रामकृष्णेन तन्यते ॥

निर्विघ्नपरिसमाप्तिकामः शिष्यशिक्षायै वाग्देवीनमस्काररूपं मङ्गलं ग्रन्थत उपनिबध्नाति । नृत्यतेर्यङ्लुगन्तात्लटि + जगज्जन्मादिकर्तृत्वरूप-ब्रह्मलक्षणमतिव्याप्तमित्याशङ्कामपाकर्तुमीक्षत्यधिकरणं व्याख्याय—

End :

तस्मादघटितघटनासमर्थानादिसिद्धशक्त्यात्मकमायाशबलं ब्रह्मैव शिव-पदवाच्यं मूर्तित्रयनियामकं वस्तुतस्तदभिन्नमारोप्यप्रपञ्चाधिष्ठानमेव जगज्जन्मादि कर्तृ तदपि न सर्वशब्दाभिधेयमिति सर्वेष्टसिद्धिः ॥

Colophon :

इति श्रीमन्महोपाध्यायवेदशास्त्रपारंगत वेंकटाद्रिकुलोत्तंसतिरुमलभट्टा-त्मज रामकृष्णभट्टकृत माध्वतन्त्रचपेटाप्रदीपस्सम्पूर्णतामगात् ॥

402

Sl. No. 38241 **मध्वमतध्वान्तदिवाकरः** Ms. No. A. 655

Beginning :

प्रणम्य सर्वान् शिरसा सर्वशास्त्रप्रवर्तकान् ।
कुर्वे तदाज्ञया मध्वमतध्वान्तदिवाकरम् ॥

अत्र सूत्रे कर्तव्येति पदं अध्याहर्तव्यम् । अन्यथा निरर्थकानुपपत्तेः कर्तव्यता च प्रकृतिप्रत्ययार्थयोरनुपपत्तेरिति विचारो लक्ष्यते ।

End :

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिञ्जज्ञे स्वयं विष्णुर्ब्रह्मेशानसमन्वितः ॥

इति स्कान्दसारसंहिताया वचनेन लिङ्गपुराणवासिष्ठलैङ्गयवचनाभ्यां च अवगतमिति । तदपि विष्णुमात्रप्रवृत्तसाधारणलिङ्गाभावात् कथमत्र रुद्रव्या-वृत्तब्रह्मसिद्धिरिति दिक् । आकाशस्तल्लिङ्गात ॥

Colophon :

— — —

403

Sl. No. 38242 **मध्वमतासाङ्गत्यप्रदर्शनम्** Ms. No. B. 958

Beginning:

अत्रायं निर्गलितोऽर्थः सायुज्यमुक्तिभाजो देवाः स्वोच्च उत्तमदेवता अनुप्रवेशक्रमेण भगवद्देहमनुप्रविश्य ग्रहावेशन्यायेन भगवद्देहेन्द्रियैः तद्भुक्ता-नेव भोगान् भुञ्जानाः कदाचिद्बहिर्निर्गत्य आत्मस्वरूपभिन्नैः चिन्मात्रदेहेन्द्रियैः

End :

यदि पाद्मवचनबलेन तामसत्वं तथा इदं पुराणं मुक्त्वैकं नास्त्यन्यत्साधनं परमिति स्वोत्कर्षार्थमुक्तवचनेन तत्तत्पुराणोत्कर्षकत्वप्रतिपादकवचनैश्च विरोधापत्तेश्च ॥

Colophon :

— — —

404

Sl. No: 38243 **मध्वाध्वभंङ्गः** **Ms. No B. . 1085**

Beginning:

शास्त्रयोनित्वात् ।

यतो वेत्यादिवाक्यं जगत्कारणत्वेन ब्रह्म प्रतिपादयतीति वेदान्तानां ब्रह्मणि प्रामाण्यं सम्भवति इत्युक्तमयुक्तम् ॥

End :

नन्वेवमत्रैव प्रकरणे उद्गातर्या देवता उद्गीथमन्वायत्ता इति प्रस्तुत्य कतमा सा देवता इति प्रश्ने आदित्य इति होवाच । सर्वाणि ह वा इमानि ॥

Colophon :

— — —

405

Sl. No: 38244 **मनीषपञ्चकम्** **Ms. No: P. 3541/1**

Beginning :

अन्नमयादन्नमयमथ वा चैतन्यमेव चैतन्यात् ।
यतिवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥
यस्मिन्नित्यसुखाम्बुधौ गळितधीर्ब्रह्मैव न ब्रह्मवित्
यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥

406

Sl. No.38246 मनीषपञ्चकम् Ms. No. P. 5779/12

Beginning

अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात्।
द्विजवर दूरीकर्तुं वाञ्छति किं ब्रूहि गच्छ गच्छेति ॥

End :

नाहं मनुष्यो न च देवयक्षो
न ब्राह्मणः क्षत्रियवैश्यशूद्रः ।
न ब्रह्मचारी न गृही वनस्थो
भिक्षुश्च नाहं निजबोधरूपः ॥

Colophon :

— — —

407

Sl. No. 38250 मनीषपञ्चकव्याख्या Ms. No. : 3541/2

Beginning :

× म्ने सीतां परिरभ्य बाहुना
वामां कलानां दशिमुद्र × न्यतः ।
तत्वं करोणोपदिशन्तमद्वयं
हनूमते दाशरथिं हरिं भजेत् ॥

+ इह खलु परमकारुणिकः भगवान् + गच्छगच्छेति ॥
ततः चण्डालवेषमण्डितः शिवः प्राह ॥
गच्छ गच्छेति ॥

End:

सुरेन्द्रब्रह्मादिभिः वन्दितमहमित्यपरो × तं × पदं स्थानं ब्रह्मस्वरूपं यस्य स तथोक्तः ॥ अत एव इन्द्रवाक्यं श्रूयते ॥ प्राणोऽस्मि प्रज्ञात्मा तन्मामा × क्रमेण ॥

Colophon :

— — —

408

Sl. No. 38251 मनीषापञ्चकव्याख्या Ms. No. P 3468/1

Beginning :

द्वैतभ्रान्तिः कः कुतः सम्भवति कुतोऽपीत्यर्थः ।

प्रत्यगेकरस्य वस्तुनो निष्प्रपञ्च × क्तेरिति भावः ॥ २ ॥

एवं पारमार्थिकदृष्टिमवलम्ब्याक्षिप्तस्सन् आचार्यः अयं देवस्तारकोप-देष्टा पुराणपुरुषो विश्वेश्वरो भवितुमर्हतीति निश्चित्य यथोक्तमिवैतत् एतादृश-दृष्टिमत्सु भवादृशेषु—

End:

अस्मिन्नर्थे न संशयः । एवं मम मनीषेति स्पष्टम् ।

मनीषापञ्चकस्यैवं कृता टीका मनोहरा ।

गोपालबालयतिना मञ्जरी मधुसंज्ञिता ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दभगवत्पूज्यपादशिष्य श्रीमच्छङ्कराचार्यकृतमनीषापञ्चकस्य टीका सम्पूर्णा ॥

409

Sl. No. 3852 महावाक्यपठनविधिः Ms. No. C. 696/7

Beginning

एवंगुणविशेषणविशिष्टायां मम जननमरणप्रवाहनिवृत्त्यर्थं सद्गुरुचरणारविन्दप्रसादसिद्ध्यर्थं ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं महावाक्यमन्त्र-पठणं कारयिष्ये । अस्य श्रीमहावाक्यमहामन्त्रस्य परमहंस ऋषिः । अव्यक्तगायत्री छन्दः । परमहंसो देवता ।

End:

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।

इति ध्यात्वा,

अविद्यामूलनाशाय जन्मकर्मनिवृत्तये ।

ज्ञानवैराग्यसिद्ध्यर्थं गुरोः पादोदकं पिब ॥

इति पीत्वा—

Colophon :

महावाक्यलेखनं सम्पूर्णम् ॥

410

Sl. No. 38253 **महावाक्यखण्डार्थः** Ms. No. P. 4642/1

Beginning :

इह खलु षड्विधलिङ्गैपेतसकलवेदान्तैरहङ्कारातिरिक्तमवस्थात्रयसाक्षि-भूतमनाद्यनन्त स्वप्रकाशं प्रत्यगभिन्न परमानन्दस्वरूपमद्वितीय्यं ब्रह्म प्रतिपाद्य मिति प्रसिद्धम् । तच्चाध्यारोपापवादभ्यां निष्प्रपञ्चं प्रपञ्चयत इति न्याय-माश्रि त्यलक्षणप्रमाणाभ्यां विचार्यते ।

End :

ज्ञानत्वेनाहते सिद्धे सर्वं ब्रह्ममयं भवेत् ।
ऐतदात्म्यमिदं सर्वम् नेह नानास्ति किंचन ॥
अद्वैतमेव शास्त्रर्थः शंभोः पादौ स्पृशाम्यहम् ॥
तस्मान्निर्भेदं ब्रह्मैकं सर्ववेदान्तप्रतिपाद्यमिति सर्ववेदान्तसंमतिसिद्धम् ॥

Colophon :

— — —

411

Sl. No. 38254 **महावाक्यनिरूपणम्** Ms. No. P. 1968/8

Beginning :

द्रष्टृदृश्यान्तराळस्थं संविन्मात्रमखण्डितम् ।
भावयन्तं स्वमात्मानं शिवरामगुरुं भजे ॥

यदज्ञानादिदं + + ।
+ + हरये नमः ॥

तापत्रयाहिसंदष्टो भवदावगतः सुधीः ।
आत्मानं रक्षितुं कश्चिन्नत्वा मुनिमभाषत ॥

यज्ज्ञानान्मुच्यते जन्तुः जन्मसंसारबन्धनात् ।
तदहं ज्ञातुमिच्छामि ब्रूहि रे कृपया प्रभो ॥

सम्यक् पृच्छमिमां साधो ज्ञानं मोक्षैकसाधनम् ।
तीर्त्वा मोहार्णवं तेन सुखमक्षयमश्नुते ॥

End :

इत्थमन्योन्यतादात्म्यं विजानानः क्रमाद्धिया ।
जीवन्मुक्ततया स्वस्थो लोके विहर लीलया ॥
यः पठेच्छ्रद्धया चैतन्महावाक्यनिरूपणम् ।
विभिन्नहृदयग्रन्थिः स कैवल्यमवाप्नुयात् ॥

Colophon :

इति माहावाक्यनिरूपणं समाप्तम् ॥

सषष्टित्रिशतश्लोकैर्दर्शितोऽनुभवो मम ।
गुरोः प्रसादात्संप्राप्तः करामलकवन्मया ॥
स्वात्मत्वेनैतदखिलं भावयन्तं निरन्तरम् ।
स्वात्मन्येवात्मनः साक्षाच्छिवरामगुरुं भजे ॥

412

Sl. No. 38255 महावाक्यरत्नावलिः **Ms. No. P. 2269**

Beginning :

यो विध्यादिविदेहान्त महावाक्यार्थविग्रहः ।
श्रीरामचन्द्ररूपोयः तस्मै भूमात्मने नमः ॥
नत्वा श्रीवासुदेवेन्द्रपदपङ्केरुहद्वयम् ।
ग्रथ्यते वै महावाक्यरत्नावलिरियं मया ॥
अथ खलु ऋग्वेदादिविभागेन वेदाश्चत्वारः ।

End :

फलभूतमहावाक्यफलको वैदेहमस्तकः ।
एवं विध्याद्यदेहान्तमहावाक्यकलेवरः ॥
स्वस्तुतो निर्विशेषात्मा त्रिपान्नारायणोऽस्म्यहम् ।
यन्महावाक्यसिद्धान्तमुक्तचित्तैकगोचरम् ॥
वासुदेवे × मुहुः ॥

Colophon:

इति परमहंस परिव्राजकाचार्य श्रीवासुदेवेन्द्रसरस्वतीचरणकमलमक-
रन्दतृप्त स्वा × रामचन्द्रेन्द्रग्रथिताष्टोत्तरशतोपनिषत् × ताष्टोत्तर
सहस्रमहावाक्यरत्नावलिः॥

413

Sl. No. 38253 महावाक्यरत्नावलिः Ms. No. P. 2872

Beginning;

यो विध्यादिविदेहान्त महावाक्यार्थविग्रहः ।
श्रीरामचन्द्ररूपाय तस्मै भूमात्मने नमः ॥
यः पूज्यो + । + ॥ + । + ॥
प्रणौमि सततं तं वासुदेवं गुरुम् ॥

नत्वा श्रीवासुदेवेन्द्रपादपङ्केरुहद्वयम् ।
ग्रथ्यते वै माहावाक्यरत्नावळिरियं मया ॥

अथ खलु ऋग्वेदादिविभागेन वेदाश्चत्वारः । + तथा च
मुक्तिकोपनिषत्स्थाष्टोत्तरशतोपनिषन्नामश्लोका लिख्यन्ते ॥

End:

ओंकारवाच्यहीनात्मा सर्ववाच्यविवर्जितः ।
अवस्थात्रयहीनात्मा वैदेहीयुक्त एव सः ॥

इति साध्यान्तिकविदेहवाक्यानि सप्तसप्ततिः । अथ साध्यान्तिक
विध्यादिविदेह कैवल्यान्तमहावाक्यान्यष्टोत्तरसहस्रम् ॥

विध्याङ्घ्रि बन्धमुग्गुल्फो ह्यविद्धद्धेयजङ्घकः ।
वासुदेवेन्द्रसंज्ञं तं नौमि सर्वात्मकं महः ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीवासुदेवेन्द्रसरस्वतीचरणकमणमक-
रन्दतृप्तस्वान्तरामचन्द्रेन्द्र ग्रथिताष्टोत्तरशतोपनिषत्साराष्टोत्तरसहस्रमहावाक्यरत्ना
वळिः परिपूर्णा ॥

414

Sl. No. 38259 **महावाक्यरत्नावलि** Ms. No. B. 8225

Beginning :

भूतित्रिपुण्डाङ्कितमक्षमाला
रुद्राक्षचिन्मात्रमखण्डमुद्रितम् ।
योगीन्द्रवर्यं च सदाशिवाख्यं
सच्चिन्निभानन्दगुरुं प्रपद्ये ॥

नत्वा श्रीवासुदेवेन्द्रपादपङ्केरुहद्वयम् ।
ग्रथ्यते × महावाक्यरत्नावलिरियं मया ॥
अथ खलु ऋग्वेदादिविभागेन वेदाश्चत्वारः ॥

End :

यन्महावाक्यसिद्धान्तं मुक्तचित्तैकगोचरम् ।
वासुदेवेन्द्रसंज्ञं तं नौमि सर्वात्मकं महः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्दतृप्तस्वान्तश्रीरामचन्द्रग्रथितेशाद्यष्टोत्तरशतोपनिषत्सारभूताष्टोत्तरसहस्रमहावाक्यरत्नावलिः सम्पूर्णा ॥

415

Sl. No. 38261 **महावाक्यरत्नावलि** Ms. No. A. 424/1

Beginning :

यो विध्यादिविदेहान्तमहावाक्यार्थविग्रहम् ।
श्रीरामचन्द्ररूपाय तस्मै भूमात्मने नमः ॥

चोदनाद्यतनुमुक्तिसूक्तयो
यस्य निष्कलतनोश्शरीरताम् ।
यान्ति सूनृतगिरं त्रिपाद्धरं
रामचन्द्रमनिशं नमामि तम् ॥

End :

जीवन्विमुक्तिश्रुतिवाक्यवेद्यं
ब्रह्माहमस्मीति सुखस्वरूपम् ।
यं प्राप्य मुक्ताः प्रचरन्ति लोके
स रामचन्द्रोऽस्मि विमुक्तबन्धः ॥

Colophon :

इति जीवन्मुक्तिमहावाक्यरत्नावलीप्रभा समाप्ता ॥

416

Sl. No. 38264 महावाक्यारत्नावलीव्याख्या Ms. .No. P. 2100/1

Beginning :

ईशाद्युपनिषत्प्रोद्यन्महावाक्यकलेबरम् ।
विकलेबरकैवल्यं रामचन्द्रपदं भजे ॥
विश्वाधिष्ठानसन्मात्रवासुदेवेन्द्रमूर्तये ।
श्रीदेशिकस्वरूपाय परस्मै ब्रह्मणे नमः ॥
नत्वा श्रीदेशिकं + महावाक्यरत्नजातकिरणावलिरीर्यते ॥

End :

तेजोमात्रमवशिष्यते तत्त्वमात्रतया तत्पर्यवसन्नो भवामीत्यर्थः ॥
श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
महावाक्यरत्नजातकिरणावलिरीरिता ॥
महावाक्यरत्नजातकिरणग्रन्थसञ्चयः ।
द्विपञ्चाशत्संख्यतोऽधिद्विसहस्रमुदीरितः ।

Colophon :

— — —

417

Sl. No. 38266 महावाक्यरत्नावलीव्याख्या Ms No. A. 425/1

Beginning :

स्वाज्ञस्वज्ञाद्यानुभूतिः यत्तापह्नवतां गता ।
तं स्वमात्मानुभूत्याऽहं कलये त्रिपदाक्षरम् ॥

ब्रह्मानुभूतिश्रुतिवाक्यजालं
यत्पाणियुग्मे निवसन्मुमुक्षोः ।
ब्रह्मानुभूतिं प्रददाति यस्य
त्रिपादहं रामनिशाकरोऽहम् ॥

End :

श्रीवासुदेवेन्द्रगुरुप्रसादात्
श्रीरामचन्द्रेन्द्रमुनीश्वरेण ।
कृता महावाक्यसहस्रवेद्य-
श्रीरामचन्द्रस्तुतिरादरेण ॥

Colophon :

— — —

418

Sl. No. 38267 महावाक्यारत्नावलीःव्याख्या **Ms. No: B. 375/2**

Beginning :

अनन्तशक्तिसन्दोहपूर्णस्य परमात्मनः ।
विघ्नविध्वंसिनीशक्तिं गणराजमुपास्महे ॥

\+ \+ \+

ईशाद्युपनिषत्प्रोद्यन्महावाक्यकलेबरम् ।
महावाक्यरत्नजातकिरणावलिरीर्यते ॥
इह खलु \+ लोचनं प्रकटयामास ॥

End :

यत्तेजोमात्रमवशिष्यते तत्स्वमात्रतया नौमि ।
तत्पर्यवसन्नो भवामीत्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
महावाक्यरत्नजातकिरणावलिरीरिता ॥
महावाक्यरत्नजातकिरणग्रन्थसञ्चयः ।
द्विपञ्चाशत्संख्याकोऽधिद्विसहस्रमुदीरितम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्द तृप्तस्वान्तरामचन्द्रेन्द्रग्रथितेशाद्यष्टोत्तरसहस्रमहावाक्यावलिः परिपूर्णा ॥

419

Sl. No. 38268 महावाक्यरत्नाबलिव्याख्य Ms. No. A. 424/2

Beginning :

यथोक्ताधिकारिणं ज्ञानसाधनशमादौ चोदयतीति चोदनाविधिरित्यर्थः । यस्य निष्प्रतियोगिकनिष्कलतनोश्चोदनावाक्यावल्यारभ्य विदेहकैवल्यान्तमहा वाक्यगानि +

End :

ब्रह्माहमस्मीति स्वावशेषतया यं प्राप्यास्मिन् लोके जीवन्मुक्ताः प्रचरन्ति सोऽयं मुक्ताभिगम्यस्वमात्ररूपेण राजमानो महीयमानोऽहं अगम्यगमनादि प्रपञ्चद्रावकं श्च भवति सोऽयं रामचन्द्रोऽस्मीति षट्सप्ततितमप्रकरणार्थः ।

Colophon :

इति जीनन्मुक्तिमहावाक्यरत्नावलीप्रभालोचनं सम्पूर्णम् ॥

420

Sl. No. 38269 महावाक्यरत्नावलिव्याख्या Ms. No. A. 425/2

Beginning :

नत्वाऽग्निदेशिकं ब्रह्ममात्रानुभवमिच्छताम् ।
कुर्वेऽनुभूतिवाग्रत्नप्रभाभासकलोचनम् ॥

इह खलु भूरिदयाकळेबरेयं भगवती लीलाविभूतिः जीवन्मुक्तिमहा वाक्यरत्नावलीं यथावज्ज्ञानतां × संक्षिप्याद्यप्रकरणेन दर्शयति–ब्रह्मेति ।

End :

अस्य प्रकरणजालस्य लीलाविभूतिफणितत्वमाह—वास्त्विति । महावाक्यसहस्रवेद्यविकळेबरकैवल्यश्रीरूपेण राजमानमहसः स्वातीमुक्ताप्रपञ्च द्रावकत्वेन श्रीरामचन्द्रः स्वमात्रतया शिष्यते इत्यनुसन्धानमेव श्रीरामचन्द्र स्तुतिरित्यर्थः ॥

Colophon :

इति वासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना कृतं विदेहवाग्रत्नमहावाक्य रत्नावली प्रभाभासकलोचनं सम्पूर्णम् ॥

421

Sl. No. 38270 महावाक्यविवरणम् Ms. No. P. 955/10

Beginning

आनन्दमानन्दकरं प्रसन्नं
ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं
श्रीमद्गुरुं नित्यमहं नमामि ॥

यदज्ञानप्रभावेन दृश्यते सकलं जगत् ।
ज्ञानात्तच्छ्रुत्य आप्नोति तस्मै ज्ञानात्मने नमः ॥
ब्रह्मज्ञानाय वेदान्तमहावाक्यार्थं विचारयिष्यामः ॥

End :

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।
इत्यादि श्रुतिस्मृतिसहस्रेभ्योऽयमर्थोऽभिधीयते । नमो ब्रह्मविद्भ्यो नमो ब्रह्मविद्भ्यः ।
ब्रह्मविद्या परं यत्तन्न भूतं न भविष्यति ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचितं वेदान्तमहावाक्यविवरणं समाप्तम् ॥

422

Sl. No. 38276 महावाक्यविवरणम् Ms. No. B. 314/2

Beginning :

अथातो द्वादशमहावाक्यार्थविवरणं कथ्यते । विवरणं नाम विचारणम् । समस्तविषयोपासनाविनिर्मुक्तः—स परमहंसः—

End :

शब्दब्रह्मस्वरूपेणात्मामिव्यक्तिं करोति । अथर्वणवेदान्तसांख्य-दर्शनपातञ्जलदर्शनं उपदर्शनमन्त्रशास्त्राणीति संक्षेपात् ब्रह्मस्वरूपं निरूपितम् ॥

Colophon :

इतिवेदान्तकरणे अथर्वणवेदवाक्ये ब्रह्मशब्दनिर्णयोनाम चतुर्दशोऽध्यायः ।
श्रीशंकराचार्यविरचितं द्वादशमहावाक्यव्याख्यानं समाप्तम् ॥

423

Sl. No: 38278 महावाक्यासिद्धान्तस्तोत्रम् Ms. No. C: 3437/13

Beginning :

क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम् ।
तन्महापातकं हन्ति तमस्सूर्योदयो यथा ॥
अज्ञानाद्बुद्बुदो ज्ञातः आकाशं बुद्बुदोद्भवम् ।
आकाशाद्वायुरुत्पन्नः वायोस्तेजस्ततः पयः ॥

End:

एकमेवाद्वयं ब्रह्म नेदं नानास्ति किञ्चन ।
अ × यंचो मिथ्यैव सत्यं ब्रह्माहमव्ययम् ॥
अत्र प्रमाणं वेदानुभवो गुरुवचस्तथा ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितं महावाक्यसिद्धान्तस्तोत्रं सम्पूर्णम् ॥

424

Sl. No: 38280 महावाक्यसिद्धान्तस्तोत्रम् Ms. No. P. 6737

Beginning:

× नित्यकल्याणसंश्रयात् ।
सर्तृणां वरदत्वाच्च ब्रह्म तन्मङ्गळं परम् ॥

पवित्रा × × त्वेनाभिमतदधी × र्घादशन घण्टानादश्रवणाद्यवेक्षयापि ब्रह्मणोऽत्यन्तमङ्गल × ह्मबोधकतया मङ्गळत्वे विवादाभावात् ।

शक्तिलक्षणाभ्यां तद्बोधकानि वाक्यानि महावाक्यानि तेषामर्थ

श्शक्यो लक्ष्यश्च स्मर्यते । शिष्यं प्रति गुरुणा ज्ञाप्यत इत्यर्थः ।

End:

आचार्योपदेशोत्तरकालीनमनननिदिंध्यासनेन निवर्तत एवेत्याह-नाहं

देह इति ॥ ननु देहाभिमान्येव × यक्ष्ये अ ×

Colophon:

— — —

425

Sl. No. 38282 महावाक्यविवरणम् Ms. No. P. 8256/4

Beginning

अहं समस्तं मम रूपतः पृथक्

न किञ्चिदस्तीति सुनिश्चयः कृतम् ।

मया तु वेदान्तवचोभिरञ्जसा

पितामहेनापि च सत्यमीरितम् ॥

End:

तथा मायाविद्योपाधिपरित्यागे सच्चि × स्वरूपमेवावशिष्यते ।

एवं विचार्य स्वाभाविकस × नन्दाद्वयप्रत्यगात्मैव मम स्वरूपं अहं

ब्रह्मास्मीति ब्रह्मैवाहमस्मीत्यनुभवो भवितव्यः ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

Colophon:

— — —

426

Sl. No. 38284 महावाक्यविवरणम् Ms. No. C. 3167

Beginning:

अथ माधवाश्रमस्वामिकृद्वाक्यार्थः प्रारभ्यते ॥ ओन्नमः परमात्मने ।

महावाक्यं विचार्यते ॥ तत्त्वमसीति महावाक्यं तस्य विचारः क्रियते ॥

प्रथमं परमेश्वरार्पणबुद्ध्या नित्यादिकर्म कुर्वतः विविदिषोत्पद्यते ॥

End :

ब्रह्मनित्यं जगदनित्यमिति अनित्यत्वदर्शनात् विषयेषु वैराग्यं पश्चाच्छ मदमादिसाधनषट्कसम्पत्तिः ततो मुमुक्षा । उत्तरोत्तरं प्रति पूर्वपूर्वस्य कारणत्वम् ॥

Colophon :

— — —

427

Sl. No. 38286 **महावाक्यविवरणम्** Ms. No: C. 4582/3

Beginning :

नेह नानास्ति किञ्चनेति सिद्धान्तप्रज्ञानस्वतश्चैतन्यं तद्विशेषा × बुध्यनुसारेण व्याख्यानं क्रियते । प्रस[ङ्गे] उत्कृष्टज्ञान × स्वतश्चैतन्यं कालत्रयरहितं आस्थाय रहितं विनिर्मुक्त × प्रज्ञानं नाम तत् ॥

End :

तदिदं तादृशमीदृशमेतावत् तावदिति यन्न भवेत् । ब्रह्म तदित्येव ध्येयं नो चेद्विषयो भवेत् परोक्षमिति शङ्कराचार्योक्तेत वाङ्मनोगोचरातीतः +
इत्यथर्वणवाक्यगत + आत्मस्वरूपनिरूपणम् ॥

Colophon :

वेदान्तप्रकरणे अथर्वणवेदवाक्यगतआत्मशब्दब्रह्मनिर्णयो नाम त्रयोदशः सिद्धान्तः ॥

इति द्वादशमहावाक्यविवरणं समाप्तम् ॥

428

Sl. No. 38287 **माण्डूक्यकारिका** Ms. No: C. 3729/5

Beginning:

भद्रं कर्णेभिः × सस्तनूभिः ।

गौडपादीयोपनिषत्कारिका—

बहिः प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।

घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥

End :

प्रणवमीश्वरं विद्यात्सर्वस्य हृदि संस्थितम्
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥
अमात्रो सत्तमात्रश्च द्वैतस्योपशमश्शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनस्स मुनिर्नेतर इति ॥

Colophon :

इति गौडपादीय माण्डूक्योपनिषत्कारिकास्वागमप्रकरणम् ॥

429

Sl. No. 38288 माण्डूक्यकारिकाव्याख्या **Ms. No: P. 2463/2**

Beginning :

उपासनाश्रितो धर्मो ज्ञाते ब्रह्मणि वर्तते ।
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥
ओंकारनिर्णये उक्तः प्रपञ्चोपशमश्शिवः अद्वैत आत्मेति प्रतिज्ञामात्रेण ज्ञाते द्वैतं न विद्यत इति ॥

End :

अव्यवहार्यमपि व्यहारगोचरमापाद्य यथाबलं यथाशक्तीरर्थः ॥
अजमपि जनियोगं + ब्रह्म यत्तन्नमस्ये ॥
प्रज्ञावैशाखवेध + समुद्रे ॥
कारुण्यदग्ध + पादपातैर्नतोऽस्मि ॥
प्रेक्षालोकावभासा + त्रासने मे ।
यत्पादावाश्रितानां + सर्वभावैर्नमस्ये ॥
इत्याचार्य श्लोकाः ॥

Colophon

इति श्रीमत्परमहंसपरिप्राजकाचार्यश्रीगोविन्द भगवत्पूज्यपादशिष्यस्य श्रीपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ गोडपादभाष्ये आगमशास्त्रविवरणे अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम् ॥

430

Sl. No. 38289 **माण्डूक्यकारिकाव्याख्या** **Ms. No. C. 2504/4**

Beginning :

परिपूर्णपरिज्ञानपरितृप्तिमते सते ।
विष्णवे जिष्णवे तस्मै कृष्णनामवते नमः ॥

श्रीगौडपादाचार्यस्य नारायणप्रसादतः प्रतिपन्नान्माण्डूक्योपनिषदर्थावि ष्करणपगनपि श्लोकनाचार्यप्रणीतान् व्याचिख्यासुर्भगवान् भाष्यकारः चिकीर्षितस्य भाष्यस्य निर्विघ्नपरिसमाप्त्यादिसिद्धये + । प्रज्ञानेत्यादिना । तत्र विधिमुखेन वस्तु प्रतिपादनमिति प्रक्रियां दर्शयति ॥

End :

सत्यं मोक्षस्य साधनं ब्रह्मात्मकज्ञानम् । तस्य जनकं शास्त्रादि तद्भवेन ज्ञानाव्यवधानेन मा ×

Colophon :

— — —

431

Sl. No. 38290 **माण्डूक्यकारिकाव्याख्या** **Ms. No. C. 4317**

Beginning

वैतथ्यं सर्वभावाना स्वप्न आहुर्मनीषिणः ।
अन्तस्स्थानात्तु भावानां संवृतत्वेन हेतुना ॥

ज्ञाते द्वैतं न विद्यत इत्युक्तं एकमेवाद्वितीयमित्यादिश्रुतिभ्यः आगम मात्रं तत् तत्रोपपत्त्यापि द्वैतस्य वैतथ्यम्—

End:

आत्मन एकत्वात्स्वरूपप्रच्यवनासंभवरच्चासदैव ब्रह्मास्मीत्यप्रच्युतो भवेत् समं सर्वेषु भूतेषु इत्यादिस्मृतेः ॥

Colophon :

इति गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य— शङ्करभगवत्पादकृतावागमशास्त्रविवरणे द्वितीयं वैतथ्याख्यं समाप्तिमगमत् ।

432

Sl. No. 38291 माण्डूक्यकारिकाव्याख्या Ms. No. C. 4319

Beginning :

प्रज्ञानांशुप्रभावैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।
पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुग्जायया मोदयन्नो
मायासंख्यातुरीयं परममृतनमहं ब्रह्म यत्तन्नतोऽस्मि ॥ १ ॥
यो विश्वात्मा विधिजविषयात्प्राप्य—

End :

नैतावत्त्वमस्य परिच्छेत्तुं शक्यत इत्यर्थः ।
सर्वद्वैतोपरमत्वादेव शिवः । ओंकारो यथाव्याख्यानो विदितो येन सपरमार्थतत्त्वस्य मननान्मुनिर्नेतरो जनः शास्त्रविदपीत्यर्थः ॥

Colophon :

इति गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शङ्करभगवतः कृतौ आगमशास्त्रविवरणे प्रथमप्रकरणं माण्डूक्यव्याख्यानं समाप्तम् ॥

433

Sl. No. 38292 माण्डूक्यकारिकाव्याख्या Ms. No. C. 4327

Beginning :

उपासनाश्रितोधर्मो ज्ञाते ब्रह्मणि वर्तते ।
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥ १ ॥
ओंकारनिर्णये उ : प्रपञ्चोपरमः शिवोऽद्वैत आत्मेति प्रतिज्ञामात्रेण ज्ञाते द्वैतं न विद्यत इति च । तत्र कृताभावस्तु वैतथ्यप्रकरणे—

End

यस्मान्न विद्यते जीव इत्येतःपूर्वेषु प्रायत्वेनोक्तानां सत्यान् सत्यस्वरूपे ब्रह्मण्यणुमात्रमपि किञ्चिन्न जायते इति ॥ ४९ ॥

Colophon :

इति गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शङ्करभगवतः कृतावागमशास्त्रविवरणे अद्वैताख्यं तृतीयप्रकरणं समाप्तम् ॥

434

Sl. No. 38294 मानदीपिका Ms. No. A. 86/1

Beginning :

एक एव महानात्मा सोऽहंकारोऽभिधीयते ।
स जीवः सोंऽन्तरात्मेति गीयते तत्त्वचिन्तैः ॥

तेनाविवेकतस्तस्मात्संसारः पुरुषस्य तु ।
स चाविवेकः प्रकृतेः संगात्कालेन सोऽभवत् ॥

End :

वैयत्यामर्षदोषग्रहविवशमतिर्दूषणे सोद्यमो यः
तं शीर्ष्णाऽद्य प्रणम्य प्रसृतकरयुगो याचते ग्रन्थकर्ता ।
पाण्डित्यं चेप्रमाणैर्निखिलबुधमतैस्सम्मतैर्दूषयेम
नो चेत्त्वाचार्यवाचामिव तव वचसा जल्पता कल्पितेति ॥

संवर्षजाद्रिनष्टे प्रमाणदीपादनाद्यचिद्धान्ते ।
शायगा सायुज्याख्या विभातिमुक्तिगुरोः प्रभोर्लक्ष्म्याः ।। (?)

Colophon :

इति श्रीमत्परमहंसपारिव्राजकाचार्य श्रीमच्छिवकाशीविश्वेश्वरमणिकर्णिकातीरस्थ श्रीजयकृष्णानन्द पादपद्माराधकश्रीवेंकटकृष्णानन्दशिष्येण बालब्रह्मानन्दसूरिणा विरचिता मानदीपिका समाप्ता ॥

435

Sl. No. 38296 मानदीपिका Ms. No. C. 507

Beginning :

लक्ष्मीनारायणं देवं गुरुविघ्नेश्वरं गिरम् ।
नत्वात्मतत्त्वज्ञानाय क्रियते मानदीपिका ॥१ ॥

युक्तिकल्लोलखेलायै ग्रन्थास्सन्त्यार्यनिर्मिताः ।
प्रतीतागममूलोऽयं नोपेक्ष्यः संविदर्थिभिः ॥

End :

अनेन साम्यं यास्यामि नानया भ्रमचेतसा ।
मम क्षमं मसहानेन चैकत्वं नानया सह ॥

आत्मानं बहुधा कृत्वा सेयं भूयो युनक्ति माम् ।
एवं परमसम्बोधात्पञ्चविंशात्प्रबुद्धवान् ॥
अक्षरत्वं निगद्येत त्यक्त्वाक्षरमनामयम् इत्यादि ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीजयकृष्णानन्दपादपद्माराधक श्रीवेङ्कटकृष्णानन्दशिष्येण बालब्रह्मानन्देन विरचितायां मानदीपिकायां प्रथम-प्रकरणं सम्पूर्णम् ॥

436

Sl. No. 38300 मानदीपिका **Ms. No: A. 86/2**

Beginning :

व्याख्यानम् । यदा योगिनः स्वाव्यवधानेन चैतन्यं सर्वत्रव्याप्तं सत् यस्य मनसि भाति स ब्रह्म संपद्यते ॥ २९ ॥

समाधिस्थोऽसंप्रज्ञातसमाधिस्थः ॥
न पश्यतिसर्वेन्द्रियादीनामुपरतत्वात् ॥
केवलः अविद्यारहितः ॥ ३१ ॥

End :

गुरोर्हृदि स्थित्वा हितोपदेष्टा आदावन्ते च लक्ष्मीशब्दप्रयोगेण ग्रन्थस्य लक्ष्मीकरत्वं सूच्यते ।

कृतप्रकरणीमानदीपिका विवृतेः कलौ ।
नष्टे च द्वापरे त्रेता श्रद्धा तस्य कृतं भवेत् ॥
मानदीपोद्दीपनेन नष्टे च द्वापरे कलौ ।
कृतादीदं यद्विभाति स आत्मास्मीति निश्चितम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छिवकाशीविश्वेश्वरमणिकर्णिकातीरस्थ श्रीजयकृष्णानन्दपादपद्माराधक श्रीवेंकटकृष्णानन्दशिष्यब्रह्मानन्दसूरिशिष्य वासुदेवानन्दभट्ट विरचितायां मानदीपिकाव्याख्यायाम् दशमं प्रकरणं समाप्तम् ॥

437

Sl. No. 38302 | **मानदीपिकाव्याख्या** | Ms. No. C. 507/2

Beginning :

यत्स्वरूपं विविच्यान्तर्ज्ञात्वा मुच्येत संसृतेः ।
सर्वात्मकमनन्यार्थमात्मानं तं समाश्रये ॥
ब्रह्माद्वैतप्रमाणानां सङ्ग्रहेण प्रकाशिनी ।
व्याख्यायते यथाबोधं सन्मुदे मानदीपिका ॥

इह खलु अनादौ संसारे केचिज्जन्तवो बहुविधतमोधिकदुष्कर्मवशात् नानाविध–

End :

तस्माद्व्रतिसामान्यादिफलरीत्या सर्वप्रमाणाविसंवाद्युपादानकारणब्रह्मानन्यत्वात्सर्वस्य क्वचिन्नित्यलोकाङ्गीकारस्य तद्विरुद्धत्वान्निरुपचरितनित्यब्रह्मैवाद्वितीयमिति सिद्धम् ॥

ब्रह्माद्वैते प्रमाणानि यथा सन्दर्शितानि मे ।
सद्वितीयं परं ब्रह्मेत्यस्ति चेत्तत्प्रदर्श्यताम् ॥

Colophon :

इति श्रीमानदीपिकायां प्रथमप्रकरणव्याख्यानं सम्पूर्णम् ॥

438

Sl. No. 38307 | **मार्गनिर्णयः** | Ms. No. P. 5779/43

Beginning ;

एवं श्रुत्युक्तमार्गेण भक्तित्रयमुदाहृतम् ।
चतुर्थभाख्या × क्रया सुखबोधाय वर्ण्यते ॥

End :

इत्युक्तवानदबाष्पाक्षो विनेयाङ्घ्रयोः पपात सः ।
तं दृष्ट्वा प्राह स गुरुः कृतार्थस्त्वं वसात्मनि ॥
इति श्रीस्वप्रकाशेन्द्रकरुणावीक्षया श्रिया ।
श्रीनिवासो जयत्यात्मसाक्षात्कारसमर्पणे ॥

Colophon :

इति श्रीस्वप्रकाशेन्द्रयोगिपादशिष्यश्रीनिवासभट्टविरचिते मार्गनिर्णये चतुर्थ्यां चतुर्थं भङ्ग्यन्तरं समाप्तम् ॥

439

Sl. No. 38310 **मिथ्यत्वनिरुक्तिः** **Ms. No. C. 1255**

Beginning

रज्जुसर्पवदनाद्यविद्यया
हत्र कल्पितमतात्त्विकं जगत् ।
तत्परं किमपि वस्तु गोकुले
नन्दवेश्मनि निलीय तिष्ठति ॥

वियद्वायुवह्निवारिवसुधादिरचेतनप्रपञ्चो मिथ्या, दृश्यत्वात्, जडत्वात् परिच्छिन्नत्वात्, यत्र यस्य वस्तुनो यत्र यत्र धर्मिणि तत्कालदेशावच्छिन्ने—

End :

वस्तुतस्तु जन्यत्वं स्वाधिकरणक्षणावृत्तिध्वंसप्रतियोगिवाक्यवृत्त्यानुपूर्वीकत्वम् । वाक्यार्थज्ञानोद्देश्यतानिरूपितसाध्यत्वाख्यविषयात् चेति संसर्गत्रयेण प्रथत्नवत्त्वं तात्पर्यमिति निष्कर्षः ॥

Colophon :

इति श्रीमहामहोपाध्याय गोकुलनाथविरचितं मिथ्यात्वे निरुक्तिरहस्यं समाप्तम् ॥

440

Sl. No. 38312 **मुक्तिशतकम्** **Ms. No. A. 416/1**

Beginning :

यः पूज्यः सकलामरैर्मुनिगणाः ध्यायन्ति यं येन वै
श्रेयोमार्गनियोजितास्सुयतयः कुर्वन्ति यस्मै नमः :
यस्मात्सर्वमभूत्प्रमातृपटलं यस्यांशकं त्रैपदे
यस्मिन्नाशमुपैति मायिकपदं तं रामचन्द्रं भजे ॥

End :

श्रीमत्पारमहंस्यधर्मनिरतश्रीवासुदेवेन्द्रचि-
त्पादाम्भोजनिवासिषट्पदनिभश्रीरामचन्द्रेन्द्रतः ।
वक्तुं ध्यातुमशक्यमायिकपदालङ्कारसङ्घाततत-
लिङ्गाकारविभङ्गमुक्तिशतकं जातं कटाक्षाद्धरेः ॥

Colophon :

इति लिङ्गभङ्गमुक्तिशतकं सव्याख्यानं समाप्तम् ॥

441

Sl. No. 38313 मुक्तिशतकव्याख्या Ms. No. A. 416/2

Beginning

यत्र देहत्रयारूढाहंभावो विलयं गतः ।
यद्वस्तुतो निराधारं तत्त्रैपदसुखं भजे ॥
नत्वा गुरुं लिङ्गभङ्गमुक्तिसाम्राज्यमिच्छताम् ।
विदेहमुक्तिशतकव्याख्येयं सम्प्रणीयते ॥

इह खलु स्वाविद्यापादालङ्कारानन्तकोटिब्रह्माण्डसदन प्राणिकदम्ब + प्रकरणशतकमारभमाणाः + देशिकनमस्काररूपं मङ्गलमाचरन्ति ।

End :

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
शतप्रकरणव्याख्या लिखिता विदुषां मुदे ॥
परमाद्वैतप्रकरणशताख्या ग्रन्थविस्तरः ।
पञ्चत्रिंशच्छदृशतादि चतुस्साहस्रमङ्कतः ॥

Colophon : — — —

442

Sl. No. 38314 मुमुक्षुबुद्धिभ्रंशप्रकरणम् Ms. No. P. 2035/27

Beginning :

इदानीं काव्यनाटकालङ्कारताकिकालङ्कारिकत्वाधीनजन्ममुमुक्षुबुद्धि भ्रंशप्रकारं द × पूर्वकं निरूप्यते । तथा हि–

लोके मण्डलेश्वरः कश्चित् स्वपुरोहितं यज्ञार्थं + नियोजया-
मास ॥

End :

एतस्मिन्नर्थे सम्मतवचनम्—

बहवो गुरवस्सन्ति शिष्यवित्तापहारकाः ।
दुर्लभोऽयं गुरुर्देवि शिष्यहृत्तापहारकः ॥

Colophon :

इति मुमुक्षुबुद्धिभ्रंशप्रकरणं समाप्तम् ॥

243

Sl. No. 38316 **मोक्षसिद्धिः** Ms. No. C. 243

Beginning :

नमस्कृत्य परब्रह्म मोक्षसिद्धिं करोम्यहम् ।
श्रीरणोद्दीपसिंहेन राज्ञा सम्प्रार्थितोसितः ॥

इह खलु धर्मार्थकाममोक्षेषु चतुर्विधफलपुरुषार्थेषु मोक्ष एव परम पुरुषार्थः । तदुपायाश्च त्रयः । कर्मयोगो भक्तियोगो ज्ञानयोगश्चेति ।

End :

न स पुनरावर्तत इत्याद्याः । तथा च कर्मोपासनाज्ञानानां क्रमेणानुष्ठा-
नान्मोक्ष इति सिद्धम् ।

बाणेन्दुरन्ध्रे(धे्रे)न्दुमिते संवत्सरे मार्गे त्वमायां रविवासरे यतिः ।
कृष्णो रणोद्दीपनृपेण प्रार्थितो मोक्षसिद्धिं रचयाम्बभूव ॥

Colophon :

इति श्रीमत्कैलासाचलशिष्येण श्रीमत्कृष्णगिरिणा विरचिता मोक्षसिद्धिः समाप्ता ॥

244

Sl. No. 38318 **मोक्षोपदेशः** Ms. No. P. 8664

Beginning :

राजसिद्धान्तयोगवासिष्ठसारसङ्ग्रहे—

मुक्तिमिच्छसि चेत्तात विषयान् विषवत्त्यज ।
क्षमार्जवदयाशौचं सत्यं पीयूषवद्भज ॥

न पृथ्वी न जलं नाग्निः न वायुर्द्यौः नवा भवान् ।
येषां साक्षिणमात्मानं चिद्रूपं विधिमुक्तये ॥

End :

देहाभिमानपाकेन चिरं बद्धोऽसि पुत्रक ।
बोधोहंज्ञानखण्डेन तन्निकृत्य सुखीभव ॥

निस्सङ्गो निष्क्रियोऽसि त्वं स्वप्रकाशो निरञ्जनः ।
अयमेव हि ते बन्धः समाधिमनुतिष्ठसि ॥

Colophon :

— — —

445

Sl. No. 38319 मौनाश्रयणस्तुतिः Ms. No. P. 2466/3

Beginning :

यदस्य जन्मस्थितिभङ्गकारणं
त्वकारणं केवलबोधलक्षणम् ।
निरन्तरान × नन्निरञ्जनं
तदस्मि साक्षादिति मौनमाश्रये ॥

End :

किं केन पश्यामि शृणोमि केन
वदामि किं केन च × वेद्मि केन ।
अनन्तमद्वैतमहेयमेकं
तदस्मि साक्षादिति मौनमाश्रये ॥ +

वाच्याभावे वाक्प्रवृत्तिः कुतो मे
ज्ञेयाभावे धीः प्रवृत्तिः कुतो मे ।
तस्मात्तूष्णीमेव सर्वेषु काले
ष्वास्सेऽद्वैतब्रह्मभावेन नित्यम् ॥

Colophon :

— — —

446

Sl. No. 38320 यज्ञशास्त्रार्थनिर्णयः Ms. No. P. 338/1

Beginning :

श्रीकृष्णं वेङ्कटेशाख्यदेशिकेन्द्रं प्रणम्य च ।
वीणय्यन्नसुधीः कुर्वे यज्ञशास्त्रार्थनिर्णयम् ॥

अथ यज्ञफलकाम्याधिकारिनिरूपणं विना यज्ञपति × भावात् सकलयज्ञप्रतिपादकश्रुतिस्मृतीतिहासपुराणतात्पर्यालोचनया यज्ञाधिकारिणां–

End :

तस्माद्योगशास्त्रस्य वेदान्तशास्त्रवत् स्वातिरिक्ताशेषशून्याखण्डैकरस-प्रत्यगभिन्नब्रह्मप्रतिपादने तात्पर्यं सिद्धमिति सर्वं समञ्जसम् ॥

Colophon :

इति श्रीयज्ञशास्त्रार्थनिर्णयः समाप्तः ॥

447

Sl. No. 38322 योगवासिष्टसारः Ms. No. B. 517/1

Beginning :

अथ वासिष्ठसारः—

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥
अहं बद्धो विमुक्तः स्याम् इति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिन् जप्तेऽधिकारवान् ॥

End :

अनुत्कीर्णा यथा स्तम्भे संस्थिता शालभञ्जिका ।
तथा विश्वं स्थितं तत्र तेन शून्यं न तत्पदम् ॥
यथा न पुत्तिकाशून्यः स्तम्भोऽनुत्कीर्णपुत्तिकः ।
तथा भातं जगद्ब्रह्म तेनाशून्यपदं मतम् ॥
सौम्याम्भसि यथा वीचिर्न चास्ति न च नास्ति च ।
तथा जगद्ब्रह्मणीदं शून्याशून्यपदं गतम् ॥

Colophon :

— — —

448

Sl. No. 38323 योगवासिष्ठसारविवृतिः Ms. No. B. 517/2

Beginning :

लक्ष्मीकान्तं नमस्कृत्य यथामति विरच्यते ।
वासिष्ठसारविवृतिः परोपकृतये मया ॥
वसिष्ठेन यतीन्द्रेणोपरिष्टाद्राघवं प्रति ।
सारमुद्धृतवान् किञ्चित् ब्रह्मविद्यामहार्णवात् ॥

तत्रादौ वसिष्ठसाराख्यं ग्रन्थमारिप्सुः तत्प्रतिपाद्येष्टदेवतानतिरूपं मङ्गलमाचरति ।

End :

सौम्ये स्थिते जले यथा वीचिरस्ति नास्ति च तथेदं जगद् ब्रह्मणि अस्ति नास्ति च । अज्ञानदशायामस्ति ज्ञानदशायां नास्तीत्यर्थः । तेनेदं ब्रह्मपदं शून्याशून्यं जगता हीनं सहितं चेत्यर्थः । व्यावहारिकतात्विक-दशायामित्यर्थः ॥

Colophon :

इति श्री योगवासिष्ठसारविवरणे लक्ष्मीधरकृते दशमं जीवन्मुक्तिविचार प्रकरणं सम्पूर्णम् ॥

449

Sl. No. 38326 रत्नत्रयपरीक्षा Ms. No. P. 284

Beginning:

नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकं
धर्माधर्मेति भेदद्वयमति पृथग्भूय मायावशेन ।
धर्मस्तत्रानुभूतिस्सकलविषयिनी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपा भवति गुणगणाश्चाश्रयस्यैक एव ॥

End :

विद्वांसः शङ्करस्य श्रुतिमतिमहितोपासनावासनाभी
राहुः स्वान्तप्रतिष्ठासुदृढममिधया तं विलोक्य स्मरेषा । (?)
गोलोकोस्योर्ध्वभागादपि परमपदाद्वैष्णवावादूर्ध्वदेशो-
प्यात्वर्ककोटिप्रभं यान्त्यपुनरपगमस्थानमानन्दरूपम् ॥

आमध्यभाप्यदुग्धाब्धि आप्तरत्नत्रयं ततः ।
शुम्भुर्गौरी हरिश्चेति तच्च सम्यक् परीक्षितम् ॥

Colophon :

इति श्रीमद्भारद्वाज कुलजलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य श्री विश्व-
जिद्याचि श्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतीरत्नत्रयपरीक्षा ॥

450

Sl. No. 38329 रत्नत्रयपरीक्षाव्याख्या **Ms. No. P. 10694/3**

Beginning :

सर्वज्ञतादिकं शम्भोर्यस्या रूपं विदुर्बुधाः ।
तां नमामि शिवां सत्यज्ञानानन्त × ॥
अथ रत्नत्रयपरीक्षाख्यामष्टश्लोकीं संक्षेपेण व्याकुर्महे । नित्यं काल-
त्रयाबाध्यम् । दोषगन्धेनापि रहितम् —

End:

न तेषां पुनरावृत्तिर्घोरसंसारमण्डले ।
इत्यादिर्वचनैर्व्यवस्थापित इति सर्वं समञ्जसम् ॥
आमध्यभाष्यदुग्धाब्धिमाप्तरत्नत्रयम् ।
× शम्भुर्गौरीहरिः तस्य सम्यक्परीक्षितम् ॥

Colophon :

इति श्री भट्टभरद्वाजकुलजलधिकौस्तुभ श्रीमदद्वैतविद्याचार्य विश्व—
जिद्याजि श्रीरंगराजाध्वरि सूनोरप्पयदीक्षितस्य कृतौ रत्नत्रयपरीक्षा समाप्ता ॥

451

Sl. No. 38335 रामायणतत्त्वदर्पणम् **Ms. No. P. 4770/1**

Beginning :

श्रीरामामरभूरुहस्सकलदः सीतालतालिङ्गितो
व्याप्ताण्डो गुणमूर्ति × र्जिरगणस्कन्धोवशाखः स्वभूः ।
नानालोककुलायमात्मपतगः सत्वादिवल्कः कथां
गन्धाः सद्गुणपुष्पवान्विजयते मुक्ताध्वनिम्नाश्रितः ॥

End :

रतिर्न मेऽस्ति देहगेहभोग्यवस्तुविभ्रमे
भवे भवेऽस्तु भक्तिरेव राम ते पदाम्बुजे ॥
न मे विरागयोगयागभक्तितीर्थसेवना-
गमान्तचिन्तनादिना धनान्यतिव किन्तु ते ।
सकृत्प्रपन्नदेहिमात्र ×
राम सर्वसाधनं तवावमाम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमत्स्वयंप्रकाशानन्दसरस्वती-पूज्यपादशिष्यश्रीमद्रामब्रह्मानन्दसरस्वतिस्वामिवि रचिते श्रीमद्रामायणतत्त्वदर्पणे वैराग्यादिसाधननिरूपणं नाम षोडशप्रकाशः ॥

452

Sl. No. 38337 लिङ्गदेहप्रकरणम् Ms. No. C. 823/9

Beginning :

स्थूलशरीरं न लिङ्गशरीरं च तस्यां नः ।
कारणमस्याप्यन्तस्ततो महाकारणं तुर्यम् ॥
स्थूलं निरूपितं प्रागधुना सूक्ष्मं त्वितो ब्रूमः ।
अङ्गुष्ठमात्रः पुरुषः श्रुतिरिति यत्प्राह तत्सूक्ष्मम् ॥

End :

चित्प्रतिबिम्बस्तद्वद्बुद्धिस्तु योजनाप्राप्तः ।
नेत्रादीन्द्रियसारैर्बहिरर्थान् सोऽवभासयते ॥

Colophon :

इति लिङ्गदेहप्रकरणम् ॥

453

Sl. No. 38339 लौकिकन्यायरत्नाकरः Ms. No. P. 252

Beginning :

× प्रसङ्गः स्यात्, वह्न्यादेः कदाचिद्धूमादिकारणत्वाभाव-शङ्कया निष्कम्पप्रवृत्तिश्च न स्यात् । अतः तयोः कादाचित्कत्वस्यायुक्तत्वात् स्वाभाविकत्वनिर्वाहाय—

End :

न च काश्यां निषिद्धस्य स्वेच्छया मरणस्य अदृष्टाद्धृ × कथं ईश्वरसामीप्यलाभः इति शक्यम् ॥

अग्निप्रवेशं ये कुर्युः अविमुक्ते विधाननः ।
प्रविशन्ति मुखं ते मे निःसन्दिग्धं वरानने ॥
कुर्वन्त्यनशनं ये तु मद्भक्ताः कृतनिश्चयाः ।

Colophon :

— — —

454

Sl. No. 38340 लौकिकन्यायरत्नाकरः Ms. No. A. 91

Beginning

द्यात्मकचित्तवृत्तिप्रवाहस्ततोन्यत्र नीयते महान् यत्न इत्यर्थः ॥
शतेपञ्चाशदितिन्यायः ॥ यादृशो पक्षस्तादृशो बलिरिति न्यायः ॥

इति श्रीमद्रामदयालुशिष्येण नामवंशीयविन्दरायकुलोत्तंस गुलापराय-वर्मसूनुनोदासीनावस्थेन रघुनाथेन विरचिते लौकिकन्यायरत्नाकरे प्रमेयनिरू-पणपरपूर्वार्धं समाप्तम् ॥

End :

सन्यासिनामपि पूर्वमनुष्ठितसगुणोपासनेन चित्तस्थैर्यार्थं तावत् सगुणो-पासनं कर्तव्यं इति द्योतनार्थं च । एवं गङ्गास्नानमात्रेण मुच्यते नात्र संशय इत्यादावपि बोध्यमिति दिक् ।

मां हि पार्थ व्यापाश्रित्य मामाश्रयत्वेन गृहीत्वा येपि स्युः भवेयुः पापयोनयः पापं योनिर्ये ×

Colophon :

— — —

455

Sl. No. 38342 वाक्यबोधः Ms. No. C. 4671/24

Beginning :

श्रीगुरुचरणद्वंन्द्वं वन्देहं मथितदुस्सहद्वन्द्वम् ।
भ्रान्तिग्रहोपशान्तिं पांसुमयं भसितमातनुते ॥

संसारदावपावकसन्तप्तः सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ॥

अस्ति स्वयमित्यस्मिन्नर्थे कस्यास्ति संशयः पुंसः ।
तत्रापि संशयश्चेत् संशयिता यस्स एव भवसि त्वम् ॥

End :

तदिदं तादृशमीदृशं एतावत्तावदिति च यन्न भवेत् ।
ब्रह्म तदित्यवधेयं नो चेद्विषयो भवेत्परोक्षं च ॥

Colophon :

— — —

456

Sl. No. 38344 वाक्यवृत्तिः Ms. No. P. 955/12

Beginning :

सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं
विश्वेश्वरं विदितविश्वमनन्तमूर्तिम् ।
निर्मुक्तबन्धनमपारसुखाम्बुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥

यस्य प्रसादादहमेव विष्णुः
मय्येव सर्वं परिकल्पितं च ।
इत्थं विजानामि सदात्मरूपं
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

End:

प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् ।
कञ्चित्कालमनारब्धस्य कर्मबन्धस्य साक्षिणे ॥

निरस्तातिशयानन्दं वैष्णवं परमं पदम् ।
पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते ॥

Colophon

वाक्यवृत्तिः परिसमाप्ता ॥

457

Sl. No. 38360 वाक्यवृत्तिव्याख्या Ms. No. P. 6731/2

Beginning :

श्रुतिस्मृतिपुरणानां + लोकशङ्करम् ॥

ब्रह्माभमेतन्मम भाति विश्वं
श्रीमाधवप्राज्ञगुरोः प्रसादात् ।
अन्वर्थविश्वेश्वरपण्डिताख्यः
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

परमकृपानिधिः श्रीशङ्कराचार्यः + वाक्यवृत्त्यभिधानापदेशेन प्रकरणेन + नमस्कुरुते — सर्गस्थितीत्यादिना ।

End :

तथाचोक्तं भगवता—

यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।

इति । तद्धामगतस्य आकाशवत् सर्वगतत्वेन जीवस्य अन्यगतस्यान्यप्राप्तेरयुक्तत्वात् । प्राप्तिर्नाम तद्भावापत्तिरिति ज्ञापयन्नाह—कैवल्यमिति ॥

Colophon :

इति श्रीमहायोगिमाधवप्राज्ञगुरुप्रसादासादितापरिमितज्ञानानन्दविश्वेश्वरपण्डितेन विरचिता वाक्यवृत्तिप्रकाशिका समाप्ता ॥

458

Sl. No. 38366 वादतरुकुठारः Ms. No. P. 2314/2

Beginning :

महात्मनां सत्यवतां व्यवस्थितिः
दृढा परिज्ञानसमाहितात्मनाम् ।
परापवादेष्वपि मादृगात्मनः
समानयेत्कल्पनया कयाङ्कुशम् ॥

यथा ममात्मप्रियसम्पदुद्यमः
तथा परेषामथवा विशेषतः ।
अवाप्नुयुश्चेन्मदभिप्लुवात्प्रियं
न ते चरेयुः कथमात्मनः प्रियम् ॥

End :

मन्निन्दया यदि जनः परितोषमेति
नन्वप्रियत्वजनितोऽयमनुग्रहो मे ।
श्रेयोर्थिनो हि पुरुषाः परितुष्टिहेतोः
दुःखार्जितान्यपि धनानि परित्यजन्ति ॥

Colophon :

इति ज्ञानाङ्कुशाचार्यविरचितः वादतरुकुठारः समाप्तः ॥

459

Sl. No. 383689 | वादनक्षत्रमाला | Ms No. P. 3590

Beginning

तन्त्रान्तरेष्वनुपपादितमर्थजातं
यत्सिद्धवद्व्यवहृतं ध्वनितं च भाष्ये ।
तस्य प्रसाधनमिह क्रियते नयोक्त्या
वालप्रियेण मृदुवादकथापथेन ॥

शेषीभवदपि भाष्ये × समर्थमिदम् ॥

कुण्डपायिनामयनाख्ये—

End :

न खलु ब्रह्मानन्दानुभवान्मुक्तः कश्चित् मनुष्यगन्धर्वानन्दमात्रमनुभवन्नस्ति । सर्वेषां मुक्तानां निरतिशयब्रह्मानन्द × षयिकानन्दलेशापरब्रह्मानन्दवैषयिकानन्दस्येति सिद्धम् ॥

इति ब्रह्मानन्दवैषयिकानन्दाभेदसमर्थनवादः ॥

समूलश्रवणा × निर्मिता ॥

Colophon :

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसुनोरप्पयदीक्षितस्य कृतिर्वादनक्षत्रमालिका सम्पूर्णा ॥

460

Sl. No. 38369 वादावलीखण्डनम् Ms. No. C. 755

Beginning:

सत्यज्ञानानन्दलक्षपरिच्छेदविवर्जितम् ।
अस्पृष्टानर्थमनिशमाश्रये नृहरेःपदम् ॥

ननु कथमात्मनः प्रत्यक्षादिसिद्धस्य परिच्छेदशून्यत्वं पारमार्थिकता च।

End :

धर्मिणा सहैव धर्मोत्पत्तेरनभ्युपगमात् अभ्युपगमे च उत्पन्न द्रव्यं क्षणमगुणं तिष्ठातीति कल्पना वैयर्थ्यात् गुणिनां ×

Colophon :

— — —

461

Sl. No. 38370 वासनालयप्रकरणम् Ms. No. P. 2035/16

Beginning:

इदानीं ज्ञानप्रतिबन्धकीभूतं वासनात्रयं निरूप्यते । तथा हि—वासना त्रिविधा—लोकवासना देहवासना शास्त्रीयवासनाभेदात् ॥

End :

तस्मात् एवं विचार्य यःपुरुषः एतत्प्रतिबन्धत्रयं परित्यज्य आत्मप्रतिपादकशास्त्रार्थविचारेण ज्ञानं सम्पादयति, स एव जीवन्मुक्त इति सकल-वेदान्तसिद्धान्त इति सर्वमनवद्यम् ॥

Colophon

इति वासनालयप्रकरणं समाप्तम् ॥

462

Sl. No. 38373 वासुदेवमननम् Ms. No. C. 424

Beginning:

योऽवतीर्ण इवाचार्यरूपेण यति × मुदे ।
श्रीमन्नारायणं वन्दे नृहरिं करुणानिधिम् ॥ १ ॥
मननाख्यं प्रकरणं वासुदेवयतीश्वरैः ।
रचितं विस्तरेणाद्य सङ्ग्रहेण प्रकाश्यते ॥ २ ॥

End:

मदुक्तप्रकारेणात्मानं समशक्त्वा मूर्तौ ध्यात्वा साक्षात्कृत्य नित्यशुद्ध-बुद्धमुक्तसत्यपरमानन्दाद्वयब्रह्मरूपेण तिष्ठन् एतावदेव आचार्यैर्वक्तव्यम् । शिष्येण श्रोतव्यम् । इतः परं वक्तव्यं श्रोतव्यं च नास्तीति सिद्धम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीवासुदेवेन्द्रविरचिते मननाख्य-प्रकरणे द्वादशवर्णकं समाप्तम् ॥

463

Sl. No. 38375 विजृम्भितयोगसूत्रभाष्यम् Ms. No. B. 895/4

Beginning:

एवं हठयोगलक्षणं विस्तरेण निशम्य प्राकृतः सद्गुरुमेवमवादीत् राजयोगं वद कृपयेति । स तु विनयसद्वचनं गुरुभक्ताग्रगण्यं शिष्यं श्रुणु सावधानेनेत्यादरेणेदमाह—राजयोगः ।

End:

+ भूत्वा तत्समीपविश्वव्योमव्याप्तपरिपूर्णचन्द्रमण्डलनिष्ठसान्द्रामृत-निष्यन्दबिन्दुसन्दोहपानपरितृप्तः सदानन्दरूपनिश्चयः प्राप्य निःसंशयतत्त्वा-काशो भूत्वा सदानन्दावधूतकृपालेशान्मुक्तोऽस्मीति भावितव्यः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यसद्गुरुविरचितं विजृम्भितयोगसूत्रभाष्यं संपूर्णम् ॥

464

Sl. No. 38376 विज्ञानतारावलिः Ms. No. B. 375/1

Beginning

वन्देऽहमाचार्यपदारविन्दे
वन्दारुमन्दारलतायमाने ।
ययोः प्रणामेन विधूतपापो
विमुच्यते दारुणकालपाशैः ॥

End :

यथा निजश्रीपरमं प्रियापि
भर्तारमेवानुसरत्यवश्यम् ।
दूर्वाङ्कुराणामिव नारिकेल–
फलप्रसूतिर्बहुचित्रमेतत् ॥

Colophon :

श्रीदक्षिणामूर्तिबुधेन्द्रवक्त्रा–
दुदीरिता ब्रह्मविदामभीष्टा ।
आचार्यराजेश्वरकण्ठदेशे
विज्ञानतारावलिरर्पितासीत् ॥

465

Sl. No. 38377 विदेहमुक्तिः Ms. No. P. 6052/15

Beginning :

अखण्डैकरसं वस्तु विदेहो मुक्तिरुच्यते ।
ब्रह्मैवाहं न संसारी सच्चिदानन्दवानहम् ॥
निर्गुणोऽहं निरीशोऽहं परमानन्दवाहनम् ॥

End :

अखण्डाकारवृत्त्याख्यं चित्तश्शिवमयं स्थिरम् ॥
लवणं तोयमात्रेण यदैकत्वमखण्डितम् ।
अखण्डैकरसं वक्ष्ये विदेहो मुक्तिलक्षणम् ॥

Colophon :

विदेहमुक्तिः सम्पूर्णा ॥

466

Sl. No. 38378 **विभूतिपञ्चकम्** Ms. No. P. 45

Beginning :

द्वैताद्वैतानुसारिण्यनुभवकलहे यत्र यच्छिन्नमासी-
त्तस्मिन् युद्धेसम प्ते पुनरनुसरणं लक्ष्मणस्तस्य नार्हम् ।
इत्यद्वैतस्थिरात्मोपदिशति सुधिये भस्मधृत्यै शिवोऽहं
न त्वद्वैताध्वमृथानुसृतपरवधूचन्दनस्यानुलेपम् ॥

End :

सोऽहं भावं प्रप न्नास्त्वनुदिनमितरशिष्यसौख्योपदेशं
कुर्वन्त्य तचिह्नं सुरमुनिविहितं भस्म वेदान्तयोग्यम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितं विभूति धारणस्थापकपञ्चरत्नप्रकरणं सम्पूर्णम् ॥

467

Sl. No. 38380 **विरोधवरूथिनी** Ms. No. B. 841

Beginning

परभाष्यबलं छेत्तुं विरोधानां वरूथिनीम् ।
उमामहेश्वराख्योऽहं कुर्वे वल्लालवंशजः ॥

भगवता हि ब्रह्ममीमांसाशास्त्रकारेण व्यासेन विप्रतिषेधाच्चासमंजसम् इत्यस्मिन्सूत्रे—

End :

विरोधास्त्वेत एवालं परभाष्यविनष्टये ।
किमनेकैः कशाघातैर्मुमुक्षोः स्वर्णहारिणः ॥

विरोधानां वरूथिन्या परभाष्यबलं हतम् ।
निःशङ्कातङ्कमद्वैतसाम्राज्यमनुभूयताम् ॥

Colophon :

इति निर्गुणब्रह्ममीमांसातत्त्वचन्द्रिका–भागवतचम्प्वाद्यनेकमहा - निबन्धनकर्ता अभिनवकाळिदासापरनाम्ना वेल्लाल उमामहेश्वरपण्डित

नाम्ना वेल्लाल उमामहेश्वरपण्डितविरचितायां विरोधवरूथिन्यां सप्तविंशो विरोधः ॥ विरोधवरूथिनीग्रन्थः समाप्तः ॥

468

Sl. No. 38382 विवेकचूडामणिः Ms. No. C. 2009

Beginning :

वेंकटेशोवासुदेवः प्रद्युम्नोऽमितविक्रमः । +
कल्याणाद्भुतगात्राय + श्रीनिवासाय मङ्गळम् ॥

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ।
गोविन्दं परमानन्दं मद्गुरुं प्रणतोऽस्म्यहम् ॥

जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता
तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् । +
लब्ध्वा कथंचिन्नरजन्म दुर्लभं
तत्रापि पुंस्त्वं श्रुतपारदर्शनम् ॥

End :

संसाराध्वनिदाघभानुकिरणप्रोद्भूतदेहव्यया-
खिन्नानां जलकाङ्क्षया मरुभुवि भ्रान्त्या परिभ्राम्यताम् ।
अत्यासन्नसुधाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-
त्येषा शंकरभारती विजयते निर्वाणसन्दायिनी ॥

Colophon :

ओंतत्सदिति श्रीमत्परहंसेत्यादि श्रीमच्छंकरभगवत्पादपूज्यकृतौ विवेचूडामणिप्रकरणम् ॥

469

Sl. No. 38384 विवेकचूडामणिः Ms. No. C. 3760/6

Beginning ;

सर्ववेदान्तसिद्धान्तगोचरन्तमगोचरम् ।
गोविन्दं परमानन्दं सद्गुरुं प्रणतोस्म्यहम् ॥

जन्तूनां नरजन्मदुर्लभमतः पुस्त्वं ततो विप्रता
तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् ।
आत्मानात्मविवेचनं स्वानुभवो ब्रह्मात्मना संस्थिति-
र्मुक्तिर्नो शतजन्मकोटिसुकृतैः पुण्यैर्विना लभ्यते ॥

End :

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥
हितमिममुपदेशमाद्रियन्तां
विहितानिरस्तसमस्तचित्तदोषाः ।
भवसुखविरताः प्रशान्तचित्ताः
श्रुतिरसिका यतयो मुमुक्षवो ये ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दभगत्पादपूज्यशिष्य श्रीमच्छंकराचार्य भगवत्पादकृतो विवेकचूडामणिः समाप्तः ॥

470

Sl. No. 38385 | विवेकसारः | Ms. No P. 696/1

Beginning :

सत्यं ज्ञानमनन्तं यत्केवलानन्दमद्वयम् ।
निष्कलं निष्क्रियं शान्तं ब्रह्म तत्समुपास्महे ॥
प्रणिपत्य शिवं साम्बं गणनाथं सरस्वतीम् ।
विवेकसारं वक्ष्यामि हितबु × क्षुताम् ॥

End :

नित्यानित्यविवेचनस्य तु फलं वैराग्यमेवोत्तमं
वैरागस्य फलं क्रियासमुदयन्यासोऽस्य बोधः फलम् ।
ब्रह्मज्ञानफलं सतां ह्युपरतिः तस्याः स्वसौख्यं फलं
पूर्वार्धस्तु निरर्थको भवति न स्यादुत्तरार्धो यदि ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमदानन्दात्मसरस्वतीशिष्य श्रीमदानन्दसरस्वतीविरचितो विवेकसारः सम्पूर्णः ॥

471

Sl. No. 38386 | विवेकसारः | Ms. No. P. 2662/1

Beginning:

बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढानामुपदेशकं च सततं पापात्मनां पापहम् ।
वैराग्यं च विरागिणां सुखकरं सम्पादकं सर्वदा
श्रीमद्देशिकवासुदेवयतिनं सर्वस्वरूपं भजे ॥

End:

तच्च विचार्यमाणे नास्त्यात्मनः अद्वितीयत्वेन अन्यस्य भोग्यवस्तुनः अभवात् आभोक्तृत्वमेव । एवं विचार्य अद्वितीयः असङ्गी अपरिच्छिन्नः अकर्ता अभोक्ता यः स एवाहमिति यो जानाति स एव मुक्तः इति सर्ववेदान्तसिद्धान्तमिति सर्वं रमणीयम् ॥

Colophon:

इति चतुर्दशं प्रकरणम् ॥

472

Sl. No. 38388 | विवेकसारः | Ms. No. P. 2035/1

Beginning:

भननं विवेकसारः नृसिंहपरब्रह्मणे नमः ।

बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढाना × शकं च सततं पापात्मनां पापहम् ।
वैराग्यं च हि रागिणां सुखकरं सम्पादकं सर्वदा
शीमद्देशिकवासुदेवयतिनं मूढात्मकोऽहं भजे ॥

अनुग्रहार्थं मर्त्यानां भाव × कारिणाम्
विवेकसारः शोतॄणां रच्यते कृपया मया ॥

इह सत्सु धर्मार्थकाममोक्षाख्य × एव परमपुरुषार्थः !!

End :

अखण्डात्मानमेवाहं इत्येवं यो विजिज्ञिवान् ।
स सर्वसंतसृतेर्मुक्तो ब्रह्मानन्दं समश्नुते ॥
प्रमादादप्रमादाद्वा यदज्ञानान्मयेरितम् ।
तत्क्षम्यन्तु समालोक्य पण्डितास्समदर्शिनः ॥

Colophon :

इति श्रीमद्वालमल्लि व + तिलको + सूरिसूनुना नाराणाम्बागर्भशुक्तिमुक्तामणिना आदिशेषशास्त्रिणा वेदान्ताशास्त्रादुद्धृते विवेकसारे द्वादशवर्णकम् ॥

473

Sl. No. 38390 | विवेकसारः | Ms. No. P. 5887/1

Beginning :

मधुरमनन बरेयुवुदके निर्विघ्नमस्तु ॥
बोधानन्दघनं निरस्तसकलं कारुण्य पूर्णेक्षणं,
मूढानामुपदेशकं सततं पापात्मनां पापहम् ।
वैराग्यं च विरागिणां सुखकरं सम्पादकं सर्वं × भजे ॥
अनुग्रहार्थं मर्त्यानां संस्कृतानधिकारिणाम् ।
विवेकसारः श्रोतॄणां रच्यते भाषया मया ॥

End :

ದೇಹೇಂದ್ರಿಯಾದಿಗಳು ಕಾರ್ಯವು, ಆತ್ಮ ಕಾರಣನು । ದೇಹೇಂದ್ರಿಯಾದಿಗಳು ಗುಣವತ್ತು । ಆತ್ಮ ನಿರ್ಗುಣನು । ಈ ಪ್ರಕಾರವಾಗಿ ದೇಹೇಂದ್ರಿಯಾದಿಗಳಿಗೂ ಆತ್ಮನಿಗೂ ವೈಲಕ್ಷಣ್ಯವನ್ನು ವಿಚಾರಿಸಿ ಆಟಾತ್ಮನೇ ನಾನು ಎಂದು ಯಾರು ತಿಳಿದಿದ್ದಾರೆಯೋ ಅವನೇ ಮುಕ್ತನು ಧರ್ಮಜ್ಞನು ಅವನೇ × ಗಳಿಗೆ ತಾತ್ಪರ್ಯ,

Colophon :

ಇಂತಿ ಕನ್ನಡ ಭಾಷೆಯೊಳು ವಿರಚಿಸಿದ ಶ್ರೀ ವಾಸುದೇವಯತೀಂದ್ರೋಕ್ತಮಪ್ಪ ವಿವೇಕಸಾರ ॥

474

Sl. No. 38391 | विवेकसारावलिः | Ms. No. C. 4693/44

Beginning :

शुद्धस्फटिकसङ्काशं उमादेहार्धधारिणम् ।
विश्वेश्वरं भवानीशं व्याघ्रचर्मोपरि स्थितम् ॥ १ ॥

+ नमस्कृत्वा महादेवं ज्ञानदं मोक्षदायकम् ।
इयं विवेकसारालिः क्रियंते मुक्तिसिद्धये ॥

End :

इदं रहस्यं परमं ज्ञानदं मुक्तिदायकम् ।
अज्ञाननाशकमिदं वक्तॄणां मोक्षदं परम् ॥

एकान्तभक्त्या श्रोतॄणां संसारभ्रमनाशनम् ।
शिवप्रसादाज्जनितं सर्वमस्तु शिवार्पणम् ॥

परमहंसपरिव्रा चितेयं यथामति ।
विवेकसारावलिः समाप्तेशप्रसादतः ॥

Colophon :

— — —

475

Sl. No. 38392 विवेकसिन्धुः Ms. No. C. 801

Beginning :

अगुणाय गुणाद्भुयस्यच्छाया नव × णे ।
शुद्धा यस्य प्रकाशाय श्रीरामसुनये नमः ॥

निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गाय कर्तृत्वं ब्रह्मणोऽभ्युपगम्यते ॥

End :

शिष्येष्वन्येषु सत्स्वप्यहमधिककृपापात्रतास्यास्मि जातो
ग्रन्थं मद्बोधसिद्ध्यै कुरु शिगुनामं ज्ञानसर्वस्वभावम् ।
एवं विज्ञापितः सन्नवनतशिरसा ज्ञानदेवेन धीमान्
सद्यः कृत्वादितास्मै सकरुणहृदयः श्रीमुकुन्दो मुनीन्द्रः ॥

इति श्रीसतयोगीश्वराचार्ये श्रीरामचन्द्रपरब्रह्मार्पणमस्तु ।

Colophon :

इति विवेकसिन्धुः समाप्तः ॥

476

Sl. No. 38394 | विवेकानन्ददीपः | Ms. No. C. 3253

Beginning :

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसञ्चरेत् ॥
अस्याः श्रुतेरभिप्रायः सम्यगत्र विचार्यते ।
जीवन्मुक्तस्य या तृप्तिः सा तेन विशदायते ॥

End :

ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमाध्याय ईरितः ।
विषयानन्द एतेन द्वारेणान्तः प्रवेश्यताम् ॥
प्रेयाद्धरिहरो येन ब्रह्मानन्देन सर्वदा ।
प्रीणयेत्प्राणिनः सर्वनाश्रयान् बुधमानसान् ॥

Colophon :

— — —

477

Sl. No. 38396 | विशिष्टाद्वैतभञ्जनम् | Ms. No. B. 1150

Beginning :

मच्चेतसि स्फुरतु मन्मथसर्वतारि (गर्वहारि)
दुर्धर्षचापशकलीकरणप्रवीणम् ।
इक्ष्वाकुवंशभवमम्बुदनीलमुग्र-
रक्षोविदारणमुदग्रमुदारमोजः ॥
परमं गुरुमिन्द्रादिवन्दनीयपदाम्बुजम ।
श्रीदेवेन्द्रमहं वन्दे परमानन्ददायिनम् ॥
श्रीधरेन्द्रगुरुन्नत्वा विशिष्टाद्वैतभञ्जनम् ।
क्रियते रघुनाथेन्द्रचरणैरमलात्मभिः ॥

End :

ननु तथापि ब्रह्मणो ज्योतिस्स्वरूपत्वे किं मानम् । येन सूर्यस्तपति तेजसेद्धः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति । सच्चिदानन्दघनं ज्योतिरभवत् । न तु— ×

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीधरेन्द्रपूज्यपादशिष्यश्रीरघुनाथेन्द्रविरचितविशिष्टाद्वैतभञ्जने प्रथमः परिच्छेदः ॥

478

Sl. No. 38398 **विश्वदेशिकविजयः** Ms. No. C. 743

Beginning :

अनादीनां वाचामपि च मनसामप्यसुगमं
बृहद्भासां भासं भुवनभवनिर्हारभवनम् ।
गुणातीतं शुद्धं गुणवरिव (?) मायामसृणितं
भजे सत्यं ज्योतिर्भगवदगपुत्रीपरिवृढम् ॥

End :

जीयाज्जगद्गुरुयशोवनजागरूकं
दृप्यद्द्विपाणिमदभञ्जनशौण्डमेतत् ।
दुर्धर्षमध्वजनधैर्यविभेदकल्यं
लक्ष्मीनृसिंहवरगर्जितमाप्रपञ्चम् ॥

Colophon :

श्रीकल्यवंशकलशार्णवपूर्णचन्द्र-
लक्ष्मीनृसिंहगुरुवर्यकृतिर्विशुद्धा ।
कैवल्यमार्गपरिमार्गणदीपरेखा
व्यालेखि वैश्वगुरवी विजयप्रशस्तिः ॥

479

Sl. No. 38403 **विष्णुसहस्रनामभाष्यम्** Ms. No. P. 1632/1

Beginning ;

सहस्रनामव्याख्येयं ब्रह्मज्ञानप्रदीपिका ।
शङ्करेणैव भगवत्पादाचार्येण वर्णिता ॥
आदिस्त्वं सर्वभूतानां मध्यमन्तस्तथा भवान् ।
त्वत्तः समभवद्विश्वं त्वयि सर्वं प्रलीयते ॥

End :

सहस्रनामसम्बद्धा व्याख्या सर्वसुखावहा ।
श्रुतिस्मृतिन्यायामाला(र)चिता हरिपादयोः ॥

येनाखिलजगच्चित्तशुद्धये निर्मलं कृतम् ।
सहस्रनामसंज्ञातस्तस्मै व्यासाय वै नमः ॥

Colophon :

इति श्रीगोविन्द भगवत्पूज्यदादशिष्य श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशङ्करभगवत्पादकृता श्रीविष्णुसहस्रनामसङ्ग्रहव्याख्या समाप्ता ॥

एतावन्त्येवायुधानि × × सर्वप्रहरणायुधः ॥

480

Sl. No. 38404 विदेहमुक्तिः Ms. No. P. 1652/1

Beginning :

कारणं खादिजगतां नारणार्थमनागसम् ।
वारणाननमात्मानमद्वयं × महे ॥ ×

सन्यज्ञानानन्दरूपां ध्यायेऽनन्यां सरस्वतीम् ।
सहस्रनामव्याख्येयं ब्रह्मानन्दप्रकाशिका ॥

End :

यस्मादेवमुक्तं भगवतैव—
अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् ।
भारताध्ययनात् पुण्यादपि पापमसंशयम् ॥
श्रद्दधानस्य पुंजातेः सर्वपापाण्यशेषतः ।
समाधिसम्पत्संयुक्तः ध्येयो यः पुरुषोत्तमः ।
तस्मै नमोऽस्तु कृष्णाय संसारक्लेशहारिणे ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्य श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशङ्करभगवत्पादाचार्यविरचितं श्रीविष्णुसहस्रनामभाष्यं समाप्तम् ॥

481

Sl. No. 38406 **विष्णुसहस्रनामभाष्यम्** Ms. No. P 3781

Beginning :

यदज्ञानप्रभावेन दृश्यते सकलं जगत् ।
यद्ज्ञानाच्छ्रेय आप्नोति त × नामिने नमः ॥

संसारस्थ × जनामुद्वेजनकरो हि सः ॥

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

End :

सहस्रनामसंबन्धिव्याख्या × सुखावहा ।
श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥

एकैकनामस्तवनस्य विशेषफलसाधनत्वं स सर्वफलसाधनत्वं च प्रतिपादयन् विष्णुधर्माध्याये एकादशेति सहस्रनामव्याख्यां ये पठ्यन्ते सहस्रनामसंकीर्तने त्वशक्तस्य कतिपयसंकीर्तनेनापि समस्तपुरुषार्थस्सिध्यतीति दर्शयितुं एकस्यैव ×

Colopnon :

— — —

482

Sl. No. 38409 **विष्णुसहस्रनामभाष्यम्** Ms. No. B. 1139

Beginning :

श्रीमाधवोमाधवविघ्नराजान्
वाग्देवतां व्यासमुनिं महान्तम् ।
श्रीशङ्करं भाष्यकृतं च भक्त्या
नमाम्यहं लोकहितावतारम् ॥

भाष्यं तैरुपदिष्टार्थं भगवत्पादनिर्मितम् ।
विष्णोर्नाम सहस्रस्य यथामति विविच्यते ॥

End :

एवं व्याख्यानान्तरेष्वपि यथासम्भवं श्रुत्यादिमूलत्वं बोध्यम्।
विष्णोर्नामसहस्रभाष्यविवृतिर्या तत्र विद्वज्जनैः +
क्षन्तव्यं क्षतमुत्तमैः भगवतो नामैकनिष्ठायतः ॥

Colophon :

इति श्रीगोपालसरस्वतीयतिविरचितं श्रीविष्णुसहस्रनामभष्यविवरणं समाप्तम् ॥

483

Sl. No. 38410 विष्णुसहस्रनामभाष्यव्याख्या Ms. No. A. 148

B eginning

श्रीमाधवोमाधवविघ्नराजान्
वाग्देवतां व्यासमुनिं महान्तम् ।
श्रीशंकरं भाष्यकृतं च भक्त्या
नमाम्यहं लोकहितावतारम् ॥ १ ॥
+ तथापि वैगुण्यमिह क्षमन्तां
सन्तो यतेर्यन्मननं स्वधर्मः ॥ ४ ॥
इह खलु युधिष्ठिरः परकारुणिकः शान्तनवाद्भीष्माद्धर्मप्रवक्तुः ×

End :

श्रीगोपालसरस्वतीयतिवरान्तेवासिनातारक
ब्रह्मानन्दसरस्वतीसुयतिना शक्त्यानुरूपा कृता ।
विष्णोर्नामसहस्रभाष्यविवृतिर्या तत्र विद्वज्जनैः
क्षन्तव्यं क्षतमुत्तमैर्भगवतो नामैकनिष्ठो यतः ॥

Colophon :

— — —

484

Sl. No. 38414 विष्णुसहस्रनामविवृतिः Ms. No. P. 2889

Beginning ;

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुरव्यक्तः स जीयाज्जगदीश्वरः ॥

+ + +

विचारविधिपारदा विहितकर्मसंचारदा
विबोधमपि शारदा विनयबुद्धिविस्तारदा ।
भवाब्धिपरिहारदा भवतु भव्यसंभावदा
सुखाय मम सर्वदा सकलपारदा शारदा ॥

End :

आयुधत्वेनाप्रसिद्धान्यायुधान्यस्य सन्ति यत् ।
करजादीन्यतश्चान्ते सर्वप्रहरणायुधः ॥

शास्त्रस्याद्यन्तमध्येष्वभिहितमिति + नमश्चेत्यवोचत् ॥

श्रीमद्विट्ठलपादपद्मभजनानन्दैकसंभाविना
गम्भीरेण विमुक्तये विरचिता श्रीभारतीसूरिणा ।
विष्णोर्दिव्यसहस्रनामविवृतिर्विद्योतपद्यात्मिका
तत्रैतद्दशमं शतं समभवत्पूर्णे सहस्रं यतः ॥

गम्भीरभारतीनाम्ना श्रीगोपालपदाम्बुजे ।
समर्पिता सुफलदा शुद्धा स्वस्तिदमञ्जरी ॥

Colophon :

इति श्रीगम्भी × तीविरचिते सहस्रनमविवृत्त्यपरपर्याये पद्यप्रसूनाञ्जलौ स्वस्तिदमञ्जरी समाप्ता ॥

485

Sl. No. 38417 वृत्तिदीपिका Ms. No. P. 3170

Beginnig :

सजलजलदकाळं सर्वलोकैकपालं
व्रजयुवतिरसालं चन्दनाभ्यक्तफालम् ।
निहतदुरितजालं फुल्लराजीवनाळं
विलसितवनमालं नौमि गोपालबालम् ॥

ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ।
मौनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥

इह सकलजनाभिलपितमोक्षमुख्योपायात्मतत्त्वज्ञानस्य तत्त्वमस्यादि-महावाक्यार्थबोमधजन्यत्वाच्छाब्दबोधे च वृत्तिग्रहजजन्योपस्थितेर्हेतुत्वात्। वृत्तिर्निरूप्यते ॥

End :

इत्थं निरूपिताः पञ्च व्यक्तिजातिस्फोटाः। बोप्पदेवेन तु शक्तताव-च्छेदक × × रेवप × रचातिद्यको धर्मविशेषः। तथा च वर्णजातिस्फोटः, पदजातिस्फोटः, वकायजातिस्फोट इति तन्मते स्फोटत्रयं सिद्धम् ॥

Colophon

इति वृत्तिदीपिका समाप्ता ॥

486

Sl. No. 38418 वेदबाह्यनिरासः Ms. No. C. 4479

Beginning :

× वां दृष्टिविरोधेन जगत्कर्तृव्यवस्थया।
मोक्षमार्गप्रकाशार्थमात्मतत्वं प्रतन्यते ॥
चूडामणिसुतेनेह राघवेन विपश्चिता।
लोकोत्तरचमत्कारि किंचिदत्र विधीयते ॥

End:

वाक्चौर्येण च मूकत्वं तस्मातत्परिवर्जयेत्।
परवाक्यं गृहीत्वा तु स्वयमुक्तं वदेत्तुयः ॥
अत एव माघादिकाव्ये परकीयश्लोकं कीर्त्यैव पुस्तके लिखितमिति

दुष्टशिक्षा ॥

Colophon :

इति महामहोपाध्याय श्रीमद्भट्टाचार्य चूडामणितनय श्री श्रीराघव-पंचानसभट्टाचार्थ विरचितवेदबाह्यनिष्कासे आत्मतत्त्वप्रवेशं सम्पूर्णम् ॥

487

Sl. No. 38420 वेदान्तकोडम् Ms. No. P. 945/3

Beginning

ननु निशि मृतस्य आदित्यरश्मिसम्बन्धाभावात् कथमयोगव्यवच्छेद इति चेत् न अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडिषु सृप्ताः आभ्यो नाडिभ्य प्रतायन्ते × ण सम्पर्कस्य यावद्देहभावित्वात् ॥

End :

वक्तुं क विधित्वानुवाद इति नियन्तुमशक्यत्वात् । न चाग्निरहस्ये भूयसां गुणानां × अग्निरहस्यविहितविद्यानुवादेन बृहदारण्यके अनेकगुणविधाने वाक्यभेदप्रसङ्गात् । वाजसनेयके आकाशा–

Colophon :

— — —

488

Sl. No. 38421 वेदान्तडिण्डिमः Ms. No C. 3777/17

Beginning :

वेदान्तडिण्डिमास्तत्त्वमेकमुद्घोषयन्ति यत् ।
आस्तां पुरस्तां ततेजो दक्षिणामूर्तिशब्दितम् ॥

सकलश्रुतिभेर्योऽपि यदद्य उद्घोषयन्त्यहो ।
तत्तेजो दक्षिणामूर्तिमग्रतो प्रतिभासताम् ॥

End :

जीवन्मुक्तिपदं भजन्ति त इमे प्रत्यग्दृशैर्वाखिलं
दृश्यं साधु विलोक्य वस्तुनि परं ब्रह्मण्यनन्ते तु ये ।
ब्रह्मानन्दसुधारसं समरसं सन्तः पिबन्तः स्वयं
तूष्णीं कल्पविकल्पजल्परहितं तिष्ठन्ति पुण्यात्मनः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री परशिवेन्द्रसरस्वतिना विरचितं वेदान्तडिण्डिमप्रकरणं समाप्तम् ।

489

Sl. No. 38423 वेदान्तपदार्थसंग्रहः Ms. No. C. 861

Beginning :

गौरीपुत्रगजननाख्यममलं सत्यस्वरूपं परं
ध्यायेऽभीष्टफलाप्तये परमदं कारुण्यपाथोनिधिम् ।
सद्योमुक्तिफलप्रदां सुखकरां भक्तप्रियां भारतीं
नत्वा श्रीगुरुपादद्वयुपगळं चिन्त्ये (?) परं नित्यशः ॥

End :

विशेषास्तु परिज्ञेयाश्चैतद्व्याख्यानतो भृशम् ।
पदार्थानां संग्रहश्च वेदान्तस्य प्रबोधितः ॥

इत्येतं परमेश्वरस्य दयया तत्प्रेरितश्चाप्ययं
वेदान्तीति च नामधारकनरो रामाभिधानः खलु ।
ग्रन्थं संग्रहनामकं परतरं वेदान्तबोध्यार्थकं
कृत्वा तं परमेश्वराय विनयात् प्रीत्यर्थमत्यार्पयत् ॥

Colophon :

— — —

490

Sl. No. 38425 वेदान्तप्रकरणम् Ms. No. P. 3950/2

Beginning :

× तस्या × नाशः । इत्यन्तः करणशुद्धिः । ततो नित्यावस्तु × विवेकः सम्पद्यते । इह व्यवहारभूमौ किमनित्यं किमु नित्यमिति विचारः । ननु नित्यवस्तु कीदृशं । शृणु । +

End :

+ इदानीं मुमुक्षोः पुरुषस्याविद्याप्रतिबन्धनिवृत्त्यर्थं सधानप्रकारा उच्यन्ते । ततः पूर्वकाण्डोक्तनिष्कामकर्मानुष्ठानादन्तःकरण × कर्मानुष्ठान × यथावृक्षस्य विम्बकारणं ×

Colophon :

इति शङ्कराचार्यविरचितः प्रथमः कल्पः ॥

491

Sl. No. 38429 — वेदान्तप्रकरणविंशतिः — Ms. No. P. 5080/1

Beginning:

वचः पारावारः प्रमथन महिम्नश्रुतिततेः
प्रासिद्धं यद्वस्तु प्रथितनवनीतोपममभूत् ।
तदद्वैताश्रान्तप्रतिपदवधूतप्रभुशिवः
स्वचिन्मायाशक्त्या जनयति जगन्निष्कृतिकरम् ॥
तत्त्वंपदविदेकोक्तिमवधूतः सदाशिवः ।
कुरुते बालबोधाय यथावेदान्तपद्धति ॥

End:

यस्योपदेशाद्वियदादिभिन्नः
प्रपञ्चमिथ्यात्वमनः प्रतीता ।
त्वं योगवर्यं परमावधूतं
ज्ञात्वा कृपालुं तरसा भजध्वम् ॥
मोक्षाब्धिदत्तहस्तेन महावाक्यार्थवादिना ।
अवधूतशिवेनेमे वर्णयो दश वर्णिताः ॥

Colophon:

इति श्रीकैवल्यनयप्रवर्तक श्रीमत्परमहंसपरिव्राजकाचार्य परशिवपाद-युगकमलिनीराजहंसावधूतशिवयोगीन्द्रविरचिते वाक्ये प्रकरणविंशतिका सम्पूर्णा ॥

492

Sl. No. 38431 — वेदान्तप्रकरणविंशति टीका — Ms. No. P. 5080/2

Beginning:

नित्याय निर्विकल्पाय योगिध्येयाय सर्वदा।
तत्त्वंपदार्थरूपाय शम्भवे-गुरवे नमः ॥

ಈ ಮಹಾಗ್ರಂಥದಲ್ಲಿ ವಸ್ತುನಿರ್ದೇಶ ಹೇಳಲ್ಪಟ್ಟಿತು । ....ಸಮಯ
ಉಂಟಾಗಿ ಗುರುದೇವತಾನಮಸ್ಕಾರಪೂರ್ವಕಾರ್ದಂ

End :

प्रकाशश्च प्रवृत्तिश्च प्रमादश्चेति ते त्रयः ॥
वैकारिकाः सत्त्वगुणाः जाताश्चेन्द्रियदेवताः ॥
बुद्धिः कर्मेन्द्रियप्राणपञ्चकं राजसोद्भवम् ।
खं वाय्वग्निजलोर्वी च तामसोत्पत्तिरुच्यते ॥

Colophon :

— — —

493

Sl. No. 38435 वेदान्तप्रकरणविंशतिका Ms. No. B. 1074

Beginning :

न द्वितीयः हेतूपरागमपेक्ष्य विकारित्वे मृदादिवत्परिणामित्वापत्तिः विशिष्टस्य ब्रह्मत्वे निर्विकारश्रुतिविरोधः । अब्रह्मत्वे ब्रह्मणः कारणत्वासिद्धिः ।

End :

छायासंज्ञा संश्रिता वामपार्श्व
हस्तद्वन्द्वे फुल्लपद्मे दधानम् ।
ब्रह्मेन्द्राद्यैरीड्यमानं सुरौघैः
सूर्यं वन्दे सर्वलोकप्रकाशम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाजार्य श्रीज्ञानेन्द्रसरस्वतीपूज्यपादशिष्य श्रीवासुदेवेन्द्रसरस्वतीविरचितायां मानन्ददीपिकयां वेदान्तभूषणव्याख्यायां द्वितीयः परिच्छेदः ॥

श्रीमज्ज्ञानेन्द्रयोगीन्द्रकृतं वेदान्तभूषणम् ।
श्रीवासुदेवेन्द्रयतिर्व्याकार्षीद्विदुषां मुदे ॥

आनन्ददीपिका समाप्ता ॥

494

Sl. . No. 38442 वेदान्तसंज्ञाप्रकरणम् Ms. No. P. 309

Beginning :

आनन्दमानन्दकरं प्रसन्नं
ज्ञानस्वरूपं निजबोधमुक्तम् ।

योगीन्द्रमीड्यं भवरोगवैद्यं
श्रीमद्गुरुं नित्यमहं नमामि ॥
श्री × गुरोः पादयुगं नत्वा तस्य प्रसादतः ।
वेदान्तसंज्ञाः प्रत्येकं निरूप्यन्ते यथामति ॥

अध्यारोपापवादाभ्यां निष्प्रपञ्चः प्रपञ्चयत इति वृद्धवचनम् । अध्यारोपो नाम वस्तुन्यवस्त्वारोपः ।

End :

तथा चासङ्गाद्वितीयब्रह्मप्रतिपादके वेदान्तशास्त्रे वृद्धवचनमनुसृत्य अध्यारोप(व)शात्संज्ञास्सन्तीति प्रतिपादितम् । सम्प्रत्यपवादो निरूप्यते । अधिष्ठानमात्रपर्यवशेषणं अपवादः । तथा च सर्वप्रपञ्चरहितं ब्रह्माहमस्मीति प्रत्यगभिन्न ब्रह्मज्ञानात्मुक्तिरिति सिद्धम् ॥

Colophon

इति संज्ञाप्रकरणं समाप्तम् ॥

495

Sl. No. 38447 वेदान्तसारः **Ms. No. P. 955/13**

Beginning :

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्यवेदान्तसारं वक्ष्ये यथामति ॥

End :

अनुभावानामन्तःकरणाभासादीकां अवभासकः सन्देहावसाने प्रत्यगानन्द परब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्याणामपि विनाशात् परमकैवल्यमानन्दरसं अगिलभेदप्रतिभासरहितं अखण्डंब्रह्मावतिष्ठतोनतस्य प्राण, उत्क्रामन्ति अत्रैव समयलीयन्ते। विमुक्तश्च विमुच्यते । इत्येवमादिश्रुतेः ।

Colophon :

इति वेदान्तसारः समाप्तः ॥

496

Sl. No. 38448 वेदान्तसारः Ms. No. P. 2035/5

Beginning :

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारं आश्रये ज्ञानसिद्धये ॥
अर्थतोप्यद्वयानन्दानतीतद्वैतभावनान् ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥

अस्य वेदान्तप्रकरणत्वेनानुबन्धचतुष्टयमेवाख्यायि इति ज्ञेयम् ॥

End :

एवं जीवन्मुक्तो प्रारब्धाधीनेन सञ्चरन् प्रारब्धाधीनसुखदुःखादिकमनुभवन् अपि जयत्सर्वमत्येति निश्चिनोति—यदा देहेन्द्रियादि प्रारब्धस्य नाशो भवति तदा विदेहमुक्तिं प्राप्नोतीति सकलवेदसिद्धान्त इति सर्वं रमणीयम् ।

यत्कटाक्षसुधासिन्धौ मज्जता पुण्यपाकतः ।
मया ज्ञानमणिर्लब्धस्तमानन्दगुरुं भजे ॥

Colophon :

इति श्रीमदादिशेषात्मजविरचितम् ॥

497

Sl. No. 38454 वेदान्तसारटीका Ms. No. P. 4123

Beginning :

कृष्णानन्दगुरुं नत्वा परमानन्दमद्वयम् ।
वक्ष्ये वेदान्तसारस्य टीकां नाम्ना सुबोधिनीम् ॥

इहा × श्रीमन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशीनां × आशङ्कयाह ॥ अवाङ्मनसगोचरमिति ॥

End :

नित्यशुद्ध × मद्वयं
सच्चिदात्मकमखण्डमक्षरम् ।
सर्वदा सुखमबोधतत्कृते-
र्वर्जितं × दिहम × तत्सरम् ॥

गोवर्धनप्रेरणया विमुक्तो
क्षेत्रे पवित्रे नरसिंहयोगी ।
वेदान्तसारस्य चकार टीकां
सुबोधिनीं विश्वपतेः पुरस्तात् ॥
जाते पञ्चदशाधिके × वेदान्तसारः ॥

Colophon :

इति श्रीकृष्णानन्दभगवत्पूज्यशिष्यनृसिंहसरस्वतीकृता वेदान्तसारटीका समाप्तिमगमत् ॥

498

Sl. No. 38456 वेदान्तसारसङ्ग्रहः Ms. No. P. 326/4

Beginning :

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनी × ता
कुर्वे वेदान्तसाराख्यं सिद्धान्तानां प्रकाशकम् ॥
नत्वा हरिहरव्यासभाष्यकारादिदेशिकान् ।
बालबोधाय वेदान्तसारस्संग्रह्यते स्फुटम् ॥ इह—

End :

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥
इति स्मृतेरिति सर्वमनवद्यम् ।
हस्तामलकवद्ब्रह्म भासते गुर्वनुग्रहात् ।
यस्य तेन बुधेन्द्रेण कृतो वेदान्तसंग्रहः ॥

Colophon :

इति श्री शिवरामभट्टाचार्यकृतवेदान्तसारसंग्रहस्समाप्तः ॥

499

Sl. No. 38458 वेदान्तसारसङ्ग्रह Ms. No. P. 5887/2

Beginning :

बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढानामुपदेशकं च सततं पापात्मनां पापहम् ।
वैराग्यं च विरागिणां सुखकरं सम्पादकं सर्वदा
श्रीमद्देशिकवासुदेवयतिनं मूढात्मकोऽहं भजे ॥

End :

मायोपाधिविनिर्मुक्तः शुद्ध इत्यभिधीयते ।
मायासंबन्धिचैतन्यं जीवोऽविद्यावशस्तथा ॥
अन्तःकरणसंबन्धात् प्रमातेत्यभिधीयते ।
तथा त × संबन्धात् प्रमाणमिति कथ्यते ॥

Colophon

वेदान्तसारसंग्रहः समाप्तः ॥

500

Sl. No. 38459 **वेदान्तसारसंग्रहदीपिका** Ms. No. P. 7679

Beginning

वागीशाद्यास्सुमनसः × गजाननम् ॥ +
ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम् ।
दुःखातीतं गगनसदृशं तत्त्वमस्यादि लक्ष्यम् ॥ +
तथा पद्मपादाचार्यतच्छिष्यानुक्रमागतम् ।
पूर्णानन्दगुरुं वन्दे पुरुषोत्तमयोगिनम् ॥
आत्मतत्त्वं निरूप्यते–

ಈ ಪ್ರಕಾರ ವಿಘ್ನ ಮುಂತಾದ ತನ್ನ ಗುರು ಮೊದಲಾದ ಸಮಸ್ತ ದೇವತಾ ಗುಂಗಳಿಗೂ ನಮಸ್ಕರಿಸಿ—

End :

ಸಪ್ತಾವಸ್ಥೆಗಳ ಪ್ರಕಾರವನ್ನು ತಾಪತ್ರಯ ಪ್ರಯಾದಿತ್ರಯ ತ್ರಿಪುಟತ್ರಯ × ಯೋರ್ಗೀತ್ಪತ್ತಿ ಮಾಯಾಸ್ವರೂಪಲಕ್ಷಣಮುಮುಕ್ಷುಲ × ಸಪ್ತವೇದಾಂತ ಸಾರ ಸಂಗ್ರಹರಹಸ್ಯಗಳನು ಸದ್ಗುರುಕಟಾಕ್ಷದಿಂದ ನನ್ನ ಬುದ್ಧಿಗೆ ತೋರಿದಷ್ಟು ಈ ಪಂಚ ವಿಂಶತಿ ನಿರ್ಣಯದಲ್ಲಿ ಹೇಳಿದೆ.

Colophon :

इति पञ्चविंशति निर्णयं समाप्तम् ॥

501

Sl. No. 38460 **वेदान्तसारसंग्रहदीपिका** Ms. No. C. 1535

Beginning :

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

अयमर्थः—चेतनमेव चैतन्यं ज्ञप्तिस्वरूपं सर्वगं स्वाविद्यापरिकल्पित दिक्कालाकाशादि सर्वं व्याप्नोतीति सर्वगमित्युक्तिः परमार्थतः सर्वं तद्गम्यमस्ती त्याशङ्का मा भूदित्याह—सर्वमिति ॥

End :

असङ्गो ह्ययं पुरुष इति श्रुतिः स्पष्टार्था । अस्ति लोके शब्दस्य वृत्तिद्वयं शक्तिर्लक्षणा चेति । लक्षणायां च वीजद्वयम् । अन्वयानुपपत्ति-स्तात्पर्यानुपपत्ति ˜˜ ति ।

Colophon :

इति श्रीमदखण्डब्रह्मविद्याविशारदज्ञानवलैश्वर्यवीर्यतेजःसौशील्याद्यसंख्येयकल्याणगुणगणरत्नरत्नाकरानाद्यविद्यासंसारनिबिडान्धकारप्रचण्डमार्ताण्डोदय श्रीजयरामब्रह्मपूज्यपादशिष्यश्रीवेंकटेशस्वामिकृतौ वेदान्तसारसंग्रहदीपिकायां ब्रह्मतत्त्वसुबोधिन्यां समाधिप्रकरणं नवमं समाप्तम् ॥

502

Sl. No. 38462 वेदान्तसारसङ्ग्रहोपन्यासः Ms. No. P. 2219

Beginning;

× साधारणत्वासंभवेन स्वाधेयकार्यतावच्छेदेन कालस्य स्वाधेय भिन्नं प्रति हेतुत्वाभावात् । अविद्याप्रयोज्यस्य तस्य तन्निवृत्त्यनाश्रयत्वात् । न चावस्थाज्ञाननिवृत्तौ व्यभिचारेण —

End :

परिभाषामात्रसिद्धमर्थज्ञानं न तत्प्रामाणिकानामभ्युपगमपदवीमारोढुम-र्हतीति । तस्मात् श्रुतिस्मृतीतिहासपुराणानामविरोधेन एकवाक्यतया स्वारसिक प्रामाण्यमिच्छद्भिः अच्छमतिभिः अनवद्यपुमर्थमर्थयमानैः अद्वैतमतमेवादरणीय मिति सर्वमवदातम् ॥

Colophon .

इति श्रीमद्ज्ञानेन्द्रयोगि चरणारविन्द्रपरिचरण तत्पर श्रीकोनेटिदीक्षित सुतेन रघुनाथाध्वरिणा विरचिते वेदान्तसारसंग्रहोपन्यासे द्वितीयः परिच्छेदः ॥

503

Sl. No. 38464 वेदान्तसिद्धान्तचन्द्रिका Ms. No. B. 815/1

Beginning:

श्रीरामभद्रसंयमिचरणौ शरणं विधाय बोधाय ।
सिद्धान्तचन्द्रिकामृतसेकैः शोधयामि चेतस्स्वम् ॥

श्रीगुरुकृपाकटाक्षात्सारं शास्त्रस्य सकलमाकलयन् ।
सुकृती कृतीह किञ्चित्श्रुतिसुखमित्थं च गौमितस्सहृदे ॥

End:

इति सुखचिदात्मवस्तुनि कुतुकादतिमन्दमपि मया गीतम् ।
कलभाषितं शिशोरिव कलयतु हर्षं सतामभीक्ष्णमिदम् ॥

श्री रामयतिमुखेन्दोश्शारदसमये गुरुप्रसादमये ।
सिद्धान्तचन्द्रिकाजनि सम्भूय पिबन्तु सहृदयचकोराः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दसरस्वतीतिलकश्रीमद्राम भद्रभगवत्पूज्यपदपायोजपादुकापरिचरणपरायण श्रीमद्रामानन्दसरस्वती विरचिता वेदान्तसिद्धान्तचन्द्रिका सम्पूर्णा ॥

504

Sl. No. 38466 वेदान्तसिद्धान्तचन्द्रिकाव्याख्या Ms. No. B. 815/2

Beginning

प्रणमदमरमौलि प्रस्फुरद्रत्नरश्मि
प्रकरविमलदीपैर्नित्यनीराजिताङ्घ्रिः ।
शशिकिरणधारी योगिहृत्पद्मचारी
कृपयतु मयि सांबः कोपि संवित्कदम्बः ॥

श्रीरामसंयमीन्दोः सान्द्रां सिद्धान्तचन्द्रिकां प्रलिखन् । (?)
प्रथयति गंगाधरयतिः भव्यचकोरस्तदुद्धतोद्गारान् ॥
इह खलु बहुतरभवपरंपरार्जितसुकृतपरिपाकजनितविवेकवैराग्यादि साधनमुमुक्ष्वभिलषित—

End :

इति आदिमध्यावसानेषु गुरुस्मरणलक्षणं मङ्गलं ग्रन्थस्य प्रपं (?) गमनावंवन्येतृश्रोतॄणामायुराद्यभिवृद्धये परमपुरुषार्थसिद्धये च कृतमिति मन्तव्यमितिसर्वं शिवम् ।

निगुम्भेऽस्मिन् श्रीमद्गुरुचरणगम्भीरवचसां
मयौत्सुक्यादेते कतिपयपदार्थाः प्रकटिताः ॥

Colopnon :

— — —

505

Sl. No. 38469 वेदान्तसिद्धान्तसूक्तिमञ्जरी **Ms. No. P. 4986/1**

Beginning

तारानाथकलाधरस्त्रिजगतां नाथस्त्रयीविग्रहः
कारुण्यैकनिधिर्विधीन्द्रसुमुखैर्देवर्षिसिद्धैर्नुतः ।
वामाङ्कस्थितशैलजाङ्कमहितं विघ्नाधिपं तालय
× नन्दः शुभदस्सदास्तु भगवान्प्ररीप्सितेस्मिन् शिवः ॥
श्रीमद्गुरुपदांभोजद्वन्द्वमानम्य भक्तितः ।
सिद्धान्तलेश्यसिद्धान्तान् कारिकाभिर्निदर्शये ॥

End :

आसर्वमुक्तिवरकल्पितसत्यकाम
सङ्कल्पितजगत्स्थितिभङ्गसर्गम् ।
सत्यं स्वतस्तु सुखचिद्धनमद्वितीयं
मुक्तोपसृप्यमहमस्मि विशुद्धतत्त्वम् ॥
श्रुतिकल्पलताकुञ्जजाता सूक्तिमञ्जरी ।
रम्या राघन्तनाद्यारञ्जयत्वखिलान्बुधान् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्रामचन्द्रसरस्वती पूज्यपाद शिष्येण गङ्गाधरेन्द्रसरस्वत्याख्य भिक्षुणा विरचिता वेदातसिद्धान्तसूक्तिमञ्जरी-सम्पूर्णा ॥

506

Sl. No. 38470 वेदान्तसिद्धान्तसूक्तिमञ्जरीप्रकाशः Ms. No: P. 4986/2

Beginnig :

स्पृहणीय गुणकदम्बं

हेरम्बमनुसन्धत्तेतरणिश तसुवर्णमिति ।

श्रेयांसि बहुविघ्नानि इति प्रवादात्परमश्रेयस्साधने ग्रन्थे विघ्नबाहुल्यं सम्भाव्य सर्वविघ्ननिबर्हणक्षमं श्री गुरुनमस्कारलक्षणं मङ्गलान्तरमारम्भं-श्चिकीर्षितं प्रतिजानीते श्रीमदिति ।

End :

प्रकृतमुक्तिस्वरूपविचारफलप्रदर्शनेन + मङ्गलमध्यानि मङ्गला-न्तानि शास्त्राणि इति पतञ्जलिस्मृतेर्ग्रन्थान्ते मङ्गलार्थमनुसन्धत्ते आसर्वेति । कीर्तिप्रचायगमनादिसिद्धये ग्रन्थस्यविशिष्टमूलगुणनामधेयानि दर्शयन्नाशीर्व-चनलक्षणं मङ्गलान्तरमाचरति श्रुतिकरलतेति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्रामचन्द्रसरस्वतीपूज्यपाद-शिष्येण श्रीसर्वज्ञसरस्वतीपूज्यपादशिष्येण गङ्गाधरसरस्वत्याख्ययतिना विरचित वेदान्तसिद्धान्तसूक्तिमञ्जरीप्रकाशे चतुर्थः परिच्छेदः ॥

507

Sl. No. 38472 वैदिकसिद्धान्तः Ms. No. P. 399

Beginning :

यत्प्रसादैकलभ्याः स्युः अपवर्गान्तसम्पदः ।
तमेवं देशिकं वन्दे वन्दे शङ्करभारतीम् ॥
ब्रह्मानन्दाब्धि × लोकोत्तरगुणो ध्रुवम् ॥

नत्वा श्रीपादुकां दिव्यां बालकृष्णमुनेर्गुरोः ।
कुर्वे वैदिकसिद्धान्तं तत्प्रसादामिकांक्षया ॥

इदमत्र दिवेक्तव्यम्—हरिशंकरयोः मुख्यभेदमाश्रित्य—

End :

दुरागृहन्तोऽपि स्वपुरुषार्थमालोचयन्तु ॥
कृतो वैदिकसिद्धन्तो भक्तिनिर्भरचेतसा ।
मया प्रसादं कुरुतात् मयि सा भक्तवत्सला ॥
आचार्यपादुकाशेष संसारविनिर्बार्तनी ।
बालकृष्णप्रिया देवी प्रत्यक्चैतन्यरूपिणी ॥ (?)

Colophon

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमद्बालकृष्णानन्दभगवत्पूज्य-पादशिष्य श्रीमत्सुखचिद्रूपभारतीविरचितः वैदिकसिद्धान्तः सम्पूर्णः ॥

508

Sl. No. 38475 वैयासिकसूत्रोपन्यासः **Ms. No. P. 2245**

Beginning ;

वटशाखतटावासं निटिलाननभास्वरम् ।
कटीतटपटीभूतगजत्वचमहं भजे ॥
आचार्यभाष्यतट्टीकातन्निबन्धनसागरात् ।
सदर्थरत्नान्युन्नद्धृत्य सूत्रेषु ग्रथयाम्यहम् ॥
ओं अथातो ब्रह्मजिज्ञासा ॥

End ;

इति सूत्राभ्यासः शास्त्रपरिसमाप्तौ ॥
वैयासिकानां सूत्राणां उप × कृतो मया ।
अलसानां × मीषप्रतीतिर्जायतामिति ॥
दिकान्केह प्रहानापि व्याससूत्तार्थदीपिका ।
इयं रामेशभारत्याः कृतिर्विजयतां भुवि ॥

Colophon :

इति वैयासिकसूत्रोपन्यासे चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्च चतुर्थाध्यायः ॥

इति श्रीमत्परमहंसपरिव्रजकाचार्य श्रीरामेश्वरभार × वैयासिकसूत्रोपन्यासः परिसमाप्तः ॥

509

SI. No. 38481 **वैराग्यबोधोपरतिप्रकरणम्** Ms. No. P. 2035/22

Beginning :

वैराग्यबोधोपरतितद्भेदस्वरूपकार्यतदवधयो निरूप्यन्ते—

वैराग्यबोधोपरतयः विवेकिषु एकैकस्यैते सहायास्सन्तः सि × ति कर्मवशादेकैक एकस्मिन् पुरुषे एकस्मिन् समये वा न सन्ति तद्वैराग्य-बोधोपरतीनां हेतुः ॥

End :

विवेकीत व्यापारान् दृष्ट्वा शास्त्रार्थ × इति न × कर्मणो नानाविधत्वेऽपि तत्तत्कर्मभिस्तेषां नानाविधव्यापारकृत्वेऽपि ज्ञानं ज्ञानफलं मुक्तिश्च एतद्द्वयं समा × सर्वशास्त्रार्थसिद्धान्त इति सर्वमवदातम् ॥

Colophon :

इति वैराग्यबोधोपरतिप्रकरणं समाप्तम् ॥

510

Sl. No. 38384 **व्यासतात्पर्यनिर्णयः** Ms. No. P. 1829/1

Beginning :

श्रीशाकृतिं मे मकुटाकृति × शात्मक कमीशात्मक ×
सत्यसुखबोधनिजस्व × णामायुतम् ।
श्रीवेंकटकवेः सूनुरळहरेरनुजः कविः ।
अय्यण्णो वैणिकः कुर्वे व्यासतात्पर्यनिर्णयम् ॥

End :

व्यासतात्पर्यनिर्णीते पूर्णचन्द्रप्रभामिमाम् ।
समास्वाद्याभिनन्दन्तु सन्मनीषिचकोरकाः ॥
बादरायणसिद्धान्ते केवलाद्वैतडिण्डिमः ।
उद्घोष्यतां विपश्चिद्भि × भेदवादिनाम् ॥
हस्तलोचननागाब्धि ह्यब्दे प्लववत्सरे ।
अय्यण्णेन कृतः श्रीमद्व्यासतात्पर्यनिर्णयः ॥

Colophon :

इति श्रीमद्राधमा × संवादाद्यनेक प्रबन्धनिर्माणधुरीणस्य श्री × स्वार्थप्रकाशनधुरन्धर न्धरेण श्रीमदण्णय्यविद्वन्मणिना विरचिते व्यास तात्पर्यनिर्णये सगुणब्रह्मविवेको नाम द्वितीयः परिच्छेदः ॥

511

Sl. No. 38486 बोधामृतम् Ms. No. B. 1071

Beginning

यस्याङ्कुशाग्रण × नमो गणेशः कुरुताच्छुभानि । +
फलन्ति मे + शिवराममुनिं भजे। +
स्वाविद्यया + स्वयंप्रकाशाख्यगुरुं नमामि तम् ॥
यस्मिन्निदं + हृदि राममीळे । +

वेदान्तदुग्धाब्धिविचारमन्था-
दुद्भूतमाचार्यहरिप्रदत्तम् ।
बोधामृतं कर्णपुटैः पिबन्तु
नराः परानन्दरसं भयघ्नम् ॥

End :

सत्यस्यासुरनायको जलनिधिः कोपस्य रामस्य सा
भक्ताधीनगतिं पतच्च शबरी तामेव जानाम्यहम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य × श्रीमत्स्वयंप्रकाशानन्द-सरस्वतीपूज्यपादानां श्रीमच्चरणारविन्दमकरन्दास्वादनेन्दीवरायमान × रूपनिरूपणं नाम विंशतितमो विवेकः ॥

512

Sl. No. 38487 शङ्कराचार्यजन्मदिननिरूपणम् Ms. No. B. 2539/42

Beginning :

नवाधिकाशीतियुताष्टशत्या
युक्ते सहस्रत्रितये व्यतीते ।

कलेस्समानां विभवाद्धराध
सिते दशम्यामुदभून्महेशः ॥

End :

भगवत्पादानां अवतारभूत प्रजोत्पत्तिनामसंवत्सरस्य मुनकुतोम्मन्नूट अखरेण्डु आयिना (?) नवशतोत्तरं द्विषष्टिवत्सरा आसन् ॥

Colophon :

— — —

513

Sl. No. 38488 शङ्करावतारप्राशस्त्यम् Ms. No. P. 5793/12

Beginning :

श्रेयो वातेरितान्नः श्रुतिशिखरवचोवीचिधाराधरेन्द्रान्
शुद्धाद्वैतामृतौघानपहृततपनान्वर्षतस्तर्षभूम्ना ।
आनेतुं झर्झरत्वं द्रुतमुपसरतस्तर्कझञ्झासमीरान्
मुष्णन पुष्णातु भद्रं स्मर × दवतरो योगिभोगीश्वरो नः ॥

End :

शिवावतारशङ्करप्रचुरसूक्तिसक्तात्मनां
वहामि शिरसा रसादहमुपानहं माल्यवत् ।
मतान्तरपिशाचिकापरवशात्मनां मस्तके
स्ववामपदपादुका विनिहिता मया वीक्ष्यताम् ॥

Colophon :

— — —

514

Sl. No. 38489 शरीरत्रयप्रकरणम् Ms. No. P. 2035/4

Beginning :

वन्दे वन्दारुमन्दारमिन्दुचूडस्य नन्दनम् ।
अमन्दानन्दसन्दोहबन्धुरं सिन्धुराननम् ॥
प्राणिनां कति शरीराणीत्येवं विचार्यते । नन्वस्य विचारस्य प्रसक्तिः कथं किंप्रयोजनमिति चेदुच्यते ॥

End :

यश्शास्त्रोक्तसाधनसंपन्नः सन् परमार्थस्वरूपाद्वितीयपरिपूर्णसच्चिदानन्द स्वरूपात्माहमिति मां विना जगन्नास्ति : भासमानमपि मिथ्याभूतजगता मे × शी नास्ति इति संशयासंभावनाविपरीतभावनारहितः सन् यो जानाति स एव जीवन्मुक्तः स एव विद्वान् स एव सर्वरू × इति सर्वं रमणीयम् ॥

Colophon :

इति शरीरलयप्रकरणं समाप्तम् ॥

515

Sl. No. 38492 शान्त्यागमसूत्राणि Ms. No. C. 2502/3

Beginning :

अथ शान्तिमन्त्रागमजिज्ञासा × ताखण्डा का × ।
चैतन्यस्वरूपा शक्तिः ॥ ३ ॥
स्त्येव वि × । तत्त्वत्रयैरिभिदा ॥ ५ ॥
शाम्भवीविद्यासमाख्यायाः पूर्वोत्तराख्यामनेका जाता ? ॥ ७ ॥
तां × परिव × श्यामायाः पूर्वस्मिन् स्थिता ताः ॥

End :

अनुत्तर सङ्केतप्रधानविद्या सप्तदशवर्णा विशिष्टा ॥
अधीता सा परिवार णामनुपरिवारा असङ्ख्याकाः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशुकयोगीन्द्रशिष्य श्रीमद्गौड-पादाचार्येण विरचितानि सूत्राणि समाप्तानि ॥

516

Sl. No. 38493 शाम्भवीविद्या Ms. No. C. 823/10

Beginning :

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समश्रितः ।
पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ॥
एतत्सप्तदशोपेतं सूक्ष्माङ्गं भोगसाधनम् ।

शाम्भवी विद्या—

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणाः ॥

End:

अन्तर्लक्ष्यं वहिर्दृष्टिः निमेषोन्मेषवर्जिता ।
एषा सा शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥

Colophon:

— — —

517

Sl. No. 38494 शारीरकमीमांसान्यायसङ्ग्रहः Ms. No. P. 3558

Beginning:

प्रणम्य प्रणतार्तीनां हन्तारं विष्णुमव्ययम् ।
शारीरकस्य संक्षेपात् क्रियते न्यायसङ्ग्रहः ॥

अथातो ब्रह्मजिज्ञा × त्र विशिष्टाधिकार्यन्शतोप्राप्तविषयतत्सा-ध्यफलानुवन्धत्रयमपेक्ष्य —

End:

अत एव दूषयितुमशक्यम × णत्वादप्राप्तेश्च स्वरूपमङ्गीकृत्य-धर्मान्तरदूषणसाधनेऽपि तथातस्मात् कार्यब्रह्मप्राप्तिःसगुणविद्याविपाकोऽय-मिति सिद्धम् ॥

Colophon:

इति शारीरकमीमांसान्यायसङ्ग्रहे भगवत्प्रकाशात्मविरचिते चतुर्थः पादः ॥

समाप्तश्चाध्यायः
शारीरकाणां न्यायानां सप्तम्यूनशतद्वयम् ।
प्रकाशात्ममुनीन्द्रेण निर्णीतं न्यायवेदिना ॥
समाप्तं शारीरकशास्त्रम् ॥

518

Sl. No. 38495 शारीरकभाष्यविवरणोपन्यासः Ms. No. P. 4413

Beginning:

यं बोधयन्ति वेदान्ताः सन्तमन्तविवर्जितम् ।
आत्मानं विशदानन्दं तं वन्दे सान्द्रचिद्घनम् ॥

भाष्यं गम्भीरभावं विकटतरपदाटोपभावा च टीका
तस्याः प्राणायमाना विवरणसरणिर्विस्तरेणास्तगाढा ।
व्याख्याव्याख्येयभावः सकलजनमनःखेदहेतुश्च तेषां
तेनाहं सारमात्रं विशदतरपदैः सङ्ग्रहीष्यामि किञ्चित् ॥

यथाश्रुतं यथाबोधं स्वबोधपरिशुद्धये ।
प्रयते सङ्ग्रहे सन्तः स्खलितं क्षन्तुमर्हथ ॥

End :

तथाचैतान्यविरोधप्रसङ्गात् ज्ञानस्य प्रामाण्यहानिकरं तर्कापेक्षत्वमनुपपन्नमिति । × तत्राश्रमधर्मानु × ज्ञानाद्दुरितापगमः रामादिसेवया चित्तस्य विपरीतप्रवृत्तयो वृध्यन्ते ॥

Colophon :

— — —

519

Sl. No. 38501 शास्त्रारम्भसमर्थनम् Ms. No C. 759/1

Beginning :

पूर्णानन्दस्वप्रकाशसर्वाधिष्ठानमूर्तये ।
निखिलागमवेद्याय नमोस्तु परमात्मने ॥

ब्रह्ममीमांसाशास्त्रमारम्भणीयं विषयादिमत्वादध्वरमीमांसाशास्त्रवत् । नन्वत्र विषयत्वाभिमतं प्रत्यग्ब्रह्मैक्यं ब्रह्मणोऽतिरिच्यते न वा । नाद्यः तस्यस त्यत्वेऽद्वैतहानेः ।

End :

श्रुतितात्पर्यगोचरता नास्त्यप्रतिकूलत्वादुक्तार्थस्यैव परिग्रहे न किञ्चित्प्रमाणम् । तस्माद्विषयप्रयोजनादिसम्भवाच्छास्त्रमारम्भणीयमिति सिद्धम् ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवत्पूज्यपादचरणानुग्रहलब्धब्रह्मविद्यावैशद्यस्य श्रीमद्ब्रह्मानन्दसरस्वती सारस्वतसाम्राज्यानुभवसमेधमानयुक्तिशतधारोत्सारितविपक्षपक्षदुरुक्तिगिरिनिचयस्य भट्टत्रियंबकस्यकृतिषु शस्त्रारम्भसमर्थनम् ॥ श्रीरामार्पणमस्तु ॥

513

Sl. No. 38488 **सुबोधनीयम्** Ms. No. P. 10352/

Beginning :

ओंनमोऽव्यक्तरूपाय परब्रह्मस्वरूपिणे ।
शब्दस्पर्शस्वरूपाय रसगन्धस्वरूपिणे ॥

+ + +

श्री राम उवाच—

कथं सृष्टिर्भवेद्देव कथं सृष्टिर्विनश्यति ।

ईश्वर उवाच—

End :

स्वेदजा अण्डजाश्चैव उद्भिदाश्च जरायुजाः ।
चतुर्थाश्च विनिर्जिन्य नास्ति प्राणाः पृथग्विधः ॥

अहमेकं जगत्सर्वं सर्वदेहसमुद्भवम् ।
कर्मबन्धं भवेज्जीवः कर्ममुक्तिस्सदाशिवः ॥

Colophon :

इति श्रीसुबोधनीये अद्वैतसुधारसे शिवरामगीतायां सप्तमोऽध्यायः ॥

514

Sl. No. 38489 **शुकाष्टकम्** Ms. No. P. 2035/2

Beginning :

भेदाभेदौ सपदिगलितौ पुण्यपापे विशीर्णे,
मायामोहक्षयमधिगतौ नष्टसन्देहवृत्तिः ।

शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥ ७ ॥

End :

सत्यं सत्यं परमममृतं सर्वकल्याणरूपं
मायारण्ये दहनमलिने शान्तिनिर्वाणदीपम् ।

End:

तेजोरूपं निगमसदनं व्यासपुत्राष्टकं यः
प्रातः काले पठति मनसा याति निर्वाणमार्गम् ॥ १ ॥

Colophon :

— — —

522

Sl. No. 38505 शुकाष्टकव्याख्या Ms. No. C. 2530/10

Beginning :

आनन्दसिन्धुमजमक्षयमद्वितीयं
आत्मानमुच्यत शिवं स्वगुरुं प्रणम्य ।
कुर्वे समस्तजननिर्वृतिसौख्यसिद्धो
श्रीमच्छुकाष्टकसरोजविबोधभानुम् ॥ १ ॥

इह खल्वनेक × आत्मतत्त्वं उपदिशति भेदाभेदावित्यादिना ॥

End :

क्रमात् ज्ञानं प्राप्य निस्त्रैगुण्ये प्रागुक्तनिर्वाणमार्गे अवश्यं याति मुच्यते इत्यर्थः ॥ १ ॥

श्रीमच्छीताष्टकस्यायं व्याख्या बुद्धिसरोरुहम् ।
भानुप्रभेदभुवनं प्रबोधय सन्मतेः ॥ १ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्रामचन्द्रसरस्वतीपूज्यपादशिष्य-गङ्गाधरेन्द्रसरस्वत्याख्यभिक्षुणा कृतशुकाष्टकव्याख्यानं सम्पूर्णम् ॥

523

Sl. No. 38506 शेषार्यावृत्तिः Ms. No. P. 5779/11

Beginning :

परं परस्याः प्रकृतेरनादि-
मेकं विविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं
तमेव विष्णुं शरणं प्रपद्ये ॥

आत्माम्बुराशौ निखिलोऽपि लोकः
मग्नोऽपि वाचा मति नेक्षते च ।
आश्चर्यमेतन्मृगतृ ×
भवाम्बुराशौ रमते मृषैव ॥

End :

कर्मेन्द्रियाणि खलु पञ्च तथाऽपराणि
बुद्धीन्द्रियाणि मन आदि चतुष्टयञ्च ।
प्राणादिपञ्चकमथो वियदादि पञ्च
कामश्च कर्म च तमः पुनरष्टमीषु ॥

Colophon :

— — —

524

Sl. No. 38507 **श्वेताश्वतरव्याख्या** Ms. No. C. 1841/6

Beginning :

श्वेताश्वतरनामा यो यजुश्शाखाप्रवर्तकः ।
सोत्याश्रमिभ्यः प्रोवाच विद्यां व्याचक्ष्महेऽत्र ताम् ॥

ये देववादिनस्ते तु मीमांसन्ते मुमुक्षवः ।
जगतः कारणं ब्रह्मैत्येवं वेदेषु घुष्यते ॥

उत्पत्तिस्थितिनाशाः स्युर्यतस्तत्कारणं त्विति ।

End:

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यै ते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

अन्तः प्रविष्टः शास्तेति योऽन्तर्यामी श्रुतीरितः ।
सोऽस्मान् मुख्यगुरुः पातु विद्यातीर्थमहेश्वरः ॥

Colophon :

इति श्री अनुभूतिप्रकाशे श्री विद्यारण्यमुनिविरचिते श्वेताश्वतरविवरणं नाम द्वादशोऽध्यायः ॥

525

Sl. .No. 38508 **श्रवणमननिदिध्यासनप्रकरणम्** Ms. No. P. 2035/6

Beginning :

इदानीं श्रवणमनननिदिध्यासनस्वरूपं विचार्यते। तत्र समस्तवेदान्तानां षड्विधलिङ्गैः ब्रह्मस्वरूदात्मन्येव तारतम्यनिर्णयः + श्रवणं श्रवणान्तन्तरं श्रुतार्थस्यैकसख्यताचिन्तनम् ॥

End :

एवं संशयसम्भावनाविपरीतभावनादिकं × एतन्निराकृत्य श्रवणादिति ज्ञानमेव यः सम्पादयति स एव जीवन्मुक्त इति सर्ववेदान्तसिद्धान्त इति सर्वमवदातम् ॥

Colophon :

इति श्रवणमनननिदिध्यासनप्रकरणं समाप्तम् ॥

526

Sl. No. 38509 **श्रुतिगीताव्याख्या** Ms. No. P. 4068/2

Beginning :

सत्यज्ञानमनन्तं यत् केवलानन्दमद्वयम् ।
प्रत्यगेकरसं पूर्णं ब्रह्म तत् समुपास्महे ॥
प्र × ते श्रुतिगीताव्याख्या वाक्यार्थबोधिनी ॥

इह खलु परमेश्वरः स्वसृष्टं विश्वं सर्वं स्वात्मन्युपसंहृत्य स्व × नारायणं व्युत्थानसमये जगाद—

End :

ब्रह्मप्रतिपादकानां सर्वासामपि श्रुतीनां साक्षात् परम्परया च निर्विशेषे सद्घने चिद्घने आनन्दघने परे ब्रह्मण्येव पर्यवसितत्वं समन्वय इति सिद्धम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमदानन्दात्मसरस्वतीशिष्य श्री शङ्करानन्पसरस्वतीकृता श्रुतिगीताव्याख्या समाप्ता ॥

527

Sl. No. 38510 .. वेदान्तपदार्थसंग्रहः Ms. No. P. 4169

Beginning :

श्रीदेशिकेशममलं नत्वा शिष्यमुदावहम् ।
तात्पर्यनिर्णयं वक्ष्ये श्रतेः षड्विधलिङ्गतः ॥
उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

End :

तस्मात् षड्विधलिङ्गपर्यालोचनया श्रुतेर्यत्वाद्वितीये ब्रह्मणि तात्पर्यं तदेवा इमस्मीति संशयादिरहिततया मनुष्यत्वादि प्रत्ययवत् यस्तु श्रुतिस्मृतिदर्शित-साधनो जानाति स एव कृतार्थ इतरेषां देहिवज्जीववत् भासमानोऽपि सर्वकर्त व्यरहितस्सर्वप्रकारे ×

Colophon :

— — —

528

Sl. No. 38512 श्रुतिमतप्रकाशिका Ms. No. P. 4646

Beginning :

वासुदेवं परं ब्रह्म सच्चिदानन्दलक्षणम् ।
स्वशक्तियोगोपगतपूर्वरूपमुपास्महे ॥
शुद्धचिदेवाविद्याया आश्रयो विषयश्च सा ।
यं प्रत्यावरिकाविव्या × ज्ञानस्य विरोधिनी ॥

End :

इत्यादि श्रुतिशतसिद्धमसङ्गो
पुराणं यत्परमस्व रहस्यमागमानाम् ।
यत्सत्तावशत इदं ×
तद्वन्दे × × ॥
अविभक्तं विभक्तेषु विभक्तमिवच स्थितम् ।
अहं हरिः सर्वमिदं जनार्दने
× न यतोऽन्यदस्ति ।
प × कर्मभेदा-
द्विभिन्न × यथाप्यवेतम् ॥

End :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री ॥ ॥ छ ज्यपाद चरणानुग्रहलब्ध ब्रह्मविद्यावैशद्येन श्रीमद्ब्रह्मानन्दसरस्वतीसारस्वतसाम्राज्यानुभवसमेधमानयुक्ति × दिपक्षपक्ष × त्तिगिरिनिचयेन भट्टत्र्यम्ब × स्फुटीकृता श्रुतिमतप्रकाशिका ॥

529

Sl. No. 38514 **श्रुतिमतप्रकाशः** Ms. No. C. 4549

Beginning :

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥

ननु वेदान्तशास्त्रमनारम्भणीयम् । आश्रयानुपपत्या ज्ञानासम्भवेन ज्ञातस्य विषयस्य अज्ञानिनः अधिकारिणः असम्भवात् मैवम् ॥

End :

परमसाम्यं च अभेद एव । अन्यथा निरञ्जनः परमं उपैतीत्यनेन साम्यपदवैयर्थ्यात् । ब्रह्मभावबोधकश्रुत्यन्तरानुरोधाच्चेति शिवम् ॥

Colophon

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कर भगवत्पूज्यपादचरणानुग्रहलब्धब्रह्मविद्यावैशद्यस्य श्रीमद्ब्रह्मान्दसरस्वतीसारस्वत साम्राज्यानुभवसमेधमानयुक्तिशतधारोत्सारितप्रतिपक्षदक्षनिचयस्य भट्टत्र्यम्बकस्य कृतिषु श्रुतिमतप्रकाशः समाप्तः ॥

530

Sl No. 38515 **श्रुतिमतानुमानोपपत्तिः** Ms. No. C. 1253/2

Beginning ;

सत्यज्ञानानन्दलक्ष्मपरिच्छेदविवर्जितम् ।
अस्पृष्टानर्थमनिशमाश्रये नृहरेः पदम् ॥

विमतं मिथ्या दृश्यत्वाद्यदित्थं न तथा यथा सम्प्रतिपन्नं न च जगतो भावादाश्रयासिद्धः ॥

End

आवश्यकं परम्परासम्बधान्तरनिरासश्चान्यत्र प्रपञ्चित इति सर्वं चतुरस्रम् ॥

Colophon :

इति भट्टत्र्यंबककृतौ श्रुतिमतानुमानोपपत्तिः सम्पूर्णा ॥

531

Sl. No. 38516 श्रुतिमूलम् Ms. No. C. 815/1

Beginning :

स्वाध्यायोऽध्येतव्यः । तद्विजिज्ञासस्व । सोऽन्वेष्टव्यः । स विजिज्ञासितव्यः । आत्मा वा रे द्रष्टव्यः + श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । भूमा त्वेव विजिज्ञासितव्यः । एषोऽणुः आत्मा चेतसा वेदितव्यः ॥

End :

एतद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वान् उदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छति । अथ यो दक्षिणे प्रमीयते × तस्मात् ब्रह्मणो महिमानमित्युपनिषत् ॥

Colophon :

— —

532

Sl. No. 38517 श्रुतिमूलव्याख्या Ms. No. C. 815/2

Beginning :

श्रीवेङ्कटार्यप × ङ्घ्रमरन्दानन्दितात्मना ।
तत्पदान्तर्विचाराप्त तत्पदान्तावलम्बिना ॥
शिवपत्तनसन्तानजातेन श्रुतिवर्त्मना ।
सव्याख्यं श्रुतिमूलं वै सीतारामेण लिख्यते ॥

En :

तदूर्ध्वं सत्यज्ञानानन्तानन्दरूपस्य ब्रह्मणो महिमानं कैवल्यं प्राप्नोति । उपनिषदित्यनेन यथोक्तविद्यायाः तत्प्रतिपादकग्रन्थस्य च उपसंहारः क्रियते ॥ तदेवं × प्रमाणमिति वेदितव्यम् ॥

Colophon :

इति श्रुतिमूलव्याख्या समाप्ता ॥

533

Sl. No. 38518 तिसारसंग्रहः Ms. No. A. 268/1

Beginning :

विषयाकृतिसंस्थितिरेकविधा
मनसस्तु सदा व्यवहारविधौ ।
अहमित्यपि तद्विषयत्वपरा–
मतिवृत्तिरवज्वलितात्मचिता ॥

End :

भूः पादौ यस्य खञ्चोदरमसुरनिलश्चन्द्रसूर्यौ च नेत्रै
कर्णावाशा शिरो द्यौः मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः
चित्रंरंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नतोऽस्मि ॥

Colophon :

इति तोटकार्यविरचितं श्रुतिसारं सम्पूर्णम् ॥

534

Sl. No. 38520 श्रुतिसारसंग्रहव्याख्या Ms. No. P. 3622/b

Beginning :

विलसच्चितिबलतस्फुरदखिलस्वगतमसा
परिनिर्मितविपुलद्वयपीडितस्वकमहिमा ।
व्यवहारकवपुषा विधिवच × दिकविषयो
मम मानसनिलयो हरिरवताज्जगदखिलम् ॥
श्रीकृष्णं प्रत्यगात्मानं भक्त्या नत्वा गुरूनपि ।
टीकां × करिष्यामि तोटकश्लोकगामिनीम् ॥
तत्र त्रैलोक्यनाथहरिमित्यादिनाश्लोकेनेष्टदेवतागुरुनम ×
व्याजेन—

End :

× खगगोभोगिगन्धर्वदैत्यैर्भेदैश्चित्रन्नाना विश्वम् । × ति
येन रमते त × भुवनवपुषं ईशं नियन्तारं सहस्रशीर्षेत्यादि श्रुतिसिद्धं
विष्णुं मुहुर्मुहुर्नमामि ।

अतिमन्दमुमुक्षूणां तत्त्वयोगप्रसिद्धये ।
तोटक ोकटीकेयं रचिता तत्वदीपिका ॥

Colophon :

इति श्रीपूर्णात्मयोगीन्द्रशिष्येण चिदानन्दयोगिना विरचिता तत्वदीपिका तोटकश्लोकटीका समाप्ता ॥

535

Sl. No: 38521 **श्रुतिस्मृतिसारसङ्ग्रहः** Ms. No: B. 322

Beginning :

न वैराग्यात्परं भाग्यं न बोधादपरं सुखम् ।
न हरेरपरस्त्राता न संसारात्परो रिपुः ॥ १ ॥
कृष्णस्य चरणौ गुरोः श्रुतिपुराणमुख्योदितम्
प्रमाणमिहसम्मतं हृदि विचिन्त्य सङ्गृह्यते ॥

End :

सत्यबोधमुखपूर्णलक्षणं तत्वमर्थविभवं सनातनम् ।
मत्स्वरूपमशुभावहं शुभं भक्तिगम्यममलं सदा नुमः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छिवकाशीविश्वेश्वर मणिकर्णिकातीरस्थ श्रीजयकृष्णानन्द पादपद्माराधक श्री वेङ्कटकृष्णानन्द शिष्येण बालब्रह्मानन्दसूरिणा विरचिते श्रुतिस्मृतिसारसङ्ग्रहे उत्तरार्धं समाप्तम् ॥

536

Sl. No: 38522 **षड्विधलिङ्गप्रकरणम्** Ms. No. p. 2035/7

Beginning :

इदानीं श्रुतितात्पर्यनिर्णायकषड्विधलिङ्गस्वरूपं निरूप्यते—उपसंहाराभ्यासापूर्वफलार्थवादोपपत्तिभेदाल्लिङ्गं षड्विधम् ॥

End :

तथा च एतत्षड्विधलिङ्गैः श्रुतितात्पर्यं यस्तु निश्चिनोति तस्माद्—द्वितीयात्मतत्त्वज्ञानमव्याहतं भवतीति सर्वमुपपन्नम् ॥

Colophon :

इति षड्विधलिङ्गप्रकरणम् ॥

537

Sl. No. 38523 षोडशप्रकरणम् Ms. No. C. 444

Beginning :

परिपूर्णसच्चिदानन्दस्वरूप आत्माहमिति मां विना जगन्नास्मै ×
भूतत्वात् जगता मम स्पर्श एव नास्ति इति संशयभावनाविपरीतभावना न
सन्ति जानाति स एव मुक्तः स एव विद्वान् + इति शास्त्रसिद्धान्तः ॥

End :

पुरुषापराधविगमे तु पुनः प्रतिबन्धकव्युदसनात् सफला ।
मणिमन्त्रयोरवगमे तु यथा सति पावका सद्भवति धूमलता ॥

Colophon :

— — —

538

Sl. No. 38524 संक्षेपवेदान्तसारः Ms. No. C. 4693/26

Beginning :

नत्वा विश्वेश्वरं देवं भवान्या सहितं शिवम् ।
नीलकण्ठं चन्द्रमौलिं शम्भुं तस्य प्रसादतः ॥
विवेकिनश्च सुधियो मुमुक्षोर्मोक्षसिद्धये ।
वेदान्तसारः संक्षेपः क्रियतेऽयं यथामति ॥

End :

प्रारब्धं बलवच्छेष्ठं कदापि न विमुञ्चति ॥
आदेहपतनाद्भुक्त्वा फलं प्रारब्धकर्मजम् ।
देहपातोत्तरं सोपि विदेहमुक्तिमान्भवेत् ॥
ब्रह्मण्येव विलियेत पुनर्जन्म न विद्यते ॥
इति सङ्क्षेपवेदान्तसारः शिवप्रसादतः ।
यथामति कृतः सोऽयं सर्वमस्तु शिवार्पणम् ॥
श्री शिवाय गुरवे नमः ॥

Colophon

— — —

539

Sl. No. 38525 संक्षेपशारीरकम् Ms. No: P. 4617/1

Beginning :

× × निर्बन्धमात्राश्रया-
दन्योन्याध्यसने निरास्पदमिदं शून्यं जगत्स्यादिति ॥

अधिष्ठानमाधारमात्रं यदि स्यात्
प्रसज्येत सत्यं तदा चोद्यमेतत् ।
न चैतत्सकार्यस्य मोहस्य वस्तु-
न्यधिष्ठानगीर्गोचरे लोकसिद्धा ॥

End :

संक्षेपशारिरकमेवमेत-
त्कृतं परिव्राजकमुक्तिहेतुः ।
गुरुप्रसादात्परिलभ्य तत्त्वं
त्रयीशिरस्तत्त्वनिवेदनाय ॥

अविरळपदपङ्क्तिः पद्मनाभस्य पुण्या
चरणकमलधूलिग्राहिणी भारतीयम् ।
घनतरमुपघातं श्रेयसः श्रोतृसङ्घा-
त्सुरसरिदिव सद्यो मार्ष्टु माङ्गल्यहेतुः ॥ +

भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने
तुरङ्गमाङ्गमेदिने नमो रथाङ्गधारिणे ॥

Colophon : इति श्रीवेदेश्वरपूज्यभट्टारकशिष्य श्रीसर्वज्ञात्ममहामुनिविरचिते संक्षेप-
शारीरके फललक्षणश्चतुर्थोऽध्यायः ॥

540

Sl. No. 38526 संक्षेपशारीरकम् Ms. No. C. 488

Beginning

अमृतजडविरोधिरूपम
त्रयमलबन्धनदुःखताविरुद्धम् ।

अतिनिकटमविक्रियं मुरारेः
परमपदं प्रणमादभिष्टवीमि ॥
स्वाज्ञानकल्पितजगत्परमेश्वरत्व
जीवत्वभेदकलुषीकृतभूतभावा ।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥

End :

एवं वेदान्तवाक्यैरवगतिपदवीमद्वये नीयमाने
प्रत्यक्तत्वे समस्तद्वयकृति तमसि क्षीयमाणे च सद्यः ।
स्वाराज्यं स्वय्यनाप्ते परमसुखभुजि स्वच्छचैतन्यमाये
शेषौ मानान्तरायामपि दुरवगमस्तत्र दूरे विरोधः ॥

Colophon :

इति श्रीसर्वज्ञात्ममुनिविरचिते संक्षेपशारीरके अविरोधलक्षणोद्वितीयोऽध्यायः समाप्तः ॥

541

Sl. No. 38529 संक्षेपशारीरकव्याख्या Ms. No: P. 4617/2

Beginning:

यस्मादर्थचतुष्टयं त्रिजगतामव्याहतं वर्तते
पित्रोरद्य कुटुम्बिनोः सुदयितालोक्य या सन्ततिः ।
युद्धे त्रैपुर एव × विदितं स्वातन्त्र्यमव्याहतं
श्रीमद्धोण्ढिविनायकः स दिशताद्दिव्यान्यदृष्टानि नः ॥
श्रीमच्छारीरकार्थाविष्करणाय ग्रन्थमारिप्सुराचार्यः इष्टदेवतातत्त्वानुस्मरणं +

End :

मानान्तरनैरपेक्षेण सिद्धं प्रामाण्यनिध्यर्थैन्याय उक्त इति प्रथमपदार्थः + तत्राद्वितीयप्रत्यग्विषयविज्ञानं वाक्यस्वारस्योत्थानि सामान्यतो दृष्टनिबन्धनानीति निर्णयः समन्वयनिरूपणफलमित्यर्थः ॥

इत्यानन्दवेदशिष्य विश्ववेदविरचिते संक्षेपशारीरकव्याख्याने × दीपे प्रथमोऽध्यायः ॥

542

Sl. No. 38530 संक्षेपशारीरकव्याख्या Ms. No. C. 489

Beginning:

सत्यं ज्ञानमनन्तमद्वयसुखं यद्ब्रह्म नत्वा गुरुं
मत्वा लब्धसमाधिभिर्मुनिवरैर्मोक्षाय साक्षात्कृतम् ।
जातं नन्दतपोबलात्तदखिलानन्दाय वृन्दावने
वेणुं वादयदिन्दुसुन्दरमुखं वन्देऽरविन्देक्षणम् ॥

× तत्र श्रीमच्छारीरकशास्त्रस्य × मुमुक्षुबोधाय संक्षेपशारीर–कारव्येन श्लोकग्रन्थेनाविश्वकारवरुणया श्रीसर्वज्ञात्माचार्यः ।

End:

क्षीयमाणे चेत्यादिना ज्ञानमाचात् परितृप्तानामुपपादितामनुवदति विचारदशायामपि वेदान्तानां न मानान्तरविरोधः सम्भावितस्तदा किमु वक्तव्यं अवगतत्व इत्याशयेनाह—लेश इति । लेशोऽपि इत्यर्थः ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्री विश्वेश्वरसरस्वतीश्रीपादशिष्य श्रीमधुसूदनसरस्वती श्रीपादकृत संक्षेपशारीरकव्याख्यानरूप सारसङ्ग्रहाख्य टीकायां द्वितीयोऽध्यायः ।

543

Sl. No. 38531 सञ्चितादिप्रकरणम् Ms. No. B. 2035/19

Beginning:

इदानीं सञ्चितागामिप्रारब्धस्तन्नाशश्च दृष्टान्तपूर्वकं निरूप्यते । तथा हि—

एकस्य ब्राह्मणस्य दश क्षेत्राणि सन्ति । तादृशक्षेत्राणां व्यवसायः स्वैनैव कृतश्चेत्प्रति संवत्सरमेकैकस्य + धनं गृह्णाम इति स्थितः ॥

End:

एतस्मिन्नर्थे शमन्तिवचनानि—

प्रारब्धं भोगतो नश्येत् तत्त्वज्ञानेन सञ्चितम् ।
आगामिद्वितयं क × एव प्रियवादिनः ॥

एवं सञ्चितादिकं विचार्य एतद्भावमहङ्कारस्यैव न तु साक्षिणो मम इति यो जानाति स एव जीवन्मुक्त इति सर्ववेदान्तराद्धान्त इति सर्वं व्यक्तम् ॥

Colophon :

इति सञ्चितादिप्रकरणं समाप्तम् ॥

544

Sl. No. 38534 | सत्तासामान्यविवेकः | Ms. No. A. 533/7

Beginning :

स्वाज्ञारोपातद्ग्रसन वेदमस्तकमाननः ।
निर्विशेषतया सिद्धरामानन्दार्णवोऽस्म्यहम् ॥
नत्वाश्रीदेशिकं सद्यो मुक्तिसाम्राज्यमिच्छताम् ।
तद्रूपसत्तासामान्यावाप्तिसाधनमुच्यते ॥

End :

परमाद्वैत पक्षे तु शास्त्रज्ञानसमं मुनिः ।
विकलेबरकैवल्यमाप्नोतीति निरङ्कुशम् ॥
श्रीवासु × ना ॥
सत्तासाम्यविवेकीयग्रन्थःस्यातसप्तसप्ततिः ॥

Colophon :

इति सत्तासाम्यविवेकः समाप्तः ॥

545

Sl. No. 38535 | सत्तासामान्यविवेकविवरणम् | Ms. No. .A 533/8

Beginning :

यद्ज्ञानाप्तिसमकालं निरस्य स्वेतरभ्रमम् ।
सत्तासामान्यतां यामि तं श्रीरामाक्षरं भजे ॥
नत्व श्रीदेशिकं सत्तासामान्यावाप्तिमिच्छताम् ।
सत्तासामान्यविवेकव्याख्येयं संप्रणीयते ॥
इह खलु लीलया स्वांशजप्राणिपटल + प्रतिजानीते स्वाज्ञेतिद्वाभ्याम् ॥

End :

युगपत् कर्मत्रयभावाभावपह्नवसिद्धत्वात् परमाद्वैतपक्षस्य । तत्र तु शास्त्रज्ञानसमकालं मुनिः विद्वान् × तत्त्वमाह श्रीवासुदेवेति । ग्रन्थ-संख्यां विशदयति—सत्तेति ॥

Colophon:

इति श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिविरचितं सत्तासाम्यविवेकविवरणं समाप्तम् ॥

546

Sl. No. 38462 **सदाहारप्रकरणम्** Ms. No. A. 2219

Beginning;

सच्चिदानन्दकन्दाय जगदङ्कुरहेतवे ।
सदोदित य पूर्णाय नमोऽनन्ताय विष्णवे ॥
सर्ववेदान्तसिद्धान्तैः ग तं निर्मलं शिवम् ।
सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥

End:

संन्यासी यो गृहातीतिः शरीरं गृहमुच्यते ।
गुणाः कुर्वन्ति कर्माणि नाहं कर्तेति बुद्धवान् ॥
सदाचारमिमं नित्यं येऽनुसन्दधते बुधाः ।
संसारसागराच्छीघ्रं मुच्यन्ते नात्र संशयः ॥

Colophon.

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्भगवत्पादपूज्य श्रीमच्छङ्करा-चार्यविरचितं सदाचार प्रकरणं समाप्तम् ॥

547

Sl. No. 38538 **सदाचारानुसन्धानम्** Ms. No. P. 7894/1

Beginning :

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिः त्यज्यताम् ।
पापौघःपरिभूयता भवसुखे दोषोऽनुसन्धीयतां
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥

End :

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चितिबलात् × त्तरैः श्लिष्यतां
प्रारब्धं भुवि भुज्यतां अथ परब्रह्मात्मना स्थीयताम् ॥

Colophon :

— — —

548

Sl. No. 38542 सनत्सुजातीयभाष्यम् Ms. No. P. 1567

Beginning :

नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे ।
निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥

सनत्सुजातीयविवरणं संक्षेपतो ब्रह्मजिज्ञासूनां सुखावबोधनायारभ्यते । स्वतश्चिदानन्दाद्वितीयस्वरूपोऽप्यात्मा —

End :

तत्रैते श्लोका भवन्ति—नित्यशुद्धबुद्धमुक्ताभावमीश्वरमात्मना भावयन् षडिन्द्रियाणि संनियस्य निश्चलः अस्ति वस्तु चिद्घनं जगत्प्रसूतिकारणं ननश्वरं च तं ततस्तमो नुदंचयत् ॥

Colophon :

इति सनत्सुजातीयविवरणे शङ्करभगवत्पादकृते चतुर्थोऽध्यायः ॥

549

Sl. No. 38544 सनत्सुजातीयभाष्यम् Ms. No. P. 5380

Beginning :

श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवत्पादविरचित सनत्सुजातपर्वणि वैशम्पायनः ततोराजा धृतराष्ट्रो मनीषीभाष्यम् । ततः सनत्सुजातं प्रति विदुरेण अविद्याकल्पित संसारनिवृत्यर्थं तस्मै धृन × सम्पूज्य वाक्यं विदुरेरितम् ।

End :

पितरं अर्थात् द्विपादादीनां जरायुजादीनां च सर्वभूतेषु सर्वदेहेषु पुष्पके हृदयपुण्डरीके निहितं स्थितं विदुः ब्राह्मणा जानन्ति एवंगुणविशिष्टं प्रत्यगात्मानं हृदये विचिन्तनीन सक्षात्कृत्यकृतकृत्या भवतीत्यर्थः ॥

Colophon :

इति श्रीमच्छङ्करभगवत्पादविरचिते सनत्सुजातपर्वभाष्ये पञ्चचत्वारिंशोऽध्यायः ॥

550

Sl. No. 38547 **सन्ध्यापञ्चीकरणम्** Ms. No. C. 1136

Beginning :

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
ओं मं मण्डूकाय नमः । ओं कं कालाग्निरुद्राय नमः । ओं कं कूर्माय नमः । ओं आं आधारशक्त्यै नमः । ओं आं अनन्ताय नमः।

End :

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्मास्म्यहमव्ययम् ॥
ब्रह्मैवाहं न संसरी न चाहं ब्रह्मणः पृथक् ।
नाहं देहो न मे देहः केवलोऽयं सनातनः ॥
एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेति श्रुतेः ॥

Colophon :

इति श्रीमच्छंकराचार्यविरचितं सन्ध्यापञ्चीकरणं महावाक्यार्थश्च सम्पूर्णमभूत् ॥

यस्य प्रसादादहमेव विष्णु-
र्मय्येव सर्वं परिकिल्पितं च ।
इत्थं विजानामि सदात्मरूपं
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

551

Sl. No. 38550 **सप्तदशप्रकरणम्** Ms. No. A. 803

Beginning

सप्तदशप्रकरणस्य सम्प्रदायार्थमाह आत्मनः बन्धो मोक्षो वा नास्ति । अनामकनिरालम्बं स्वीयचिच्छक्त्या स्वास्मिन्नीश्वरत्वमारोप्य अनिर्वचनीयमायया

जगत्पाञ्चभौतिकं सृष्ट्वा रज्जुसर्पवत् ततः स्वात्मनि 'अनेन जीवेनात्म-नानुप्रविश्य नामरूपे व्याकरवाणी'तिश्रुत्या चित्तसादात्म्यात् जीवभावहाव-मारोप्य दुष्कृतं चेन्नरप्राप्तिः सुकृतं चेत्स्वर्गमोक्षौ कल्पयित्वा लीलार्थे करोति ।

End :

अनन्तशास्त्रव्याख्यानेष्वितो नास्त्यधिकं परमित्येतावत्पर्यन्तश्लोकद्वयेनास्य ग्रन्थस्य तात्पर्यं सङ्ग्रहेणोक्तमित्यर्थः ॥

श्रीशृङ्गेरिपुरे वासी कृष्णशास्त्रीति विश्रुतः ।
पूर्वार्धमस्य ग्रन्थस्य व्याख्यानं च चकार सः ॥

विद्वज्जनानां निकटे गत्वा श्रुत्वा कृतं मया ।
व्याख्यानमस्य ग्रन्थस्याप्य × पीश्वरेच्छया ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीरामभद्रतीर्थपादशिष्य × सदाशिवानन्दपादशिष्य महेश्वरानन्दविरचितं सकलवेदशास्त्र × परमार्थ निरूपणं नाम सप्तदशं प्रकरणं समाप्तम् ॥

प्रमादा प्रमादाद्वा यदज्ञानान्मयेरितम् ।
कश्चिदत्याश्रमी भूत्वा काश्यां मुक्तिरपित्यजन् ॥ (?)

552

Sl. No. 38551 — सप्तदशप्रकरणम् — Ms. No. A. 808/1

Beginning :

यत्कटाक्षात्सुधासिन्धौ सज्जता पुण्यपाकतः ।
मया ज्ञानमणिर्लब्धस्तमानन्दगुरुं भजे ॥

कालक्षयार्थं सिद्धानां यतीनां ध्यानमङ्गलम् ।
श्रवणार्थं मुमुक्षूणां वाणी वदति मां विना ॥

नित्यमुक्तः सदैवास्मीत्येवं चेन्न भवेन्मतिः ।
किमर्थं श्रावयत्येषा मातृवत् श्रुतिरादृता ॥

End :

सर्वबन्धविमुक्तोऽपि वेदान्तार्थविलो ।
चातुर्मास्यमहापाशादात्मनिष्ठोऽपि बध्यते ॥
विरिञ्चादिभिराम्नात स्वानुभूतिरसार्णवे ।
मज्जता स्वप्रकाशाख्यमणिर्लब्धा मया शुभा ॥

Colophon

श्रीपरमहंसपरिव्राजकाचार्य श्रीरामभद्रतीर्थपादपूज्यपादशिष्य × सदाशिवानन्दपूज्यपादशिष्यमहेश्वरानन्दविरचितं सकलवेदशास्त्र × परमार्थनिरूपणं नाम सप्तदशं प्रकरणं समाप्तम् ॥

553

Sl. No. 38552 सप्तप्रकरणम् Ms. No. B. 275/7

Beginning;

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वदासाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

End :

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

Colopnon :

सप्तप्रकरणं सम्पूर्णम् ॥

554

Sl. No. 38554 समाधिदीपिका Ms. No. C. 2558/

Beginning :

समाधिदीपिका चेयं यथामति निरूप्यते ।
इह खलु सन्धिं समाधावात्मान्यं चरेत् ।
अस्यार्थः आत्मविषयकसमाधौ सन्धिं छिद्ररूपं ब्रह्मात्मनोर्भेदमाचरेत् भक्षयेत् । निवारयेदित्यर्थः ।

End :

एष ह्येवसाधुकारयतीत्यादिश्रुतेः भगवत्प्रेरितत्वं मन्तव्यम् ।

समाधिदीपिका भृङ्गी सेवाव्याजं समाश्रिता ।
प्राप्ताभूत्कृष्णपादाब्जं प्रसिद्धानन्दवाञ्छया ॥

प्रसिद्धानन्दयोर्वाञ्छया श्रीकृष्णपादाब्जयुगं प्रापेत्यर्थः । इदं प्रकरणं पञ्चशतीसंख्याकमिति वेदितव्यम् ॥

Colophon :

श्रीमत्परमहंसपरिव्राजकाचार्याद्वितीयनन्दसरस्वतीशिष्य पूर्णप्रकाशानन्द सरस्वती विरचिता समाधिदीपिका ॥

555

Sl. No. 38555 समाधिलक्षणम् Ms. No. B. 278/6

Beginning :

देवत्रिमूर्तिजीवेशकूटस्थं ब्रह्म लौकिकम् ।
सकलं चैकमेवेति स्वाश्रितानां प्रदर्शने ॥

End :

अभ्यासिनां तु सुलभो मोक्षप्रापक ईरितः ।
समाधेरल्पग्रन्थेन कथितो रङ्गसूरिणा ॥

Colophon :

— — —

556

Sl. No. 38556 सर्वंनास्तिप्रकरणम् Ms. No. P. 3902/13

Beginnig :

कदाचिच्छङ्करः पुत्रं कुमारमुपतिष्ठवान् ।
तदेव तव वक्ष्यामि सावधानमनाः शृणु ॥
इदं प्रपञ्चं नास्त्येव नोत्पन्नं नो स्थितं क्वचित् ।
चित्तप्रपञ्चमित्याहं नास्तिनास्त्येव सर्वदा ॥

End :

भ्रान्तिरभ्रान्तिनास्त्येव सर्वं नास्तीति निश्चिनु ।

केवलं ब्रह्ममात्रत्वात् नास्ति नास्त्येव सर्वदा ॥

एतत्प्रकरणं सर्वं नास्ति नास्त्येव सर्वदा ।

यः शृणोति सकृद्वाऽपि ब्रह्मैव भवति स्वयम् ॥

Colophon :

इति सर्वं नास्तिप्रकरणं समाप्तम् ॥

557

Sl. No. 38557 सर्ववेदान्तसारसंग्रहः Ms. No. P. 2035/29

Beginning :

प्रणम्य परमात्मानमादिशेष × णा ।

क्रियते सर्ववेदान्तसारसङ्ग्रहनामकः ॥

अव–अज्ञानावरणविक्षेपपरीक्षानर्थनिवृत्यानन्दावाप्तिभेदात् सप्तावस्थाः ॥

End :

ओं अतलपातालसुतलातलरसातलमहातलपातालाः सप्ताधोकलोकाः ।

भूलोक— ॥

Colophon :

— — —

558

Sl. No. 38558 सर्ववेदान्तसारसंग्रहः Ms. No. B. 543

Beginning :

श्रीकृष्णं परमानन्दं जगज्जन्मादिकारणम् ।

सत्यज्ञानानन्तरूपं प्रणमामि जगद्गुरुम् ॥

अस्मिन् लोके तापत्रयार्कसन्तप्ताः जननमरणप्रवाहरूपे संसारे पतिताः तन्निवृत्युपायमजानन्तः + आत्मानात्मविवेकरूपं सर्ववेदान्तसारसंग्रहं कथयिष्यामः ।

End:

तस्य प्राणोत्क्रमणाश्रवणात् प्राणे ब्रह्मणि लीने सति स्वयं केवलात्मनाकाशवत्तिष्ठतीत्यर्थः ॥ विदेहकैवल्यसिद्धिर्नातः प्रतिपाद्यमस्ति ॥ सर्वमनवद्यम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचर्यश्रीसच्चिदानन्देन्द्रस्वामिना विरचितः सर्ववेदान्तसारसङ्ग्रहस्समाप्तः ॥

559

Sl. No. 3 8559 सर्वसिद्धान्तसारसंग्रहः Ms. No. B. 278/17

Beginning:

अखण्डानन्दसम्बोधो वन्दनाद्यस्य जायते ।
गोविन्दं तमहं वन्दे चिदानन्दतनुं गुरुम् ॥
अखण्डं सच्चिदानान्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

Edd:

सर्ववेदान्तसिद्धान्तसारसङ्ग्रहनामकः ।
ग्रन्थोऽयं हृदयग्रन्थिविच्छित्यै × तः सताम् ॥
श्रीमद्भिर्भगवत्पादै × दत्यायं मुमुक्षुभिः ।
श्रोतव्यो दर्शनीयश्च पठनीयश्च सर्वदा ॥

Colophon

सम्पूर्णः ॥

560

Sl. No. 38560 सर्वोपनिषत्समाधिवाक्यम् Ms. No. P. 4106/7

Beginning:

जीवात्मपरमात्मनोरेकत्वज्ञानेन तयोर्भेद एव विभग्नः । सा सन्ध्या । जीवात्मपरमात्मैक्यावस्थात्रिपुटिरहिता परमानन्दस्वरूपा शुद्धचैतन्यात्मिका समाधिः ।

End:

अतद्व्यावृत्तिशून्योऽसौ समाधिर्मुनिभावितः ।
ऊर्ध्वपूर्णमधः पूर्णं मध्यपूर्णं शिवात्मकम् ॥
साक्षाद्विधिमुखो ह्येषसमाधिः पारमार्थिकः ।
सार्धान्तिकवाक्याद्वा × विसित् ॥

Colophon: — — —

561

Sl. No. 38561 सर्वोपनिषत्सारमञ्जरी Ms. No. B. 624

Beginning

श्रीमन्महायोगपीठे संस्थितं तत्त्वदर्शितम् ।
सदानन्दगुरुं वन्दे ज्ञानमार्गसुबोधकम् ॥
सोमसूर्याग्निमध्यस्थं महातेजोविराजितम् ।
योगीश्वरैर्ध्यानगम्यं तत्त्वमूर्तिं भजाम्यहम् ॥
अव्यक्तव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥
कदाचिन्नैमिशारण्ये शौनकाद्या महर्षयः ।
सूतं प्रसि सदा सम्यङ्मृदुवाक्यैर्महात्मकाः ॥

ऋषयः—

सूत सूत महाभाग कर्मयज्ञान्यनेकशः ।
नानधर्मपुराणेषु त्वया चोक्ता मुनीश्वर ॥

End:

इत्येवं बोधयामास तं शृणु द्विजसत्तमम् ।
सोऽपि विप्रतपस्वीयं गुरुं नत्वा तदाज्ञया ॥
गृहं गत्वा सद्गुरूक्तमार्गेण ध्यानमास्थितः ।
ततो गुरुस्स त्वरया मुदान्वितो
महानुभावोत्तरतश्च तत्क्षणात् ।

तदादिमध्यान्तमिदं ह्युदीरितं
मयापि सर्वं शृणु दर्शितः खलु ॥

Colophon :

हरिः ओं तत्सदिति श्रीमत्सर्वोपनिषत्सारब्रह्मविद्यायां मोक्षशास्त्रे राज-
योगप्रकरणे गुरुस्तुतिलक्षणं नाम चतुस्त्रिंशोध्यायः । समाप्तश्चायं ग्रन्थः ॥

562

Sl. No. 38562 | साधनचतुष्टयम् | Ms. No. P. 6244

Beginning :

आत्मनः किंनिमित्तं दुःखम् । शरीरपरिग्रहनिमित्तम् । शरिरपरि
ग्रहः केन वा भवतीति चेत् । कर्मणा । कर्म केन वा भवति ।
रागादिभ्यः । रागादि केन । अभिमानात् । अभिमानोऽपि केन ।

End :

परोक्षब्रह्मविज्ञानं शाब्दं देशिकपूर्वकम् ।
बुद्धिपूर्वं कृतं पापं कृत्स्नं दहति वह्निवत् ॥
अपरोक्षात्मवि × देशिकपूर्वकम् ।
संसारकारणाज्ञान तमसश्चण्डभास्करः ॥

Colophon :

इति भगवत्पादकृतं साधनचतुष्टयं समाप्तम् ॥

563

Sl. No. 38566 | साधनचतुष्टयम् | Ms. No. P. 1830/1

Beginning ;

अङ्कुरितबोधमुद्रिकमपसव्योरूपरिस्थसव्यपादम् ।
वस्त्वेकमनुसरामो धरभूरुहमूलवास्तव्यम् ॥ १ ॥
वदन × दधोविभागव्यञ्जितमातङ्गमानवाभेदम् ।
मदनारिभागधेयं महिमानं वयमुपास्महे कमपि ॥ २ ॥

End :

नानाजीवमतेऽपि प्रतिबिम्बेशानदर्शने तस्याः ।
प्रतिबिम्बान्तरभावायोगात् बिम्बात्मना परिशेषः ॥
बिम्बे श्वरवादे × श्वरता प्राप्तिविमुक्तस्य ।
आसर्वविमुक्तयमुष्मिन् बिम्बत्वापह्नवायोगात् ॥
परमार्थतस्तु मुक्तस्सर्वेशत्वादिधर्मनिर्मुक्तम् ।
विगलितसकलविकल्पं विमलं ब्रह्मैव केवलं भवति ॥

Colophon :

इत्थं परमशिवेन्द्रानुग्रहभाजनसदाशिवेन्द्रकृतौ सिद्धान्तकल्पवल्ल्यां तुरीयः स्तबकश्च पूर्णः ॥

564

Sl. No. 38567 सिद्धान्तकल्पवल्लिव्याख्या Ms. No. P. 1830/2

Beginning :

स्वाज्ञानेन विवर्तते त्रिभुवनाकारेण यस्सर्वतः
स्वस्मै यः स्वयमेव चोपदिशति स्वं शिष्यगुर्वात्मना ।
स्वाज्ञानेन ययोः द्वितीयसुखसद्बोधात्मना शिष्यते
तस्मै विस्मयनीयशक्तिनिधये कस्मैचिदस्मै नमः ॥

सिद्धान्तलेशसङ्ग्रहाख्यग्रन्थे वर्णितानां मतानां सुखेनावधारणार्थं चिकीर्षितस्य सिद्धान्तकल्पवल्ल्याख्यस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय _ + मङ्गलं ग्रन्थतो निबध्नाति अंकुरिता–सञ्जाता +

End :

संसारदशायामानन्दो नास्ति न भातीति व्यवहारात् आचरणप्रयुक्ता काचित् तस्याप्राप्तिस्य विद्यायावरनि × तत्प्रयुक्ताप्राप्तिन्निवर्तित इति । अप्राप्तिः प्राप्तिश्च मुख्यैमेवेति मतान्तरमाह—

Colophon : —

565

Sl. No. 38568 सिद्धान्ततत्वम् Ms. No. P. 3611

Beginning :

सर्ववेदान्तसिद्धान्तसम्प्रदायानुसारतः ।
नामस्कृत्य गुरून् बक्ष्ये प्रक्रियां तत्त्वसंश्रयाम् ॥
यत् श्रीमद्रामतीर्थेभ्यः सम्प्रदायसमागतम् ।
श्रुतं सत् तर्कसचिवं विविच्य कथयाम्यहम् ॥

End :

ज्ञानानन्दाखण्डाद्वितीयं वस्तुमात्रं अवशिष्यते, नान्यदिति सर्वमवदातम् ॥

इत्येषा × धीपूजा श्रीमद्गोपालपादयोः ।
अर्पिता तेन मे देवः प्रीयतां परमेश्वरः ॥

Colophon :

इति श्रीमदापदेवसूनुना अनन्तदेवेन कृतं सिद्धान्ततत्त्वं नाम प्रकरणं समाप्तम् ॥

566

Sl. No. 34569 सिद्धान्तत्रयोदशी Ms. No. C. 3168

Beginning :

विश्वनाथमभिवन्द्य सादरं
स्वानुभूतिविशदान्त्विमामहम् ।
विश्वनाथकरुणासवाग्मितां
विश्वभीतिहरणाय योजये ॥

End :

यत्पश्येयं न तु दृशिपथे
वस्तु साक्षात्कृतिस्सा ।
नो मे कृत्यं जगति न तथा
प्राप्यमप्यस्ति किञ्चित् ॥

अस्यां हि सर्वसिद्धान्तत्रयोपश्यान्तु ये नराः ।
प्रस्थानं कुर्वते तेषांब्रह्मसिद्धिः करे स्थिता ॥

Colophon :

इमां मोक्षाध्वनीनेभ्यो दैवज्ञकुलसत्कृतः ।
वामनोदास्प्रयाणार्थं सुसिद्धान्तत्रयोदशीम् ॥

567

Sl. No. 38571 सिद्धान्तरत्नमाला Ms. No. P. 791/1

Beginning :

हिरण्यगर्भं प्रथमं विधाय यः
श्रुतीश्च तस्मै प्रजिघाय सर्वतः ।
तमादिदेवं मनआदिसाक्षिणं
मुमुक्षुगम्यं शरणं भजामहे ॥

End :

मामेवेतीन्द्रवचनं आत्मसम्बन्धभूमतः ।
शास्त्रदृष्ट्या सम्भवति वामदेववचो यथा ॥
जीवमुख्यप्राणलिङ्गे भवेतामौपचारिके ।
अन्यथोपासनात्रित्वमेकवाक्ये प्रसज्यते ॥

Colophon

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्परमशिवेन्द्रसरस्वतीपादाब्ज-सेवापरायणेन विश्वनाथविदुषा विरचितायां सिद्धान्तरत्नमालायां व्याख्यान-प्रकाशसहितायां प्रथमाध्यायस्य प्रथमः पादः ॥ +

आद्ये पादे स्पष्टब्रह्मलिङ्गानां × उत्तरत्रोक्तानां सत्य ॥ (?)

568

Sl. No. 34572 सिद्धान्तरत्नमालव्याख्या Ms. No. P. 791/2

Beginning :

यो ब्रह्माणं विधायादौ प्रादात्तस्मै तथा श्रुतीः ।
तं सर्वसाक्षिणं (वन्दे) देवं मुमुक्षुशरणं भजे ॥

नमामि × × सुधीव्रजम् ॥
सूत्रभाष्यकृतौ नत्वा तद्व्याख्यानकृतस्तथा ।
सिद्धान्तान् ग्रथितान् पद्यैः व्याख्यानेन प्रकाशये ॥

End :

अन्यथा एकस्मिन् वाक्ये उपासनात्रयं प्रसज्यते । तथा सति वाक्यभेदः स्यादित्यर्थः । सूत्रं, जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रै विध्यादाश्रितत्वादिह तद्योगादिति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य × विश्वनाथविदुषा विरचितायां सिद्धान्तरत्नमालायां व्याख्यानप्रकाशसहितायां प्रथमाध्यायस्य प्रथमः पादः ॥

569

Sl. No. 38574 सिद्धान्तरत्नमालाव्याख्या Ms. No. P. 2001

Beginning :

आद्ये पादे स्पष्टब्रह्मलिङ्गानां × उत्तरत्र चोक्तानां सत्य × ॥
अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान् सम्प्राप्य शौरिपदोद्गता ।
जयति भगवत्पाद श्रीमन्मुखाम्बुजनिर्गता
जननहरिणी सूक्तिः × ब्रह्माद्वयैकपरायणा ॥
+ तेषूपपादकापेक्षान् पक्षान् प्रायो यथामति ।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरम् ॥

End:

मुक्तजीवानां यावत्सर्वमुक्ति चैतन्यमात्रत्वाविरोधिबद्धपुरुषाद्यविद्याकृत-निरवग्रहैश्वर्य तदनुगुणकलापविशिष्टनिरतिशयानन्दस्फुरणसमृद्धं निस्सन्धि-बन्धपरमेश्वरभावापत्तिरादर्तव्येति सिद्धम् ॥

Colophon :

इति शास्त्रसिद्धान्तलेशसङ्ग्रहे चतुर्थपरिच्छेदः ॥

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पदीक्षितकृतीप्रथितस्तनूजः ॥
तन्त्राण्यधीत्य सकलानि स तातपाद-
व्याख्यानकौशलकलाविशदीकृतानि ।
× मनुरुध्य च सम्प्रदायं
सिद्धान्तभेदलवसङ्ग्रहमित्यकार्षीत् ॥

570

Sl. No. 38582 सिद्धान्तलेशसंग्रहव्याख्या Ms. No. B. 121

Beginning;

× त्मनः कारणतायाः निरसिष्यमाणत्वात् न द्वितीयः तस्या अपि वृत्तेः संस्काराधानाय द्वोभरवृत्यन्तोपगमेनैवानवस्था प्राप्नोति तस्मात् ज्ञानरूपासु घटादिवत्तिषु ज्ञानभिन्नासु दुःखादिरूपवृत्तिषु च कथं संस्काराधानमित्या-शङ्क्याह एवं चेति ॥

End:

कुतस्तस्य विद्यया अघनाशादेः श्रुतिस्मृतिषु व्यपदेशात् श्रुत्यादि सिद्धत्वादित्यर्थः । मुक्तस्येश्वरभावापत्तिमुपपादितामुपसंहरति तस्मादिति ॥ उदाहृतश्रुतिसूत्रभाष्यादिस्वारस्यादित्यर्थः । अविरोधित्वमैश्वर्यविशेषणम् । तदनुगुणेति ऐश्वर्यानुगुणेत्यर्थः । समृद्धत्वमीश्वरभावाप्तिविशेषणमिति ॥

Colophon.

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्स्ववर्यप्रकाशानन्दसरस्वती दिव्यश्रीचरणारविन्दसंलग्न रजोभूतस्याच्युतकृष्णानन्दतीर्थस्य कृतौ शास्त्र सिद्धान्तलेशसङ्ग्रहव्याख्यायां कृष्णालङ्काराख्यायां चतुर्थः परिच्छेदःसमाप्तः॥

571

Sl. No. 38583 सिद्धान्तलेशसंग्रहव्याख्या Ms. No. .P 8690/5

Beginning :

यस्य प्रसादेन भवन्ति लोका-
पश्चर्यशास्त्रार्थ परात्मसिद्धाः ।

तस्मै नमो विश्वहिते रताय
विघ्नेश्वरायाखिललोककर्त्रे ॥

+ परमकारुणिको अद्वैतविद्याचार्यः सर्वतन्त्रस्वतन्त्रः भगवान् श्रीमान
प्पयदीक्षितो वेदान्तसिद्धान्तलेशसंग्रहभिधानं प्रकरणं चिकीर्षुः प्रारीप्सित—

End :

ननु अपरोक्षज्ञानत्वेन ज्ञाननिर्वर्तकत्वमुतापरोक्षवृत्तिज्ञानत्वेन ।
आद्ये अविद्यान्तःकरणतद्धर्मानुभवस्य ज्ञानानिवर्तकत्वाभ्युपगमविरोधः ।
द्वितीयमंगीकारेण ×

Colophon :

— — —

572

Sl. No. 38586 सिद्धान्तसिद्धाञ्जनम् Ms. No. P. 3440

Beginning :

× × सीमादिनगुरुः—
विचेयो योगेनानिदमुदयवाचामवधिषु ।
प्रकाशानन्दात्मा परिमुषितनिश्शेषकलुषः
त्रिभेदातीतो × साक्षी विजयते ॥

× के सा कृतस्मितविभ्रमाणि × इह खलु तावदतीतानेक
× परंपरासमर्जित—

End :

यथावर्णितमेवाधिकरणशरीरं शुद्धमिति सिद्धम् ॥
वाचालयति यः × समीक्षताम् ॥
सन्तो ये गुणयन्ति × व्यतिकरम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीभगवद्रामभद्रानन्दसरस्वती-
विरचिते सिद्धान्तद्धाञ्जने जिज्ञासासूत्रविवरणलिपिः प्रथमा ॥

573

Sl. No. 3 8587 | सिद्धान्तसिद्धाञ्जनम् | Ms. No. P. 4055

Beginning:

जगज्जन्मस्थेमाप्ययनियमसीमादिमगुरुः
विचेयो योगेनानिदमुदयवाचामवधिषु ।
प्रकाशानन्दात्मा परम × निश्शेषकलुषः
त्रिभेदातीतो × नटनसा × विजयते ॥ +

येन ज्ञानदृगञ्चिता न रजसा सङ्क्षुभ्य सङ्क्षिप्यते
शश्वत्पा × ति शान्तसन्ततमःप्रत्यूहमन्तर्हितम् ।
तृष्णादूषि कथा न दुष्यति न वा निद्राति त × दृशं
कृष्णानन्दसरस्वती वितनुते सिद्धान्तसिद्धाञ्जनम् ॥ ×

+ इह खलु तावदतीतानेकभवपरम्परासमार्जितसुकृतसम्पद्विवर्धित-भगवदनुग्रहासादितसत्वप्रसादतया + तत एव तदुपायमात्मतत्वज्ञान-मधिगत्य जिज्ञासते ।

End:

नचैवमरुणाधिकरणपूर्वपक्षासम्भवः अरुणशब्दस्यापि द्रव्यवृत्तितया पिङ्गाक्ष्यादेरविशेषादिति शङ्क्यम् । परमात्रशक्तिसमर्थनेन तत्सम्भवात् ।

Colophon:

— — —

574

No. 38589 | सिद्धाञ्जनव्याख्या | Ms. No. P. 3577

Beginnig:

× सपादयितुं शक्यं न तु देवादिदेहे तस्य भोगप्रधानत्वात् । अत एव हृद्यपेक्षया तु मनुष्याधिकारत्वादिति सू × मिरिह चेदवेदीदथ सत्य × न चेदिहावेदीन्महती विनष्टिरिति श्रुतिप्रत्यभिज्ञानाय यथा दर्शे तथात्मनि—

End:

× महावाक्यस्य न भेदस्तथेहापीति भावः। × इत्यमिप्रेत्य श्लोकरूपेण तमुपसंहरति त × द्रष्टव्येति × स्य × दे

नविचारस्स एव न सम्भवतीति योज्या । भावादिति मूले कु ठारनिधाने क्षिपति ×

Colophon:

इति श्रीहारीतकुलतिलक + श्रीवेङ्कटपतियज्वनस्तनूजस्य नाच-माम्भागर्भसम्भूतस्य श्रीविजयराघशास्त्रि × स्वरकटाक्ष + + श्रीकृष्णानन्दसरस्वतीगुरुचरणारविन्दपरिचरण + भास्करदीक्षितस्य कृतौ सिद्धान्तसिद्धाञ्जनव्याख्यायां रत्नतूलिकाख्यायां सूत्रार्थसङ्ग्रहविवरणं समाप्तम् ॥

575

Sl. No. 38591 सिद्धान्तसिद्धाञ्जनव्याख्या Ms. No P. 4791

Beginning:

यत्सद्बोधसुखैकरूपममलं विश्वात्मना भासते
सृष्टिस्थेमलयैः विरिञ्चिमुरभिद्रुद्रादिसंज्ञान्वितम् ।
प्रत्यग्रूपतया च यद्यवसितं वेदान्तवाक्यैर्महः-
ज्योतिस्तत्समुपास्महे गणपतिं देव्या समालिङ्गितम् ॥

अस्ति श्रीहरितान्वये समुदितः श्रुत्यर्थनिर्णायकः
सूत्रेषु त्रिषु कल्पसंज्ञिषु पटुः स्मृत्यर्थविज्ञाग्रणीः ।
तत्सूनुर्विवृणोत्येषः सिद्धाञ्जनकृतिं गुरोः ।
सर्वतोमुखयागस्य कर्ता भास्करदीक्षितः ॥

End:

ननु परमात्मनोंशाभावे पादोस्य विश्वा भूतानीति सर्वभूतानां ब्रह्मपादत्व-व्यपदेशानुपपत्तिरित्यत आह--पादोऽस्येति । परिच्छिन्नधर्माणां स्वाधिकरण-भेदसम्पादनेनैवात्मलाभादित्यर्थः । इतरेतरेति इतरेतरविशिष्टो यः पृथगर्थः तद्वृत्तेरित्यर्थः ॥

Colophon:

इति सिद्धान्तसिद्धाञ्जनव्याख्यानं रत्नतूलिकाग्रन्थं प्रथमसम्पुटम् ॥

576

Sl. No. 38593 सिद्धान्तसिद्धाञ्जनव्याख्या Ms. No. B. 796

Beginning :

× भावस्यालोकत्वात्तथा च कथं ततो निवृत्त्या सिद्धिरित्युच्यत इत्याशंक्याह नचेति । ननु व्यवहारस्याभिसारोपत्वाचालोकभिन्नालोकस्य तत्सामग्र्यन्तर्भावे को वा अस्तीत्यादिव्यवहारसामग्र्येत्याशंक्य—

End

एवं परकृतमधिकरणवर्णनं दूषयित्वा स्वकृतमेवाधिकरणवर्णनं शुद्धमित्युपसंहरति — तस्माद्यथावर्णितमेवेति । सिद्धशब्दो ग्रन्थान्ते मङ्गळार्थः ॥

Colophon :

सिद्धान्तसिद्धाञ्जनव्याख्यानं सम्पूर्णम् ॥

577

Sl. No. 39597 सूतसंहितासारसंग्रहव्याख्या Ms. No. P. 6225

Beginning :

वीरासनसमासीनं विद्युल्लिङ्गजटाधरम् ।
कराकलितचिन्मुद्रं कञ्चिद्देशिकमाश्रये ॥

नत्वा व्यासमुनिं सूतसंहितायां पारत्मनोः ।
ऐक्यप्रकाशकस्सारसङ्ग्रहः क्रियते मया ॥

End :

ज्ञानलाभाय वेदोक्त प्रकारेण समाहितः ।
महाकारुणिकं साक्षाद्गुरुमेव समाश्रयेत् ॥

वक्तव्यं सकलं प्रोक्तं मयातिश्रद्धया × ।
ततः परं तु वक्तव्यं न पश्यामि मुनीश्वराः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्परमशिवेन्द्र सच्छात्र श्रीमत्सदाशिवब्रह्मेन्द्रविरचितस्सूतसंहितासारसङ्ग्रहस्समाप्तः ॥

578

Sl. .No. 38598 सोपानपञ्चकव्याख्या Ms. No. C. 4192/3

Beginning :

लोलाक्षीं सुन्दरेशं गजवदनगुहं वासुदेवं गुरूंश्च

नत्वा ध्यात्वा परेशं श्रुतिगुणविमितं तत्त्वमस्यादिलक्ष्यम् ।

ज्ञानानन्दादिलक्ष्यं × स्म्यनीहः ॥

सोपानपञ्चकव्याख्या यथामत्यावितन्यते ।

बुद्धिसुष्टिविधानाय कालक्षेपाय चात्मानः ॥

Edd :

विधिकिंकरत्वप्रसङ्गादिति भावः ।

वेदान्तैकेन वेद्यः गुरुवरमुखतः वेदिते चाप्रमत्तैः × ×

स्वजनहितकरस्सुन्दरेशोऽहमात्मा ॥

सोपानपञ्चकव्याख्यारत्नपूगो मयार्पितः ।

सुन्दरेश्वरपादाब्जे भक्ताभीष्टप्रदायके ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितसोपानपञ्च-कव्याख्या समाप्ता ॥

579

Sl No. 39599 सोहम्पदार्थसंग्रहः Ms. No. P. 5733/9

Beginning :

तत्त्वातीतपदोऽहं तनुरहमस्मीति भावरहितोऽहम् ।

तामसदुरधिगमोऽहं तत्वंम्पदबोधबोध्यहृदयोऽहम् ॥

देवतदैत्यनिशाचरमानव × हीधरादिरहम् ।

देहेन्द्रियरहितोऽहं दक्षिणपूर्वादिदिग्विभागोऽहम् ॥

End :

नामादिविरहितोऽहं नरकस्वर्गापवर्गरहितोऽहम् ।
नादान्तवेदितोऽहं नानाविधनिखिलनिगमसारोऽहम् ॥

Colophon :

— — —

580

No. 38600 **स्मृतिसारसंग्रहः** **Ms. No. A. 86/3**

Beginnig :

प्रणम्य चरणौ गुरोः श्रुतिपुराणमुख्योदितं
प्रमाणमिह सम्मतं हृदि विचिन्त्य संगृह्यते ।
सतां विशयशातनाद्धतहृदः प्रचारे चिति
प्रतीचिमुखपाठतः सदसि वादिमोहाय च ॥

End

अतः प्रयोजनाभावाद्द्वैतं न प्रतिपाद्यते ।
× नूयद्वैतनं प्रतिपादयति श्रुतिरिति ॥
सत्यबोधसुखपूर्णलक्षणं
तत्त्वमर्थविभवं सनातनम् ।
मत्स्वरूपमशुभावहं शुभं
भक्तिगम्यममलं सदा नुमः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छिवकाशीविश्वेश्वरमणिकर्णिकातीरस्थ श्रीजयकृष्णानन्द पादपद्माराधक श्रीवेंकटेशकृष्णानन्दशिष्येण बालब्रह्मानन्दसूरिणा विरचिते श्रुतिस्मृतिसारसंग्रहे उत्तरार्धं समा ॥

581

Sl. No. 38601 **स्वप्रकाशप्रकरणम्** **Ms. No. C. 823/8**

Beginning :

रविचन्द्रवह्निदीपप्रमुखाः स्वपदप्रकाशास्स्युः ।
यद्यपि तथाप्यमीभिः प्रकाश्यते क्वापि नैवात्मा ॥

End :

जानाति येन सर्वं तं केन वा विजानीयात् ।
इत्युपनिषदामुक्तिर्बुध्यत आत्मानमात्मना तस्मात् ॥

Colophon :

इति स्वप्रकाशप्रकरणम् ॥

582

Sl. No. 38603 — स्वरूपदशकम् — Ms. No. P. 5779/21

Beginning :

न भूमिर्न तोयं न तेजो न वायुः
न खंचेन्द्रियं वा न तेषां न मोहः ।
अनैकान्तिकत्वात् सुषुप्त्यैकसिद्धः
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥

End :

न चैकं तदन्यद्द्वितीयं तु तस्याश्च
नाकेवलत्वं नो केवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥

Colophon :

— — —

583

No. 38605 — स्वात्मप्रकाशः — Ms. No. P. 1968/3

Beginnig :

यस्यान्तःस्थमिदं विश्वं येन सर्वं प्रकाशते ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
स्वरूपावारकाज्ञानग्रहो + श्रीगुरवे नमः ॥
एकानेकस्वरूपाय + ब्रह्मणे नमः ॥
आपादमूर्ध्निपर्यन्तमन्तर्ब्रह्माण्डकोटरे ।
कोऽहं स्यामिति यत्नेन चिन्तयामि सदा धिया ॥

क्षरो दृश्यास्थिसंयुक्तस्त्वङ्मांसरुधिरावृतः ।

नवरन्ध्रान्वितः स्थूलो देहो नाहमचेतनः ॥

Edd :

अनन्तोऽहमखण्डोऽहमहमाकाशवद्विभुः ।

अव्ययोऽहमखण्डोऽहं चिन्मात्रोऽहमिति स्थितः ॥

दृश्यं नाहमयं देहो नाहमेभ्यो विलक्षणः ।

संविन्मात्रोऽहमित्येतत्स्वरूपं प्रोक्तवानहम ॥

इतीमं श्रद्धया युक्तः पठेत्स्वात्मप्रकाशकम् ।

भवबन्धात्स निर्मुक्तो महत्पदमवाप्नुयात् ॥

Colophon :

इति स्वात्मप्रकाशकः समाप्तः ॥

584

Sl. No. 38606 स्वात्मप्रकाशः Ms. No. C. 3437/19

Beginning :

जगत्कारणमज्ञानमेकमेव चिदन्वितम् ।

एक एव जगत्साक्षी ज्ञानात्मैव जगत्त्रयम् ॥ १ ॥

End :

इत्येवमवधार्यार्थ विचारे यत्नवानिव ।

साधूत्तिष्ठ न ते धर्मैः लिप्यते शुद्धभावतः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितस्वात्मप्रकाश प्रकरणं सम्पूर्णम् ॥

Extra information :

ग्रन्थान्ते—

पञ्चाक्षरीजपपदेन विभाति रुद्रा-

ध्यायस्तथा स्फुरति तेन चतुर्थकाण्डम् ।

काण्डेन सर्वयजुरेव बिभाति तेन

ऋक्-साममध्यमणिना च विभान्ति वेदाः ॥

इति पद्यमेकं दृश्यते ।

585

Sl. No. 38607 **स्वात्मानन्दप्रकाशः** **Ms. No. C. 4671/21**

Beginning :

इदमिदमिति प्रतीतेर्वस्तुनि सर्वत्र बाध्यमानोऽपि ।
अनिदमावध्यं तत्त्वं सत्वादेतस्य नैव पारोक्ष्यम् ॥
नावेद्यमपि परोक्षं भवति ब्रह्म स्वयंप्रकाशत्वात् ।
सत्यं ज्ञानमनन्तं ब्रह्मेत्येतस्य लक्षणं प्रथितम् ॥

End :

रक्षाविधानसाक्षादीक्षितलीलावलोकमहिमाहम् ।
रजनीदिवसमविरामं स्फुरदनुभूतिप्रमाणसिद्धोऽहम् ।
लक्षणलक्ष्यमयो × ॥

Colophon :

— — —

586

Sl. No. 38608 **स्वानुभवसिद्धिः** **Ms. No. P. 9627/2**

Beginning :

प्रणम्य बालकृष्णार्यपादुकां तत्त्वदीपिकाम् ।
अद्वैतमननं कुर्वे सङ्ग्रहेण यथामति ॥

इह खलु सच्चिदानन्दमात्मेकरसमद्वितीयमात्मतत्त्वं जगज्जीवेश्वरतत्साक्ष्यात्मकनामरूपात्मनास्तिभातीष्टमिति व्यवह्रियते ।

End :

तथाच संग्रहपादत्रयमिदं मायामात्रं स्यान्न तु तात्विकमित्युक्ता अवस्थास्तिस्र उतासु मायालेशेन संयुताः निःशेषमायाहीनोऽयमविकल्पको भवत्यथेत्युक्तम् ॥

इममर्थं परिभावयन्तु बुधोत्तमाः । दुराग्रहेणापि स्वपुरुषार्थं मालोचयन्तु ।

इत्यद्वैतसिद्धान्तमननं श्रुतिमूलकम् ।
तत्त्वापरोक्षसिध्यर्थं उपादेयं मुमुक्षुभिः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमद्बालकृष्णानन्द भगवत्पूज्य पादशिष्य श्रीमत्सुखचिद्रूपभारतीविरचित सर्वोपनिषत्सारस्वानुभवसिद्ध संग्रहमननं समाप्तम् ॥

587

Sl. No. 3 ‹609 स्वानुभवादर्शः Ms. No. C. 3110/1

Beginning :

यस्मात्परं किमपि नास्ति नमोऽस्तु तस्मै
सच्चित्सुखाय विभवे पुरुषोत्तमाय ।
नो यत्र वागपि मनो न विबोधनाय
कृष्णाय पूर्वमहसे यदुनन्दनाय ॥

End :

पूर्वाचार्योच्छिष्टलेशोयमुक्तः
वुद्धिस्थों में स्वस्य न प्रौ॥ढ़ः ।
विद्वांसो येऽनुग्रहार्थं समर्थाः
तेभ्यो भक्त्या मे प्रणामोऽस्तु नित्यम् ॥

Colophon :

— —

588

Sl. No. 38610 स्वानुभवादर्शव्याख्या Ms. No. C. 3110/2

Beginning :

अथ स्वानुभवादर्शार्थप्रकाशिका ॥
नमः ओङ्कारगम्याय नमः ओङ्कारसाक्षिणे ।
नमः ओङ्कारवर्णाय कृष्णाय परमात्मने ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचयगमन × संक्षेपेण दर्शयति यस्मादिति ॥

End :

किमेतावता अत आह ॥ निर्मथ्य वेदान्तेति ॥ स्पष्टार्थः ॥

इदानीं ग्रन्थकर्तृत्वाभिमानपरिहारपूर्वकं संप्रदायकर्त्राचार्यनमस्काररूपं मङ्गलमाचरति ॥ पूर्वाचार्येति ॥ स्पष्टार्थः ॥

Colophon :

— — —

589

Sl. No. 38611 स्वाराज्यसिद्धिः Ms. No. A. 722/1

Beginning :

गङ्गापूरप्रचलितजटास्तस्तभोनीन्द्रगीता-
मालिङ्गन्तीमचलतनयां सस्मितं वीक्षमाणः ।
लीलापाङ्गैः प्रणतजनतां नन्दयंश्चन्द्रमौलिः-
मानीहृद्ध्वान्तं हरतु परमानन्दमूर्तिः शिवो नः ॥

End :

इत्थं यः कर्मबन्धे भ्रमति परवशः प्राणभृज्जन्मसङ्घैः
दुःखस्यान्तं न वेत्ति स्मरति न च जनीव्रातमज्ञानयोगात् ।
तं सर्वानर्थमूलप्रशमनविधिना स्वात्मराज्येऽभिषेक्तुं
तात्पर्येण प्रवृत्ताः श्रुतिशिखरगिरः सूत्रभाष्यादयश्च ॥

Colophon :

— — —

590

Sl. No. 38612 स्वाराज्यसिद्धिव्याख्या Ms. No. A. 722/2

Beginnig :

अथ स्वाराज्यसिद्धिव्याख्या प्रारभ्यते ॥

तरुणतपनवर्णं कर्णलीलावधून-
भ्रमरनिवहगुञ्जाकर्णनोद्भूतहर्षम् ।
अमरवरकिरीटोघृद्घृष्टपादाब्जमन्तः
स्फुरतु दलितविघ्नं दन्तिवक्त्रं महो नः ॥

प्रारीप्सितस्य ग्रन्थस्य × चतुष्टयमर्थाद्दर्शयति गुणेत्यादिना ॥

End:

× दर्शयतीति ज्ञानलाभ एवात्मसाम्राज्यलाभ इति सिद्धम् ॥

विधूय विमतध्वान्तमान्तरे परिशेषिते ।

प्रति × जगदध्यासादध्यारोपोऽत्र दर्शितः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्रामचन्द्रसरस्वती पूज्यपाद–शिष्येण गङ्गाधरसरस्वत्याख्यभिक्षुणा विरचितायां आत्मसाम्राज्यसिद्धि व्याख्यायां कैवल्यकल्पद्रुमाख्यायां अध्यारोपप्रकरणाख्यं पूर्वार्धं सम्पूर्णम् ॥

591

Sl. No. 38613 हरिपूजनम् Ms. No. A. 8186

Beginning:

वेदान्तशास्त्रकल्पोक्तविधिना ब्रह्मणोऽनिशम् ।

आत्मपूजां प्रकुर्वीत तद्विधानं मयोच्यते ॥

आत्मा यः प्रभुरेक एव जगतां सृष्टेः पुरा निर्गणः

स्वात्मानन्दनिधिः निजेक्षितमहामायागुणोपाधितः ।

धत्ते ब्रह्मरनेशशङ्करतनूर्विश्वोदयाद्युत्सुक–

स्तस्मै श्रीगुरवे नमो भगवते श्रीदक्षिणामूर्तये ॥

End:

आत्मनो मननं नाम वक्तव्याभावचिन्तनम् ।

ध्यातव्याभावचिन्तनं ध्यानम् । निदिध्यासनमात्मनः समाधि निक्षेपभ्रान्तिराहित्येनात्मनिष्ठता ।

समाधिरात्मनो नाम नान्याचिंतस्य विभ्रमः ।

एवं वेदान्तकल्पोक्त विधिना हरिपूजनम् ॥

कुर्वीत क्षणं वापि क्षणं वा सुसमाहितः ।

End

सर्वदुर्वासनाजालं पादपांसुमिव त्यजेत् ।
विधूयाज्ञान द्य × मोक्षानन्दमवाप्नुयातू ॥

Colophon :

— — —

592

Sl. No. 38614 हस्तामलकभाष्यम् Ms. No. P. 6052/14

Beginning :

कस्त्वं विशोकस्य सुपकजातो
किं नाम ते त्वं कुत आगतोसि ।
एवतन्मयोक्तं वचसार्भकत्वं
मत्प्रीतियत्प्रीतिविवर्धनोऽसि ॥ १ ॥

End :

उपाधौ यथा भेदता सन्मणीनां
तथा भेदता बुद्धिभेदेषु ते × ।
यथा चन्द्रिकाणां जले चञ्चलत्वं
यथा चञ्चलत्वं तथापीह × क्षो ॥ १२ ॥

Colophon :

हस्तामलकभाष्यं सम्पूर्णम् ॥

अनुभवाद्वैतम्

593

Sl. No. 38618 अनुभूतिसूत्रम् Ms. No. B. 333/1

Beginning :

ओं अथात आत्मदिहक्षा ॥

सत्याद्यात्मक एषः ॥

परमप्रेमास्पदत्वात् ॥

प्रमाणानुसारात् ॥

End :

इन्द्रियाणां मन इत्यादिदर्शनात् ॥

नोत्क्रान्तिस्तु तच्छ्रुतेः ॥

अदेहमुक्तिश्शब्दाददेहमुक्तिश्शब्दात् ॥

Colophon :

चतुर्थाध्यायस्य चतुर्थः पादः ॥

594

Sl. No. 38620 अनुभूतिमीमांसाभाष्यम् Ms. No. B. 333/2

Beginning :

ओं शं नो मित्र इत्यादयः शान्तिपाठाः ॥

ओं षोडशयुष्मदस्मत्प्रत्ययगोचराणां षोडशविषयविषयिणां शेषशेषिणां तमःप्रकाशवद्विरुद्धस्वभावानां इतरेतरस्मिन्नितरेतरात्मकतामितरेतरविवेकाग्रहणनिबन्धनो महान्प्रमादः पण्डितेऽप्यवगम्यते । कोऽयं प्रमादो नाम ।

End :

तस्मात्सर्ववेदान्तरहस्यार्थायतनभूतेऽस्मिन् महानुभवशास्त्रे सर्वेऽप्यपरोक्षानुभवेच्छवः निरन्तरनिष्ठां कुर्वन्तः अत्रैवादेहमुक्तिं गच्छन्तीति सिद्धम् ॥

अदेहमुक्तिः शब्दादिति पदाभ्यासः अनुभूतिमीमांसाशास्त्रपरिसमाप्तिद्योतनार्थः ॥

Colophon :

इति श्रीमुत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षीताचार्यकृतावनुभूतिमीमांसा भाष्ये चतुर्थाध्यायस्य चतुर्थः पादः ॥

595

Sl. No. 38625 | कान्तिमत्येकश्लोकी | Ms. No. B. 2414

Beginning :

कान्तेः कान्तिमतिस्ववागनुचिता विज्ञानवस्त्वोक्तिवत्
सत्यज्ञानसुखस्य वस्तुना इह स्वस्थस्य सद्ब्रह्मणः ।

End :

धर्मो धर्मिमदप्रसिद्ध इति यद्वेदान्तशास्त्रे मतं
मातः कान्तिरपि त्वमेवमुचिता भासि स्वकोल्लासतः ॥ १

Colophon :

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्य अप्पयदीक्षितस्य कृतौ कान्तिमत्येकश्लोकी समाप्ता ॥

596

Sl. No. 38626 | कान्तिमत्येकश्लोकीव्याख्या | Ms. No. B. 241/5

Beginning :

ययैव भासते नित्यं शालिवाटीश्वरश्शिवः ।
कान्तिं कान्तिमतीन्नित्यां तां वन्दे लोकमातरम् ॥

अत्र खलु भूमण्डले प्रतिस्मृति पुराणादिषु प्रसिद्धेषु × व्याख्या रभ्यते । कान्तेरिति ।

End :

यथा चेक्षतिकर्मव्यपदेशात् स इति सूत्रोक्तेक्षणवत्वं निरुपाधिक चैतन्यत्वं सुप्रसिद्धं तद्वदवगन्तव्यम् ।

एकश्लोकीमिमां श्रीमत्कान्तिमत्यम्बिकापराम् ।
सत्यख्या परयतो न स्याच्छोक मोहादिकं ध्रुवम् ॥

Colophon :

इति श्री मदप्पयदीक्षितेन्द्रान्वयजस्य अप्पयदीक्षितस्य कृतौ कान्तिमत्येकश्लोकी समाप्ता ॥

597

Sl. No. 39627 कैवल्यसाधनम् Ms. No. B. 333/2

Beginning :

श्रीमद्गुरुं प्रणम्याथ साधनं शास्त्रसम्मतम् ।
सद्यः कैवल्यमुक्त्यर्थं सङ्ग्रहेणोच्यते श्रृणु ॥
यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति ।
तथा वृत्तिक्षयाच्चित्त स्वयोनावुपशाम्यति ॥

End :

बोधहीनं न वैराग्यं शोभते कस्य चिद्भुवि ।
न च शास्त्रैश्च शिष्टैश्च श्लाघ्यते तद्विवेकिभिः ॥
तस्मद्वैराग्यबोधाभ्यां संयुक्तो धीमतां वरः ।
ब्रह्मात्मैक्यमहायोगं नियमेन समाचरेत ॥

Colophon :

इत्यप्पयदीक्षितेन्द्रान्वयजाप्पयदीक्षितकृतौ कैवल्यसाधनाख्यं प्रकरणं समाप्तम् ॥

598

Sl. No. 38629 गुरुशिष्यसंवादः Ms. No. A. 169

Beginning :

यौ मे नाथ इहाश्रमं वरमिति प्राप्तं द्वितीयं कलौ
युक्तं ज्ञायत आशरीरपतनात् गार्हस्थ्यनिष्ठास्वतः ।
श्रौतस्मार्तसमस्ततत्त्वरसिकौ कूटस्थसद्देशिकौ
तौ वन्देऽप्पययज्वसुन्दरसमाख्यातौ महान्तौ सदा ॥

सर्वसद्गुणसंपन्नः कश्चिच्छिष्यः स्वबुद्धितः ।
सद्गुरुं शान्तहृदयं इदंपप्रच्छ सादरम् ॥
ब्रह्मात्मैक्यमवाप्य संसृतिभयान्मुक्तस्सुधीरोऽप्यहं
स्मारं स्मारमिमान् बिभेमि कलिना त्यक्ताश्रमान् दुर्जनान् ॥
शिष्यप्रश्नः–श्रीमन्निखिलवेदान्तसद्गुरो मत्पूर्वपुण्यविशेषैर्मां वेदान्तश्रवणाधिकारिणम्—

End :

श्रोतव्यं मम किञ्चिदस्ति भगवन् नास्मात्परं मुक्तये
सन्तृप्तोऽस्मि तथापि तावकपदाम्भोजेऽस्तु भक्तिर्दृढा ।
वक्तव्यं च न सौम्यकिञ्चिदथ ते श्रौतं रहस्यं मया–
सच्छिष्येण तथाप्यमुष्य मननं ग्रन्थस्य तेऽस्त्वन्वहम् ॥

Colophon :

इति श्रीमदप्पय्यदीक्षितेन्द्रान्वयजस्याप्पय्यदीक्षितस्य कृतिषु गुरुशिष्यसंवादः समाप्तः ॥

599

Sl. No. 38632 तत्त्वसंग्रहः **Ms. No. B. 239/1**

Beginning:

श्रीमद्गुरुपदद्वन्द्वं स्मृत्वाभीष्टप्रदं सदा ।
जिज्ञासुबालबोधार्थं क्रियते तत्त्वसङ्ग्रहः ॥
अत्र खलु पदवाक्यप्रमाणज्ञेन भगवता बादरायणाचार्येण विरचिते अथातो ब्रह्मजिज्ञासेत्यादिभिः अनावृत्तिश्शब्दादनावृत्तिश्शब्दादित्यन्ते—

End :

यत् सत्यं विभु केवलं च सकलाम्नायान्तसिद्धं परम्-
तद्ब्रह्माहमिति श्रुतिस्मृतिवचोजाताद्विदित्वा गुरोः ।
युक्त्या ध्यानशतेन च स्फुटतरं पश्यन् विमुक्तो भवेत्
धन्यः सोऽत्र समस्तवित् सुरगणैः पूज्यः स एव ध्रुवम् ॥

Colophon :

इति श्रीमदप्पदीक्षितेन्द्रान्वय जाप्पयदीक्षित कृतौ तत्त्वसङ्ग्रहे उत्तरार्धः ॥
तत्त्वसङ्ग्रहः समाप्तः ॥

600

Sl. No. 38641 पञ्चदशाङ्गयोगप्रकरणम् Ms. No. B. 1019/1

Beginning :

सद्गुरुं प्रणिपत्याहं सद्यो मुक्त्येकसाधनम् ।
वक्ष्ये पञ्चदशाङ्गं तं योगं सव्याख्यमादरात् ॥
श्रीमन्तं पूर्वपुण्यैर्गुरुवरमुपलभ्येश्वरस्य प्रसादात्
सर्वं ब्रह्मेति बोधात् प्रबलविषयसंसक्तमेतच्चिरेण ।
नानादुःखैकहेतुं मुहुरपि करणग्राममायम्य नित्यं
योऽहिंसाद्यैरुपेतो जयति सहजतस्सोऽग्रयोगी यमी स्यात् ॥

End :

वृत्तीनां विस्मृतिर्या प्रकृतिविकृतिजाशेषमोहास्पदानां
चित्तप्राणाद्यरूपाप्ययसुखजननी सर्वतत्त्वैरपेता ।
विद्याशक्तिस्वरूपा जयति सुखमयी ब्रह्मविच्छ्रेष्ठलभ्या
सेयं यत्रास्ति पंचाधिकदशचरमाङ्गे समाधौ समाप्तम् ॥

Colophon :

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजेनाप्पयदीक्षितेन विरचितेषु पंचदशाङ्ग योगप्रकरणं समाप्तम् ॥

601

Sl. No. 38644 पञ्चदशाङ्गयोगप्रकरणव्याख्या Ms. No. B. 1018/2

Beginning :

सद्गुरुं प्रणिपत्याहं सद्योमुक्त्येकसाधनम् ।
वक्ष्ये पञ्चदशाङ्गं तं योगं सव्याख्यमादरात् ॥

अत्र खलु श्रुतिस्मृतिपुराणादिप्रपञ्चितेषु कर्मभक्तिज्ञानयोगाख्येषु मोक्षसाधनेषु चतुर्षु सद्यो मुक्तिं प्रति योगस्यैवान्यवहितसाधनत्वं शिष्टैः पूर्वकै स्सर्वैरप्यभ्युपगतं दृश्यते ।

End :

तृतीयो हि निर्विकल्पाख्यस्समाधिः ब्रह्मविल्लभ्यः प्रसिद्धः । तत्रापि प्रारब्धबीजसद्भावेऽपि तत्क्षिणामिनाभावात् मुक्तिरेवास्माकं तत्त्वम् ॥

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजेनाप्पयदीक्षितेन विरचितेषु पंचदशाङ्ग योगप्रकरणं समाप्तम् ॥

602

Sl. No. 3.646 पराशरोपपुराणव्याख्या Ms. No. B. 306/2

Beginning

दृष्ट्वात्मानमिदन्तया + परमाचार्यं दयासागरम् ॥

अत्र खलु व्याचिख्यासितस्य सर्ववेदान्तरहस्यार्थगर्भितस्य श्रीमत्पराशरोपपुराणगतस्य अन्तिमस्याष्टादशाध्यायस्य सर्वाध्याय सारत्वात्—

End :

अष्टोत्तरसहस्रश्लोकेन निर्मिते अष्टादशाध्याययुते अस्मिन्नेव पुराणे शिवः सम्यक् प्रदर्शितः साक्षात्कारयोग्यत्वेनावबोधितः इत्येवं व्याख्यानकर्ताऽपि स्वाचार्यं प्रणमति—

श्रुतिशिरसि + सुन्दरेशाय नित्यम् ॥

Colophon

इति श्रीमत्सुन्दरेश्वर तातपादशिष्याप्पयशिवाचार्यकृतौ पराशरदीपिका समाप्ता ॥

603

Sl. No. 38647 ब्रह्ममीमांसाभाष्यम् Ms. No. B. 235/1

Beginning :

ओम् । असत्प्रत्ययगोचरः कर्तृत्वभोक्तृत्वदुःखित्वाद्यखिलसंसारधर्मोपेतश्च जीवात्मा प्रबलतरज्ञानसमुच्चितकर्मानुष्ठानसंस्कृतजीवान्तरपरिणतेश्वरसेवकत्वमात्मनो मत्वा अहमिदं ममेदमित्यभिमानवशात् पश्चाद्यविशिष्ट ×

End :

अनावृत्तिः शब्दात् अनावृत्तिः शब्दात् ।

नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये सत्यदहरादि × ततस्तेषामनावृत्तिरेवेति सिद्धम् । अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥

Colophon :

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्य कृतौ ब्रह्ममीमांसा भाष्ये चतुर्थाध्यायस्य चतुर्थः पादः ॥

604

Sl. No. 38653 ब्रह्ममीमांसाभाष्यम् Ms. No. B. 237/1

Beginning:

अथातो ब्रह्मजिज्ञासेत्यादिसूत्रचतुष्टयम् ।
सभाष्यं विस्तरेणैव व्याख्यास्ये सद्गुरुं स्मरन् ॥

अत्र खल्ववतारभाष्ये प्रथममुक्तम्—

अस्मत्प्रत्ययगोचरपरमात्मोत्पन्नाहंप्रत्ययगोचरः सुखित्वदुःखित्वाद्यखिल संसारधर्मोर्पितश्च जीवात्मा प्रबलतरं + दृश्यत इति ॥

End:

कपिलादयस्तु महर्षयः सर्वज्ञा अपि वेदविरुद्धमतप्रतिष्ठापनाय परमेश्वरेण नियमितत्वान् तन्मतं अस्माभिः वैदिकैः निराकर्तव्यमेव ।

बादरायणस्तु सर्ववैदिकाचार्यः इति प्रसिद्धत्वात् तन्मतमनवद्यमिति-स्थितम् ॥

Colophon:

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ पञ्चमी समन्वय दीपिका समाप्ता ॥

605

Sl. No. 38654 ब्रह्ममीमांसभाष्याव्याख्य Ms. No. B. 238/1

Beginning

प्रथमाध्यायस्य प्रथमः पादः। अथेदानीं षष्ठी ईक्षातिदीपिका आरभ्यते ।

अत्रायमाक्षेपः । न हि ब्रह्मणोऽपि निर्विशेषस्य कथञ्चिदपीक्षितृत्वं भवितुमर्हति । कुतः ईक्षणात्मकस्य कर्मणश्च चक्षुराद्यैककरणसापेक्षत्वेन ब्रह्मणोऽकरणत्वेन च लोकेक्षणकर्तृत्वासम्भवात् । ×

End:

तथाहि लोके देवदेवस्य पितृपासकत्वं पुत्रोपास्यत्वं च भवतः तस्मा-त्प्रत्यक्जीवैक्यवादमुत्सृज्य तद्भेदवादाश्रयण एव मुमुक्षूणां परमपुरुषार्थ इत्य-वगन्तव्यम् ।

Colophon:

[इत्यप्पय्यदीक्षिताचार्यकृतौ भाष्यदीपिकायां प्रथमाध्यायस्य द्वितीयः पादः ॥]

606

Sl. No. 38657 ब्रह्ममीमांसभाष्यम् Ms. No. B. 1020

Beginning :

सर्वेषामपवादतो विभु परं ब्रह्मैकमेवाद्वयं
व्योमेवाहमिति स्थिरा मतिरभूद्यस्येह मुक्तो गुरौ ।
प्राप्तः प्राथमिकं समाधिमनया दृश्यानुविद्धाभिधं
मत्या सन्मननान्तजं स तु भवेत् सौम्यार्चिरादिक्रमात् ॥
शब्दास्ते विषयीकृता हि विदुषा तस्मिन्परब्रह्मणः
को न्वस्मादितरस्समाधिरुदितो जीवद्विमुक्त्यर्थकः ।
दृश्यत्यागपुरस्सरो न फलवांच्छब्दानुवेधः पृथक्
तत्त्यागाद्यनपेक्ष एव फलदस्साक्षित्वधीवर्जनात् ॥

End :

ते मन्दा उपदेशमेव न विधेस्संप्राप्नुयुस्त्वानना-
दावर्तन्त इहेतरोत्रजति तन्मुक्तिं विकामो महान् ॥
इति निगदितमेतं कर्मपादं तुरीयं
स्थिरमतिरवलोक्य ज्ञातकर्मप्रकारः ।
परशिवभजनेन ब्रह्मविद्वान्महात्मा
परतरनिजयोगी भाति सद्यो विमुक्तः ॥

Colophon :

इत्यप्पयदीक्षितस्य कृतिषु मुक्तिकामधेनुः समाप्ता ॥

607

Sl No. 38661 ब्रह्ममीमांसभाष्यम् Ms. No. B. 1021/2

Beginning ;

अखण्डसच्चिदानन्दलक्षणं तमसः परम् ।
निष्कळं निष्क्रियं शान्तं मङ्गळं तत्स्मराम्यहम् ॥
यतः प्रकृतिरुत्पन्ना सत्त्वादिगुणसाम्यतः ।
अवाप पुरुषाभिख्यां तस्यां यत्प्रतिबिंबितम् ॥

End:

कर्मणां स्वाश्रमोक्तानां तारतम्येन सङ्ग्रहात् ।
गौरवं ब्रह्मविद्यायाः स्वतःसिध्येदकर्मजम् ॥
निदिध्यासनयोगेन जीवन्मुक्तिपदं व्रजन् ।
पश्चात्समाधियोगेन वैदेहीमुक्तिमाप्नुयात् ॥

Colophon :

इत्यप्पयदीक्षिताचार्यकृतं योगदर्पणं नाम प्रकरणं समाप्तम् ॥

608

Sl. No. 38663 वेदान्तयुद्धप्रकरणम् Ms. No. C.450

Beginning :

अथ वेदान्तिषु त्रिषु पुञ्जेषु वेदान्तान् अन्योन्यं व्यवहृत्यगच्छत्सु कश्चिदाह चतुर्विंशतितत्त्वविलक्षणस्य परमात्मनो विज्ञानमात्रेण संसारबन्धान्मुक्तिर्भवितुमर्हतीति । तदानीं तदन्येषां तत्त्वानां विचारः वृथाश्रमहेतुरेवेति ।

End :

अतः अस्य परिग्रहोऽनवद्यः इति मत्त्वानिर्विकल्पाभिः समाधिभिः सह जनिष्ठो भूत्वा सर्वविषयवासनावर्जितः तं स्वीचकार ।

Colophon :

[सङ्गतिः सप्ता ॥]

609

Sl. No. 38664 वेदान्तयुद्धप्रकरणम् Ms. No. C. 452

Beginning :

अथ दशोपनिषत्पुराधिपतिः कश्चन भूपालः भगवद्गीताख्यया स्वभार्यया अन्तःपुर एवमवबोधितोऽभूत् । भोगप्रणनाथ भवान् खलुप्र सिद्धाह्वयोऽन्वर्थ नामा सर्वजनाराध्यमानोऽस्ति ।

End

अतोऽस्य परिग्रहो अनवद्य इति मत्वानि र्विकल्पादिसमाधिभिः सह जनिष्ठो भूत्वा सर्वविषयवासनावर्जितः तं स्वीचकार ॥

Colophon :

सङ्गतिः समाप्ता । युद्धप्रकरणं समाप्तम् ॥

610

Sl. No: 38666 वेदान्तव्यवहारमाला Ms. No. C. 451

Beginning :

अथ केनचित् ज्ञानवादिनामकः कश्चनवादी न्यायाधि सन्निधाविदं निज्ञापयामास । स्वामिन्यायधिपते ॥ ज्ञानयोगिनामकः प्रतिवाद्येवमाह सच्चिदानन्दलक्षणे परब्रह्मणि अभेदेनाभिध्यायमाने दीप इव कर्पूरस्य—

End :

अपितु चतुर्विंशतिसंवत्सरशुश्रूषात्र निर्धार्यते । द्वितीयस्थानी तु प्रमादीति महाराजं बोधयिष्यामहे ॥

Colophon :

सङ्गतिः समाप्ता ।

611

Sl. No: 38667 वेदान्तव्यवहारमाला Ms. No. C. 453/1

Beginning :

अथ परमेश्वराख्यः कश्चन वादी स्वसङ्कटं न्यायाधिपतेः सन्निधाविदं व्यजिज्ञपत् ।

भो प्रभो न्यायाधिपतेः मायाख्या मद्भार्या जगत्सृष्टिस्थितिसंहारादिन सर्वेषां मद्वापायपांराणां ×

End :

अतः तानि प्रमाणानि नादिनः स्वानीति त्रिस्थानसिद्धान्तश्चोपपद्यते । तथापि तेषां वादिमात्राधारभूतत्वाभावाद्वादिनोऽद्य प्रतिवादिवत् प्रतीयमानत्वाच्च तत्स्वाधीकरणमयुक्तमित्यधस्तनन्यायाधिपकृतः सिद्धान्तः समीचीनः । इति ॥

612

Sl. No. 3 8669 **शङ्करभाष्यशोधनी** Ms. No. B. 329/4

Beginning:

वयं च आद्यशङ्कराध्यासभाष्यप्रभृतिकेषु स्थितान् दोषान् दर्शयिष्यामः— युष्मदस्मत्प्रत्ययगोचरयोरिति शङ्कराचार्यैरुपक्रान्ते अध्यासभाष्ये इतरेतराभावानुपपत्तौ सिद्धायामित्युक्तम् ॥

End:

तस्मात् शङ्करभाष्यविषयकान् अत्रत्यानेकविंशतिसंख्याकान् दोषात् विद्वांसः आलोक्य समाधानानि वदन्तु । नो चेत् अस्मद्भाष्याध्ययनादीनि यथाविधिकृत्वा कृतार्था भवन्तु ॥

Colophon:

इति अप्पयदीक्षितकृतौ भाष्यशोधनी समाप्ता ॥

613

Sl. No. 38673 **षोडशमञ्जरी** Ms. No. P. 1310/3

Beginning:

ईशात्तत्पदवाच्यार्थात् प्रागभूद्यत् परं विभु ।
तथा त्वंपदलक्ष्यार्थात् प्रतीतस्तद्ब्र स्मराम्यहम् ॥

End:

सर्वचेष्टाविनिर्मुक्तो यश्शिलावदचञ्चलः ।
वरिष्ठो मुख्यमुख्यमुख्यस्सोऽतिवर्णाश्रमीभवेत् ॥

Colophon:

इति भस्मान्तशरीरश्रीमत्सुन्दरेश्वरतातपादशिष्याप्यदीक्षितस्याप्यय दीक्षितेन्द्रान्वयजस्य कृतिषु षोडशमञ्जर्याख्यं प्रकरणं समाप्तम् ॥

614

Sl. No. 38674 **षोडशमञ्जरीव्याख्या** Ms. No. P. 1310/4

Beginning:

अक्षाद्यायतनस्थमक्षीकन कवलक्षात्मरूपं पुरा
पक्षादिक्रममुक्त्युपास्यमतिरक्तारमभिस्सजनैः ।
कुक्षापूर्तिरतैस्तु नैव कुमतैः कक्षातिगं यत्परं
भक्ष्याभक्ष्यविभागशक्तिविमुखं वक्ष्यामि तं निष्कलम् ॥
वेदान्त + सिध्यति ॥

अत्र खल्वीशावास्यादि + प्रार्थ्यते ॥

End:

परिणामवादानुरोधेन भ्रमरकीटान्यायमाश्रित्य ब्रह्मात्मैक्यानवरतानुसन्धानेन सप्तमभूमिकाविषयिणी विदेहमुक्तिः प्रापणीयेति सिद्धम् ॥

Colophon:

इति भस्मान्तशरिरश्रीमत्सुन्दरेश्वरतातपादशिष्याप्ययदीक्षितस्याप्ययदीक्षितेन्द्रान्वयजस्य कृतिषु षोडशमञ्जर्याख्यं प्रकरणं समाप्तम् ॥

615

Sl. No. 38675 षोडशमालिका Ms. No. B. 241/2

Beginning:

सूत्रं प्राथमिकं प्रमेयविषयं वैयासिकं यन्मतं
तार्तीयीकमपि प्रमाणविषयं यच्च स्फुटं दृश्यते ।
तत्सम्बद्धमिदं प्रमातृविषयं मध्यस्थमप्यस्फुटं
जीवस्यैव हि मातृता कथमियं तस्योद्भवा भावना ॥

End:

नादातीतपरप्रकारमुदितं पश्यन् व्रजेत् सद्गुरुं
नो चेदिन्द्रमनुत्तमं सुखवशात् भित्वा च सूर्यं ततः ।
ब्राह्मं वैष्णावमादिशैवमपि वा लोकं प्रपद्यामृतं
तन्नित्यं प्रविशेत्परात्परतरं ब्रह्मैव नानावर्तते

Colophon:

— — —

616

Sl. No. 38676 षोडशमालिकाव्याख्या Ms. No. B. 241/2

Beginning:

सुन्दरेश्वरतातारूयं सद्गुरुं शान्तमानसम् ।
नत्वा षोडषमालाख्य ग्रन्थं विरचयाम्यहम् ॥

अत्र खल्वष्टोत्तरशतोपनिषद्भाष्ये ब्रह्ममीमांसानुभूतिमीमांसागीताभाष्ये भगवतैकादशव्याख्यादिषु प्रबलतरप्रबन्धेषु लोकोपकारर्थमस्माभिः प्रणीतेष्वपि × प्रारिप्सितेऽस्मिन् प्रकरणे प्रथमश्लोकमुपक्रम्य व्याख्यास्यामहे ॥

End :

श्रुतोपनिषत्कगत्यभिधानाच्चेति × त्रेणा ज्ञानिन इव प्रकृताक्षिपुरुषविदोपि देवयानमार्गेण दर्शनात् क्रममुक्तिसिद्धिरित्यवगन्तव्यम् ॥

Colophon :

इति श्रीमदप्यदीक्षितेन्द्रान्वयोद्भवस्याप्पयदीक्षितस्य कृतिषु षोडश-मालिका सामाप्ता ॥

617

Sl. No. 38678 समाधिरत्नमञ्जूषा Ms. No. P. 1310/1

Beginning :

श्रीमद्गुरु हृत्कमले विचिन्त्य
क्षरप्रपञ्चेश्वरजीव हेतवे ।
तदक्षरं स्वानुभवैकवेद्यं
वदामि सौम्याक्षरगम्यमेकम् ॥

End :

धन्योसि सौम्यात्र समाधिरत्न-
मञ्जूषया त्वं ह्यनया महत्या ।
तथापि मद्भक्तिमयीं शलकां
रक्षस्व मुख्यां हृदि सावधानः ॥

Colophon :

इति श्रीमदप्ययदीक्षितेन्द्रान्वयजस्याप्ययदीक्षितस्य कृतिषु समाधिरत्न मञ्जूषाख्यं प्रकरणं समासम् ॥

618

Sl. No. 38679 समाधिरत्नमञ्जूषाव्याख्या Ms. No. P. 1310/2

Beginning :

सुन्दरेश्वरताताख्यं सद्गुरुं चिन्तयन् हृदि ।
समाधिरत्नमञ्जूषां सव्याख्यां रचयाम्यहम् ॥

अत्र खलु केषाञ्चिद् बहुशास्त्राध्ययनादि विमुखनामपि ॥

End :

शलाकाया अल्पत्वात् चौर्यद्वारा रत्नोपायः प्रसज्यते । अतः साप-यानो (?) रक्षस्वेति सूक्तम् ॥

Colophon :

इति श्रीमदप्पयदीक्षितेन्द्रान्वयजस्याप्पयदीक्षितस्य कृतिषु समाधिरत्नमञ्जूषाख्यंप्रकरणं समाप्तम् ॥

619

Sl. No. 38681 **हरिहरसामरस्यम्** **Ms. No. B. 241/1**

Beginning:

श्रीमन्तं सद्गुरुं नत्वा वाग्विभूतिप्रदं हृदि ।
श्रौतं हरिहरब्रह्मसामरस्यं विधीयते ॥

अत्र खलु श्रुतिस्मृतीतिहासपुराणागमाख्यानां प्रसिद्धानां प्रमाणानामुत्तरोत्तरदौर्बल्येन पूर्वापूर्वप्राबल्यात् श्रुतिरेव सर्वत्रानु × तगीतरिति सर्व–शिष्टसम्मतम् ॥

End :

एवं परमगुरुत्वावगमात् त्रयाणामपि ब्रह्मविष्णुरुद्राणां साम्यं सिध्यतीत्य-तस्सर्वेषामपि मतस्थानां सामरस्योपपतिरिति स्थितम् ॥

Colophon :

इति श्रीमदप्पय्यदीक्षितेन्द्रान्वयजस्य अप्पयदीक्षितस्य कृतिषु हरिहर ब्रह्मसामरस्ये तृतीयभागः समाप्तः ॥

विशिष्टाद्वैतम्

620

Sl. No. 38682 अन्तिमोपयनिष्ठा Ms. No. P. 3947

Beginning :

श्रीशैलेशदयापात्रं + मुनिम् ॥

+ + +

नमोस्तु भट्टताथाय मुनये मुक्तिदायिने ।
येनैवमन्तिमोपायनिष्ठा लोके प्रतिष्ठिता ॥

End:

उपनिषदमृताब्धेः उद्धृता सारविद्भिः
मधुरकविमुखैस्तामन्तिमोपायनिष्ठाम् ।
उपदिशति जनेभ्यो यो दयापूर्णदृष्टिः
भज हृदय सदा त्वं भट्टनाथं मुनीन्द्रम् ॥

Colophon .

— — —

621

Sl. No. 38683 अर्चिरादिवैभवम् Ms. No. C. 930/1

Beginning :

श्रीरमङ्गलमहोद्भववर्धनाय
वेदान्तपान्थपरमार्थसमर्थनाय ।
कैङ्कर्यलक्ष्मणविलक्षणमोक्षलक्ष्म्यै
रामानुजो विजयते यतिराजराजः ॥

इति सङ्कीर्तनीयार्हः श्रीरामानुजाचार्यः स्वरूपोपायपुरुषार्थान् प्रतिपाद्य सकलचेतनान् सदाचार्यसमाश्रयदानं कृत्वा परमपदस्य गमनोपायं च परमपदमार्गे च विशदं वक्तुमारब्धवान् ।

End :

श्रीवैकुण्ठनायकश्चास्य कृपाकटाक्षवीक्षणैः ईषत्स्मितपूर्वकं स्निग्धगम्भीरमाधुर्यश्रीसूक्तैः समीपमाहूय स्वस्य श्रीपादकमले तस्योत्तमाङ्गं + सर्वविध कैङ्कर्यं कुर्वन् कृतार्थो भूत्वा तिष्ठतीति ॥

Colophon :

इति श्रीमद्रामानुजार्यविरचितमर्चिरादि मार्गवैभवं सम्पूर्णम् ॥

622

SI. No. 38684 अद्वैतनिरासः Ms. No. P. 3406/3

Beginning :

यद्ध्यानात् परमानन्दः सिद्ध्येद्वाचामगोचरः ।
कारणं जगतामीशं तमानन्दमहं भजे॥
त्रयीसिद्धान्तसिद्धान्तशुद्धान्तःकरणान् गुरून् ।
प्रणम्याद्वैतिनो भिक्षोः पक्षो विक्षोभ्यतेऽधुना ॥

End :

तदभिधानमुक्तमिति चेन्न । शारीरत्वादेः सर्वसाधारणस्य वृत्ताक्षेपकहेतोरपि सत्त्वेन अन्नमयाद्यपेक्षायोगादित्यन्यत्र विस्तरः ॥ तस्मादानन्द ×

Colophon :

— — —

623

No. 38685 अद्वैतनिरासः Ms. No. C. 1995

Beginning :

शेषाशेषामनिर्दोष गुणभूषाय शेषिणे ।
निर्मलानन्दनिर्माणधामणे ब्रह्मणे नमः ॥
त्रयीसिद्धान्तसिद्धान्तशुद्धान्तःकरणान्गुरुन् ।
प्रणम्याद्वैतिनो भिक्षोः पक्षो विक्षोभ्यतेऽधुना ॥

89

Sl. No. 37528 **आत्मबोधव्याख्या** Ms. No. C. 4286/2

Beginning :

प्रचण्डपाखण्डविखण्डनोद्यतं
त्रयीशिरोऽर्थप्रतिपादने रतम् ।
बुधर्नुतं योगकलाभिराद्दतं
नमामि तं शङ्करदेशिकं नुतम् ॥

इह सकलशिष्टाग्रणीर्भगवान् शङ्कराचार्यः जिज्ञासुजनानुकम्पया +

End :

एतावता गुरुदेवतयोरैक्यभावनमेव आत्मप्रकाशसाधनमिति प्रतिपादितं भवति ।

चैतन्यद्युतिरुचिरां गोदूरनिरस्तश्यामतासङ्गः ।
हृदयसरोजे भ्रामति भ्रमरो विलक्षणः कश्चित् ॥

Colophon :

इति श्रीसच्चिदानन्दसरस्वतीविरचिता आचार्यार्याव्याख्या समाप्ता ॥

90

Sl. No. 37529 **आत्मलिङ्गार्चनम्** Ms. No. B. 951/1

Beginning:

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥
निर्मलस्य कुतः स्नानं वासो विश्वोदरस्य च ।
अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ॥

End :

एवं वेदान्तकल्पोक्तस्वात्मलिङ्गप्रपूजनम् ।
कुर्वन्नामरणं वापि क्षणं वा सुसमाहितः ॥

श्रीविष्णुचित्तयतिश्रेष्ठपादपङ्केरुहद्वये ।
रमतां मेऽनिशं चेतःषट्पदःप्रेमनिर्भरः ॥

अद्वैतविजयः ससाप्तः ॥

625

Sl. No. 38691 अधिकरणमाला Ms. No. P. 628/4

Beginning :

वन्दे वेदान्तकर्पूर वासितस्वान्तमन्वहम् ।
वाधूलकुलजीवातु श्री नेवा समहागुरुम् ॥

श्रियः पतिः परमकारुणिको भगवान् निर्वेयां पुरुषाणामुपादित्सितेष्टा-निष्टतत्साधननां त्याज्योपादेयविभागार्थं × ब्रह्मासूत्रणि चकार ॥

End :

भगवत्स्वातन्त्र्यान्मुक्तस्यावृत्तिस्सम्भवतीत्याशङ्क्य इमं मानवमावर्तन्नावर्तन्त इत्यादिना अनावृत्तिश्रवणादाश्रितव्यामुग्धस्य भगवतस्तन्निवर्तन-सङ्कल्पासंभवान्मुक्तस्य पुनरावृत्तिर्न सम्भवतीत्युक्त्या उपसंहृतम् ।

Colophon

इति श्रीमहाचार्यस्य कृतिषु अधिकरणमालायां चतुर्थस्याध्यामस्य चतुर्थः पादः ॥

हयग्रीव वन्दे तदनु परकालार्यचरणौ
प्रणम्य श्रीनिवासो यदुशि(?) कल्याणी सरसः ।
तटे शीतरण्ये त्वधिकरणमालां
प्रमलिखत्ता । कैंत पर दशम्यामति जवात् ॥ (?)

626

Sl. No. 38694 अधिकरणर्थासंग्रहः Ms. No. P. 1513/1

Beginning

नृत्तव्यत्यस्तपादं करकमललसद्वेणुमापूरयन्तं
गाना × व्रजस्त्रीसुरमुनिपशुभिर्मोहितैस्सेव्यमानम् ।
वृन्दारण्ये सुरेड्ये सुमफलवति गाश्चारयन्तं चरन्तं
बालं नीलाम्बुदाभं फलदमपि फलं नौमि गोपालकृष्णम् ॥

End

नानानावृत्तिवेदैरपि हत विषयैस्सूत्रतश्च स्मृतिभ्यो
नित्यं ब्रह्म प्रतीचोरनुपधिपरमप्रीतिबन्धा × त् ।
स्वेच्छातो दुस्सहायेक्षतिविरहदयाधीशसङ्कल्पतो वा
मुक्तावावृत्तिशङ्कालवलवरहितो ब्रह्म मुक्तोऽनुभुङ्क्ते ॥

श्रीभाष्यस्य प्रवक्ता श्रुतिमकुटगुरुर्भाष्यकारश्च वक्ता
वेद्यः श्रीवासुदेवः परमकरुणया वेणुवन्मां गृहीत्वा ।
प्रीतो वा वादयन्मामति प्रहृतिजुषोऽधिक्रियासङ्ग्रहाख्य-
मेतं प्रबन्धं महद्भिस्तदतिकरुणया दृष्टिरत्रापि कार्या ॥

Colophon :

[इत्यधिकरणसङ्ग्रहे तुरीयस्याध्यायस्य तृतीयः पादः]

627

Sl. No. 38695 अधिकरणसारार्थदीपिका Ms. No. P. 3653/5

Beginning:

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणां उपादित्सित जिहासितेष्टानिष्टतत्साधनानांत्याज्योपादेयविभागार्थं हर्तुन्तमस्सदसती च वि × मीशो मानं प्रदीपमिव कारूणिको ददातीत्युक्तरीत्या वेदाख्यप्रमाणं प्रदाया-वतारादिमुखेन तद्विषयज्ञानञ्चोदपादयत् ।

End :

भगवत्स्वातन्त्र्यान्मुक्तस्य पुनरावृत्तिस्सम्भवतीत्याशङ्क्य इमं मानवमावर्तं नावर्तन्त इत्यनावृत्तिश्रवणात् आश्रुतव्यामुग्धस्य भगवतस्तन्निवर्तनसङ्कल्पासम्भ-वाच्च न मुक्तस्य पुनरावृत्तिरित्युपसंहृतम् ॥

Colophon :

इति चतुर्थस्याध्यायस्य चतुर्थःपादः । इति श्रीवाधूलकुलतिलक श्रीमत्समरपुङ्गवाचार्यसम्प्राप्त भाष्यहृदयेन महाचार्यश्रीनिवाससूरिणा विर-चितायां अधिकरणसरार्थदीपिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

वन्दे वेदान्तकर्पूरवासितस्वान्तमन्वहम् ।
वाधूलकुलजीवातुं श्रीनिवासमहागुरुम् ॥

628

Sl. No. 38700 **अधिकरणसारावलीव्याख्या** Ms. No. P. 3653/2

Beginning :

स्वस्ति श्रीरङ्गभर्तुः किमपि दधदहं शासनं तत्प्रसत्त्यै
सत्यैकालम्बिभाष्यं यतिपतिकथितं शश्वदध्याप्य युक्तान् ।
विश्वस्मिन्नामरूपाण्यनुविहितवता तेन देवेन दत्तां
वेदान्ताचार्यसंज्ञामवहिबहुवित्सार्थमन्वर्थयामि ॥

End :

पाराशर्यप्रभूतादुपनिषदमृतोदन्वतस्सारभूतं
निर्मथ्यादत्त सूत्रैरवितथनिगमाचार्यनाम्ना मुनीन्द्रः ।
यत्तन्निष्कृष्टमित्थं यतिपतिहृदयारूढमारूढतार्क्ष्य-
स्तद्भक्ता वाजिवक्त्रस्सह मम गुरुभिर्वादिहंसाम्बुवाहैः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां चतुर्थः पादः । समाप्तश्चाध्यायः । शास्त्रं च परिसमाप्तम् ॥

629

Sl. No. 38709 **अधिकरणसारावलीव्याख्या** Ms. No P. 3756

Beginning :

कोयमस्य प्रबन्धस्य शारीरकशास्त्राधिकर्तॄणामुपकारकत्वप्रकारविशेष इत्याशङ्क्य तद्विशेषोपपादानेन विशदं प्रकाशयति— त्रैयन्तेति । पौनरुक्त्यम् प्रयोजनमन्तरेण पुनरभिधानम् । कश्चिन्मन्यते—पूर्वकाण्डप्रतिपादितैरेव न्यायैः वेदान्तवाक्यानामपि निरूपितत्वात् किमनेन शारीरकशास्त्रेणेति ।

End :

जीवस्य कर्तृत्वं परमात्मायत्तं, उत स्वाधीनमिति किं परमात्मायत्तत्वे विधि निषेध शास्त्रानर्थक्यं नेति । अत्र जीवः स्वतन्त्रः परतन्त्रो वा । स्वतन्त्र श्चेत् परायत्तुतच्छ्रुतेरिति पारतन्त्र्यकथनं कथं स्यात् । परतन्त्रश्चेत् कुर्यान्न कुर्यादिति विधिनिषेधशास्त्रे कर्तृत्वं कथं स्यात् × इति तदिदमाह—कर्त्रेति ॥

Colophon

— — —

630

Sl. No. 38710 **अधिकरणसारावलीव्याख्या** Ms. No. P. 3757

Beginning :

परात्तु तच्छ्रुतेः । किं जीवस्योक्त कर्तृत्वं स्वातन्त्र्येण उत परमात्मायत्तमिति चिन्त्यते इति भाष्य एवं सङ्गतिरुक्ता तदर्थविचारस्तु किं जीवत्वं परमात्मायत्तं उत स्वायत्तमिति । परमात्मयत्तत्वे विधिनिषेधशास्त्रानर्थक्यं स्यान्न वेति । अत्र जीवः स्वतन्त्रः परतन्त्रोवा । स्वतन्त्रश्चेत् परात्तुतच्छ्रुते पारतन्त्र्य कथनं ×

End :

× मखिलगुरुजनग्रन्थसंवादभाजां
पद्यानामुद्यतर्कप्रतिभटमहसामर्थतत्त्वप्रसिद्ध्यै ।
व्याख्या × वेदसिद्धान्तवेदी
वेदान्ताचार्यसूनुर्विमतमतकथावीरसंहारसिंहः ॥

Colophon :

इति विश्वामित्रगोत्रसंभवेन निखिलतार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीवरदनाथापरनाम्ना वेदान्ताचार्येण विरचितायां अधिकरणसारावलीव्याख्यायां शारीरकाधिकरणचिन्तामणौ चतुर्थाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः । शास्त्रं च समाप्तम् ॥

631

Sl. No. 38712 **अधिकरणानुक्रमणिका** Ms. No. P. 5147/2

Beginning :

अथातो ब्रह्मजन्मादि तथा शास्त्रसमन्वयात् ।
ईक्षानन्दान्तराकाशात एव ज्योतिरित्यपि ॥
प्राणस्तथा दशैकं च प्रथमे चरणे मताः ॥

End :

संकल्पादेवचाभावं जगद्व्यापारमन्तिमे ।
षट् संख्यातन्त्वधिकरणं तुर्याध्यायस्य तुर्यगम् ॥
१५६ अधिकरणसंख्या ॥
५४६ सूत्रसंख्या भाष्ये ॥

Colophon ·

632

Sl. No. 38713 **अधिकारसंग्रहः** Ms. No. P. 5102/b

Beginning :

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः ।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन
श्रमपरिचयश्रद्धाशुद्धाशया मम देशिकाः ॥

End :

आस्तिक्यवान्निशितबुद्धिरनभ्यसूयः
सत्सम्प्रदायपरिशुद्धमना सदर्थी ।
सङ्केतभीतिरहितः सतृणेष्वसक्तः
सद्वर्तिनीमनुविधास्यति शाश्वतीं नः ॥

Colophon :

— — —

633

Sl. No. 38718 अधिकारसंग्रहव्याख्या Ms. No. P 3748

Beginning :

श्रीमान्वेंकटनाथार्यः + संनिधत्तां सदा हृदि ॥
वेदान्ताचार्यवर्येण वेङ्कटेश्वरसूरिणा ।
समुद्धृतोऽधिकाराणां सङ्ग्रहोऽद्य विविच्यते ॥
श्रुतिमौलि × अधिकारसंग्रहमिमं व्यरीरचत् ।
तमिह प्रसन्नकठिनं यथाश्रुतं विवृणोमि तस्य करुणाबलात् ॥

End :

यामुनयतिवरादिपरम्परया अनादिकालमारभ्य प्रवृत्तानो रामानुज-सिद्धान्तानुसारिणां अस्माकं सद्वर्तिनीं सन्मार्गमनुविधास्यति अनुसरिष्यति ॥
कवितार्किकसिंहाय + गुरवे नमः ॥

Colophon :

इति अधिकारसङ्ग्रहव्याख्या समाप्ता ॥

634

Sl. No. 38721 **अधिकारसंग्रहव्याख्या** Ms. No. P. 5102/a

Beginning :

वेदान्ताचार्यवर्येण वेङ्कटेश्वरसूरिणा ।

समुद्धृतोऽधिकाराणां सङ्ग्रहोऽद्य विविच्यते ॥

श्रुतिमौळि + करुणावलम्बनः ॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्य इति श्रीरङ्गराजदत्तापरनामधेयः श्रीमान्वेङ्कटनाथार्यः मुमुक्षूज्जीवनाय तदपेक्षितसकलार्थपरिपूर्ण × उपकाराय अधिकारसङ्ग्रहं नाम प्रबन्धं पृथक्त्वेन चकार ।

End :

इत्थं वेदान्तगुरुभिः दर्शितस्य यथामति ।

सङ्ग्रहस्याधिकाराणां व्याख्योक्ता तत्प्रसादतः ॥

श्रीभाष्यश्रीनिवासेन कौशिकान्वयजन्मना ।

सङ्ग्रहस्याधिकाराणां व्याख्येयं साधु निर्मिता ॥

आधिकार + गुरुशेखरमन्वहम् ॥

Colophon :

अधिकारसङ्ग्रहव्याख्या सम्पूर्णा ॥

635

Sl. No. 38724 **अध्यात्मचिन्ता** Ms. No. P. 3676/2

Beginning :

अस्मद्विधपरित्राणप्रेमप्र × णमानसम् ।

वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ।

नमोऽस्त्वस्मद्गुरुभ्यश्च तद्गुरुभ्यस्तथा नमः

परमेभ्यो गुरुभ्यःस्यात् निखिलेभ्यो नमो नमः ॥

End :

सौम्यजामातृमुनिना सम्यक्दृष्टामिमां सदा ।

अध्यात्मविषयां चिन्तां परिचिन्वन् सुखी भवेत् ॥

चैतन्यद्युतिरुचिराङ्गो ..गनिरस्तभ्यामतासवः । (?)
हृदयसरोजे विरजे भ्रमति भ्रमरो विलक्षणः कश्चित् ॥

Colophon:

इति श्री सच्चिदानन्दसरस्वतीविरचिता आर्याव्याख्या समाप्ता ॥

109

Sl. No. 37574 अर्यास्वात्मनिरूपणव्याख्या **Ms. No. C. 759/11**

Beginning:

पूर्णज्ञानाय + ॥
वेदान्तशास्त्रमखिलं यत्तत्वप्रतिपत्तये ।
विवृतं देशिकेद्रेण तद्ब्रह्म प्रणतोऽस्म्यहम् ॥

ननु वेदान्तशास्त्रमनारम्भणीयम् । वक्ष्यमाणन्यायेनाश्रयानुपपत्त्या ॥

End:

ननु गगनादिधर्मिकप्रागभावप्रतियोगित्वस्याळीकतया तस्य घटादावारोपोऽसत्यप्रधानशून्यत्वेन न सम्भवतीति तदभावस्तत्र दुर्घट इति चेत् गगनादावपि सुलभः स कथं स्यात् । तथा चासम्भवः ।

Colophon:

— — — —

110

Sl. No. 37575 आसुरावसानप्रकरणम् **Ms. No. P. 2035/17**

Beginning:

इदानीमासुरवासनप्रतिबन्धो निरूप्यते । स च प्रतिबन्धः स्वस्मिन्नविद्यमान इव भासमानोऽपि कदाचित्पराचारदर्शनानन्तरमाक्षेपादिभिः प्रकटीभवति ॥

End:

तदनु तत्प्रतिबन्धविचारं कृत्वा तत्प्रतिबन्धं निराकृत्य श्रवणादिकं कृत्वा ज्ञानं सम्पादितं चेन्मुक्तो भवतीति सकलस्मृतिश्रुतीतिहास-

End :

परिचिन्वन्निति सति मनोहरविषयलाभात्पुनः पुनर्दर्शनेऽप्यतृप्तिवत्पुनः पुनरावृत्तौ सुखातिशयो भवतीत्यर्थः ।

अस्मद्विधपरित्राणप्रेमप्रवाणमानसम् ।
वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ॥

अध्यात्मचिन्ताव्याख्यानं चिन्तामणिमिवापरम् ।
व्यधाद्वरदराजाख्यो वेदान्तार्थावगोचरम् ॥

Colophon :

इत्यध्यात्मचिन्ताव्याख्या समाप्ता ॥

638

Sl. No. 38729 — अध्यात्मचिन्ताव्याख्या — Ms. No. A. 181

Beginning :

श्रीमद्द्रविडवेदान्तदेशिकं करुणाकरम् ।
श्रीमच्छठारियोगीन्द्रं सन्ततं हृदि भावये ॥

अत्र भवान् रम्यजामातृमुनिः सकलवेदान्तसारतया प्रतिपन्नस्वरूप-साधनपुरुषार्थविवेकं सकलसात्त्विकजनोज्जिजीविषया अध्यात्मचिन्ताख्यप्रबन्ध मुखेन प्रकाशयामास । तत्र अस्मद्गुरुसमारम्भामिति प्रकारेण गुरुपरम्परां तावत् नमस्यति—नम इत्यादिना ॥

End:

इत्थमिति इत्थं च प्रार्थनं कैङ्कर्यप्रार्थनवदात्मस्वरूपानुरूप एवेति सर्वं समञ्जसम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यस्य नारायणमुनेः कृतिषु अध्यात्म-चिन्तामणौ अध्यात्मचिन्ताव्याख्याने तृतीयः परिच्छेदः ॥

39

Sl. No. 38730 — अरुणाधिकरणभङ्गः — Ms. No. B. 1106

Beginning :

अथ अरुणाधिकरणभङ्गः प्रस्तोष्यते मया ।
दयया परिपश्यन्तु धीरा विगतकल्मषाः ॥

अर्थैकत्वेत्यादि । ज्योतिष्टोमे श्रूयते । अरुणया पिंगाक्ष्या एकहायन्या सोमं क्रिणातीति ॥ तत्र संशयः ॥

End :

अत्र जातेरपि त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यत्र प्राथम्यस्य सामिधेन्यनुवचनसाध्यत्ववत् द्रव्यपरिच्छेदद्वारा आरूण्यस्येव साधनसम्भवेन जाते–

Colophon:

— — —

640

Sl. No. 38731 अरुणाधिकरणमञ्जरी Ms. No. P. 1205/5

Beginning :

किमरुणादिपदोक्तमारुण्यं प्रा × क सर्वद्रव्यान्वयि किं वा स्व × कयावगतैकहायनीमान्त्रान्वयीति प्रथमो विचार × द × विचारणीयं किमरुणयेति पदमेकहायन—

End :

न हि प × केऽप्यन्वये करणत्वं विरोधि व्रीहिभिर्यजेतेत्यादौ करणतया प्रतिपन्नस्य ×

Colophon :

— — —

641

Sl. No. 39732 अरुणाधिकरणसरणिः Ms. No. P. 2218

Beginning :

ब्रह्माद्वितीयमनपायकृपावलोकं
स्तोकेतरस्वगुणभव्यमपत्यलिकम् ।
एकं वशीकृतविचित्रचरित्रलोकं
श्रीकान्तमात्तकरुणं शरणं भजामि ॥
अरुणाधिकरणसरणि गुरुणा निरणायि या यतीन्द्रेण ।
तरुणैः सद्युक्तिपरिष्करणैः निष्कण्टकीकरोम्येनाम् ॥

End :

रञ्जनीय त्रयीकुञ्ज पुञ्जमञ्जुलनाश्रिता ।
मञ्जरीयं जरीजृम्भ्यात् अञ्जनाचलरञ्जने ॥

Colophon :

इति श्रीशठमर्षणकुलतिलक श्रीनिवासनातयाचार्यतनूभवकौण्डिन्यश्रीनिवास दीक्षितकटाक्षलक्षितभाष्यार्थसार्थेन निजसहजाण्णयाचार्यदीक्षिताचार्यचरण × सिद्धान्तपद्धतिना श्रीनिवासविदुषा विनिर्मिता यतिपतिसम्मतारुणाधिः करणसरणिविवरणी समाप्ता ॥

642

Sl. No. 38733 अवताररहस्यम् Ms. No. P. 6153/2

Beginning :

भगवदवतारस्य कर्मनिमित्तकत्वाभावे प्रमाणानि—अजायमानो बहुध विजायते । एष सर्वभूतान्तरात्मा अपहतपाप्मा स एष सर्वेभ्यः पाप्मभ्य उदितः ॥

अस्य देवस्य माहात्म्यं महिमानं च नारद ॥

End :

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥
जन्मकर्म च मे दिव्यम् ॥

स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥

Colophon :

— — —

643

Sl. No. 38735 अष्टश्लोकीव्याख्या Ms. No. C. 671/2

Beginning :

उदयश्च रक्षाच प्रलयश्च उदयरक्षाप्रलयाः । तान् करोतीति जगदुदय रक्षाप्रलयकृत । जगदुत्पत्तिस्थितिसंहारकर्तेत्यर्थः । व्याप्नोतीति विष्णुः विष्णुव्याप्तावितिः धातुः व्यापनशीलः श्रियः पति अकारार्थ ॥

End :

अनेन अध्यवसानस्य त्वाच्चलाभावः सूचितः। (?)
अस्मीति वर्तमाननिर्देशो तत्तदर्थानुसन्धानेनेव कालक्षेपः कर्तव्य इतिसूचितः ॥

इत्थं बालप्रबोधार्थमष्टश्लोक्या यथाश्रुतम् ।
वर्णितोऽर्थो महत्मानः क्षन्तुमर्हन्ति साहसम् ॥

Colophon :

इति श्री अष्टश्लोक्या विवरणं समाप्तम् ॥

644

No· 38736 अष्टश्लोकीव्याख्या Ms No. P. 8528/2

Beginning :

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

वरदार्यदयालब्ध यतीन्द्रविषयीक्रियः ।
भट्टार्यदष्टाङ्कोऽप्यष्टश्लोकीं विवृणुते यतिः ॥

सकलशास्त्रनिपुणः श्रीमद्भट्टार्यः + श्लोकाष्टकेन सञ्जगृहुः ।

End :

स्मरन्निति वर्तमाननिर्देशेन तदर्थानुसन्धानेनैव कालक्षेपः कर्तव्यः इति सूचितम् ॥

इतीत्थं बालबोधार्थं अष्टश्लोक्या यथाश्रुतम् ।
वर्णितोऽर्थो महात्मानः क्षन्तुमर्हथ साहसम् ॥

नारायण × जन्मापराधिनम् ॥

Colophon :

अष्टश्लोकीव्याख्या सम्पूर्णा ॥

645

Sl. No. 38737 अष्टश्लोकीव्याख्या Ms. No. P. 3736

Beginning :

श्रीमल्लक्ष्मणयोगीन्द्रवाधूलवरदार्ययोः ।
कृपासुपात्रं वेदान्तिरामानुज × ॥

× सकल शास्त्रनिपुणः श्रीमहाचार्यः सर्वशास्त्रतात्पर्यभूतरहस्यत्रयार्थं अखिलचेतनोज्जिजीविषया श्लोकाष्टकेत सङ्गृहुः ।

End:

सारथेरित्यनेन मामित्यस्यार्थः ।

अनेन वात्सल्यादिकमुच्यते । त इति मानससान्निध्याभिप्राय × भिप्रायेण वा संबुद्धिः । दृढोऽस्मीति नि × ×

× शेन्दुवरदानन्तसूरिणोः ॥

किङ्करो व्याक्रिया व्याजात् अष्टश्लोकीमबुध्यत ॥

Colophon:

— — —

646

Sl. No. 38738 अष्टश्लोकीव्याख्या Ms. No. P. 1182/5

Beginning:

श्रीपरशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।

श्री वत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

वन्देहं घटिकाद्रीशं × नतानामनवधिं निधिम् ॥

अखिलचिदचिदीश × वेङ्कटेशो मुकुन्दः ॥

प्रणम्य देशिकान् सर्वान् अष्टश्लोक्या यथाश्रुतम् ।

अर्थो वैष्णवदासेन बालबोधाय वर्ण्यते ॥

अथ परमकारुणिको भगवान् पराशरभट्टार्यः × श्रीमदष्टाक्षरं मन्त्रमादौ विवृणोति ।

End:

यदि कश्चिदस्ति भुवने नाथस्सयूथस्य × इत्यादिकमत्रानुसन्धेयम् । दृढोस्मीति स्व × दर्शनेन प्रबन्धश्च निगमितः ॥

इत्थञ्च बालबोधार्थं अष्टश्लोक्या यथाश्रुतम् ।

वर्णितोऽर्थो महात्मानः क्षन्तुमर्हथ साहसम् ॥

Colophon:

647

Sl. No. 3 8745 **अष्टश्लोकीव्याख्या** Ms. No. P. 4321/2

Beginning:

प्रपद्ये + शठकोपमुनीश्वरम् ॥ रामानुज + देशिकम् ॥ श्रीमान् + हृदि ॥ लक्ष्मी + पराम् ॥

सङ्ग्रहेणोक्तस्योपायोपेयस्वरूपस्य द्वये विविच्य प्रतिपादनात् द्वयविवरणम् । चरमश्लोकः उपायोपेयस्वरूपापेक्षित प्रापकान्तरपरित्यागसर्वपापनिवृत्त्योः तत्राभिधानात् । अतः सर्वसमग्रं प्रणवमादौ विवृणोति— जगदुत्पत्तिस्थितिसंहारकर्तेत्यर्थः ॥

End:

कर्म ज्ञानमुपासनं चेति । शास्त्रानामुरिस्थितेन मनुनेति इत्यादिक मन्त्रानुसन्धानम् । दृढोऽस्मीति च ।

इत्थं च बालबोधाय + ष्टश्लोक्या यथाश्रुतम् ।
फणितोऽर्थो महात्मानः क्षन्तुमर्हथ साहसम् ॥

Colophon:

— — —

648

Sl. No. 38748 **अष्टश्लोकीव्याख्या** Ms No. P. 9011/2

Beginning:

श्रीपराशरभट्टार्यः—मेऽस्तु भूयसे ॥ अकारार्थो विष्णुरिति । श्रीपराशरभट्टार्यैः अष्टश्लोक्या रहस्यत्रयार्थः विविच्यते । तस्याः सङ्ग्रहेणार्थः प्रकाश्यते । अकारार्थो विष्णुरित्यनेन श्लोकेन श्रीमदष्टाक्षरमन्त्रस्य प्रणवार्थः प्रकाश्यते ।

End:

चरमं वाक्यं चरमश्लोकं तदुक्तमर्थमविशेषमितिभावः । स्मरन् उक्तप्रकारेणानुसन्दधन् दृढोऽस्मि एतच्छ्लोकपदानां व्याख्येयभावः समर्थैरूह्यः ॥ इत्येवं अष्टश्लोक्यर्थः सङ्ग्रहेण प्रदर्शितः ॥

Colophon.

— — —

649

Sl. No. 3 8750 **अष्टाक्षरमन्त्रार्थकारिका** **Ms. No. A. 394**

Beginning :

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्न जन्तुसंसारपोतकम् ॥
अस्मद्गुरुं तदाचार्यान् परमानखिलानपि ।
रामानुजार्यं करुणावात्सल्यवरुणालयम् ॥

× रहस्यत्रितयं ज्ञेयं चेतनेन मुमुक्षुणा ।
ज्ञातव्यमखिलं तस्य यस्मादत्राभिधीयते ॥

End

श्रीशानेकेष्टकैङ्कर्यसिद्ध्यै त्यक्तान्यसाधनाः ।
उत्तमाङ्गः स्वपादाब्जमालाभिः भूषयन्ति मे ॥

Colophon :

इति श्री वादिभीकर वरवरमुनिप्रणीता श्रीमन्त्रार्थकारिका समाप्ता ॥

650

Sl. No. 38753 **अष्टाअरमन्त्रार्थकारिकाव्याख्या** **Ms. No. P. 7166/1**

Beginning :

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
सांसारार्णवसंमग्नजन्तुसन्तारपोतकम् ॥
गुरुस्नेहदशारूढस्तत्त्वदीपः प्रकाश्यते ॥
तत्रार्थतत्त्वमाचार्याद्यथामति यथाश्रुतम् ॥

End

संप्रतिपत्तेरयमेवोपायविशेषः सर्वाधिकारिणा स्वाभिलषितपुरुषार्थ
सिद्ध्यर्थं स्वोज्जीवनार्थं समाश्रयणीय इति निरवद्यम् ॥

Colopnon :

श्रीमान्निर्मलविद्वदग्रविलसद्धाखलीनायकः
श्रीवत्सान्वयवार्धिशीतकिरणः श्रीश्रीनिवासस्सुधीः ।
वादिप्रोद्भटदन्तिकेसरिकृतश्रीतत्त्वदीपाभिध-
ग्रन्थं स्वादुमलीलिखत्सुमतयस्संवीक्ष्य हृष्यन्तु तम् ॥

651

Sl. No. 38754 अष्टाक्षरमन्त्रार्थविवरणम् Ms. No. P. 7203

Beginning

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
वेदान्तदेशिककटाक्षविवृद्धबोधं
कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं
भक्त्या भजामि परवादिभयङ्करार्यम् ॥
लभेयं लब्धविज्ञानो लक्ष्मीपतिपदद्वयम् ।
मन्त्रद्वयोत्तमश्लोकविषयोऽर्थविवेचकः ॥
गुरुस्नेहदशारूढस्तत्त्वदीपः प्रकाश्यते ।

End:

सर्वोपायविलक्षणभगवदेकोपायत्व व्यवसाय एव भगवता स्वेनैव सादरं विधीयत इत्यस्यैव शरण्याभिमततरत्वसम्प्रतिपत्तेरयमेवोपायविशेषः सर्वाधिकारिणां स्वाभिलषितपुरुषार्थसिद्ध्यर्थं च समाश्रयणीय इति निरवद्यम् ॥

Colophon :

सौम्यजामातृमुनिना गुरुस्नेहवशान्वयात् ।
चरमश्लोकसारार्थतत्त्वदीपः प्रदर्शितः ॥
आरण्यकगुहान्तस्थमहस्यं गुरुगोपनात् ।
संपश्यति रहस्यार्थतत्त्वदीपान्वितः पुमान् ॥
सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्न जन्तुसन्तारपोतकम् ॥

652

Sl. No. 38755 **अष्टाक्षरमन्त्रार्थविवरणम्** **Ms. No. B. 849**

Beginning :

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसन्तारपोतकम् ॥
मन्त्रद्वयोत्तमलोक विषयोऽर्थप्रदर्शकः ।
गुरुस्नेहदयारूढस्तत्वदीपः प्रकाश्यते ॥
तत्रार्थतत्वमाचार्याद्यथामति यथाश्रुतम् ।
वर्ण्यते मननार्थाय मतो ह्यर्थःस्थिरो भवेत् ॥

End:

तस्माद्भगवच्छेषत्ववत् तत्प्रयुक्तभागवतशेषत्वमपि सर्वप्रकारविशिष्ट मेवेत्यात्मयाथात्म्यप्रतिपादकमन्त्रार्थतात्पर्यतया तत्वविद्भिरनुसन्धीयत इति सर्वमुपपन्नम् ॥

Colophon :

सौम्यजामातृमुनिना गुरुस्नेहदशान्वयात् ।
श्रीमदष्टार्णमन्त्रार्थतत्त्वदीपः प्रदर्शितः ॥
मुनिना रचितः श्रीमद्वादिकेसरिणा मया ।
तत्त्वदीपो हरत्वद्य मनीषासम्भवं तमः ॥

653

Sl. No. 38756 **अथाक्षरमन्त्रर्थाविरणम्** **Ms. No. C. 925**

Beginning :

असद्गुरुभ्यस्तेषां च गुरुभ्यो विदधे नमः ।
निदधे चा × रस्यादिगुरोः पादौ श्रियः पतेः ॥

वेदान्तवेद्यं गुरुभिः सुगुप्तं
मन्त्रद्वयश्लोकमुखं रहस्यम् ।
यत्तत्त्वदीपात्सुपथं चकार
तं सौम्यजामातृमुनिं प्रपद्ये ॥

मन्त्रद्वयोत्तमश्लोक विषयार्थप्रदर्शकः ।
गुरुस्नेहदशारूढस्तत्त्वदीपः प्रकाश्यते ॥

End :

सुन्दरजामातृमुनिं वन्दे पूर्वसुरक्षितं गुरुभिः ।
यत्तत्त्वदीपकरणादकरोत्सुपथं रहस्यार्थम् ॥
एकः सुमनःप्रसक्तं बहुषु वनेष्ववष्टनपथा यतते ।
दान + रामानुजसुरभि मारुतं वन्दे ॥
स्वाधीनयतयो नित्यं हठात्कृत्य मनो मम ।
तस्मै रामानुजाख्याय नमस्ते ब्रह्मयोगिने ॥

Colophon

इति श्री तत्त्वदीपग्रन्थः सम्पूर्णः ॥

654

Sl. No. 38758 अष्टादशरहस्यम् Ms. No. C. 2524//8a

Beginning :

श्रीमन्महाप्रसादपरमभागवत-
पादपद्मपरागकणिकेजयतः ॥

अयं चेतनः अनादिकर्मप्रवाहेन संसारमहार्णवनिमग्नः अज्ञानेनात्मान-मज्ञात्वा तेनाज्ञानेन हेतुनाऽहङ्कारममकारयुक्तः सन् कारणभूताभ्यां राग-द्वेषाभ्यां पुण्यपापहेतुभ्यां —

End :

पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ।

इति च ।

गच्छता दुर्गमध्वानं तृष्णा मूर्छितचेतसाम् ।
पाथेयं पुण्डरीकाक्षनामसंकीर्तनामृतं ॥

इति च श्रियः पत्युः सर्वविधबन्धुत्वं ज्ञात्वा स एव निर्हेतुकोपायः इति स्थितिरात्मारामत्वम् ॥

Colophon :

इति श्रीमद्रामानुजाचार्यविरचितं अष्टादशरहस्यं सम्पूर्णम् ॥

655

Sl. No. 38761 अकाशाधिकरणवादः Ms. No. B. 388

Beginning :

कलशाब्धिकन्यकायाः पतिं यतीन्द्रं च सादरं नत्वा ।
आकाशनयविचारं तनुते कुतुकादनन्तार्यः ॥

सदेवेत्यादि कारणवाक्यप्रतिपाद्यं--

End :

योगजन्य बोधस्य सर्वसिद्धत्वात् शब्दप्रत्यक्षयोः युगपदुत्पत्त्यङ्गीकारेण एकसामग्र्या अपरबुद्धिप्रतिबन्धकताविरहाच्च योगपक्षे न गौरवमिति दिक् ॥

Colophon :

— — —

656

Sl. No. 38762 आगमप्रामाण्यम् Ms. No. P. 3763

Beginning :

यत्पादाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयन्नुमा × ॥

जगज्जन्मस्थितिध्वंसमहानन्दैकहेतवे ।
करामलकवद्विश्वं पश्यते विष्णवे नमः ॥

+ + +

इह केचित् यतस्ततोवगतकतिपयक—

End :

आकल्पं विलसन्तु सात्वतमतप्रस्पर्धिदुष्पद्धति
व्यामुग्धोद्धत दुर्विदग्धपरिषद्दैदग्ध्यविध्वंसिनः ।
श्रीमन्नाथमुनीन्द्रवर्धितधियो निर्धूतविश्वाऽशि ×
सन्तस्सन्ततगद्यपद्यपदवीहृद्यानवद्योक्तयः ॥

Colophon:

657

SI. No. 38763 अचार्यसंभावनाहृदयम् Ms. No. P. 4128

Beginning :

यस्सर्वं यं श्रिता श्रीः जगदखिलमिदं येन संरक्ष्यते ते
यस्मै कुर्वन्ति देवाः प्रणतिमजहरेन्द्राद × वाति वायुः ।
× स्मादलभ्यं श्रुतिशिखरगिरो यस्य माहात्म्यलेशं
नेशावक्तुं न यस्मिन् तमिह मधुरिपुं वन्दिषीय प्रसन्ने ॥
तातदेशिकतातार्यनिर्मितं तत्त्व × णम् ।
निराकरोमि गुर्वङ्घ्रि × न सञ्जातधीरहम् ॥

End :

अस्मदाचार्यपाद श्रीपादुकासेवकरामानुजमुनीन्द्रविरचितम् आचार्यसंभावनाविचारं यन्निगरग्रन्थं श्रीदेशिकन्विरचितं आचार्यस्वरूपतन्महिम तत्तारतम्य तद्विषय शिष्य × परिचर्याभलिसंभावनादिः अवरुडय बहुनिबन्धनम् ॥

अमत्सराः तत्त्वं निश्चयित्वा पेरियो ×

Colophon :

आचार्यसम्भावनाविचारहृदयं सम्पूर्णम् ॥

658

No. 38764 आचार्यसंभावनाहृदयम् Ms. No. P. 7150/2

Beginning :

न्यग्रोधबीजे वटवत्प्रणवे शब्दजालवत् ।
सिद्धे तदीये शेषत्वे सर्वार्थास्सम्भवन्ति हि ॥
पारतन्त्र्यं नाम परेच्छानुविधायित्वम् ।
स्वदासमिच्छेद्यः क मदासं प्रीतमानसः ।
स्कन्धादादाय तस्यासौ भिन्द्यात् कुम्भं सहाम्भसा ॥
विपथा इत्यस्यार्थः ।

End :

प्रासङ्गिकमेकपुरुषापेक्षम् । यादृच्छिकसुकृतारोपणविषयचेतनभागवतरूपपुरुषद्वयापेक्षम् +

आसन्नत्वाद्दयालुत्वाद् ज्ञानित्वाद्गुणभावतः ।
वैशसन्न वरं नेष्टं वैशसं क्रकचेऽपि वा ॥
इति कोशः ॥

Colophon :

— — —

659

Sl. No. 38765 आत्मभरन्यासः Ms. No. P. 9222/9

Beginning :

× श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥
न्यस्याम्यकिञ्चनः श्रीमन् अनुकूलोऽन्यवर्जितः ।
विश्वासप्र × × ॥
× स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम् ।
स्वदत्तस्वधिया स्वार्थं स्वस्मिन्न्यस्यति मां स्वयम् ॥ +

End :

किञ्चिद्भुजगशयनः स्वात्मनैवात्मनः सन् ॥
मध्येरङ्गं मम च हृदये वर्तते सावरोधः ॥
× शेषचित्ते विद्वत्सेवाविमलमनसा वेङ्कटेशेन क्लृप्तम् ।
अक्लेशेन प्रणिहितधिया × ॥

Colophon

— — —

660

Sl. No. 38766 आत्मविजयः Ms. No. P. 2516

Beginning

श्रीमन्नारायणोऽशेषजगज्जन्मादिकारणम् ।
अन्तरात्मा शिवादीनां अव्यादव्याजवत्सलः ॥
प्रम णं लोकानां प्रणयपदमप्राकृतगिरां
परं वक्षस्सीमापरिणतपयोराशिसुकृतम् ।

फरा ।कुरत्तेजः कलिकमरुणाम्बोजनयनः
अहौमे × धाम प्रणमत ॥

End :

ब्रह्मेशानादयस्सर्वे स्वस्वातन्त्र्येण गर्विताः ।
प्रतिबुद्धैर्न सेव्यन्ते स्वल्पास्थिरफलप्रदाः ॥
इत्यादिषु बहुषु प्रदेशेषु शिवस्योपास्यत्वप्रतिषेधोपलम्भात् । यस्तु शैवा ×

Colophon :

— — —

661

Sl. No. 38768 आनन्दतारतम्यखण्डनम् Ms. No. P. 3079/2

Beginning;

शेषाशेषाय निर्दोषगुणभूषाय शेषिणे ।
निर्मलानन्दनिर्माणधर्मिणे ब्रह्मणे नमः ॥
इह केचिद्देवमनुष्यादीनां मुक्तानां परस्परमानन्दे तारतम्यमाचक्षते तत्साधनतारतम्यायत्तं दुरपह्नवम् । मुक्तिसाधनं हि ज्ञानम् ।

End :

+ पौराणिकवचनानि तु उक्तयुक्तिविरोधात् परमसाम्यश्रुतिविरोधाच्च सालोक्यादिमुक्तिपराणि वा जीवन्मुक्तिपराणि वा उपासनाकालिकफलानुभवपराणि वा नेयानीत्यन्यत्र विस्तरः ।

Colophou :

इति श्री शठमर्षणकुलतिलक श्रीनिवासताताार्यनन्दनेन लक्ष्म्यम्बागर्भशुक्तिमुक्ताफलेन कौण्डिन्यश्रीनिवासाध्वरिवरकरुणाकटाक्षलक्षितभाष्यतत्त्वार्थेन श्रीनिवासाचार्येण विराचितानन्दतारतम्यखण्डनं नाम प्रकरणं समाप्तम् ॥

662

Sl. No. 38774 आचार्यलक्षणम् Ms. No. P. 5641/6

Beginning :

आत्मनो ह्यतिनीचस्य योगिध्येयपदार्हताम् ।
कृपयैवोपकर्तारं आचाय संस्मरेत्सदा ॥

डाम्भिकं क्रोधनं मूर्खं तथाहङ्कारसंयुतम् ।
त्यक्तधर्मं च विप्रेन्द्रं गुरुं प्राज्ञो न कल्पयेत् ॥

End :

अन्यूनानतिरिक्ताङ्गं विषयग्राहकेन्द्रियम् ।
सौम्यवेषं प्रशान्तं च पापरोगविवर्जितम् ॥

Colophon :

— — —

663

Sl. No. 38775 ईक्षत्याधिकरणविचारः Ms. No. P. 5604

Beginning :

नत्वा श्रीशपादाब्जे स्तुत्वा पङ्क्तिं गुरूणां च ।
ईक्षत्यधिकरणविचारं तनुतेऽनन्तार्यदासोऽयम् ॥

पूर्वोत्तरद्विकभेदभिन्ने शारीरकशास्त्रे प्रथमद्विकेन प्रमेयत्वव्यापक-कार्यतानिरूपितकारणत्वस्य–

End :

एवं च तत्तेज ऐक्षत इत्यत्र तेजःप्रभृतिशब्दानां विशिष्ट × र्य प्रयुक्तगौणत्वशङ्कानुदयात् सच्छब्दवाच्यं न प्रधानम् । इदंपदस्य स्थूलचिदचिद्विशिष्टब्रह्मपर ×

Colophon

— — —

664

Sl. No. 38779 उभयकलातात्पर्यतत्वप्रकाशः Ms. No B. 174

Beginning :

श्रीरामानुजयोगिराजचरणाम्भोजद्वयेन्दीवरं
श्रीरङ्गार्यपदाम्बुजातयुगळं श्रेयस्करं मादृशाम् ।
सर्वाभीष्टफलप्रदाननिपुणं सर्वाघविध्वंसनं
कारुण्यारुणताऋजुत्वललितं सेवेऽनिशं चेतसा ॥

नमामि × प्रदं सदा ॥
उभयोः पक्षयोः तत्वतात्पर्यस्य प्रकाशिकाम् ।
रामानुजार्यनामाहं करोमि च यथामति ॥

End :

लोकार्यनिगमान्तार्यव्याख्याभेदः पृथक्पृथक् ।
दिङ्मात्रं दर्शितोऽप्यत्र रामानुजविपश्चिता ॥

Colophon :

इति श्रीमन्मैत्रेयगोत्रदुग्धसागरसुधाकर श्रीकृष्णमाचार्यसूनुना श्रीमदद्दङ्कि शिङ्गराचार्यचरणसरोरुहेन्दीवरायमाणस्वान्तेनं सुदर्शनविलासप्राप्तविद्याविलासविराजमानेन श्रीमच्चन्नुपाटि रामानुजाचार्येण विरचितोभयपक्षतात्पर्यप्रकाशिकायां कैवल्यस्वरूपनिरूपणं नाम अष्टादशाधिकारः ॥

665

Sl. No. 38781 कठोपनिषद्विवरणम् Ms. No. P. 6021

Beginning :

श्रीहयवक्त्रं × पास्य श्रीमच्छ्रीशैलदेशिकाकारम् ।
औपनिषदं तमन्तश्चिन्तयति श्रीनिवासदासोऽयम् ॥
कठवल्लीकल्पवल्याः कमलाकान्तकल्पकम् ।
शिष्यन्तः पूरयन्त्यर्थैः निगमान्तविदोऽर्थिनः ॥

End :

मुक्तिदशायां तदनुसन्धानस्यानुकूलतयैवोपलम्भात् । अनुकू × नं यत्स्वरूपयोग्यतारूपं आनुकूल्यं तदाश्रयतया × धकज्ञानमेव सुखं न त्वनुकूलं वस्त्वित्यभिप्रेत्य वा इव ×

Colophon :

— — —

666

Sl. No. 38782 कूरेशविजयः Ms No. P. 892/4

Beginning :

गायत्र्या बोधितत्वाद्दशरथतनयस्थापिताराधितत्वा ×
त्वादपि च पशुपतिः सर्वदेवः प्रकृष्टः ॥ ×

गायत्रीपूर्वकृत्याचमनविधिपुरस्कारसंकल्पकार्ये
गोविन्दाख्यप्रयोगाद्धरिरिति कथनाच्छुद्धसत्त्वधीत्यादिकाले ।
भर्गश्शब्दस्य सूर्यात्मकहरिमहसो वाचकत्वात्परस्ता-
दोङ्काराख्येयभावादनघनिजगुणाच्छुद्धसत्त्वाश्रयत्वात् ॥

End

प्रालेयाद्रीन्द्रकन्यावयवविलसनाद्योनिपीठस्य पुंस-
स्ताद्रूप्यायोग्यभावादपि च पृथगवस्थानयोगप्रसिद्धेः ।
नित्यं वैशिष्ट्यरूपाद्वयमतवचनायुक्तभावाद्विशिष्टा-
द्वैतस्य स्वाङ्गालिविरतयततया चक्रिणो युक्त्यभवात् ॥
× त्वप्रसङ्गाद्भव उभयथा चिद्विवर्गापवर्गा
युक्तत्वादेवशक्तेरपि न पशुपतिर्विष्णुरेव प्रकृष्टः ॥

Colophon :

श्रीकूरेन्द्रेण सार्थैः सदसि च विविधैर्दूषणैस्सप्तरात्रं
वादे लुप्ता विपिक्षाः प्रतिवचनजडाः विस्मयानानवापुः ।
तं । जैत्रघोषं व्यतनुत स महापूर्णनामार्यवर्यः
श्रुत्वा चैतत्तदानीं समजनि विमनाश्चोलभूपस्समन्त्री ॥
श्रीवत्साङ्कविरचितकूरेशविजयः समाप्तः ॥

667

Sl. No. 38784 कूरेशविजयः Ms. No. P. 6823/4

Beginning :

गायत्र्या बोधितत्वादपि नमकमुखैराघवस्थापितत्वात्
शौरेः कै ।सयात्राव्रतमुदिततयाभीष्टसन्तानदानात् ।
नेत्रेण स्वेन साकं दशशतकमलैर्विष्णुना पूजितत्वात्
तस्मै चक्रप्रदानादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

End

कूरेन्द्रेणेति सार्थैः सदशशतविधैः दूषणैः सप्तरात्रं
बादे क्षिप्तापि पक्षाः प्रतिवचनजडाः विस्मयान्मौनमापुः ।

तद्दृष्ट्वा जैत्रघोषं व्यतनुत स महापूर्णनामार्यवर्यः ।

श्रुत्वा चैतत्तदानींसमजनि विमनाः चोळभूपस्समन्त्री ॥

चतुर्विंशतिकक्ष्याभिः सिद्धान्तं वक्ति कूरराट् ॥

Colophon :

कुरेशविजयः सप्पूर्णा ॥

668

Sl. No.38787 कूरेशविजयव्याख्या **Ms. No. P. 6822/6**

Beginnig :

अत्र शैवाः — गायत्र्या बोधितत्वात् । भर्गश्शब्दस्य शिवे रूढत्वेन देवताःतरत्वायोगात्त । अन्यथा रथकाराधिकरणादिविरोधाच्च । न च धियो यो नः प्रचोदयात् तत् सवितुर्वरेण्यं धीमहीति अन्वयो वाच्यः ।

End:

उपक्रमानुगुण्येन नारायणपरत्वावधारणात् । नारायणपारम्यमेव अव्याहतम् । यच्चोक्तं विश्वं भूतं भुवनम्, तमीश्वराणां परमं महेश्वरम् इति मन्त्रद्वयेनापि परमशिवसिद्धिरिति तदपि न मनोहरम् ॥

Colophon :

इति कूरेशविजयव्याख्यानं समासम् ॥

669

Sl. No. 38791 गद्यत्रयभाष्यम् **Ms. No. P. 1074/1**

Beginning :

श्रीमहाकृष्ण × प्रश्रित्य प्रणयति वेङ्कटेशसूरिः ।

लक्ष्मीशप्रपदनवैभवप्रतिष्ठां रागान्ध्यप्रशमकरीं रहस्यरक्षाम् ॥

यद्यपि च भगवान् स्वतः सर्वज्ञः तथापि प्रियेण सेनापतिना निवेदितं तथानुजानन्तं उदारवीक्षणैः × तन्यायेन भगवद्दत्तताद्दशाधिकारतया ते ऽवसरेषु जगत्सृष्ट्याप्यन्यर्थो ×

670

Sl. No. 38792 गायत्रीविवरणम् **Ms. No. P. 5255**

Beginning :

अथ गायत्रीं व्याचक्ष्महे । अत्र वेदमातुः गायत्र्याः माहात्म्यस्य पण्डितपामरसाधारण्येन सर्वैर्विदितत्वात् अपरिमेयत्वाच्च न लिख्यते । यद्यपि सावित्रीव्याख्याः शतशः सन्ति ।

End :

नो धियः प्रचोदयादिति कैङ्कर्यप्रार्थनावाचि अयशब्दार्थः। कैङ्कर्ये भगवतैव प्रेरिते सति स्वभोक्तृत्वरूपममकारानवकाशात् नमश्शब्दार्थोऽप्युक्त प्रायः ॥

Colophon :

समाप्तं गायत्रीविवरणम् ॥

671

Sl. No.38794 गीतार्थसंग्रहव्याख्या **Ms. No. P. 1170/8**

Beginnig :

श्रीमान् वेङ्कटनथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
श्रीमद्वेङ्कटनाथेन यथाभाष्यं विधीयते ।
भगवद्यामुनेयोक्तगीतासङ्ग्रहरक्षणम् ॥

End :

× फल्गुनसारथीयवचसां श्रीयामुनेयोद्धृतं
विस्पष्टैरिति वेङ्कटेश्वरकविः व्याचष्ट भाष्याक्षरैः ।
यद्वादेषु कुदृष्टिबाह्यकुहनाकोलाहलस्कन्दिभिः
जङ्घालैर्जयघोषणाघणघणैः विद्राणनिद्रा दिशः ॥

Colophon :

इति कवितार्किक सिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु गीतार्थसङ्ग्रहरक्षा सम्पूर्णा ॥

672

Sl. No. 38977 **गीतार्थसंग्रहव्याख्या** Ms. No. C. 75/1

Beginning

करतलनिदर्शितात्ममुद्रः
परिकलितोन्नतबर्हिबर्हचूडः ।
इतरकरगृहीतवेत्रतोत्रो
मम हृदि सन्निधिमातनोतु शौरिः ॥
श्रीमद्वेङ्कटनाथेन यथा भाष्यं विधीयते ।
भगवद्यामुनेयोक्तगीतासंग्रहरक्षणम् ॥

End :

अस्माभिर्बहुश्रुतस्य भगवद्गीतार्थस्य प्रपञ्चस्य संग्रह इति मुमुक्षुभिः संग्राह्यतम इति भावः ।

सारं फल्गुनसारथीयवचसां श्री यामुनेयोद्धृतं
विस्पष्टैरिति वेङ्कटेश्वरकविर्व्याचष्ट भाष्याक्षरैः ।
यद्वादेषु कुदृष्टिवाह्यकुहनाकोलाहलाक्रन्दिभिः
जङ्घालैर्जयघोषणाघुणघुणैर्विद्राणनिद्रा दिशः ॥

Colophon

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीगीतार्थसंग्रहरक्षा सम्पूर्णा ॥

673

Sl. No. 38803 **गुरुपरम्परसारव्याख्या** Ms. No. P. 3422/3

Beginning :

आरभ्यास्मद्गुरोराभगवत्तोऽखिलान् गुरून् ।
प्रणम्य वर्ण्यते श्रीमत्सारतात्पर्यकौमुदी ॥
श्रीभाष्यकारसिद्धान्तरत्नाकरसुधांशवे ।
नमो वेदान्तगुरवे दुर्मतध्वान्तभानवे ॥
सुधायां पदवाक्यार्थावस्माभिरुपवर्णितौ ।
तात्पर्यमात्रसरणिश्शोध्यतेऽत्र सतां मुदे ॥

श्रीभाष्यकारेण भगवता सहकार्यन्तरविधिरिति सूत्रे तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्याथ मुनिरिति श्रुतौ श्रुतशारीरकस्यापि + सिद्धान्तितम् ।

End :

अथ नाथोपज्ञं प्रवृत्तं + तद्गुणेष्वाविष्टमना गायति–आरणनूलित्यादिना गाथात्रयेण । उपकारे × सन्धाय गाथासु पौर्वापर्यमवगन्तव्यम् ॥

Colophon :

इति श्रीमच्छ्रीरङ्गराजमहादेशिकदयोदितदिव्यदृष्टिना रङ्गरामानुजमुनिना विरचितायां श्रीमद्रहस्यत्रयसारतात्पर्यकौमुद्यां गुरुपरम्परासारः ॥

674

Sl. No. 38806 गुरूपसत्तिविजयः Ms. No. P. 451/1

Beginning :

वक्त्राम्भोजान्मुरारेरुदयमधिगतां सम्यगद्वैतविद्यां
वाधूलक्ष्मीनिवासो गुरुरिति महितास्तानिमानाश्रयामः ॥
स्वाध्यायोऽध्येतव्य इत्यध्ययनविधेः अध्ययनगृहीताङ्गपरिकर्मित—

End :

वैदिकगोष्ठीमध्यारुह्य तस्यापि तत्त्वावेदकतयाऽभिमततत्त्वमस्यादेः संसर्गबोधकत्वमेव नास्तीति कुतः प्रामाण्यमिति व्यञ्जयन्ति । तत्र पूर्वनिरासः पूर्वकाण्डे विस्तृतोऽनुसन्धेयः । पाश्चात्यनिरासविस्तरस्तु अद्वतविद्याविजये ऽनुसन्धेयः ॥

इति प्रथमविजये अवाच्यत्वभङ्गः—
इत्थं स्वानुचरैः + त्यक्षशदिभिः ॥

Colophon :

इति वाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन महाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये गुरुविधिविजयः ॥

675

Sl. No. 38807 गोदागथाः Ms. No. P. 1846/2

Beginning :

गोप्यः स्वोद्बोधिताभिस्सह निशि भवने कृष्णमुद्बोध्य सुप्तं
नीलावक्षोजवर्ये धृतविधिकपटादाश्रयन्नित्यदास्यम् ।

तच्चित्तास्तगोपीविकृतिरकृतितयोद्योगाधाहि गादा
तस्या गाधानुवादोऽप्यजितरसफलस्स्यात्सदैवानुभाव्यः ॥

End :

प्राप्य स्तुत्वासुभूषामथितजलनिधिं माधवं केशवं तं
गोप्यास्त्रा × ध्वंहिमकरवदनास्तत्प्रकारान् वदन्तीः ।
त्रि × द्वाधास्समग्रास्सुभगनवपुशधीशचित्तोद्भवाया
वक्तारो भूमिदेव्या भगवदनुभवं प्राप्नुयुर्दास्यगर्भम् ॥

Colophon

— — —

676

Sl. No. 38812 गोदागाथाः Ms. No P. 3028/3

Beginning :

स्वशेषाशेषार्थो निरवधिकनिर्बाधमहिमा
फलानां दाता फलमपि च शारीरकमितम् ।
श्रियं तत्सध्रीचीं तदुपसदनत्रासशमनी-
मभिष्टौति स्तुत्यामवितथमतिर्यामुनमुनिः ॥
अत्र समन्वयाधिकरणे साधनं × विषयकशारीरकचतुरध्यायीसम-
धिगतस्य भगवतः सर्वप्रकाराभिमतानुरूप +

End :

कवितार्किकसिंह इत्थं त्रय्यन्ताचार्य इत्यभिख्यातः ।
व्यवृणुत यामुनविहितां × स्तुतिं वेङ्कटेशः कविः ॥
इति किल चतुश्श्लोकीसुप्रकाशरक्षणां
पटुतरधियां प्रज्ञासौधे न्यबध्यत सद्गुणैः ।
विमतकथकव्यापनकोशीविकथनलम्बन
व्यसनशमन व्यक्तोत्सेधा जयध्वजपट्टिका ॥

Colophon :

इति श्रीकवितार्किकसिंहस्य वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां चतुश्श्लोक्यधिकारस्तृतीयः ॥

677

Sl. No. 3 8814 **चतुश्लोकीभाष्यम्** Ms. No. A. 215/1

Beginning :

लक्ष्मीशप्रपदनवैभवप्रतिष्ठां
रागान्ध्यप्रशमकरीं रहस्यरक्षाम् ।
लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नो
योसौ पुरा समजनिष्ट जगद्धितार्थम् ॥
प्राप्य प्रकाशयतु वः परमं रहस्यं
संवाद एष शराणागतिमन्त्रसारः ॥

End :

+ चरणशब्दोपलक्षितविग्रहयोगोऽपि मूर्तं ब्रह्मेत्यादिना प्रदर्शितः । एवं संक्षिप्तसिद्धान्तांशविशदीकारपूर्वकं सार्थं प्राप्तमुपायं स्तोत्रे सन्दर्शयिष्यति ।

कवितार्किकसिंह इत्थं त्रय्यन्ताचार्य इत्यभिख्यातः ।
व्यवृणुत यामुनविहितां रमास्तुतिं वेङ्कटेशकविः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां चतुःश्लोक्यधिकारस्तृतीयः ॥

678

Sl. No. 38816 **चरमश्लोकाः** Ms. No. P. 7590/13

Beginning:

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति श्रीकृष्णचरमम् ॥

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥

इति रामचरमम् ॥

End :

स्थिते मनसि सुस्वस्थे शरीरे सति यो नरः ।
धातुसाम्ये स्थिते स्मर्ता विश्वरूपं च मामजम् ॥
ततस्तु म्रियमाणं तं काष्ठपाषाणसन्निभम् ।
अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥

इति वराहचरमम् ॥

Colophon :

— — —

679

Sl. No. 38817 चरमश्लोकव्याख्या Ms. No. B. 976

Beginning :

श्रीशैलेशदयापात्रं × प्रणतोऽस्म्यहम् ॥
नमो निजाचारविधायिसाल-
ग्रामार्यवंशोद्भवसद्गुरुभ्यः ।
शठारिशैलेशमहाभिरम्य-
वरासदाचार्यमुखाखिलेभ्यः ॥

End :

शठारिगाधानुसारेण शतधार्थ्रा रहस्यत्रयस्य भाष्य श्रुतप्रकाशिका भगवद्विषयैककण्ठ्याध्ययनावसरे श्रोतुं घटन्ते नान्यथेति सङ्क्षेपः ॥

Colophon :

इति श्रीसङ्कर्षणफणीन्द्रावतार श्रीभाष्यकारवरवरगुरुब्रह्मतत्त्वदर्शनस्थापक श्रीमद्भाष्यकारसुदर्शनजगदाचार्यकृता चरमश्लोकव्याख्या तत्त्वभूषणाख्या समाप्ता ॥

680

Sl. No. 38818 चरमोपायनिर्णयः Ms. No. P. 7624/6

Beginning:

अभयप्रदराजदेशिकोद्भवं
गुरुमीडेऽनिशमादरेण साकम् ।

य इहाखिललोकजीवनार्थं
चरमोपायविनिर्णयं चकार ॥
अभयप्रतिपादाख्यं अस्मद्देशिकमाश्रये ।
यत्प्रसादादहं वक्ष्ये चरमोपायनिर्णयम् ॥

End:

सत्यं सत्यं पुनस्सत्यं यतिराजो जगद्गुरुः ।
स एव सर्वलोकानां समुद्धर्ता न संशयः ॥
एम्बेरुमानारु श्री चरणयोः प्रावण्यरहितानां यावदात्म भावि संसारः अनुवर्तेत ॥

Colophon:

— — —

681

Sl. No. 38820 जन्मरहस्यम् Ms No. P. 9554/2

Beginning:

श्री विष्णुपुराणे—
कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम् ।
नार्चयिष्यन्ति मैत्रेय पाषण्डोपहता जनाः ॥
विनिन्दां प्रथमे पादे करिष्यन्ति हरेर्नराः ॥

End:

यः पठेत्प्रातरुत्थाय देवदेवस्य कीर्तितम् ।
मुच्यते सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥

Colophon:

इति जन्मरहस्यं समाप्तम् ॥

682

Sl. No. 38824 जिज्ञासादर्पणम् Ms. No. P. 7405/2

Beginning:

भवबन्धं जिहासन्तो यमन्तस्सन्तमन्ततः ।
जिज्ञासन्ते सदा सन्तः तमनन्तमुपास्महे ॥

गुरून् कृपागुरून् नत्वा धृत्वा च तदनुग्रहम् ।
सतां सन्तोषमादित्से जिज्ञासादर्पणार्पणात् ॥

इह तावत् त्रैय्यन्तसन्ततिसमर्थनाय प्रवृत्तेन भगवता बादरायणेन प्रणीतानि ब्रह्मसूत्राणि । तेषां परकीयव्याख्यानप्रत्याचिख्यासया भगवान् भाष्यकारः प्रवबृते । तत्रेदमादिमं सूत्रम्—अथातो ब्रह्मजिज्ञासा ॥

End :

तदयमत्र सङ्ग्रहः—

मीमांसाशब्दवद्रूढं जिज्ञासापदमादितः ।
तथानुशासनाभावादयुक्तमिति तद्विदः ॥
पथ्यं त्रिः खलु वेदनीयमिति यत्सूत्रं त्रिधा व्याकरोत्
त्रय्यन्तादयमुद्दधार कृपया दुर्यन्त्रणामन्त्रणाम् ।
गीतां चाप्यविगीत × वैभवतीं चक्रे प्रचक्रे यशः
तस्मै दोषविदूरशेषवपुषे कस्मै नतास्स्मो हृदा ॥

Colophon

इति श्रीनिवासविदुषा विरचितं जिज्ञासादर्पणं नाम प्रकरणं सम्पूर्णम् ॥

683

Sl. No. 38826 जीवकर्तृत्वसमर्थनम् Ms. No. P. 3420/2

Beginning :

तत्तत्कर्मसु विश्वं प्रवर्तयतोऽपक्षकश्च साक्षी च ।
फलयनमन्ताफलदः सहजरयं दधन्तं श्रियः पतिं नौमि ॥ (?)

कर्ताशास्त्रार्थवत्त्वात् परात्तु तत् श्रुतेः इत्यधिकरणाभ्यां जीवस्य कर्तृत्वं तस्य परमात्माधीनत्वं च भगवान् सूत्रकारोसूत्रयत् । तत्र भगवद्भाष्यकारैरेव-

End :

निगमान्तगुरुभिर्यैर्यदन्वग्राहि नात्रास्ति विरोध इति दर्शितं तत् प्रीयन्तां श्रीहयास्यनिगमान्तगुरूत्तमाः श्रुतप्रकाशिकाचार्याः × वो मयि ।

यदधीनं इदं विश्वं यदाज्ञा च श्रुतिस्मृती
यत्प्रीतिः परमं साध्यं स मे श्रीमान् प्रसीदतु ॥

phon

— — —

684

Sl. No. 38828 जीवाणुत्वम् Ms. No. B. 398

Beginning :

श्रीमद्वरप्रदाचार्यसूनु तत्पदसंश्रयम् ।
कौशिकान्वयजीवातुं चम्पकेशकगुरुं भजे ॥

हयवदनकवाक्षैर्हारिभिर्देशिकानां
वरदगुरुमुखानां दृष्टिभिश्चाभिाद्भुताभिः
चरितनिगमसीमा चम्पकाधीशनामा
प्रथयति बहुमानं जीवमानं विपश्चित ॥

अथर्वणे श्रूयते एषोऽणुरात्र ।

End:

स जयति यतिराजयतिः करुणाजलधिः क्षमापरिष्कारः ।
करिशैलकृष्णमेघः कांक्षितवर्षी यदर्पितसपर्यैः ॥

Colophon :

इति श्रीभगवद्रामाजानुचार्यनियमितचतुस्सप्रतिसंख्याकभद्रपीठप्रतिष्ठितगुरुगणविभूषण तन्नियमितनेकबिरुदावलीशोभमानकोकौशि ज ल धिकोस्तुभस्य श्रीमद्वरदाचार्याभिधानतातपादश्रीपादकमलमधुव्रतायमानस्य कविकुलसार्वभौमस्य कथकजनकण्ठीरवस्य श्रीमद्रामानुजसिद्धान्तविजयध्वजस्य श्रीचम्पकेशाचार्यस्य कृतिषु जीवाणुत्वसमर्थनं सम्पूर्णम् ॥

685

No. 38837 ज्ञानरत्नप्रकाशिका Ms. No. B. 79

Beginning :

यत्तच्छुसं हृदि मतं च मुहुः स्मृतं च
तत्तादृशं शुभमितं नियतं तनोति ।
तद्ब्रह्म निर्मलमपारकृपानुकूलं
गोपालबालमतिवेलगुणं प्रणोमि ॥

प्रणम्य पूर्णपाण्डित्यान् अण्णयार्यान् निजाग्रजान् ।
क्रियते श्रीनिवासेन ज्ञानरत्नप्रकाशिका ॥

प्राचां ग्रन्थेष्वमुक्तानामव्यक्तानां च सर्वशः ।
संग्रहात् सुखबोधाच्च ग्राह्या प्राज्ञैरियं कृतिः ॥

इह तावदनवरतपरमपुरुषध्यानादेव—

End:

कौण्डिन्यश्रीनिवासाध्वरिवरकृपयाप्यग्रजानुग्रहेण
ज्ञातं यद्भाष्यतत्त्वं तदिह बुधजनप्रीतये व्यक्तमुक्तम् ।
तेन प्रीतः प्रतीतः प्रथितसुरपुरीबालगोपालरूपः
श्रीमान् श्रीपामभूपः श्रियमयमधिकामादरादादधातु ॥

श्रुतश्च यत्नेन मतश्च पश्चात्
ध्यातःफलं पूर्वमदादिदानीम् ।
श्रीपामभूपाकृतिरेष शौरिः
सर्वं फलं दास्यति दृष्टमात्रात् ॥

Colophon

इति श्रीशठमर्षणकुलतिलकवेदान्तविद्यानिषद्यायितहृदय श्रीनिवास-तातचार्यनन्दनेन लक्ष्मयाम्बागर्भशुक्तामुक्ताफलेन कौण्डिन्यश्रीनिवासदीक्षित-कृपाकटाक्षलक्षित श्रीमद्भाष्यतत्त्वार्थेन निजाग्रजाण्णयार्यदीक्षितानुग्रहलब्ध-बुद्धिना सर्वतन्त्रस्वतंत्र श्रीनिवासार्येण विरचिता ज्ञानरत्नप्रकाशिका सम्पूर्णा ॥

686

Sl. No. 38840 ज्ञानयथार्थ्यवादः Ms. No. P. 3074/1

Beginning:

जगज्जन्मस्थेमप्रलयमहानन्दलहरी
निदानं श्रीकान्तं निरवधिककारुण्यजलधिम् ।
समाराध्य श्रीमद्यतिपतिमतं तन्यत इदं
मतीनां याथार्थ्यं यदुगिरिजुषानन्तविदुषा ॥

ज्ञानत्वव्यापकं याथार्थ्यमिति वेदान्तसिद्धान्तः । यद्यपि नैयायिक मतेऽपि सर्वं ज्ञानं धर्मिण्येव भ्रान्तं प्रका × तु विपर्यय इति न्यायेन भ्रमस्यापि धर्म्यंशे प्रमात्वाङ्गीकारात् ॥

End :

अत एवाद्वैतवादिभिरपि प्रत्यक्षस्थले अनिर्वचनीयख्यातिः परोक्षे अन्यथाख्यातिरङ्गीकृतेत्यादिकं वादान्तरे प्रपञ्चितमिति सर्वमवदातम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon :

इति ज्ञानयाथार्थ्यवादः ॥

687

Sl. No. 38842 — **ज्ञानसारव्याख्या** — Ms. No. P. 1994/3

Beginning :

यदा परानन्वयिभिः दुश्शकस्मृतिभिर्विना ।
तेन तत्पुरतः पातः सा प्रपत्तिः तदा भवेत् ॥
यस्त्वया सह स स्वर्गः निरयो यस्त्वया विना ।
इति जानन् परां प्रीतिं गच्छ राम मया सह ॥

End :

वासुदेवप्रपन्नानां यान्येव चरितानि वै ।
तान्येव धर्मशास्त्राणि इत्येवं वेदविदो विदुः ॥
न शुध्यते तथा जन्तुः तीर्थवारिशतैरपि ।
लीलयैव यथा भूप वैष्णवानां हि वीक्षणैः ॥

Colophon :

— — —

688

Sl. No. 38843 — **तत्त्वतत्त्वपरित्राणम्** — Ms. No. P. 4942

Beginning :

श्रीमन्महाश्वशिरसे कमलालङ्कृतोरसे ।
वेदाहरणकार्यी × य परस्मै ब्रह्मणे नमः ॥

तत्कृपैकोद्भूतविज्ञानस्तदवाप्तजनिद्वयः ।
णत्वतत्वपरित्राणं वितनोमि सतां मुदे ॥
फणिपतिभाष्यं विशदमजानन्नपीह ×
यस्स्वयमन्तर्याता वाजि खो मां प्रवर्तयत्यत्र ॥
अत एव प्रमदो × न्तासा × र्थमपिक्तनिम् ।
एको ह वै नारायण आसीत् न ब्रह्मा ने × च शङ्करः ।

End

णत्वतन्त्रं परं तत्र विशिष्य न निरूपितम् ।
अतो नि × सम्यग्बुधाः × मो × ताम् ॥ +
स्याद्रूपोत्र समासेन न समासे ततः परम् ।
नैकादिवच्छिवादौ च साधुर्नारायणाभिधा ॥
नत्वादि × ॥

Colophon:

— — —

४७

Sl. No.38845 णत्वदर्पणम् Ms. No. P. 616/1

Beginnig :

सद्ब्रह्मात्मादयश्शब्दास्सर्वकारणवाचिनः ।
पर्यवस्यन्ति यत्रैतं नारायणमुपास्महे ॥
णत्वं वेदान्तसिद्धान्त व्यस्थापकतां नयन् ।
आश्रृङ्ग श्रुतेर्यस्तु व्याचक्रे तं नमाम्यहम् ॥

End :

नारायणपदे णत्त्वं संज्ञात्वैकान्तिकं यतः ।
तेन नारायणो विष्णुर्नान्ये मन्ये शिवादयः ॥
कौण्डिन्य श्रीनिवासार्यमखिनो निखिलार्थदान् ।
अस्मद्वाप्यगुरून् शश्वद्विश्वश्रेयःप्रदान्नुमः ॥
अग्रजानुग्रहोपात्त शास्त्रविस्तृतबुद्धिना ।
श्रीनिवासेन विदुषा निर्मितं णत्वदर्पणम् ॥

Colophon :

इति श्रीशैलकुलतिलक श्रीनिवासताताचार्यनन्दनेन लक्ष्माम्बागर्भशुक्ति-मुक्ताफलेन + प्रतिदिनप्रबन्धनिर्माणधुरन्धरेण षट्तन्त्रनियन्त्रितमानसेन श्रीनिवासाचार्येण विरचितं णत्वदर्पणं समाप्तम् ॥

690

Sl. No. 38850 णत्वैकान्तशिरोमणिः Ms. No. P. 653

Beginning

श्रियः पत्यौ पत्यौ निखिलजगतां णत्वबलतो
यदैकान्त्यं धृत्वा नियमयति नारायणपदम् ।
तयो पाति × भगवति मतस्तोपनिषदं (?)
नमस्तस्मै नाम्नेऽद्भुतमहिमधाम्ने भवतु नः ॥
जयन्ति जगतां पत्युः जगद्रक्षणसम्मुखाः ।
मूर्ता इव दयापूरा ह्यस्मदाचार्यसूक्तयः ॥

End :

शास्त्रे कर्तुमकर्तुमन्यथयितुं शक्ता अपि प्रथितः (?)
तत्सीमानतिवर्तिनस्सहृदया निर्मत्सरास्सूरयः ।
णत्वैकान्तशिरोमणिं मम कृति भू × विमान्याहरात्
सारार्थाननुगृह्णतां सुमन × सारग्रहाः ॥
स्तोतुं निन्दितुमन्यथापहसितुं × वो बुधाः
स्वप्रीत्यै स्वयमाग मान्तनिलयः श्रीमान् स नारायणः ।
अज्ञं मामपि यद्भवान्मुखरयन् श्रीपाञ्चजन्य क्रमात्
स्वासाधारणनाम वै मवकृतौ सन्नह्यति स्मादरात् ॥
द्वित्राब्दबालकवचः पितराविवार्थ्य
लीलाशुकोक्ति × पतत्रियभूपतीन्द्रः ।
श्रुत्वा मुहुर्मम कृतिं च × तां परीतौ
हृद्यं च तत्पदयुगे शरणाश्च × नन्तः ॥

Colopnon :

इति श्रीमद्वाधूलकुलतिलकपदवाक्य प्रमाणपारदृश्वमूर्धन्य वेदान्तयुगात्म निखिलरहस्यजालनिषद्यायित ×

691

Sl. No. 38851 **णत्वैकान्तशिरोमणिः** Ms. No. P. 4917/1

Beginning :

श्रियः पत्यौ निखिलजगतां × ।
नमस्तस्मै धाम्नेऽद्भुतमहिमधाम्ने भवतु नः ॥
जयति जगतां पत्युः आचार्यपङ्क्तयः ॥
पोपोष्टि ज्ञान × दोषतः ॥
किन्तु नारायणाख्यायां णत्वस्य कमलापतौ ।
ऐकान्त्यं स्थापयामोऽत्र वैयाकरणरीतितः ॥
णत्वं बाधत × ॥
वाधूलवेंकटार्यस्य सूनुनाद्य समर्प्यते ।
विष्णौ वरददासेन णत्वैकान्त्यशिरोमणिः ॥

End :

अशक्यतया सुप्रतिष्ठितमिति सर्वं समञ्जसम् ॥
पद्माकान्तपरस्व × सन्तति सादरात् ॥
द्वित्राब्दबालकवचः × हृष्यन्तु तत्पदयुगीशरणाश्च सन्तः ॥

Colophon :

इति श्रीमद्वाधूलकुलतिलक श्रीकन्दाडे वरदाचार्यात्मज श्रीवेंकटाचार्य तनयेन श्रीमत्संयमि यादवाद्रिनिवासिना श्रीमत्पादुकासेवकरामानुज वरददासेन विरचिते णत्वैकान्तशिरोमणौ भगवतः नारायणभागस्तुरीयः ॥ णत्वैकान्त शिरोमणिः सम्पूर्णः ॥

692

Sl. No. 38852 **तत्क्रतुन्यायवादः** Ms. No. P. 3039/5

Beginning :

यदुभूधराद्रिनिलयं वन्दित्वा श्रीपतिं यतीन्द्रं च ।
तत्क्रतुनीतिविचारं फलयति कुतुकादनन्तार्यः ॥

यथाक्रतुरस्मिन् लोके पुरुषो भवति । तं यथा यथोपासते तथैव भवति—

End :

पञ्चाग्निविद्यानिष्ठानामपि ब्रह्मप्राप्तिश्रवणात् ब्रह्मोपासकत्वमवर्जनीयमिति ब्रह्मणः प्राप्यत्वेनोपास्यत्वसमर्थनात् तदनुपपत्तेः । तस्मादस्मदुक्तार्थ एव युक्तः ॥

Colophon :

— — —

693

Sl. No. 38853 तत्त्वचिन्तामणिः Ms. No. P. 31

Beginning ;

यच्छक्त्या संविशिष्टो हरिरखिलतनुर्जङ्गमाजङ्गमानां
सर्गस्थित्यन्तलीलामनुभवति दधत्सर्वभूतेश्वरत्वम् ।
हेतुत्वोपायतादित्रियुगगुणजुषे सर्वभूतेश्वरायै
लक्ष्म्यै तद्विष्णुपत्न्यै शुभप्रदवपुषे कुर्महे सम्प्रणामान् ॥

End

श्रीतत्त्वचिन्तनमणिं श्रीहयकन्धरमविहाय धृत्वा हृदास्मिन् स मोदतेतराम् ॥

Colophon

इति श्रीवाधूलकुलतिलक पदवाक्य प्रमाणपारदृश्वमूर्धन्यवेदान्तयुगलनिखिलरहस्यजालनिषद्यायितहृदयकमल श्रीकन्दाढेवरदाचार्यात्मज श्रीवेङ्कटाचार्यतनयेन श्रीमत्संयमि सार्वभौमविजयस्थानापरनामधेययादवाद्रिनिवासिना श्रीमत्पादुकासेविकरामानुजसंयमीन्द्रकरुणाकटाक्षसमधिगतोभयवेदान्त निखिल रहस्यजालहृदयेन तच्चरणनलिनविन्यस्तात्मरक्षाभरेण श्रीवरददासेन विरचतः श्रीतत्त्वचिन्तामणिः सम्पूर्णः ॥

694

Sl. No. 38855 तत्त्वत्रयनिरूपणम् Ms. No. P. 626/4

Beginning :

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥

श्रीमत्त्रय्यन्तसिद्धान्तगुरुपुत्रेण वर्ण्यते ।
सत्त्वोत्तरप्रमादार्थं तत्त्वत्रयनिरूपणम् ॥
यतिपतिमतनिष्ठान् यामुनार्य प्रबन्धैः—
व्यतनुतवरदार्यः सर्वतन्त्रस्वतन्त्रः ॥
+ + +
श्रीमतो नारायणस्य चरणावुपायत्वेन—

End:

त्रिवृत्करणोपदेशस्तु पञ्चीकरणस्याप्युपलक्षणमिति भाष्य एव प्रपञ्चित-मेतत् ॥

Colophon:

— — —

695

Sl. No. 38856 तत्त्वत्रयनिरूपणम् **Ms. No. C. 51**

Beginning:

श्रीमत्त्रय्यन्तसिद्धान्तगुरुपुत्रेण वर्ण्यते ।
तत्त्वोत्तरप्रसादार्थं तत्त्वत्रयनिरूपणम् ॥

End:

अस्मदीयं वै तदनवद्यं पद्यप्रबन्धपरिसमाप्तौ लिख्यते—
परिणतगुरुभक्तिः पद्मनाभाङ्घ्रिपद्मं
शरणमुपगतोऽयम् शान्तसिद्धान्तवेदी ।
स हि भवतु मुनीनां मुक्तिसौधस्थिताना-
मपि परिषदि भाव्यो भाग्यसौभाग्यशाली ॥

Colophon:

चिदचिदीश्वरतत्त्वनिरूपणं वरदनायकसूरिभिः ।
गुम्फितं परमपुरुषभक्तिपरायणाः परिपश्यन्ति सूरयः ॥

लिपिकृतोऽयं गोपालरामानुजदासेन स्वाज्ञाननिवृत्त्यर्थे समाप्तोयं प्रबन्धस्तत्त्वत्रयः ॥

696

Sl. No. 38857 **तत्त्वत्रयप्रमाणसंग्रहः** Ms. No. P. 1844/1

Beginning:

अनादिमायया सुप्तो यदा जीवःप्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥

श्रीगीतायां षोडशे—

ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ।
आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मया ॥

End:

स्वामेवं व्यवसा × खिलंजानादिपूर्णोद्य ×
मत्प्राप्ति प्रतिबन्धकैर्विरहितं कुर्याच्च शोकं व्यथाः ॥
निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरे
कर्तुं मापि प्रपत्तुमधिकं सीदामि दुःखाकुलः । (?)
एतज्ज्ञानमुपेयुषो मम पुनः सर्वापराधक्षयं
कर्तासीति दृढोऽस्मि ते तु चरमवा × न् सारथेः ॥

Colophon:

— — —

697

Sl. No. 38859 **तत्त्वनिर्णयः** Ms. No. P. 3401

Beginning:

श्रीमद्रामानुजमुनिवरैर्यामुनार्यैर्मुनीन्द्रैः
अप्याचार्यैर्बहुभिरपरैर्विस्तरेणाभ्यधायि ।
विष्णुस्तत्त्वं परमिति परन्यायमन्वादि ×
व्यक्तार्थाभिःश्रुतिविततिभिस्तद्वयं सङ्क्षिपामः ॥

अत्र एवं साध्यते—नारायणः परं ब्रह्मेति ।

End:

तथा अथर्वशिरसि + सिद्धम् । तदेवं प्रत्यक्षश्रुतिभिः नारायण-
स्यैव परत्वावगमात् पौरुषवचसां + अप्रामाण्यं च पुरुषनिर्णये सुव्यक्तम् ॥
तस्मात् नारायण एव मुमुक्षुभिः × ज्ञास्यं परं ब्रह्मेति सिद्धम् ॥
[देवराजार्यपुत्रेण कृतोऽयं तत्त्वनिर्णयः ।
अभङ्गुरेण यशसा मनसा हर्षशालिना ॥]

Colophon :

वात्स्यश्रीदेवनाथर्यनयनानन्ददायिना ।
वरदेन कृतस्तत्वनिर्णयः श्रुतिसम्मतः ॥

698

Sl. No. 38863 तत्त्वनिष्कर्षः Ms. No. P. 3014

Beginning :

प्रणम्य स्वगुरोरा × भगवतोऽखिलान् गुरून् ।
प्रणम्य तत्वनिष्कर्षः क्रियते विदुषां मुदे ॥
श्रीसूक्तमपि पुंसूक्तसहितं तत्वनिर्णये ।
तथाहि भावमास्ते × ब्रूहि तम् ।

End:

इत्युक्तमेकत्वविशिष्टस्यैव युज्यते ।
अनादिः परमेशो यत् × पुरुषोत्तमः ।
इतीत्थं शक्ति × विशिष्टस्यैव स × ।
तत्रैव खल्वहिर्बुध्न्यसंहितायां बहुस्थले लक्ष्म्याश्शक्तिशब्दस्सन्दिष्टः। × इति ॥

Colophon.

— — —

699

Sl. No. 38864 तत्त्वनीतिमहार्णवः Ms. No. A. 391/

Beginning :

विरमति महाकल्पे ब्रह्माण्डमण्डलसंक्षये
गतवति लयं नीरूपाख्ये पुराखिलवस्तुनि ।
उदवहदहो मा भैष्टेति स्वयं कृपयाखिलं
पुनरसृजदप्याद्यं यादृक्तदेव वयं स्तुमः ॥
श्रीमत्परमकारुणिक सर्वेश्वर प्रसादेन—

End:

सव्यं पादं प्रस र्यश्रितदुरितहरं दक्षिणं कुञ्चयित्वा
जानुन्याधाय सव्येतरभुजमितरं नागभोगे निधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन्शङ्खचक्रे
देवीभूषादिजुष्टो जनयतु जगतां शर्म वैकुण्ठनाथः ॥

Colophon:

— — —

700

Sl. No. 38868 तत्त्वमुक्ताकलापः Ms. No. P. 616/2

Beginning:

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो-
नाभीनालीकरिङ्खन्मधुकरपटलीदत्तहस्तावलम्बः ।
अस्माकं सम्पदोघानविरलतुलसीदामसञ्जातभूमा–
कालिन्दीकान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥

End:

गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना
क्षीणा काणादवाणी द्रुहिणहरगिरस्सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिर्जगति गुरुमतं गौरवाद्दूरवान्तं-
का शङ्का शङ्करादेर्भजति यतिपतौ भद्रवेदीं त्रिवेदीम् ॥

Colophon:

इति श्रीमत्कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेदान्ताचार्यस्य
कृतिषु तत्त्वमुक्ताकलापे अद्रव्यसरः पञ्चमः ॥

701

Sl. No. 38872 तत्त्वमुक्ताकलापः Ms. No. P. 9101/1

Beginning:

लक्ष्मीनेत्रोत्पल श्रीसततपरिचयादेषसंवर्धमानो
नाभीनालीक रिङ्खन्मधुकरपटली दत्तहस्तावलम्बः ।

अस्माकं सम्पदोधानविरलतुलसीदामसञ्जातभूमा
कालिन्दीकान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥

End :

स्यादित्थं शिक्षितार्थो यदिह यति पतिच्छात्रहस्ताग्रनृत्यं-
न्नारादारसमेधा सहचरितमतः सर्वतन्त्रस्वतन्त्रः ।
शिक्षोपन्यासाशिक्षापटिमकटरटद्गर्वं विद्वत्करोटी
कोट्टाकक्रीडमष्टापदकटकमसौ वामपादे निभर्तु ॥

Colophon :

ग्रन्थः समाप्तः ॥

702

Sl. No. 38881 तत्त्वमुक्ताकलापः **Ms. No. P. 3269**

Beginning :

जयतिसकलविद्यावाहिनीजन्मशैलः ×
दूराद्वृत्त्या दुरधिगमतां पश्यतां सर्वसिद्ध्यै ।
नातिव्यासव्यतिकरवती नातिसङ्कोचखेदा ×
× × ×
× माचरन्नर्थाद्वक्ष्यमाणद्रव्याद्रव्यविभागं प्रतितन्त्रविशेषांश्च दर्श ×

End :

प्रबन्धसमाप्तौ सकलाचार्य देशिकं श्रीमद्रामानुजाचार्य प्रतिभटसकल सिद्धान्त × साधारणत्वेन प्रस्तौति गाथेति ॥

इत्थं श्री वेङ्कटाचार्यः कवितार्किककेसरी ।
तत्त्वमुक्ताकलापस्य व्याख्यानमतनोत् स्वयम् ॥

Colophon :

इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापव्याख्याने सर्वार्थसिद्धौ अद्रव्यसरः पञ्चमः ॥

703

Sl. No.38885 तत्त्वमुक्ताकलापव्याख्या Ms. No. P. 9191

Beginnig :

× मा भवद्भेदाभेदपरं सामानाधिकरण्यम् ।

अथाप्यनुमानवलात् निर्विशेषोपलक्षकमस्त्वित्याह—तथाहीति । तत्त्वमित्यादिसामानाधिकरण्यात् निर्विशेषोपलक्षकसामानाधिकरण्यात्मकत्वा सोऽयं देवदत्त इत्यादिसामानाधिकरण्यवदिति +

End :

इत्थमनेन प्रबन्धेन शिक्षितार्थं सर्वेष्वपि तन्त्रेषु स्वातन्त्र्यं तन्नयन् + प्रकृतस्य प्रबन्धस्य वैतण्डिकविजयहेतुत्वेनातिशयमाह स्यादित्थमिति । पदार्थः स्पष्टः ।

सर्वमङ्गलसिद्ध्यर्थं प्रबन्धसमाप्तौ सकलाचार्यदेशिकं श्रीमद्रामानुजाचार्यं प्रतिभटसकलसिद्धान्तध्वान्त निरासफलत्वेन प्रस्तौति—

इत्थं श्रीवेङ्कटाचार्यः कविकथककेसरी ।
तत्त्वमुक्ताकलापस्य व्याख्यानं व्यतनोत्स्वयम् ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापव्याख्याने सर्वार्थसिद्धौ पञ्चमः सरः ॥

704

Sl. No. 38887 तत्वमुक्ताकलापव्याख्या Ms. No. P. 3040

Beginning :

× शुभगुणनिलयो निस्समः सर्वदोष-
प्रत्यर्थीभूतमूर्तिः चिदमितमहिमादसत्यस्वरूपः ।
सृष्टिस्थित्यन्तकारी सकल चिदचितां मोक्षदः सर्वविद्या-
वेद्यः वागीशमूर्तिः वृषभगिरि × श्रेय × ॥

अप्रसिद्धस्य पक्षस्य सन्मूलस्य प्रकाशिकाम् ।
सर्वार्थसिद्धेः व्याख्यां तां करोम्यानन्दवल्लिकाम् ॥

End:

त्रय्यन्तदेशिकवरस्य कटाक्षलेशात्
सर्वार्थसिद्धिगतजीवसरस्य चेत्थम् ।
व्यातानिषं विवरणं यदि तत्र दोषः
× करुणाधनिनो महान्तः ॥

Colophon:

इति श्रीकुशिककुलजलाधि सुधाकरनिगमान्ताचार्यस्य भागिनेयेन वत्सकुलतिलक श्रीनृसिंहगुरुमहादेवेन विरचितायां सर्वार्थसिद्धिव्याख्यायां आनन्ददायिन्यां द्वितीयः सरः ॥

705

Sl. No. 38888 तत्त्वमुक्ताकलापव्याख्या Ms. No. P. 4793

Beginning:

देवि त्वं मम वल्लभेति निगमस्त्रीषूत्तमामब्रुवन्
देव त्वां मदुपादचिह्न घटितोरस्कं परं तेऽविदन् ।
इत्येवं वृषशैलनित्यगृहिणीनिर्मोक्तिपारम्परी
अस्माकं दिशतादनन्तसमसक्तकल्याणपारम्परीम् ॥ +

सदेवेति सच्छब्दः सूक्ष्मचिद्विशिष्टचित्पर इति परिहरति सामानाधिकरण्यस्येति । +

End:

प्रत्यक्षावगतस्यापि गगननीलिम्नो ज्वालैक्यस्य चागमस्यापि अनुमान विरुद्धस्योत्तानादिवाक्यस्य प्रापकत्वाभावात्तादृशार्थबहुलस्य प्रत्यक्षश्रुतिविरुद्धस्य दुर्लभत्वमेवेति प्रागेवोक्तमिति भावः ।
इत्थं वेङ्कटदेशिकस्य निगमान्ताचार्य चूडामणे ×

Colophon:

इति कुशिककुलजलनिधिसुधाकरनिगमशिखरपरविद्याकुमुदिनीसम्मोदकस्य वेदान्ताचार्यस्य भागिनेयेन वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन विरचितायामानन्ददायिन्यां सर्वार्थसिद्धिटीकायां तृतीयः सरः ॥

706

Sl. No. 38889 तत्त्वमुक्ताकलापव्याख्या Ms. No. P. 4800/1

Beginning:

× नि बुध्यादिलयोदश तेषां व्यवस्था प्रतिनियमः। सर्वशरीरेष्वपि जीवस्यैक्ये व्यवस्था नोपपद्यत इति भेदसिद्धिरिति भावः। अयुगपत् × तमाने सर्वशरीरेऽपि प्रवृत्तिस्स्यादिति युगपत्प्रवृत्यभावोऽपि भेदक इति भावः।

End :

लौकिकजयादिपुरुषार्थनिष्ठानामप्ययमुपादेय इत्याह–इत्थमित्यादिना ॥ मङ्गळादीनि मङ्गळमध्यानि मङ्गलान्तानि प्रथन्ते बिपुरुषाणि भवत्यायुष्मत्पुरुषाणि चेति न्यायेन ग्रन्थान्ते गुरुप्रकाशनात्मकं मङ्गळं निबध्नातीत्याह पूर्वमङ्गळसिध्यर्थं इति ॥ इत्थं वेङ्कटदेशिकस्य निगमान्ताचार्यचूडामणे ×

Colophon :

इति श्रीकुशिककुलकलशजलनिधिसुधाकरनिगमशिखरपरविद्याकुमुदिनीसम्मोदकरस्य वेदान्ताचार्यस्य भागिनेयेन वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन विरचितायां आनन्ददायिन्यां सर्वार्थसिद्धिटीकायां तुरीयस्सरः ॥

707

Sl. No. 38891 तत्त्वमुक्ताकलापव्याख्या Ms. No. P. 7439

Beginning :

× नन्दसत्यस्वरूप।

सृष्टिस्थित्यन्तलीलः सकलचिदचितां मोक्षदस्सर्व × ×

जायतां श्रेयसे नः ॥

तस्यात्मजः + कुशिककु लश्रीभाष्य श्रीनिवास दौहित्रः ॥

अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम्।

सर्वार्थसिद्धं स्सट्टीकां करोम्यानन्दवल्लरीम् ॥

End :

सत् चितं तत्तत्काले विद्यमानं तृतीयचतुर्थौ दूषयति न विरुद्धाकारेति । अनुभवविषयाकारविरुद्धाकारघटितमिति । ×

Colophon

— — —

708

Sl. No: 38892 तत्त्वमुक्तावलिः Ms. No. B. 405/2

Beginning :

अनितरजनपालः शूरभूपालपालः
तरुणतरतमालश्या लो नन्दबालः ।
बहुकिरणविशालः सर्वशक्तिप्रवाळः
स जयति धृतमालः पुंड्रकोद्भासिफालः ॥

जीवात्मनोरैक्यमतं विहाय + बहुधा तनोति ॥

End :

नानालङ्कारयुक्ता मृदुमधुरपदन्याससंवर्धितश्रीः
पीयूषप्रत्यवाक्यप्रकरसुललिताचारुसर्वोज्वलाङ्गी ।
चिन्तानन्दैकभूमिः गुणगणसुभगा दोषलेशेन हीना
भक्तानां कण्ठदेशे निवसतु सततं तत्त्वमुक्तावलीयम् ॥

Colophon :

— — —

709

Sl. No. 38893 तत्त्वविलासः Ms. No. P. 7388

Beginning :

मीमांसासरणौ वादकामानां वादिनां मुदे ।
ग्रन्थस्तत्त्वविलासोऽयं लक्ष्मणार्येण तन्यते ॥

केचिदधिकरणेषु प्रायत्तरपक्षभंगकथनेन क्रियते तत्त्वविलासः । प्रायता अवलोकय भूमितमतः । (?)

End:

क × करण भावनाविधिराद्यः। यथा अग्निहोत्रं जुहोतीति।
अत्र हि यद्यपि इष्टसामान्यं भावनाभाव्य × विधिव्यापाराभावात्
शुद्धत्वोपपत्तिः। अन्योद्देशेन शुद्धधात्वर्थे ×

Colophon:

— — —

710

Sl. No. 38894 तत्त्वविवेकः Ms. No. P. 4919/2

Beginning:

श्रीमदाम्नायमकुटीदेशिकं करुणानिधिम्।
प्रणम्य तन्यते तत्त्वविवेको विदुषां मुदे॥
अहंबुद्ध्या परागर्थाद् प्रत्यगर्थो हि भिद्यते।
इति श्रीभाष्यकृत्सूक्त्या प्रत्यक्तत्त्वं विशेषितम्॥

End:

दिङ्मात्रमिह निर्दि निर्धूतविचिकित्सितम्।
वाम्यज्ञेनार्चितो देवः प्रीयतां श्रीहयाननः॥
स्वशिक्षितशुकोक्त्येव सार्वभौमः प्रियान्वितः॥

Colophon:

इति श्रीभगवद्रामानुजमतभूषणमाडपूशुतिरुवरङ्गमाण्डान् श्रीमत् श्रीरङ्ग-
राजमहादेशिकतनुजेन तदेकदैवत्येन तत्प्रसादलब्धवाजपे × जनग्रन्थ-
तावता श्रीशैलाचार्यदासेन विरचितस्तत्त्वविवेकः सम्पूर्णः॥

711

Sl. No. 38897 तत्त्वसारः Ms. No. P. 3082/2

Beginning:

श्रीविष्णुचित्तपदपङ्कजसङ्गमाय
चेतो मम स्पृहयते किमतः परेण।
नो चेन्ममापि यतिशेखरभारतीनां
भावः कथं भवितुमर्हति वाग्विधेयः॥ +

\+ + +

यश्चकार यतिराजभारती
चित्तवृत्तिषु चिरं परिश्रमम् ।
तस्य वैदिकसदश्शिखामणे-
रग्रतः क्व परवादिवैभवः ॥

End :

शेषत्वं ननु दुःखमीक्षितमतो मुक्तेरयुक्तं न तत्
मैवं माधवदास्य औपनिषदा जागर्ति भूयः प्रियम् ।
धर्मिग्राहकमानधिक्कृततमस्तद्दुःखतासाधनं
यद्वा तद्व्यतिरिक्तदास्यमसुखं साध्येत सिद्धं हि तत् ॥

वरदाह्वयमण्डनो मनीषी
यतिवृन्दारकभागिनेयपुत्रः ।
निगमान्तपयोधिकर्णधारः
विदधे शिष्यहिताय तत्वसारम् ॥

Colophon :

— — —

712

Sl. No. 38900 तत्त्वसारः **Ms. No. P. 5613/2**

Beginning :

इदं मायावादे विविधमुदितं दूषणमिह
स्वयंज्योतिर्ब्रह्म व्यपगतविशेषं यदि कथम् ।
मते तस्मिन्नसद्दृशि तु सविशेषः पुरुष इ-
त्यतद्रूपारोपस्त × ॥

अधिष्ठाने पुंसि---

End :

वरदाह्वयमण्डनो मनीषी
यतिवृन्दारकभागिनेयपौत्रः ।

निगमान्तपयोधिकर्णधारो
विदधे विश्वहिताय तत्त्वसारम् ॥

Colophon :

— — —

713

Sl. No. 38901 तत्त्वसारः Ms. No. P. 7443/2

Beginning :

× ष × पद्पङ्कजसङ्गमाय ।
चे तो मम स्पृहयते किमतः परेण ।
विदुषामेषा प्रौढी श्रियः प्रभूणां शफे × ।
× शकलं मन्ये माहक्प्रभावनिदर्शनम् ॥

+ शब्दाः किमर्थपरा इति श्रुतिरतस्तत्रैव मानं पुनः
प्रामाण्यं कथमश्नुवीत परिनिष्पन्ने परे ब्रह्मणि ।
अत्रोत्तरम् —

End :

सर्वप्रकारेण सर्वज्ञेष्वसंसारिषु + भोक्तृभोग्यभावसम्बन्ध शरीरशरीभावसम्बन्धं ज्ञातृज्ञेयभावसम्बन्धं तस्य च सर्वज्ञतां आत्मरक्ष्यरक्षक भावसंम्बन्धं अवजनितप्रीतिकारितकैंकर्यान्तर्यं समाप्नोति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजक श्रीनारायणयतिविरचितार्थपञ्चक × सम्पूर्णा ॥

714

Sl. No. 38902 तत्त्वसारव्याख्या Ms. No. P. 5243/2

Beginning :

ओं नमो भक्तिसाराय व्यवसायात्मने हरेः ।
दैत्यान् प्रच्छन्नदैत्यान् वा शस्त्रैः शास्त्रैर्विधून्वते ॥

चिकीर्षितस्य ग्रन्थस्य अविघ्नेन परिसमाप्त्यर्थं स्मृत्याचारसिद्धं मङ्गल-

माचरति—श्रीविष्णुचित्त +

End :

भाषामृतनिषेवणसुखपरवशेन स्वेमापि ग्रन्थकरणं प्रतिसंहितमिति सूचनाय परोक्षे लिडुक्तः ।

श्रीभाष्यमेरुकटकोदरलब्धमूर्ति
सौदर्शनोक्तिदृढपञ्जरपाल्यमानम् ।
सच्चण्डमारुतरयं विजयैकहेतुं
सारौघमाशयतु वो मणिसारिणीयम् ॥
नरसिंहगुरेः पुत्रो वरदार्यकृपाधनः ।
वीरराघवदासोऽहं तत्त्वसारं व्यचीचरम् ॥

Colophon :

इति श्रीवाधूलकुलतिलकश्रीनरसिंह गुरुवरतनयेन तच्चरणपरिचरणपरायणेन श्रीवाधूलवेङ्कटाचार्यसम्भव श्रीवरदगुरुनिर्व्याजदिव्यकरुणासमधिगतनिगमान्तयुगळहृदयेन वीरराघवदासेन विरचिता तत्त्वसारव्याख्या रत्नसारिणीसमाख्या सम्पूर्णा ॥

715

Sl. No. 38903 तत्त्वसारव्याख्या Ms. No. P. 3011/b

Beginning :

वेदान्ते योगिनां स्वान्ते रङ्गे च कृतसन्निधिम् ।
निधिं वन्देय जगतां इन्दिरामन्दिरं हरिम् ॥
श्रीतत्वसारं वरदार्यसूरेः
श्रीभाष्यसिंहासननाथपौत्रम् ।
जातं ग × रन्तदनुग्रहेण
व्याख्याति तद्वंशजसुन्दरार्यः ॥

इह खलु भगवान् वरदगुरुः + मङ्गळमाचरति श्रीविष्णुचित्तोति ॥

End :

तत्त्वसारं-तत्त्वसारसमाख्यं ग्रन्थं विदधे निर्मितवानित्यर्थः । सर्वेषु शास्त्रेषु वेदान्तानां सारभूतत्वेऽपि अतिविपुलतया वैविध्येन च तत्र तत्त्वनिर्णयस्य दुष्करतया +

सारसमाख्या ख्यातमेवेति भावः ॥
पूर्वाचार्यकृतीः प्रेक्ष्य सुन्दराह्वयधीमता ।
× धानां मुदे तत्वसारास्वादिन्यरच्यत ॥

Colophon

इति श्रीशैलकुल × श्रीम × यतातार्यकटाक्षलब्धसत्सम्प्रदायेन श्रीवत्सवंशमु × फल श्रीवरदाचार्यत × वेन श्रीसु × जाचार्येण कृता तत्वसारास्वादिनी सम्पूर्णा ॥

716

Sl. No. 38904 तत्त्वसिद्धिः Ms. No. C. 934

Beginning :

यन्नाभिपद्मरेणुर्विधिरपि पुरभिद्यन्मुखे स्वेदबिन्दुः
यत्पादाम्भोजभूमा दशशतननयनेनापि नाद्यापि दृष्टः ।
श्रेयः श्रीवासुदेवस्स दिशतु निगमव्रातगीतानुभाव-
स्सत्कर्मोदग्रबोधोदितनिजपदपाथोजभक्त्येकलभ्यः ॥

End :

अङ्गीकुर्वन्तु मा वा मम गिरमगिरो विस्मितास्सस्मिता वा
साहन्तानामुदन्ताः स्वदुरितस्वान्तजध्वान्तशान्ताः ।
निष्ठा येषां गरिष्ठा श्रुतिशिरसि पटिष्ठा च × सप्रतिष्ठा
भाषातत्त्वोपदेशापरिहृतकलुषास्पदशेषासुवेषा ॥ (?)

Colopnon :

इति श्रीभगवद्रामानुजाचार्यसिद्धान्ततत्त्वसिद्धौ पुरुषार्थनिष्कर्षाधिकारस्तुरीयः॥

717

Sl. No. 38905 तदुक्तार्थविलासः Ms. No. P. 1186

Beginning:

प्राच्चं कश्चन सैन्धवोत्तममुं राकेन्दुबिम्बोज्वलं
श्रीमन्मौलिपरिभ्रमत्सुरनदीपूरप्रियंभावुकः ।
वेदान्तार्यविपश्चिदेतदधुना श्रीकृष्णराजप्रभो-
रास्थानीमहितः × ॥

End :

प्रतिपत्तित्वाच्चाविरोधः ॥

मीमांसाद्वय + प्रज्ञावदग्रेसरः ॥

+ श्रीकृष्णभूपसभ्याग्रयः +

+ तदुक्तार्थविलासकम् ॥

तदुक्तार्थविलसाख्य + गुम्भितः ॥

Colophon

इति श्रीवंग्यधीशवंशजातेन वेदान्ताख्यदासेन विरचिते तदुक्तार्थविलासे चतुर्थः परिच्छेदः ॥

तदुक्तार्थविलासः सम्पूर्णः ॥

718

Sl. No. 38906 तदुक्तार्थविलासः **Ms. No P. 4083**

Beginning :

नमः प्राञ्चत्कञ्चनसैन्धवोत्तम × म् राकेन्दुबिम्बोज्वलं

वन्दे यत्पदपङ्कजं प्रणमतां मुक्ताग्रगाणामपि ।

वाग्गुम्भः प्रविजृम्भते प्रतिकलं सन्ध्यानटीधूर्जटीः

श्रीमन्मौलिपरिभ्रमत्सुरनदी पूरं प्रियंभावुकः ॥

× × ×

व्यासेनानुगृहीत × तदुक्तं त्विति ।

× तदधुना व्याख्याति × वंगिशवंशोद्भवः ॥

End :

विरुद्धार्थप्रतिपादनाभावात् पौनरुक्त्याभावात् कृत्स्नस्यापि पूर्वभागस्य वेदान्तभागोपयुक्तत्वाच्च सिद्धमैकशास्त्र्यमिति कृतं विस्तरेण ॥

Colophon :

इति वङ्ग्यधीशवंश्यजातेन वेदान्तदासेन विरचिते तदुक्तार्थविलासे तृतीयः परिच्छेदः ॥

719

Sl. No. 3 8911 **तुरीयशिवखण्डनम्** Ms. No. P. 3242

Beginning:

श्रीमन्नाराणोऽशेषजगज्जन्मादिकारणम् ।
अन्तरात्मा शिवादीनां अव्यादव्याजवत्सलः ॥
नारायणः परं ब्रह्म न ब्रह्मा न च शङ्करः ।
शास्ता जनानां सर्वात्मा ततो ज्यायांश्च पूरुषः ॥

End :

अनन्तकल्याणगुणाकारं परंज्योतिः परं तत्त्वं परमात्मा परंब्रह्म श्रीमन्नारायण एव अनन्तस्थिरफलप्रेप्सुभिः प्रतिबुद्धैरुपास्यत इति सिद्धम् ॥

Colophon :

इति तुरीयशिवखण्डनं ससाप्तम् ॥

720

Sl. No. 38913 **तैत्तिरीयोपनिषद्भाष्यम्** Ms. No. P. 221

Beginning :

यस्य ह्यानन्दपर्यन्ता यं त्वं प्रमुखा गुणाः (?)
अप्रमेयतयाम्नातास्तं श्रीशं संश्रयेमहि ॥
सांहितीष्वपि सन्धाता सर्वेशः प्रतिपाद्यते ।
वरीता वरणीयो वा वारुणो वारुणीष्वपि ॥

इह खलु संसारावर्तपरिश्रान्तमानसैस्तदुत्तरणप्रकारबुभुत्सुभिस्सर्वैश्चेतनैः + शं नो मित्र इत्यारभ्य द्वादशानुवाकाः × सन्धाता सर्वेश्वर इति —

End :

एवं भास्वरा मयूरश्री वा स एवं हि भगवद्रूपं शास्त्रेषु प्रतिपाद्यते वाराहे ब्रह्मा कमलगर्भाभो रुद्रः कालाग्निसन्निभः पुरुषः पुण्डरीकाभोरूपं तत् पर ×

Colophon :

— — —

721

Sl. No. 38914 त्रय्यन्तघण्टापथः Ms. No. P. 2409/2

Beginning

निसर्गभिदुरोऽपि सन् निखिलचेतनाचेतना-
स्समस्तजगदात्मकस्सकलशब्दवाच्यस्स्वयम् ।
अशेषवपुरुज्वलो हृतसमस्तहेयाकृति-
स्स ते भवतु केशवश्शुभगुणाश्रयः श्रेयसे ॥

+ सर्वेषां वेदान्तवाक्यानां विशिष्टाद्वैत एव तात्पर्यम् । तथापि कानिचिच्छास्त्राणि स्वरूपभेदं प्रतिपादयन्ति ॥

End :

तस्मान्निर्विशेषस्वरूपाभेदसाधकमानाभावाद्बाधकसद्भा × सद्भावाच्च सजातीय विजातीयादि सकलभेदविशिष्टं ब्रह्मैव तत्त्वमिति सिद्धम् ॥

पूर्वाचार्यतृणीकृतेर्बलवता प्राप्तोपरोधश्चिरं
मिथ्यावादिजनेन माधवकृपारूपैस्तदुच्छेदकैः ।
श्रीरामानुजविष्णुचित्तवरदव्यासादिभिर्देशिकै-
स्तत्वज्ञैरुपदर्शितोऽयमनघस्त्रय्यन्तघण्टापथः ॥

पूर्वाचार्यान् परमपदतश्शासनं मूर्ध्नि विष्णो-
र्धृत्वा विष्णुस्रजमिव जगत्पालनायावतीर्णान् ।
वाचां पूरैर्हरिपदनदीवीचिकानां सगर्भ्यै-
र्लोकान् पातॄन् यतिपतिमुखान् सन्ततं चिन्तयेऽहम् ॥

Colophon :

— — —

722

Sl. No. 38918 दशप्रकरणी Ms. No. C. 4481

Beginning :

ध्येयं सतां सर्वपदाभिधेयं
मेयं श्रुतीनामपि भागधेयम् ।

संत्यक्तहेयं चिदचित्स्वकायं
ब्रह्मद्वितीयं प्रणमाम्यमेयम् ॥

इहखलु भगवद्बादराणो मुपीशापनीषदः पुरुष इत्यादि ×

End :

श्रीशैलान्वय वेतालिमण्डन मणिश्री तातयार्याग्रणी
लक्ष्माम्ब। सहाण्णायार्य मखिना प्रसूतयं सादरम् ।
तेन श्रीनिधिनामकेन विदुषा सिद्धान्त चिन्तामणि
क्लिष्टो लुप्तपरोक्तिनिकरो भूयात्सतां प्रीतये ॥

Colophon :

इति श्रीमच्छमर्षण कुलतिलकनिखिल श्रीवेदान्ताद्युपनिषद्या + + व्याकरणशिक्षितमतेरण्णाचार्यदीक्षित सहजन्मनः श्रीनिवासचार्यस्य कृतौ दशप्रकरण्यां सिद्धान्तचिन्तामणिर्नामोपादनत्वसमर्थनप्रकरणं समाप्तम-भवत् ॥

723

Sl. No. 38921 दुरूहशिक्षा Ms. No. B. 797

Beginning :

अस्मद्गुरूणां पङ्क्ति ताममोघद्वयवासिताम् ।
भजामः श्रीशपादाब्जमधुधारात्मिकां पराम् ॥

सा × ज्यंववृत्तां वादिकलिसिंहाख्यं सद्गुरोः ।
यत्रोदितोक्तिस्वप्नोऽपि दाक्षिणात्येव भज्जतः ॥

End :

फलत्वैकश्रुतेस्तत्वामन्तेवाधिकारः न तु मोक्षकामनैवोपायविशेषणत्वेन तदन्वयावमेत्त्वोपायभूतो भवेति मोक्षस्य उपायनिरूपकत्वेन साक्षादकाम्यत्वात्॥

Colophon

इति श्रीरहस्यत्रय + श्रीनिवासपरकालयतिना वेदान्तयतिराज स्वामि शिष्येण लिखितायां पूर्वखण्डार्थ विषयदुरूहशिक्षायां श्रीशब्दार्थ निरूपित परप्रतिपादनार्थप्रतिक्षेपतः प्रथमः पादः ।

724

Sl. No· 38922 — दुर्वादिविजयकाहळी — Ms. No. P. 3106/1

Beginning :

पूर्वाचार्यप्रसादेन निर्वैरमनसां मुदे ।
कुर्वे द्युभ्वादिपादस्य दुर्वादिजयकाहलीम् ॥

तत्र तावदयं पूर्वाचार्याभिमतो घण्टापथः । पूर्वस्मिन्नधिकरणे द्युपृथिव्यादिसम्बन्धिनः परमात्मत्वमुक्तम् ।

End

पक्षनिर्देशरूपप्रयोजने सम्भवति स्थितगति × याटन्या यस्मात् ॥

प्राक्‌द्राविडागमगुरुः प्रीथतोऽथजातो
वाग्भूषणार्थविशदीकरणप्रवीणात् ।
यो भाग्याशेषफलमद्य ममाविरासीन्
श्रीशुद्धसत्त्वगुरुरेष शतं समाः स्यात् ॥

श्रीमान् × सेव्यतायै ॥

Colophon :

— — —

725

Sl. No· 38924 — नमकचमकव्याख्या — Ms. No. P. 1880/7

Beginning :

नमकं चमकं चैव शिवसार्वात्म्यबोधकम् ।
इति भ्रान्तिं निराकर्तुमिदमारभ्यतेऽधुना ॥

End :

एवमपौरुषेयेण ब्राह्मणेन अग्निचयनप्रकरणे शिवपरतया निर्णीतयोर्नमकचमकयोः शिवपरत्वं पौराणिकविनियोगानुगुणमपि अयुक्तमेवेति यत्किञ्चिदेतत् ॥

Colophon

इति श्रीशैल श्रीनिवासाचार्यविरचितं नमकचमकयो रग्निपरत्वं नाम प्रकरणम् ॥

726

Sl. No. 38925 नमश्शब्दार्थः Ms. No. P. 6154/1

Beginnig :

नमश्शब्दनिर्वचनम्—

नामयत्यपि वा देवं प्रह्वीभावयति ध्रुवम् ।
प्रह्वीभवति नीचे हि पनैरोच्यं विलोकयन् ॥
अतो वा नम उद्दिष्टं यत्तन्नामयति ध्रुवम् ।
वाचा नम इति प्रोच्य मनसा वपुषा च यत् ॥

End :

पन्था नकार उद्दिष्टः मः प्रधानो निरूप्यते ।
विसर्गः परमेशस्तु + यं निरूप्यते ॥
अनादिः परमेशो यः शक्तिमानच्युतः प्रभुः ।
स्वप्राप्तये प्रधानोऽयं पन्था नमननामवान् ॥

Colophon :

— — —

727

Sl. No. 38927 नयद्युमणिः Ms. No. C. 1168/a

Beginning :

द्रव्यत्वाषण्डद्रुमपरशुवचस्स्पष्टिमुष्टिन्धयश्री-
स्वामी रामानुजार्यो जयतु विधिवधूश्लाघितामोघशक्तिः ।
तद्भाष्यं चाप्यदूष्यं प्रभवतु कुहनाबद्धसिद्धान्तभेद-
श्रद्धालुध्वान्तसद्योविघटनचटुलो साध्यमध्याह्नभानुः ॥
हरेर्जिज्ञास्यत्वं तव मुनिरसकृ × थमभाक्
ब्रह्मेत्येतत्स्तवपदमसाधारणमभूत् ।
अथातश्शब्दाभ्यामपि विहितकर्मावगतिभिः
तदाराध्यो वेधस्त्वमिति निरणैषीत्करुणया ॥

End :

निरातङ्कं पङ्करुहनयनमङ्के निधिमिव
इति ब्रूते रूपं तव निरुपमानन्दममलम् ।
प्रवर्तन्ते सन्तः तदिदमवगन्तुं च बहुधा
क एवान्यात्प्राण्याद्यदि न हि तदानन्दमयता ॥

Colophon :

— — —

728

Sl. No. 38927 नयद्युमणिव्याख्या Ms. No. C. 1168/b

Beginning :

श्रीमत्त्रैऽयन्तसीमायुगळविभजनाखण्डपाण्डित्यभूमा
षट्तन्त्रोदन्तदन्तावळवलनसृणीबेभुवत्सूक्तिदादा ।
श्रीशैलाख्यान्वयेन्दुस्सुगुणगणनिधिस्सर्वतन्त्रस्वतन्त्रः
कारुण्यात्सन्निधत्तां मम हृदि सततं श्रीनिवासाचार्यवर्य ॥ +

+ स्वकृतब्रह्मसूत्रार्थ ह्यपद्यविवेचिनी ।
क्रियते श्रीनिवासेननयद्युमणिदीपिका ॥ +

इह खलु भवभयाहितबतभागधेयवैभव भावितावतरणेन भगवता बादरायणेन × प्रणीतानि ब्रह्मसूत्राणि + जिज्ञास्यत्वं भगवतः प्रथमतो वक्ति हरेर्जिज्ञास्यन्वमिति ॥

End :

न केनापि प्रकारेण ब्रह्मणश्शास्त्रप्रमाणकत्वं न सम्भवतीत्यनारभणीयो वेदान्तविचार इतीमामाशङ्कां निराकरोति– तत्तु समन्वयादिति सूत्रेण । तदेतदर्थतो विवृणोति— निरातङ्कमिति ॥

सर्वत्रापि मृद्घटादिदृष्टान्तवैघटयाच्चेत्यादिप्रकृत्यधिकरणे वक्ष्यते— तेजो × न्नाद्याकारेण परिणामश्चोत्तरवाक्येषु वक्ष्यमा ×

Colophon :

— — —

729

Sl. No. 38929 **नयमणिकालिका** Ms. No: A. 713

Beginnig :

मदनकदनवेल्लद्वल्लवीज।ललो-
लत्कुचतटघटनोद्यत्कुङ्कुमालङ्कृताङ्गः ।
निगमनिकरचूडाक्रीडलीलानुकूलः
कलयतु कोऽपि कामी मुदन्नः ॥

यद्यपि चेदं प्रकरणमुपयुक्तं चन्द्रिकानिराकरणे ।
तथापि प्रथमे सूत्रे प्रणववदाप्नोति किं न पार्थक्यम् ॥
इह कतिचिदतिसाहसिनः प्रथममथातो ब्रह्मजिज्ञासेति—

End :

किं वा नित्यः पञ्चचितयन्तु षष्ठी चितीं प्रतिष्ठया निमित्ते विधीयत इति चमनाञ्चीमिव चितिकं कस्मात् प्रमाणाभावात् न सूत्राणां प्रत्येकं प्रणवगर्भत्वमिति प्राहुः । तस्मादप्रामाणिकमिदं ध्वानमतानुवर्तिनामवयवत्व-कथनमिति सर्वं समञ्जसम् । (?)

Colophon :

श्रीमच्छ्रीशैलवंशाम्बुधिशशिकमलावासतातार्यपुत्रः
पौत्रश्चित्रापदानप्रगुणगुणनिधेरण्णयाचार्यनाम्नः ।
स्वाचार्याचार्यसेवासमधिगततोदन्तवेदान्ततत्त्वं
व्यातानीच्छ्रीवासो नयमणिकलिकां ध्वान्तदौर्गर्वहन्त्रीम् ॥

नयमणिकलिका समाप्ता ॥

730

Sl. No. 38930 **नानार्थकल्पवल्लिः** Ms. No: B. 828

Beginning :

यन्नानाविधनामरूपतनुभाग्जीवाख्यसस्यावहं
नोग्रं कैः न च सिक्तमम्बुभिरदः कालेन नो जीर्यते ।
नाप्याद्रीक्रियते जलेन न च वै सन्दह्यते वह्निना
तत्सर्वस्य निदानमन्तरहितं ब्रह्माख्यबीजं नुमः ॥

End:

तत्रैव—

मनसैव जगत्सृष्टिं संहारं च करोति यः ।
तस्याविपक्षक्षपणे कियानुद्यमविस्तरः ॥

तथापि यो मनुष्याणां धर्मः तदनुवर्तनम् ।
कुर्वन् बलवता सन्धिं × ॥

Colophon:

इति श्री हारीतकुलातिलक श्रीरङ्गराजदिव्याज्ञलब्ध श्रीपराशरनाम धेय श्रीपराशरभट्टारकवंशदुग्धपारावार + श्रीमदळहशिङ्गरिभट्टारकाग्र. तनय वेङ्कटभट्टाचार्यनाम्ना श्रीवैष्णवदासेन परिपोषितायां नानार्थकल्पवल्ल्यां + प्रथमो गुच्छः ॥

731

Sl. No. 38931 नानार्थकल्पवल्लिः Ms. No. B. 829

Beginning:

× हीनैः युद्धं करोत्यसौ ।
नाम × दानं च तथा भेदप्रवर्तनम् ॥

करोति दण्डपातं च क्वचिदेव पलायनम् ।
मनुष्यदेहिनां तेषामित्येवमनुवर्तते ।
लीलाजगत्पतेस्तस्य छन्दतस्संप्रवर्तते ॥

तत्रैवान्यत्र—

End:

एषा नानार्थकल्पद्रुमनुरचिता कल्पवल्ल्याह्वयेयं
माला सक्तेष्टवन्धोस्सुगुणमणिगुणस्यातिसुक्षीरसिन्धोः ।
श्रीरङ्गेन्दोः पदकिसलयद्वन्द्वविन्यासधन्या
लक्ष्मीयुक्तस्य तस्य प्रचुरतममुदे साम्प्रतं वौभवेत् ।

Colophon:

इति श्रीहारीतकुलतिलकश्रीरङ्गराजदिव्याज्ञालब्धश्रीपराशरनामधेयश्रीपराशरभट्टारकवंशदुग्धपारावारशरच्चन्द्रकाशशांकायमानश्रीमदळपहिशिंगरिभट्टारकाग्र.

तनयेन वेंकटभट्टराचार्यनाम्ना श्री वैरगरदासेन परिपोषितायां नानार्थ कल्पवल्ल्यां फलप्रकरणं नाम चतुर्थो गुच्छः समाप्तः । समाप्तश्चायं ग्रन्थः ॥

732

Sl. No. 38940 नानार्थकल्पवल्लिः Ms. No. C. 4529

Beginning:

अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्ततिग्मांशुजाले ।
निरवधिकरुणाब्धौ वेदचूडागुरौ मे
भवतु परमभक्तिः श्रीनिधौ वेङ्कटेशे ॥
+ तत्र निक्षेपन्यासापरपर्याय प्रपत्तिविद्यायाः अङ्गानि—
आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।

End:

दृप्तप्रपन्नस्य × जीवनहेतु दृष्टौषधादिपानमवश्यं कार्यम् एवमन्यदपि देशिकनिबन्धनादाववलोक्य अनुष्ठेयमिति संक्षेपः ॥

Colophon:

इत्यात्रेयकृष्णार्यतनुजेन तच्चरणकमलचञ्चरीकेण श्रीमद्वेदान्तरामानुज योगीन्द्रमहादेशिककटाक्षलब्धवेदान्तरहस्यजातेन गोपालदासेन विरचिते निक्षेपचिन्तामणौ द्वितीयोऽधिकारः ॥

733

Sl. No. 38941 निरपेक्षरक्षा Ms. No. P. 651

Beginning;

संसाराध्वगतागतश्रमहरस्सर्वापगाद्यावयः
श्रीसंश्लेषसमुल्लसद्घनरसश्शीतस्त × तोमहः ।
नेदिष्ठेन महापथेनुगमो येषां प्रसादाद ×
तीर्थं तत्र शुभं प्रकाशयतु नस्तेभ्यो गुरुभ्यो नमः ॥
प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
हस्तः श्रीरङ्गभर्तुर्मामव्याद्भयमुद्रितः ॥

स्थितं तावदिह बाह्याभ्यन्तरकरणग्रामं × भगवन्तमनु भवति

प्रत्यगात्मेति ।

End :

प्रशंसामात्रस्य च प्रयोजनमान्द्यात् । अधिकस्य चानुपदेशात् । अतस्समस्ताभिमतसाधनस्वतन्त्रप्रपत्तिविषय एवायं श्लोकः ।

सुदुष्करेण शोचेद्यो येन येनेष्टहेतुना ।
स स तस्याहमेवेति चरमश्लोकसङ्ग्रहः ॥

गुरु चरण सपर्यास्वादवैदेशिकानां
प्रलपितमवधूय प्राक्तनेनाध्वनैव ।
व्यवृणुत परमार्थं वेङ्कटेशः प्रजानां
निगमगिरिनिगूढं न्यासविद्यानिधानम् ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनायस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु निक्षेपरक्षा सम्पूर्णा ॥

734

Sl. No. 38937 | निक्षेपरक्षाव्याख्या | Ms. No. B. 559

Beginning :

वधूटीवक्षोजद्वितयघुसृणालिप्तहृदये
दयासिन्धुर्बन्धुर्दनुजशिशवे स्तम्भजननः ।
मुखे सिंहः श्रेयस्सुरनरतिरश्चामपि विभुः
स्वयं देवो देयाद्यदुशिखरिशृङ्गाग्रवसतिः ॥
टीकां निक्षेपरक्षायाः नानागुरुमतानुगाम् ।
यथाश्रुति यथान्यायं करोमि कृपया गुरोः ॥

Colopho :

इत्थं वेङ्कटदेशिकेन्द्रकथितां निक्षेपरक्षामिमां
व्याख्यां + श्रीसिंहदेवः सुधीः ॥

सम्प्रदायागता ह्यर्थाः व्यलेखि प्रायशो मया ।
अत्रातिक्रमदोपश्चेत् क्षन्तव्यः साधुबुद्धिभिः ॥

Colophon :

इति श्रीनिगमान्तवेद्य विद्याकुमुदिनीमोदकस्य कुशिककुलजलधि-चन्द्रस्य वेदान्ताचार्यस्य भागिनेयेन वत्सकुलजलधिकौस्तुभनृसिंहसूरितनयेन सिंहदेवेन रचिता निक्षेपरक्षाव्याख्या समाप्ता ॥

735

Sl. No. 38938 — निक्षेपसिद्धाञ्जनम् — Ms. No. P. 4915/1

Beginning :

आरभ्यास्मद्गुरोरा च श्रीधरात् प्रथितान् गुरून् ।
प्रणम्य कुर्वे निक्षेपसिद्धाञ्जनमनाविलम् ॥

अधिकारः प्रपदने × विशेषतः ॥
एतेन तेनाप्येतत्तन्न्यासेनैव पुनः पुनः ॥
श्रुत्या प्रपत्तिरखिल × प्रपूरणी ॥

End :

साङ्गविद्याप्रसिद्धत्वं भाव्यमेव द्वयोरपि ।
विशेष्यमात्मभावे तु विद्या स्याद्विकला ध्रुवम् ॥
श्रीसहायः परं तत्त्वं तत्प्रपत्तिश्च मुक्तिदा ।
सम्पूर्णतच्छेषवृत्तिः मुक्तौ सत्यमिदं ध्रुवम् ॥

Colophon :

इति श्रीभगवद्रामानुजमतभूषणमाडपूशुतिरुमलैयाण्डान् तिरमलै श्रीरङ्गराजमहादेशिकतनूजेन × श्रीशैलाचार्यदासेन विरचितं निक्षेपसिद्धाञ्जनं सम्पूर्णम् ॥

736

Sl. No. 38943 — निर्गुणत्वखण्डनम् — Ms. No. P. 7470/1

Beginning :

ब्रह्मसाद्गुण्यनैर्गुण्य घटनैस्त्रिविधां त्रयीम् ।
एकधा वदतीं नित्यं अर्थामिष्टां न मन्महे ॥

इह तावदचिन्त्य × विस्तरविचित्ररचनास्पदस्थिरत्रसभिदुर निखिलजगज्जननरक्षणक्षपणलीलादक्षिणं परं ब्रह्म—

End :

निश्शब्दो निष्प्रत्यूहः इत्यादिषु तथैव × न हि घट वति × सजातीयातिशय × छागपशुन्यायः। विधे सामान्यविषयत्वेऽपि तस्य × × प्रतिपत्तिविरोधान्न प्रयोगः—

Colophon :

— — —

737

Sl. No. 38999 निर्विशेषनिरासः Ms. No. P. 3039/3

Beginning :

समाराध्य श्रीशं निखिलगुणवाराशिममलं
यतीनां सम्राजः पदयुगलमाराध्य बहुधा ।
विधत्ते वादार्थं कमपि विशदं कौतुकवशात्
अनन्तार्यः श्रीमत्फणिपगुरुवंशाम्बुधिशशी ॥

यत्तावदुक्तं महासिद्धान्तारम्भे —निर्विशेषवस्तुवादिभिः निर्विशेष-वस्तुनि—

End :

निर्विशेषत्वव्युदासपूर्वकं तदविरोधेन वेदान्तवाक्यानि स्वरसतो ऽप्याख्यायन्त इति सिद्धान्तस्य पूर्वपक्षक्रमाननुरोधित्वेऽपि न क्षतिरिति ॥

Colophon :

इति शेषार्यवंशतिलकस्य यादवाद्रिनिवासरसिकस्य अनन्ताचार्यस्य कृतौ निर्विशेषप्रमाणनिरासवादः ॥

शेषाद्रिवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

738

Sl. No. 38947 नीतिमाला Ms. No. P. 1592/2

Beginning :

विचारोऽप्यपेक्षितत्वात् कर्तव्य एव। कर्मविचारस्य कर्तव्यतायां सत्यां (?) कर्मणां साधनत्वात् तद्विचारस्यैव प्राथम्यमुचितम्। अनुष्ठिते साधने साध्य निर्णयानुपपत्तेः अश्चिन्तायाः प्रागेव साधनभूत यागादिचिन्ता क्रियते। अतः कर्म ब्रह्मविचारयोः पौर्वापर्यमुपपन्नम्। किञ्च नित्यनैमित्तिकानां कर्मणाम करणे प्रत्यवायबाहुल्यं श्रतिभिरुद्धोष्यते। अतोमुमुक्षुरपि प्रथमं कर्मविचारे प्रवर्तते।

End:

स्त्रीणां पारतन्त्र्यस्य श्लाघ्यत्वात् तेषामेव स्वातन्यत्र्स्य निन्दितत्वात् सेवार्थ प्रवृ × अनेनाप्यनर्थहेतुभूतासेव्यसेवा निषिध्यते। न सेवामात्रम्। इतरधा ह्यन्तेवासिनामाचार्यसेवाया अशास्त्रीयत्वप्रसङ्गात् × ज्ञानानन्दाद्यस ङ्ख्यकल्याणगुणगणस्य सर्वस्वामिनः परमपुरुषस्यानुभवशेष शेषभूतस्य मुक्तस्य परिचर्यारसमावहिर्तािति × भगवदनुभवः परनिश्रयेसमिति सर्वं समञ्जसम्॥

Colophon

इति निश्रेयसाधिकारो दशमः॥

739

Sl. No. 38950 न्यायकुलिशम् Ms. No. A. 355

Beginning :

यस्मादस्माभिरेतद्यतिपतिकथितप्राक्तनप्रक्रियोद्यत्
कर्मब्रह्मावमर्शप्रभवबहुफलं सार्थमग्राहि शास्त्रम्।
तं विष्वग्भेदविद्यास्थितिपथविषयस्थेयभूतं प्रभूतं
वन्देयात्रेयरामानुजगुरुमनघं वादिहंसाम्बुवाहम्॥

अभेद्यं सर्वथा ... न्यायकुलिशम्॥

सिद्धे वेदान्तवाक्यानां प्रामाण्यस्य प्रसिद्धये ।
व्युत्पत्तिरपि तत्रास्ति शब्दानामिति वक्ष्यते ॥

तत्र केचिदाहुः—
नैककश्येन शब्देषु व्युत्पादोऽङ्गुलिमुद्रया ।
असिद्धे बोधकत्वस्य न चैवं ह्यन्विताभिधा ॥

End:

अतः अनुगूहत्वमेव इतरेषामिति तदपि प्रत्युक्तः । अर्थान्तरस्य अवयविसंज्ञस्य तत्सं × रभे हि तदवकाश इति ॥

Colophon

इति भगवद्रामानुजमुनिवरमतधुरन्धरस्यात्रिगोत्रप्रदीपश्रीपद्मनाभार्य-नन्दनस्य वादिहंसनवाम्बुदस्य श्रीमद्रामानुजाचार्यस्य कृतिषु न्यायकुलिशे सत्कार्यवादोऽष्टमः ॥

740

Sl. No. 3895 न्यायकुलिशव्याख्या **Ms. No. B. 1163**

Beginning :

इदं न्त्विह वक्तव्यं कथं संस्थानमेव जातिरिति तत्र ह्येते वदन्ति ।
भेदेष्वेकानुवृत्ता हि जातिः प्रत्यक्षमीक्ष्यते ।
तदसिद्धौ न सिध्येयुः शब्दादीनां प्रवृत्तयः ॥

पश्यामो हि वयं खण्डादिष्वनुगतं हस्त्यादिभ्यो व्यावृत्तं गोत्वं कश्चिच्च दृष्टहस्ति जातीयोदृष्टतज्जातीयं प्रतिब्रवीति ।

End:

तद्वेदनं हि कर्मयोगादि साध्यं विशदतमापरोक्ष्यापन्नं भगवदानुकूल्य प्रतिभासलक्षणप्रतिबन्धित प्राचीनकर्मसञ्चयं विनाशयति। अतो भक्तिनिष्पत्यङ्ग मित्यत्वस्साध्या × योगाधिगमेन देवन्मत्वेत्यादिषु ×

Colophon :

इति भगवद्रामानुजमुनिवरमतदुरन्धरस्य अत्रिगोत्रप्रदिप श्रीपद्मना-भार्यनन्दनस्य वादिहंसनवाम्बुदस्य श्रीमद्रामानुजार्यस्य कृतिषु न्यायकुलिशे शरीरलक्षणवादो द्वादशनाद समाप्तः ॥

741

Sl. No. 38955 न्यायकुलिशम् Ms. No. C. 840

Beginning :

पत्युः संयमिनां प्रणम्य चरणौ तत्पादकोटीरयोः
सम्बन्धेन समिध्यमानविभवान् धन्यांस्तथान्यान् गुरून् ।
शुद्धं संश्रितबादरायणतनोः नारायणस्योक्तिभिः
श्रीमान् वेङ्कटनायकः स्थितिपदं निर्माति नीतेश्शुभम् ॥

विद्यास्थानेषु धर्म्येषु गण्यते न्यायविस्तरः ।
स च विप्लावितस्तैस्तैः ततोऽत्र परिशोध्यते ॥

End :

यत्रोदासत जैमिनिप्रभृतयः श्रुत्यर्थचिन्तापराः
यस्यां कन्दळयन्ति मन्दमतयः पारिप्लवान् विप्लवान् ।
विश्वेषामिह वेङ्कटेशविदुषा विश्रान्तये वादिनां
प्राची नीतिषु पर्यशोधि सरणिः प्रच्छायनिष्कण्टका ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायपरिशुद्धौ प्रमेयाध्याये द्वितीयमाह्निकम् । समाप्तश्चाध्यायः शास्त्रं च समाप्तम् ॥

742

Sl. No. 38956 न्यायपरिशुद्धिव्याख्या Ms. No. P. 2675

Beginning :

श्रीमान् वेङ्कटनाथार्यः + सदा हृदि ॥

गुरुपङ्क्तिहारयष्टिं गुणरमणीयां सतां सदा हृद्याम् ।

श्रीम ङ्कटनायक भूषितभागद्वयामीतमां × ॥

× समाधववंश्येन नीतिपरिशुद्धेः ।

व्याख्या विशदार्थपदा विरच्यते श्रीनिवासदासेन ॥

भगवान् परमकारुणिको भगवत्प्रसादलब्धवेदान्ताचार्यापरगुणसमाख्यः श्रीमान्वेङ्कटनाथः चिकीर्षितस्य न्यायपरिशुद्धाख्यस्य ग्रन्थस्य + मङ्गळमाचरन् विषयप्रयोजने निर्दिशति–पत्युस्संयमिनामिति ॥

End :

प्रवृद्धिर्भक्तिश्चेत् भवति परमाचार्यपदयोः
वयं तद्भक्तत्वादभिमतपदं वो यदि मताः ।
तदा दोषादधिप्र × एव रससारेण—
× स्यात्कृतिरनघभावस्सुमनसः ॥

Colophon :

न्यायपरिशुद्धिव्याख्या न्यायसारसमाख्या सम्पूर्णा ॥

743

Sl. No. 38958 न्यायपरिशुद्धिव्याख्या **Ms. No. P. 3738/1**

Beginning :

गुरुपङ्क्तिहारयष्टिं गुणरमणीयां सतां सदा हृद्याम् ।
श्रीमद्वेङ्कटनायकभूषितभागद्वयीं नमामि तमाम् ॥
द्रविडोपनिषद्देशिकमाधववंश्येन नीतिपरिशुद्धेः ।
व्याख्या विशदार्थपदा विरच्यते श्रीनिवासदासेन ॥

भगवान् परमकारुणिको भगवत्प्रसादलब्धवेदान्ताचार्यापरगुणसमाख्यः श्रीमान् वेंकटनाथो गुरुः चिकीर्षितस्य + पत्युस्संयमिनामिति ॥

End :

यदुक्तेरुल्लासः कविकथकदर्पप्रशमनो
यदीयाङ्घ्रिश्रद्धा प्रगुणयति तत्त्वं व्यवसितम् ।
प्रनिष्ठातर्काणां भवति च यदुक्तेः करणतः
स वेदान्ताचार्यः शमयतु ममाघं बहुमुखम् ॥
प्रवृद्धा भक्तिश्चेद्भवति परमाचार्यपदयो–
र्वयं तद्भक्तत्वादभिमतिपदं वा यदि मताः ।
तदा दोषादर्शिप्रणयरससारेण मनसा
परिग्राह्योऽयं स्याद्गुरुरनघभावाः सुमनसः ॥

Colophon :

इति श्रीमद्वेदान्ताचार्यचरणारविन्दानुसन्धानविशदप्रबोधेन भारद्वाज-
कुलजलधिकौस्तुभ श्रीदेवराजाचार्यसूनुना श्रीनिवासदासेन विरचितायां न्याय
परिशुद्धिव्याख्यायां न्यायसारसमाख्यायामनुमानाध्याये चतुर्थं प्रमाणाभा-
साह्निकम् ॥

744

Sl. No. 38961 न्यायपरिशुद्धिव्याख्या Ms. No. A. 778

Beginning :

वन्दे द्वन्द्वं श्रितपरतन्त्रं निदानमखिलानाम् ।
दशरथजनकापत्यं स्थिरवाणीमौलिभूषणं किमपि ॥
लक्ष्मीकुमारताताार्यदेशिकवंश्येन कृष्णातातेन ।
न्यायपरिशुद्धिटीका क्रियते सन्न्यायदीपिकाभिख्या ॥
प्रारिप्सितग्रन्थाविघ्नपरिसमाप्तिप्रचयगमनादिप्रयोजनाय +
मङ्गलसिद्धये च ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते— पत्युरिति ॥

End :

हेतोरवृत्या साधनाव्यापकत्वं इत्यर्थः । सपक्षे साध्यवत्तया निश्चिते
साध्यवदिति यथा पक्षातिरिक्ते सर्वत्र हेतुमति साध्यनिश्चयात्—

Colophon :

— — —

745

Sl. No. 38962 न्यायपरिशुद्धिव्याख्या Ms. No. P. 1010

Beginning :

शब्दाध्यायमारभते। येति हेतुहेतुमद्भावं सङ्गतिमाह अनुमोदयमिति ।
तयोर्मध्ये संस्थितं अनुमानस्मृत्योर्मध्य इह हेतुसमाप्त्यनन्तरप्रकरणं इदानीं
हेतुरूपानुमानस्य समाप्तत्वादनन्तरमित्यर्थः ।

End :

पुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तित्वातिह (?)न्यू (?) त्तत्रोक्तम् ।
अस्तु तस्याप्य चिंरादिगति (?) चेत्न । अप्रतीकालं प्रति (?) कालम्ब नाति
विशेपितत्वात् । इदमप्यप्रतिकालम्बनमिति चेत् न । मनआलम्बनस्याप्य
प्रति (?) ॥

इदमप्यप्रतीकालम्बनमिति चेत् न । मन अलाम्बनस्याप्यप्रतिं ×

न्यायपरिशुद्धि व्याख्यानं समाप्तम् ॥

Colophon:

[इति कवितार्किक मतङ्गजकेसरिणस्सर्वतन्त्रस्वतन्त्रस्य श्रीपराङ्कुश यतिपतिपादसरोरुह प्र (? भ्र) मद (? र) स्य श्रीमदहोबलार्यकृपापात्रस्य श्रीनिवासशठगोपयतेः कृतौ न्यायपरिशुद्धिनिकषाख्यायां व्याख्यायां शब्दाध्याये ×] ॥

[न्या × द्धिघटनाख्यायां प्रमेयाध्याये प्रथमह्निकं समाप्तम् ।]

746

Sl. No: 38966 न्यायरत्नावली Ms. No. P. 1985

Beginning:

स्वामी समस्तजगतामपि यः पुरासौ
दूतो बभूव विनतस्य मृदङ्गकेतोः ।
स्वां दर्शयन् प्रणतकिङ्करतां स देवः
श्रेयांसि मे दिशतु वृष्णिकुलाधिराजः ॥ +

श्रीमदादिवराहार्यान् वेंकटेशगुरोस्सुतान् ।
वन्दे येषां प्रसादेन वस्तुभावं गतोऽस्म्यहम् ॥ +

न्यायाभा^(सै)र्मुषितमतयो मध्वसिद्धान्तनिष्ठाः +
तेषां दर्पं विबुधपरिषत्प्रीतयेऽद्य क्षिपामः ॥
पश्यन्त्वार्याः विमलमनसः प्रीतिपूर्वं कृतिं नः ॥
न्यायरत्नावली सेयं कुमतिध्वान्तसन्ततिम् ।
विलोपयति, धीराणां मण्डनाय च कल्पते ॥

End:

अत्यर्थं प्रतिरूपत्वात्साधनत्वे मुदीरितम् ।
तारतम्यपराया च परैः स्तुतिरुदाहृता ॥
सा तु श्रुतिविरुद्धत्वान्न प्रमाणमिति स्थितिः ।
सालोक्यादिपरा या च तारतम्यपरा स्मृतिः ॥
तत्सर्वथापि मुक्तानां भोगसाम्यं व्यवस्थितम् ॥

Colophon :

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसम्प्रदायप्रवर्तकपरवस्तुवेङ्कटेशदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रवेदान्तानुज श्रीमदादिवरहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य कोनेट्यम्बागर्भसम्भवस्य वेदान्ताचार्यस्य कृतिषु न्यायरत्नावल्यां द्वितीयः परिच्छेदः ॥

747

Sl. No. 38967 न्यायसंग्रहः Ms. No. P. 8541/2

Beginning :

श्रीविष्णुचित्तपदपङ्कजसङ्गमाय
चेतो मम स्पृहयते किमतःपरेण ।
नोचेन्ममापि यतिशेखरभारतीनां
भावः कथं भवितुमर्हति वाग्विधेयः ॥

यश्चकार यतिराजभारती–
चित्तभित्तिषु चिरं परिश्रमम् ।
तस्य वैदिकसदशिखा ́णेः
अग्रतः क्व परवादिरम्भभवः ॥

ओं प्रथमाधिकरणे । अन्यल व्य × तो न × त्पचिन्यत था कश्चित् कार्यधियः कथं व्यवहरेत् । इत्थं च निश्चीयते ॥

End :

आविर्भावस्वरूपस्य परानुभवरूपणम् ।
मुक्तस्वरूपनिष्कर्षः सत्यसङ्कल्पता तथा ॥
स्वेच्छया सर्वसम्भोगो मोक्षस्य च फलोदयः ।
इत्येव × त्पादेनानेन चिन्तितम् ॥

चतुर्थस्याऽध्यस्य चतुर्थः पादः ॥

समाप्तश्चाऽयायः ॥

Colophon :

इति न्यायसङ्ग्रहः समाप्तः ॥

748

Sl. No. 38969 न्यायसिद्धाञ्जनम् Ms. No. P. 217

Beginning

जयति सकलविद्यावाहिनी जन्मशैलो
जनिपथपरिवृत्तिश्रान्तविश्रान्तशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥

End:

ततश्च सन्ततिस्मृत्याऽनुगृहीतेन चक्षुषा ।
विज्ञायमानं ब्राह्मण्यं प्रत्यक्षत्वं न मुञ्चति ॥
तथा च दृश्यते नानासहकारि व्यपेक्षया ।
चक्षुषो जातिविज्ञानजनकत्वं यथोदितमित्यादि ॥

Colophon:

इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायसिद्धाञ्जनं सम्पूर्णम् ॥

749

Sl. No. 38897 तत्त्वमुक्ताकलापः Ms. No. P. 3687/1

Beginning:

श्रीमद्वेङ्कटना × पर्यपर्यासधीः ।
लब्धार्थो वरदार्यपादरसिकाद्रामानुजा × ॥
× ददर्शां सम्यक् × य तनुते सत्तर्कसिद्धाञ्जनम् ॥
सदसद्भूतिकाभेदैस्तत्तत्सिद्धान्तनाटकैः ।
उपप्लुतस्य तत्वस्य शुध्यर्थोऽयमुपक्रमः ॥
यन्न्यायपरिशुध्यन्ते सङ्ग्र × प्रदर्शितम् ।
पुनस्त × रेणात्र प्रमेयमभिदध्महे ॥
अशेषचिदचित्प्रकारकमेव तत्वम् ।

End:

ज्ञायमानं ब्राह्मण्यं प्रत्यक्षत्वं न मुञ्चति ।
तथा च दृश्यते नानासहकारिव्यपेक्षया ॥
चक्षुषा जातिविज्ञानजनकत्वं यथोदितम् ॥ इत्यादि ॥

Colophon

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु द्रव्यपरिच्छेदस्समाप्तः ॥
न्यायसिद्धाञ्जनं समाप्तम् ॥

750

Sl No. 38979 न्यायसिद्धाञ्जनव्याख्या Ms. No. P. 8634

Beginning

श्रीरामानुजभाष्याध्वा येन निष्कण्टकीकृतः ।
जयन्तु कृतयस्तस्य निगमान्तगुरोश्शुभाः ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं शिष्टाचारप्राप्तं गुरुपरम्परास्मरणरूपं मङ्गलं दर्शयति—श्रीमद्वेङ्कटनायकः + सिद्धञ्जनम् इति ।

End:

उपकारकल्पने क्लृप्तो विनियुक्तः पदार्थानुगुण एवोपकारः कल्पनीयः इति सम्प्रतिपत्त्यैव बाधलक्षणस्य × × विकृतिषु प्राकृतान्वयः समर्थितः ।

Colophon:

— — —

751

Sl. No. 38983 न्यायसिद्धाञ्जनव्याख्या Ms. No. C. 438/2

Beginning:

अतसीगुच्छसच्छायं अञ्चितोरस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥

श्रीमत्तातार्यपादाब्जे हृदये भावये शुभे ।
आत्मानं लभते जातुः ययोस्स्वात्मर्पणात् ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्तये + ; ग्रन्थान्तरवैलक्षण्यं च दर्शयति—श्रीमद्वेङ्कटनायक इति ॥

End:

यथोचितं जातिविज्ञानजनकत्वं चक्षुषो युज्यत इति भावः ।

न क्वाप्यतः परमदृश्यत कोशशेषः,
तच्छेषपूरणकृतिः परिहासहेतुः ।
ज्ञातव्यमन्यदपि तैः निरणायि सम्यक्
ग्रन्थान्तरेष्विति न किञ्चिदिहास्ति चिन्त्यम् ॥

Colophon

इति श्री रङ्गरामानुजमुनेः कृतिषु न्यायसिद्धाञ्जनटीकायां अद्रव्यपरिच्छेदः ॥

श्रीरामानुजभाष्याध्वा येन निष्कण्टकीकृतः ।
जयन्तु कृतयस्तस्य निगमान्तगुरोश्शुभाः ॥

752

Sl. No. 38984 न्यासतिलकम् **Ms. No. P. 1170/5**

Beginning :

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहि ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥ १ ॥
प्रायः प्रपदने पुसां पौनःपुन्यं निवारयन् ।
हस्तः श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः ॥२ ॥

End:

निधानं रङ्गाधीशादधिगतवतो वेङ्कटकवेः
स्फुरद्वर्णं वक्त्रं परिकलयतां न्यासतिलकम् ।
इहामुत्राप्येषःप्रणतजन चिन्तामणिगिरिः
स्वपर्यङ्के सेवां दिशति फणिपर्यङ्करसिकः ॥

[Co]lon

इति न्यासतिलकम् ॥

753

Sl. No. 38987 न्यासतिलकव्याख्या Ms. No. P 1170/4

Beginning

श्रीमत्त्रय्यन्यन्तसिद्धान्तदेशिकेन्द्रेण दर्शितम् ।
वक्त्रे भजध्वं तिलकं वरेण्यं न्यासशालिनाम् ॥
विश्वामित्रकुलोद्भूतवरदार्येण वर्ण्यते ।
आचार्यरचिन्तयासतिलकस्यार्थनिर्णयः ॥

अत्र खलु आचार्यतातपादनिर्मितस्य न्यासतिलकस्य तात्पर्यं दिङ्मात्रेण श्रोतृजनसम्प्रीतये प्रकाशयामि ।

End :

स्फुरद्वर्णं स्फुटाक्षरं अन्यत्र स्फुरद्वर्णविशेषं वेङ्कटकवेः वक्त्रस्फुरद्वर्णं न्यासतिलकं वक्त्रे परिकलयतामिति । वक्त्रशब्दः काकाक्षिन्यायादुभयत्रान्वेतीति सर्वमवदातम् ॥

इत्थं त्रय्यन्तसिद्धान्तगुरुपुत्रेण वर्णितः ।
आचार्यरचितन्यासतिलकस्यार्थनिर्णणः ॥

Colophon :

इति न्यासतिलकव्याख्या ॥

754

Sl. No. 38992 न्यासतिलकव्याख्या Ms. No. C 931/b

Beginning :

श्रीमान्वेङ्कट + सदा हृदि ॥
वाधूलश्रीनिवासार्यं श्रीनिवासगुरुं भजे ॥
श्रीमत्त्रैय्यन्तसिद्धान्तदेशिकेन्द्रेण वर्णितम् ।
वक्त्रे भजध्वं तिलकं बरेण्यं न्यासशालिनाम् ॥

अत्र खलु भगवान् वेदान्ताचार्यः—

× गुरुपरम्परां नमस्करोति—गुरुभ्य इति ॥

End :

अन्तरङ्गतयाधिकृत्य तस्मै स्वसमानभोगान् दास्यति तद्वद्विभावः ॥
वेदान्ताचार्यपद्यानां + प्रसादतः ॥
श्रीमद्वेङ्कटनाथाय + विशोध्यताम् ॥
वेदान्ताचार्यसंदर्भे + कृतेयं न्यासतिलकव्याख्या ग्राह्या विचक्षणैः ॥

Colophon :

इति श्रीन्यासतिलकव्याख्यानं सम्पूर्णम् ॥

755

Sl. No. 38995 न्यासदशकम् Ms. No. P. 2406/2

Beginning :

अहं मद्रक्षणभरो मद्रक्षणफलंतथा ।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥
न्यस्याम्यकिञ्चनःश्रीमन् अनुकूलोऽन्यवर्जितः ।
विश्वासप्रार्थनापूर्वमात्मरक्षाभरं त्वयि ॥
स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम् ।
स्वदत्तस्वधिया स्वार्थं स्वस्मिन्न्यस्यति मां स्वयम् ॥

End :

अकृत्यानां च करणं कृत्वानां वर्जनं च मे ।
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो ॥
श्रीमन्नियतपञ्चाङ्गं मद्रक्षणभरार्पणम् ।
अचीकरः स्वयं स्वस्मिन्नतोऽहमिह निर्भरः ॥

Colophon :

— — —

756

Sl. No. 38998 न्यासदशकम् Ms. No. P. 1170/1

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

वेदान्ताचार्यगुरुर्यदिदं न्यासस्य दशकमाचष्ट ।
व्याख्याति तत्समासात्श्रीभाष्य श्रीनिवास इह सूरिः ॥

इह खलु सात्विकजनानुप्रेरितः श्रीमान् वेदान्ताचार्य इति जगत्प्रसिद्धः श्रीमान् वेङ्कटनाथार्यः न्यासविद्यायाः स्वरूपं स्वभावं च प्रपत्तिशास्त्रप्रपञ्चितं विरलबुद्धीनां सुग्रह का ×

End:

हे श्रीमन् श्रियः पते स्वयमेव–प्रार्थनां विना आदौ मम जीवनतुष्टिं कुर्वन् आचार्यसमाश्रयणद्वारा स्वस्मिन् परमशेषिणि प्राप्ये सर्वज्ञे सर्वशक्ते त्वयि नियतानि नियमेन स्वीकर्तव्यानि पञ्चाङ्गानि अहं त्वयि न्यस्तभरः ततः कर्तव्यशेषरहितः भरन्यासात् परस्मिन् काले निर्भरः–विगलितभरः अस्मीति सर्वं सुस्थम् ॥

Colophon :

इति श्रीभाष्य श्रीनिवासकृतन्यासदशक व्याख्या सम्पूर्णा ।

757

Sl. No. 39002 न्यासदशकम् Ms. No. P 5596/4

Beginning:

[कौशिकान्वयसम्भवः] ॥
वेदान्ताचार्यगुरुर्यदिदं न्यासदशकमाचष्ट ।
व्याख्याति समासात् श्रीभाष्यश्रीनिवास इह सूरिः ॥

इह खलु सात्विकजनानुजिघृक्षया श्रीमद्वेदान्ताचार्य इति जगति विख्याताः श्रीवेङ्कटनाथार्याः न्यासविद्यास्वभावं च प्रपत्तिशास्त्रप्रपञ्चितं विरलबुद्धीनामपि सुखग्रहणाय दशभिरनुष्टुभैः पद्यैः सञ्जगृहुः । +

End :

श्रीवेङ्कटेशगुरुशेखरोदितां
न्यासविंशतिमुदारगुम्भनाम् ।

End :

व्याकरोति तदनुग्रहात्स्फुटं
श्रीनिवास इह कौशिकान्वयः ॥

इह भरन्यासात् एकस्मिन् काले निर्भरो विगतसर्वभारोऽस्मीति सर्वं समञ्जसम् ॥

श्रीन्यासदशकव्याख्या सेयं संक्षेपतः कृता ।
हृद्या सुधीभिर्हृदये नित्यं धार्यार्थसिद्धये ॥

Colophon :

— — —

758

Sl. No. 39004 न्यासविंशतिः Ms. No. P. 1170/7

Beginning :

सिद्धं सत्सम्प्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥

End :

संसारावर्तवेगप्रशमनशुभदृग्देशिकप्रेक्षितोऽहं
सन्त्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।
निश्शङ्कस्तत्त्वदृष्ट्या निरवधिकगुणं प्रार्थ्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि ॥

Colophon:

इति न्यासविंशतिः ॥

759

Sl. No. 39010 न्यासविंशतिव्याख्या Ms. No. P. 9534/9

Beginnig :

श्रुतिस्मृत्यादितात्पर्यं निरूढा न्यासविंशतिः ।
स्वयं व्याक्रियतेऽस्माभिः दिङ्मात्रेण सदिच्छया ॥

प्रपत्त्यपरपर्यायां न्यास द्यां संजिघृक्षुः तत्त्वज्ञानादिमुखेन तदधिकार हेतुभूतमाचार्यसङ्ग्रहमाह— सिद्धमिति ॥

End :

सर्वशक्तौ भरं न्यस्यतः सर्वधर्मत्यागवचनात् वर्णाश्रमादिधर्मरूपमाज्ञा कैङ्कर्यं तदनुसिद्ध अनुज्ञाकैङ्कर्यं च न स्यातामित्यत्राह न्यासा देशेष्विति ॥

Colophon :

— — —

760

Sl. No. 39011 न्यासविंशतिव्याख्या Ms. No. P. 632/2

Beginning :

आत्रेयरामानुजदेशिकेन्द्र
पादारविन्दप्रणातात्मवृत्तिम् ।
समस्तकल्याणगुणाभिरामं
वेदान्तविद्यागुरुमाश्रयामः ॥

सकलश्रुतिस्मृतीतिहासपुराणेषु अन्तस्सारतया प्रतिपाद्यमानं + सदाचार्यवरणमाह—सिद्धं सत्संप्रदायेत्यादिना ।

End:

स्वशक्त्या सकृत्कर्तव्यलघूपायपरामर्शेन प्रत्यवस्थापितः फलसङ्गकर्तृत्वादि त्यागयुक्तः साङ्गभरन्यासेन कृतकृत्यः स्वीकृतभरं शरण्यं श्रियःपतिमवलोक्य निर्भयो निर्भरः स्वयंप्रयोजन कैंकर्येण वर्ते इति ॥

श्रीमन्नारायणमुनिःसम्प्रदायानुसारतः ।
टीकां पटीयसीं प्रीत्यै चकार न्यासविंशतेः ॥

Colophon :

इति श्रीमन्नारयणनामधेय श्रीमत्परमहंस परिव्राजकाचार्यकृता न्यास विंशतिटीका सम्पूर्णा ॥

761

Sl. No. 39017 न्यासविंशतिव्याख्या Ms. No. P. 5596/3

Beginnig :

शठारियतिराजस्य चरणौ शरणं भजे ।
हृदये मम यद्भक्त्या न्यासविद्या विजृम्भते ॥

आचार्यवत्तया मुक्ताविप्यादिप्रमाणप्रसिद्धमाचार्यसङ्ग्रहणमाह—सिद्धमिति । सत्सम्प्रदाये संध्यासौ सम्प्रदायः +

End :

फलसङ्गकर्तृत्ववदित्यागमुक्तसङ्ग भरन्यासेन कृतकृत्यः स्वपदनिक्षिप्तात्मभरणं शरण्यं प्रयोजन कैङ्कर्यं सुखं वर्तेतेति ॥

Colophon :

इति श्रीकौशिककुलतिलकताताचार्यसूनु श्रीनिवासाचार्यकृतिषु न्यासविंशतिव्याख्या सम्पूर्णा ॥

762

Sl. No. 39018 न्यासविद्यापरिष्कृतिः Ms. No. P. 4917/2

Beginning :

जयन्ति जगतां पत्युः जगद्रक्षणसंमुखाः ।
मूर्ता इव दयापूराः ह्यस्मदाचार्यपङ्क्तयः ॥
पोपोष्टि ज्ञानदृष्टिं + धत्ताम् ॥
श्रीपादूसेविरामानुजमुनितिलको मानसेसन्नि + कवितार्किकसिंहस्य गोचराम् ॥

अस्मद्गुरुस्य आरभ्य नत्वा गुरुपरम्पराम् ।
महतामाज्ञया कुर्वे न्यासविद्यापरिष्कृतिम् ॥

श्रीमन्यासविद्याया अङ्गानि—

End :

इत्याचार्यसकल दिव्यप्रबन्धेषु सुप्रतिष्ठितमिति सर्वं समञ्जसम् ॥
इत्थं देशिकसूक्ति + नित्यशः ॥
न्यासविद्यापरिष्कृत्या परिष्कृतपदाम्बुजः ।
प्रीयतां श्रीहयग्रीवः दयन्तां मम देशिकाः ॥

Colophon :

इति श्रीमद्वाधूलकुलतिलक + वेंकटाचार्यतनूभवेन यादवाद्रिनिवासिना श्रीमत्पादुकासेवकरामानुजसंयमीन्द्र + आत्मरक्षाभरेण श्रीवरददासेन विरचिता न्यासविद्यापरिष्कृतिस्संपूर्णा—

763

Sl. No. 39020 न्यासविद्याप्रकाशः Ms. No. P. 2254/1

Beginning:

श्रीमतो वरदार्यस्य देशिकस्य दयानिधेः ।
चरणौ शरणं यामि प्रारम्भेऽभीष्टसिद्धये ॥

जयत्यस्मत्कुलपतिः करुणाब्धिर्यदर्पितैः ।
तोयैर्वृषाद्रिजलदः काङ्क्षिताधिकवर्षुकः ॥

End:

त्वत्समीपे सदा वर्त इति वेदान्तदेशिकः ।
स्वप्ने यस्यावदत्तस्मै वरदार्याय मङ्गलम् ॥
स्वप्ने भगवदादिष्टधर्मामावर्तनादहम् । (?)
वस्तुतामुपयातस्तं वन्दे वरददेशिकम् ॥
अपरां वरदार्याख्यां निगमान्तार्यपादुकाम् ।
उदितां चैत्ररोहिण्यां मदसाधारणीं भजे ॥

Colophon:

— — —

764

Sl. No. 39021 न्यासविद्याप्रकाशविवृत्तिः Ms. No. P 2254/2

Beginning:

वेदान्तार्यावतारं वरदगुरुवशं वत्सलत्वादिराशिं
निक्षेपं मूर्तिमन्तं कृपणजनफलं सर्वदा बोधयन्तम् ।
वन्दे श्रीशैलवंशाम्बुधिविधुमनघं तातयार्यं गुरुं तं
यद्दृष्ट्या लब्धसत्तस्समुचितमतिमानप्यहं सर्वतन्त्रे ॥

गुरुप्रणामपूर्वकं भगवत्प्रणाममाचरिष्यन् अव्यवहितगुरुप्रणतिं शिष्य
शिक्षायै ग्रन्थमुखैराचरयति— श्रीमत इति ।

देशिकैः वरददेशिकप्रभृतिभिः आचार्यैः दर्शनीयार्थाः विचारमुखेन प्रदर्शनीयार्थाः × दरिद्रः ज्ञानशक्त्यादिरहितः: ज्ञानपापीयानित्यनेन अत्र तद्धतुरुच्येत । + तादूरूप्यरूपकालङ्कातरः ।

Colophon:

श्रीमानित्थं श्रीनिवासपरकालयतेर्मुखात् ।
हयग्रीवो न्यासविद्याप्रकाशविवृतिं व्यधात् ॥

765

Sl. No. 39022 न्यासविद्याभूषणम् Ms. No. P 6027

Beginning :

आरभ्यास्मद्गुरोराचार्य श्रीधरात्प्रथितान् गुरून् ।
सम्प्रणम्य न्यासविद्या भूषणं विदधीमहि ॥
पत्तिर्भक्तिवत्साक्षा × य इतीष्यते ।
श्रीमन्निक्षेपरक्षादितत्त्वविद्भिर्महात्मभिः ॥

End :

न पाण्डित्यख्यापनाय तदेतन्मे निबन्धनम् ।
किन्तु श्रीभगवद्वेदचूडागुरुनियोगतः ।
तत्सर्म्प्रात्यै तत्प्रसादविशुद्धप्रतिभाजुषा ।
श्रीरङ्गराजगुर्वङ्घ्रिसेवाधन्येन निर्मिता ।
श्रीमान् महाहयशिराः प्रसीदतु जगत्प्रभुः ॥
न्यासविद्याभूषणेन तत्कृषिः फलिता यतः ॥

Colophon :

— — —

766

Sl. No. 39023 न्यासविद्याविजयः Ms. No. P. 2097

Beginning :

श्रीरङ्गराज गुरुपुङ्गवमस्मदार्यं
रमानुज × कुश × मान्यान् ।

श्रुत्यन्तसूरिर्यतिशेखर ×

× शठारिमपि नौम्यथ दम्पती तौ ॥

हयवदनाननाब्जमधुदुग्धपयोधिसुता × अखिलागमसिन्धु सुधाम् ॥

End :

शरणागतानां च मुक्तौ तारतम्य कथने न कैवल्यनित्यत्वसाधनेन च प्रक्षीणाखिलकर्मणः प्राप्य ज्ञानादिदोषाङ्गीकारेण च पुरुषार्थ विषयं अन्यथात्वमिति परोक्तं सर्वं कुतर्ककल्पितमिति प्रामाणिकैरमा दरणीयम् ॥

Colophon :

११२ तमे पुटे —

इति श्रीमदाण्डान् श्रीशैलवंशकलशोदधिकौस्तुभ श्रीमत्सुन्दरराजमहादे शिकतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतिषु न्यासविद्याविजये श्रीवच नभूषणमीमांसाविशसने परमपुरुषार्थवैपरीत्योक्तिभङ्गः चतु श्चत्वारिंशः ॥

767

Sl. No. 39025 **न्यासविद्याविजयः** Ms. No. P. 6048

Beginning :

× वेद मकुटीयुगलि × ।

× प्रबन्धोऽयं विधीयते ॥

स्वनिष्ठो रथाचार्य निष्ठेति शरणागतौ ॥

End :

× त्वामशेषाघनाशनम् ॥

इत्या दिना प्रमाणेन × भञ्जनम् ॥

यथासङ्कल्पमाक्षिप्य प्रपत्त्या × ॥

Colophon :

768

Sl. No. 39027 न्यायविद्याविलासः Ms. No. P 6026

Beginning

प्रणम्य श्रीमदाम्नायमकुटीयुगलीगुरुम् ।
न्यासविद्याविलासोऽयं लिख्यते विदुषां मुदे ॥
तैत्तिरीयोपनिषदि + तारेणात्मनिवेदनम् ।
विहितं तद्भरन्यासरूपं प्रपदनात्मकम् ।
दिव्यसूक्त्यनुसारेण दर्शितं तस्य क्र × ।

End :

× नु सर्वेषामपेक्षित पलरिष्क्रिया ।
प्रमाणानुगुणा × सम्प्रदायसुधादिषु ॥
× क रुण्यशेवधिः ।
श्रीमान.म्नायमकुटीदेशिकः शरणं सताम् ॥

Colophon:

तिरुवरङ्गमाण्डान् तिरुमलै श्रीरङ्गराजमहादेशिकतनूजेन तदेकदैवतेन तत्प्रसादलब्धवाजपेय × श्रीशैलाचार्यदासेन निरचितो न्यासविद्याविलासः सम्पूर्णः ॥

769

Sl. No. 39028 न्यासविवरणम् Ms. No. P. 9547/2

Beginning :

यत्पादपद्मरजसा मम मूर्धन्य दुर्लिपिः ।
श्रीशेन मार्जिता तस्मै श्रीरङ्गार्याय मङ्गलम् ॥

सदाचार्य प्रसादविशेषसमधिगत श्रीमद्रहस्यसारार्थतत्त्वयाथात्म्यः यथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत् कराकलपं पुनरपि विदन् कस्तितिक्षे तवन्धं इति रीत्या तीव्रतममुमुक्षाशाली दुष्करोपायान्तर ×

End :

अतोऽहं निर्भरो निर्भयोऽस्मि इत्येवं मनसा अङ्गाङ्गिनोर्नैरन्तर्येणाविकलमच्छिद्रमनुष्ठाय ततस्साङ्गभरसमर्पणलक्षणशरणागति व्याजमात्रेण सहज-

कारुण्यस्वभावविशेषवतः सर्वस्वामिनः श्रीमतो नारायणस्य सञ्जातं अहं त्वा सर्वं ×

Colophon :

— — —

770

Sl. No. 39029 न्याससंग्रहः Ms. No. P. 5052

Beginning :

आरभ्यास्मद्गुरोः श्रीशं अभिवन्दनपूर्वकम् ।
आचार्यवंशमालम्ब्य समारोक्ष्यामि सत्पथम् ॥

श्रीमदाम्नायमकुटीदेशिकश्रीपदाब्जयोः ।
विन्यस्तामभरेणायं क्रियते न्याससंग्रहः ॥

जायमानदशोद्भूतभगवत्कटाक्षापादित सत्सहवासादिमूलक मुमुक्षोत्पत्तौ—

End :

श्रियः पतिः स्वयमेव स्वीकुरुतेऽस्य तत्काल एव तादृशफलानुकूलयत्नरूपमद्रक्षणभरं, श्रीमते × तुभ्यमेवेति भरसमर्पणप्रकारः तथैव फलसमर्पणसात्विकत्यागौ कार्याविति विशेषो × ज्ञेयः ॥

Colophon :

— — —

771

Sl. No. 39030 न्याससंग्रहः Ms. No. P. 9597/1

Beginning :

श्रीमच्छ्रीशैलार्यमददेशिकाय नमः ।
श्रीमदाम्नायकुटीदेशिकश्रीपदाब्जयोः ।
विन्यस्तात्मभरेणायं क्रियते न्याससंग्रहः ॥

सुप्रक्षालितपाणिपादः स्वाचान्तः भगवन्तमाराध्य प्राणानायम्य तिथि-वारनक्षत्रादीन् सङ्कल्प्य अस्य एतद्देहावसाने ब्रह्मनाड्या शारीरान्निर्गत्य अर्शिरादिमार्गेण—

End:

संसारावर्तवेगप्रशमनशुभदृक्देशिकप्रेक्षितोहं
न्यस्य त्वत्पादपद्मेवरदनि
जभरं निर्भरो विर्भयोऽस्मि ॥

भगवान् देवः स्वकीयेनानेनात्मना स्वचरणारविन्दयोः मोक्षार्थं प्रपत्ति विद्यां कारितवान् ।

भगवान् प्रीयतां वासुदेवः ।

Colophon:

— — —

772

Sl. No. 39042 पञ्चीकरणम् **Ms. No. P. 5412/3**

Beginning:

तदन्तरप्रपत्तौ रंहति सम्परिष्वङ्गक्तः प्रश्ननिरूपणाभ्याम् ।
देहाद्यं भोग्यनीत्यादिपिळविचगती तत्तत्रैव लभ्यं
प्र × क्ष्मैरपि किमिह मुधा पूर्वदेहाद्गृहीतैः
जीवस्याणोर्गतिं च स्वमुपजनयेदीश्वरः प्राणनीत्या
मैवं स्वच्छन्दकृत्ये श्रुतिमितनियतौ गौरवोक्तेरयुक्तेः ॥

नानाजातीयराशिं व्यपदिशति जनो भूयशोंऽशस्य नाम्ना
प्राचुर्यादेव मापः पुरुषवचस इत्युच्यते भूतबर्गः ।
व्यष्टिं पञ्चीकृतैस्तैः सृजति हि स विभुस्तारतम्यं पुनश्च
श्रद्धाशब्दस्त्विहापः कथयति निगमे तत्समाख्यावदुक्तेः ॥

End:

आसीदग्रे त्वसद्वा इदमिति विलयावस्थतामात्रमुक्तं
नैवासीकिञ्चिदित्याद्यपिक रंविलयपन्भूतयादेर्निषेधात् ।

सर्वस्याप्राकृतत्वं विभजनविरहात्तादृशावस्थतत्त द्रव्यस्तोमान्तरात्म
तदिह सदसद्व्याकृताद्युक्तिवाच्यः ॥

Colophon :

— — —

773

Sl. No. 39043 परतत्त्वनिर्णयः Ms. No. P. 3167

Beginning :

× हार्यत्वादीनां श्रुत्यैव प्रतिपन्नत्वात् तद्वाचिनां शब्दानां अचेतने
× नारायणविष्णुवासुदेवनृसिंहभगवदादिपदवाच्यस्य कुत्रापि ×
× स्वापत्तेश्च---

End :

× रपरैश्च कैश्चित् निश्चि × रे विस्तरेणाभ्यधायि ।
विष × श्रुत्यनुसारेण अस्मा ×
× र्येण कृते परतत्त्वनिर्णये × निवासाचार्येणस ङ्गृहीतं
परतत्त्वं च सर्वस्मात् परत्वं ब्रह्मणस्तथा ।

Colophon :

— — —

774

Sl. No. 39045 परतत्त्वनिर्णयः Ms. No. P. 5026

Beginning :

तदनन्यसाम्यबुद्धेश्च दोषहेतुत्वमुच्यते ॥
विष्णोः स्वरूपामहात्म्याद्यज्ञानं च ततः परम् ।
ब्रह्मादीनां च सृज्यत्वसंहार्यत्वे ततः परम् ॥

End :

× वेद्येन भगवान् कृपया × यास्तुतः ।
चतुर्विधमिदं प्राह सर्वेषां हितकारणात् ।
इत्यादि ॥

श्रुतिस्मृतिरथे तिष्ठन् ज्ञानखड्गेन खण्डयन् ।
कुमतिं वेदतत्त्वज्ञः वेदान्तार्थप्रतिष्ठितम् ॥

Colophon :

— — —

775

Sl. No. 39048 परमपदस्थानम् Ms. No. P. 9520/4

Beginning :

प्रधानपरमव्योम्नोरन्तरं केवलं स्मृतम् ।
तत्स्थानमुपभोक्तव्यं अव्यक्तब्रह्मसेविनाम् ॥

स्वात्मानुभवजानन्दसुखदं केवलं स्मृतम् ।
निश्रेयसं च निर्वाणं कैवल्यं मोक्षमित्यपि ॥

End :

महात्मानो महाभागा भगवत्पादसेवकाः ।
तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः ॥

Colophon :

— — —

776

Sl. No. 39049 परमार्थस्तुतिः Ms. No. P. 9182/15

Beginning :

वन्देऽहं वरदार्यं त वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः सञ्जीवयति मामपि ॥

सत्सङ्गाद्भवनिःस्पृहो गुरुमुखात् श्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य ×
हार्दानुग्रहलब्धमध्यधमगतिद्वारा बहिर्निर्गतः ॥

End :

मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्
मासा × धन्यः पुमान् ॥

प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः ।
श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत् ॥

Colophon :

— — —

777

Sl. No. 39050 परवादिखण्डनम् Ms. No. B. 382

Beginning :

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

अविद्यायाः कोऽयमाश्रयः किं ब्रह्म किं वा जीवः ? जीव इतिचेत्तन्न: जीवस्याविद्यापरिकल्पितत्वेन अन्योन्याश्रयप्रसङ्गात् ।

End :

आचार्यजनसम्मतानां तन्मतानुसारिणां पाषण्डवैतण्डिकवेतण्डषण्ड खण्डन प्रचण्ड विक्रमाणां पुरुषसिंहानां सिद्धान्त इति । सकलोपनिषद् बृंहितमिदमनुसरन्तो विहसन्तः सन्तस्सर्वत्र विजध्वयम् ।

इत्थं त्रय्यन्तसिद्धान्त दुग्धसिन्धुसुधामिमाम् ।
मतिमन्थानमाविध्य ममन्थुः मतिशालिनः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथत्मजस्य वेदान्तचार्यस्य वरदाचार्यस्य कृतिषु परवादिखण्डनं समाप्तम् ॥

778

Sl. No. 39054 परवादिखण्डनम् Ms. No. P. 9043

Beginning ;

चातुर्व्यूहं परं ब्रह्म षाड्गुण्यपरिकर्मितम् ।
पञ्चरात्रस्य कृत्स्नस्य प्रसूतिं पर्युपास्महे ॥

अनन्यदेवस्थायिन्या यतेमहि हितेन यम् ।
पञ्चरात्रमहाम्भोधि पारदृश्वनि सज्जने ॥

End :

त्यक्तं शास्त्रमलेपकप्रभृतिभिः किं तेन तस्यागतम्
प्रद्विष्टे जगदेकचक्षुषि दिवाभीतैस्ततस्तस्य किम् ।
दुग्धं पित्तहतैर्जुगुप्सितमतस्तस्यापि किं दुर्जनैः
त्यक्तं चेदपि मत्कृतं सुरुचिरं किं देशिकैः त्यज्यते ॥

Colophon:

इतिश्री + वेदान्ताचार्यस्य कृतिषु श्रीपाञ्चरात्ररक्षायां तृतीयोऽधिकारः ॥

779

Sl. No. 39056 परमात्मिकोपनिषद्भाष्य Ms. No. P 5129

Beginning

विष्णुः सर्वेषामधिपतिः परमपुराणः परो लोकानामजितो जितात्मन्
भवते भवाय स्वाहा । विष्णुः सर्वत्र व्याप्तः ।

यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

इति श्रुतेः ।

End :

वाक्च वश्या क्रिया शक्तिः कला वै षोडश स्मृताः ।
तेषां रूपं तथा प्रोक्तं प्रकृतिं विकृतिं तथ ॥
प्रकृतिस्सप्तवर्णानि विकृतिस्सप्तवर्णकम् ॥

Colophon

२३४ तमे पत्रे—

इति श्रीवेङ्कटेश्वरपदाब्जसपर्यासु रतात्मना । श्रीमत्कौशिकगोत्रेण श्रीगोविन्दार्यसूनुना वेदान्तदेशिकेन श्रीनिवासाचार्ययज्वना । विरचिते पारमात्मिकोपनिषद्व्याख्याने दशमानुवाकार्थविवरः समाप्तः ॥

780

Sl. No. 39058 पाखण्डदलनम् Ms No. C. 4438

Beginning :

अज्ञानतिमिरान्धस्य ज्ञानांजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

तथाहि श्रीपद्मपुराणे—

चण्डालोपि मुनिश्रेष्ठः विष्णुभक्तिपरायणः ।
विष्णुभक्तिविहीनश्च यती च परमोऽधमः ॥

End :

श्री भागवते—

यथाय श्रयमाणस्य भगवन्तं विभावसुम् ।
ज्ञातं भयं तमो हन्ति साधून् संसेवितस्तथा ॥

तथाहि—

साधूनां समचित्तानां मुकुन्दचरणौ विना ।
उपेक्ष किं धनं तत्र असद्भिरसदाश्रयैः ॥

Colophon :

इति पापण्डदलनं समाप्तम् ॥

781

Sl. No. 39060 पाखण्डदलनम् Ms. No. P. 3064/3

Beginning ;

श्रीमत्त्रय्यन्तसीमायुगलविभजनाखण्डपाण्डित्यभूमा
षट्तन्त्रोदन्तदन्तावलवलनसृणीबोभवत्सूक्तिधामा ।
श्रीशैलाख्यान्वयेन्दुः सकलगुणनिधिः सर्वतन्त्रस्वतन्त्रः
कारुण्यात्सन्निधत्तां मम हृदि सततं श्रीनिवासार्यवर्यः ॥
प्रणम्याद्वैतिनो भिक्षोः पक्षो विक्षोभ्यतेऽधुना ॥

End :

आनन्दात्मकानन्दमयनिष्ठतयोपसंह्रियमाणं आनन्दमयस्य ब्रह्मत्वे निरपवादं कारणमिति कथं तद्विरोधिनः पुच्छस्य ब्रह्मता + कल्पनीयेति यत्किञ्चिदेतत् ॥

Colophon :

इति श्री शठमर्षणवंशपारावारराकासुधाकरलक्ष्माम्बागर्भशुक्तिमुक्ता × पेन × श्रीनिवासार्येण निर्मितं पुच्छब्रह्मवादो नाम प्रकरणं समाप्तम् ॥

782

Sl. No. 39067 पाखण्डदलनम् Ms. No. P. 5638/2

Beginning :

श्रीमत्त्रैयन्तसीमायुगळविभजनाखण्डपाण्डित्यभूमा
षट्तन्त्रोदन्तदन्तावलवलनसृणीबोमव × रामाम् ।
श्रीशैलाख्यान्वयेन्दुस्सुगुणगुणनिधिस्सर्वतन्त्रस्वतन्त्रः
कारूण्यात्संनि × तं श्रीनिवासाचार्यवर्यः ॥

यध्या × नन्दसिद्धेर्वाचामगोचरः ।
कारणं जगतामीशं तमानन्दमयं श्रये ॥
त्रयीसिद्धान्तशुद्धान्तशुद्धान्तःकरणान् गुरून् ।
प्रणम्याद्वैतिनो भिक्षोः पक्षो विक्षोभ्यतेऽधुना ॥

इह तावत् पृ × यब्रह्म × न सिद्धान्तिनश्च विप्रतिपत्त्यां वादकथा प्रस्तूयते—

End :

इमानि भूतानीत्यादिना पुनरनूदितं च ब्रह्मणो मूर्धामिपि जगत्कारणत्वरूपलक्षणं आनन्दाद्धयेव खल्विमानिभूनानि जायन्ते इत्यादिनानन्दात्मकानन्दमयनिष्ठतयोपह्रिय × णमिति कथं तद्विरोधिनो पुच्छस्य ब्रह्मताकल्प × यत्किञ्चिदेतत् ॥

Colophon

इति श्रीनिवासाचार्यविरचितं पुच्छब्रह्मवाद निराकरणं नाम प्रकरणम् ॥

783

SI. No. 39068 पुरुषकारवैभवम् Ms. No. P 728

Beginning :

पुरुषकारवैभवं च साधनस्य गौरवं + गुरुं तमाश्रये ॥
+ वन्दे सदा वचनभूषणदिव्यशास्त्रम् ।

वेदार्थो निश्चेतव्यस्स्मृतीतिहासपुराणैः स्मृत्या पूर्वभागार्थो निर्णियते—अन्याभ्याञ्चाभ्यां उत्तरभागार्थो निर्णीयते। अनयोरुभयोर्मध्ये इतिहासः प्रबलः तेन स पूर्वं भवति। इतिहासश्रेष्ठेन + + एतद्दशभ्यां च पुरुषकार वैभव उपायवैभवश्चोक्तः। पुरुषकारभवनसमये कृपापारतन्त्र्ये अनन्यार्ह-त्वञ्चापेक्षितम्। लक्ष्म्याः प्रथमविश्लेषस्स्वकृपाप्रकाशनार्थम्; मध्यममविश्लेषः पारतन्त्र्यप्रकाशनार्थम्; अनन्तरविश्लेषोनन्यार्हत्वप्रकाशनार्थम्। संश्लेषविश्ले-षयोः पुरुषकारत्वं भासते।

End:

तथा बालः स्वामिविश्लेषे धारणाभावं पुरस्कृत्य कैङ्कर्यं कर्तव्यम्। + पुरप्रवेशानन्तरं वने राकान्ते स्वयंपाके उदरवर्धनात् सहभोजन-मसहमानः एकस्मिन् हस्ते श्वेतच्छत्रचचामरं चधृत्वा कैङ्कर्यमकरोत्॥

Colophon:

- — —

784

Sl No. 39070 **पुरुषकारवैभवम्** Ms. No. P. 5229/1

Beginning:

श्रीदेवराजरचिता रामानुजकृपैधिता।
जीयात् पुरुषसूक्तस्य व्याख्यासर्वार्थसुन्दरी॥

सर्वेषु वेदान्तेषुगूढमेव परमगुह्यं परं ब्रह्मोपदिश्यते यत्र अतिगहनन्यायकलापावगाहनक्षमाणां विस्पष्टं तत्त्वहितपुरुषार्थं निर्णयं करोति पुरुषसूक्तम्॥

End:

तस्मादिति च सप्तर्चा जगत्सृष्टिस्समीरिता।
वेदाहमिति मन्त्राभ्यां वैभवं कथितं हरेः॥
यज्ञेनेत्यनेत्यनयैवर्चा सृष्टिर्मोक्षस्य चेरिता।
य एवमेतज्जानाति स हि मुक्तो भवेदिति॥

Colophon:

इति श्रीदेवराजमिश्रप्रणीतं श्रीपुरुषसूक्तभाष्यं सम्पूर्णम्॥

785

Sl. No. 39071 पुरुषार्थसुधानिधिः Ms. No. P 5121

Beginning :

समस्तजगदाधारं संश्रितामरभूरुहम् ।
समाश्रये नरहरिं गरुडाद्रिनिवासिनम् ॥
आचार्योदीरितानर्थन् श्रुतिस्मृतिसदुक्तिभिः ।
मादृशां मननायैव सङ्कलय्य × × ॥

ब्रह्मणो रूपं + सेतिहासपुराणकाः ।

इति सकलशास्त्र सारतयार्थपञ्चकं प्रथमं सर्वोपयुक्ततया प्रमाणचिन्ता क्रियते ।

End :

तथा गीतासु भगवता स्वयमेवोक्तम्—

मामुपेत्य पुनर्जन्म दुखालयमशाश्वतम् ।
नाप्नुवन्ति ×
× पुनर्जन्म न विद्यते ॥
इति ॥ तस्मात्सायुज्यंमोक्ष एव श्रेयान् ॥

सालोक्यमपि सामीप्यं सारूप्यंच ततः परम् ।

Colophon:

षष्टिप्रबन्धक कर्तृर्वेदान्ताचार्यस्य श्रीमन्नारायणमुनिकृतिषु पुरुषार्थ सुधानिधौ मोक्षप्र ×

786

Sl. No. 39074 प्रणवदर्पणम् Ms. No. P. 621/1

Beginning :

ओं तद्ब्रह्मेति प्रतिपाद्यमानाद्यमेयमनवद्यम् ।
श्रुशिखरस्तुतमस्तु लाभाय निस्तुलं वस्तु ॥

इह तावदोङ्कारस्य ब्रह्मसूत्रेष्वाद्यन्तयोरुच्चार्यत्वमाद्यसूत्र न्वत्वंकेचि दाचक्षते ॥

यथोक्तमनुव्याख्याने-

सर्वत्रानुगतत्वेन पृथगोंक्रियतेऽखिलैः ।

तत्ततारार्थमूलत्वं सर्वशास्त्रस्य चेष्यते ॥

इति । अत्रेदं वक्तव्यम् । अप्रमाणतया यत्र +

End :

अथशब्दोङ्कारयोर्द्वयोर्युगयदुच्चारणायोगात् । द्वितीयसूत्रादावप्येवं प्रयोगस्य वेदाद्यन्तयोरोङ्कारयोः सूत्रान्त्योङ्कारे च एवं प्रयोगस्य च सम्भवे आभाससाम्याच्चा +

त्रय्यन्तसन्ततिवधे बहुधा प्रवृत्तां

ध्वान्तानुवृत्तिमपहत्य गुरुप्रसादात् ।

भास्वद्यतीन्द्रकृपया च कथं मदेत-

त्सन्तो निरीक्ष्य दयया मुदमाश्रयन्तु ॥

तत्र स्वातन्त्र्यपूर्णार्णग गुरुतन याचातयात्र प्रासूतः-

Colophon :

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासताताचार्यनन्दनेन लक्ष्मा-म्बागर्भशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षितकरुणाकटाक्षवीक्षाशिक्षित-मीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयाचार्यदीक्षितानुग्रहगृहीतचतुस्तन्त्री-नियन्त्रितस्वान्तेन श्रीनिवासविदुषा विरचिते प्रणवदर्पणे द्वितीयः परिच्छेदः ॥

787

Sl. No. 39077 प्रणवदर्पणम् Ms. No. C. 928

Beginning :

ओं तत्सद्ब्रह्मेति प्रतिपाद्यं अनाद्यमेयमनवद्यम् ।

श्रुतिशिखरस्तुतमस्तु प्रस्तुतलाभाय निस्तुलं वस्तु ॥

यद्यप्यत्रोदासतपूर्वेप्यखर्वगर्वौघान् ।

एतद्दोषगवेषणजातां जेतुं समायमारम्भः ॥

विस्तरस्तु अन्यत्रेति सर्वमवदातम् ॥ +

तत्रस्वातन्त्र्यपूर्णार्णयगुरुतनयाचातयार्यात्प्रसूतः

कौण्डिन्यश्रीनिवासाध्वरिवरकरुणोपात्तभाष्यार्थवित्तः ।

लक्ष्माम्बागर्भजन्मा स्वसहजकृपया न्यस्तशास्त्रप्रशस्तिः
श्रीशैलश्रीनिवसोऽतनुत कृतिमिमां प्रीतये विश्वमूर्तेः ॥

Colophon :

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनीवासताताचार्यनन्दनेन + बुक्कपट्टण श्रीनीवासविदुषा विरचिते प्रमाणदर्पणे द्वितीयः परिच्छेदः समाप्तं प्रणवदर्पणम् ॥

788

Sl. No. 39080 प्रतिज्ञावादः Ms. No. P. 3039/4

Beginning :

आराध्य वारिधिसुताकलितांघ्रियुग्मं
आनाम्य लक्ष्मणयतीश्वरमादरेण ।
तोषाय सर्वविदुषां कुतुकात्प्रतिज्ञा-
वादं सयुक्तिकमनन्तसुधीर्विधत्ते ॥

इह खलु प्रतिज्ञाविरोधात् प्रतिज्ञाहानिरव्यतिरेकादित्यादिषु

End :

विशेष्यबाधस्थल एव तथात्वात् । सविशेषणे हीति न्यायस्य बाध घटितत्वात् । एवं स्वभेदनिषेधस्य स्वस्मिन् सिद्धतया वैयर्थ्याच्च । तस्मा दद्वैतमसंगतमिति दिक् ॥

शेषार्यवंशरत्नेन यादावाद्रिनिवासिना ।
अनन्तार्येण रचिता वादार्थोऽयं विजृम्भताम् ॥

Colophon :

— — —

789

Sl. No. 39082 प्रतितन्त्रदर्पणम् Ms. No. P. 646/3

Beginning :

अशेषदोषैकसुपे विदुषां श्रेयसां पुषे ।
चिदचिद्वपुषे तस्मै नमःकुर्मो मधुद्विषे ॥
स्वापृथक्सिद्धसर्वार्थैस्तद्वाचिपदवाच्यताम् ।
गुणिव्यक्त्यादिवद्विन्दत् मुकुन्दोस्तु मुदे मम ॥

इह खलु भगवान् बादरायणः सर्वे वेदा यत्पदमामनन्ति

End:

प्रवीणादिशब्दवन्निरूढलक्षणावन्तो वा भवन्ति ।

× बाधकानि तत्र नात्र किञ्चिदपि बाधकम् ।

साधकं चास्तीत्युक्तम् । पण्डितप्रतिपत्तेः पामरप्रतिपत्तिः दुर्बल-तन्मूलीयवृत्ति × वैदिकाश्च व्यवहारा नापराध्यन्ति यथाशास्त्रीय यणादितत्कार्यवर्जितोपि वर्णनिर्देशो नापराध्यति तेन विना तदीयनिष्पत्तेः तद्वदिहापीति सर्वमवदातम् ॥

Colophon:

श्रीमद्यतीन्द्रसिद्धान्तस्थापननिपुणेन श्रीनीवासार्येण निर्मितं प्रतितन्त्र दर्पणं नाम प्रकरणं समाप्तम् ॥

790

Sl. No. 39086 प्रतितन्त्रपरिष्क्रिया Ms. No. P. 3014/1

Beginning;

श्रीघण्टावताराय सिंहाय कविवादीनाम् ।
सर्वतन्त्रस्वतन्त्राय वेदान्तगुरवे नमः ॥
तत्वमुक्ताकलापादि दिव्यसूक्त्यनुसारिणी ।
वितन्यते सतां प्रीत्यै प्रतितन्त्रपरिष्क्रिया ॥

स्वासाधरणसिद्धान्तः प्रतितन्त्र इतीर्यते ।

End:

निग्र × प्रति × द्रामिडरूपेण प्रसिद्धानि बहुविधानि एतेषां सर्वेषामपि यथायथमुक्तेष्वेव पदार्थेष्वन्तर्भावनिपुणैरध्यासितः अधि कन्तुश्रीतत्वमुक्ताकलापसर्वार्थसिद्धिन्यायपरिशुद्धिन्यायसिद्धाञ्जनादिदिव्यप्रबन्धेषु सुधीभिः सप्रयत्नमनुसन्धेयम् ॥

निगमान्तगुरोरेवं प्रतितन्त्रपरिष्क्रिया ।
रङ्गरामानुजमुनिः प्राचीकशदनाकुलम् ॥

Colophon:

791

Sl. No. 39089 **प्रपञ्चमित्यत्वखण्डनम्** Ms. No. P. 4935

Beginning :

इह कतिचिदरसमुचितदुरिता सर्वीमलीमसमानसः प्रपञ्चमिथ्यात्वं कथयन्तस्तदेव प्रातिभासिकान्यत्वविशेषितं व्या × कत्वं मन्यमाना-स्तत्साधकमि × तिचिमनुमानं गृह्णन्ति ।

End :

यत्र स्वचिन्तयसाक्षात्कारनिवर्त्यत्वं तत्र स्वचिरत्ययजप्रतिक्षेपक इत्यपि इत्यपि निरस्तम् । पूर्वोक्त × ग्रासात् रजतभावादीनां पारमार्थिकतया शुक्त्यसमानसत्ताकानामपि रजतादिप्रतिक्षेपकत्वदर्शनेना-प्रयोजकत्वाच्च ।

Colophon

— — —

792

Sl No. 39090 **प्रपत्तिप्रयोगः** Ms. No. P. 6947/2

Beginning

श्रीमच्छ्रीरङ्गराजार्य चरणाब्जरजांसि माम् ।
पवित्रयन्तु यैर्लुप्ता मम मूर्धन्यदुर्लिपिः ॥

अथ मोक्षार्थकृत × प्रयोगक्रमो वर्ण्यते—

श्रीमान्वेंकटनाथार्यः इत्यादि । 'गुरुभ्यस्तद्गुरुभ्यश्च' इत्यादि । 'गुरवस्तदीयगुरवः' इत्यादि । 'श्रीमन्नभीष्टवरद' इत्यादि ॥

End:

सूक्त्युदाहरणपूर्वकं परिष्कृतमित्युपरम्यते—

प्रयोगतत्त्वमेतावत् आचार्यानुग्रहादिदम् ।
प्रपत्तेर्भणितं तेन प्रीयतां श्रीहयाननः ॥

Colophon:

— — —

793

Sl. No. 39091 प्रपत्तिप्रयोगः Ms. No. P. 7570

Beginning :

श्रीमान्वेङ्कटनायार्थः कवितार्किककेसरी ॥
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

गुरुभ्यस्तद्गुरुभ्यश्चेत्यादिना स्वाचार्यमारभ्य भगवत्पर्यन्तान् गुरून् प्रणामादिभिरभ्यर्च्य ।

End:

अतस्त्वं × परत्वतो म × ज्ञानदर्शनप्रप्राप्ति निस्संशयं सुखमास्वेति + दत्तवरः प्रहर्ष × हृदयस्सुख मासीतेति ॥

Colophon :

इति प्रपत्तिप्रकारः सम्पूर्णः ॥

794

Sl. No. 39092 प्रपत्तिप्रयोगः Ms. No. P. 9101/14

Beginning

स्वाचार्यमारभ्य भगवत्पर्यन्तान् सर्वान् गुरून् प्रणामादिभिर भ्यर्च्य—

गुरवस्तदीयगुरवो दिशन्तु मम साध्वनुग्रहम् ।
युष्मदुपजनितशाक्तिमतिः अहं श्रियमाश्रयामि गतभीः ॥

End :

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति मयैव ह्युक्तम् । अतस्त्वं मद्ज्ञानदर्शनप्राप्तिषु निःसशंयः सुखमास्व इति दत्तवरः प्रहर्षपरवशहृदयः सुखमासीत ।

Colophon: — — —

795

Sl. No. 39095 प्रपत्तिप्रयोगः Ms. No. P. 10706/80

Beginning :

× पादपद्मरजसा मम मूर्ध्न्यपि दुर्लिपिः ।
श्रीशेन मार्जिता तस्मै श्रीरङ्गार्याय मङ्गळम् ॥
स्वाचार्यप्रसादविशेषसमधिगत श्रीमद्रहस्यत्रयसारार्थतत्वयाथात्म्यः
याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत्
कारंकव्वपुपुरपि विदन् कस्तितिक्षेतबन्धम् ॥
मितिरित्यातित्रतरमुमुक्षाशालिदुष्करोपायान्तरादुरशारहितस्तादर्शी स्वद
शामनुसन्धानः हरेर्विज्ञाय पारम्यं × इयुक्तरीत्या समुपनतावसरमात्मप्र तीक्षः
कोऽपि महात्मा न्यासाख्यब्रह्मविधिविशेषेधिकरोति तदर्थोऽयं प्रयोगसङ्ग्रहः॥

End :

इत्येवं शिष्ये पुत्राद्यात्मीयसंबलित स्वापवर्गार्थप्रयोगकटाक्षेण प्रयोग

Colophon:

— — —

796

Sl. No. 39093 प्रपत्तिप्रयोगः Ms. No. P. 4919/3

Beginning :

श्रीमच्छ्रीरङ्गराजार्यचरणाब्जरजांसि माम् ।
पवित्रयन्तु यैर्लुप्ता मम मूर्धन्यदुर्लिपिः ॥
अथ मोक्षार्थस्वतन्त्रप्रपत्तिप्रयोगोवर्ण्यते सत्संप्रदायसक्रमो मधिगतश्रीमद्रह
स्यत्रयसारसाध्योपायस्य सिद्धोपायविशेषणान्वयवदविगीत इत्येव हृदयं भगवतो
देशिकस्येति सुधीभिर्विभावनीयम् ॥

End :

यदुक्तंसनधन्योऽहं प्रेक्षणीयोऽस्मि सन्निव ।
श्रीपतेस्तत्पदाम्भोजे मद्गुरोरस्तु मे मनः ॥

Colophon :

— — —

797

Sl. No. 39094 प्रपत्तिप्रयोगः Ms. No. P. 4919/4

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

निर्दोषभव्यगुणसागरस्य निरुपाधिकस्वामिनो निरतिशयभोग्यस्य परहित प्रवणस्य श्रीमतो नारायणस्य पुरुषकार—

End :

अस्माभिरपि बहुषु ग्रन्थेषु तत्तच्छ्रीसूक्त्युदाहरणपूर्वकं × परिहृत मित्युपरम्यते ॥

प्रयोगतत्त्वमेतावत् आचार्यानुग्रहादिदम् ।
प्रपत्तेर्वर्णितं तेन प्रीयतां श्रीहयाननः ॥

Colophon :

— — —

798

Sl. No. 39095 प्रपत्तिप्रयोगः Ms. No. P. 10782/3

Beginning :

स्वाचार्यमारभ्य भगवत्पर्यन्तान् सर्वान् गुरून् प्रणामादिभिः अभ्यर्च्य गुरवः—प्रसीदन्तु इति प्रार्थ्य तैः अस्यां शुभतिथौ—अङ्गपञ्चकसम्पन्नं आत्मरक्षाभरसमर्पणं करिष्ये इति सङ्कल्प्य ॥

End :

एतद्रक्षणफलमपि प्रधानफलिने श्रीमते नारायणाय न मम । इतः पश्चात् अनिष्टनिवर्तने इष्टप्रापणे च मम नान्वयः निर्भरो निर्भयोऽस्मि । सात्विकत्यागं कृत्वा । सर्वधर्मान् परित्यज्य + + माशुचः ॥

Colophon :

— — —

799

Sl. No. 39097 प्रपत्तिप्रयोगः Ms. No. P. 5609/1

Beginning :

× सुन्दरजामातृ मुनेः प्रपद्ये × ।
नमस्त्वस्मद्गुरुभ्यः स्यात् त × मोनमः ॥
नमो रामानुजार्याय × वेदिने ।
नमोऽस्तु राममिश्राय × मयोगिने ।
हृद्याय कुलनाथाय × दायिने । श्रियै ×

End :

× इत्थं त्वत्सन्निधौ वाचमुदितां × क्षान्तिदया निधे । ×
दयया तथा तत्परिपालनात् ।
सौम्यजामातृ मुनिना सम्यग्दृष्टामिमां सदा ।

Colophon :

— — —

800

Sl. No. 39098 प्रपत्त्युपायत्वनिर्णयः Ms. No. P. 4/2

Beginning ;

× वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ॥

निजवसदसिताक्षीशोभनापाङ्गवीक्षा
विहरणपरिपुष्टोत्फुल्लनीलोत्पलाभम् ।
शठरिपुवदनाब्जस्यन्दिगाधामधूनां
मधुपमतिरसज्ञं भावये वेंकटेशम् ॥

तत्र तावद्भवक्रदनकालरात्रिविरामविधिविहितसुप्रभातकल्पम्—

nd :

परस्पराश्रयप्रसंगात् । उपदेशपरम्परापेक्षया निबन्धनस्य प्रबल
त्वाच्च न चाकारद्वयं प्रबलभाष्यादिनिबन्धनसिद्धं–प्रबलेतिविशेषणात्—

Colophon

— — —

801

Sl. No. 39099 प्रपत्त्युपायत्वनिर्णयः Ms. No. P. 5602/4

Beginning :

उपायश्रीर्विभवशरणवचसस्साधनमति-
र्न कैवल्यं मुक्तिः पुनरपि परप्राप्तिकथनम् ।
तथाण्डान्तर्भावं प्रमितिवचनं केवलगतेः
प्रपत्तेर्दौर्बल्यं त्विति कतिचन द्राग्जगदिरे ॥

End :

साध्योपायेन सिद्धं न भवति सदृशं प्राप्यमन्येन नान्यत्
त्यागश्चाङ्गं प्रपत्तेः प्रणवविरहतोष्टाक्षरं (अष्टाक्षरस्य ममनोन्) ।
सृष्ट्यादौ चास्ति शक्तिः प्रभुनियमनतो नित्यमुक्तादिकानां
दोषे त्विच्छैव वात्सल्यमपि च परदुःखासहत्वं दया हि ॥

Colophon :

— — —

802

Sl. No. 39101 प्रपन्नकृत्यम् Ms. No. P 7276/6

Beginning :

× दळद्दनुजमर्मणि ब्रह्मणि ॥
क्षुद्रान् हित्वा सवयसो अप्रपन्नान् जडाशयान् ।
विप्रः स्थितोऽहं स इव प्राप्नुयान्मानसे सुखम् ॥

+ +

स वासुदेवो विज्ञेयस्सृग्यः सर्वं चतुर्मुखत् ।
ध्येयश्च योगिभिर्नित्यं हृत्पद्माह्वयविष्टरे ।
पश्यन्ति सूरयः शश्वत् तद्विष्णोः परमं पदम् ॥
देहासक्तात्मबुद्धिर्यदि भवति पदं साधु विद्या तृतीयं
स्वातन्त्र्यान्धो यदि स्यात् प्रथममितरशेषित्वधीश्चेद्द्वितीयम् ।
आत्मत्राणोन्मुखश्चेन्नम इति पदं बान्धवाभासलोलः
शब्दं नारायणाख्यं विषयचपलधीश्चेच्चतुर्थीं प्रपन्नः ॥

End:

अहमेव परं तत्वं दर्शनं भेद एव च ।
उपायो न्यासविद्या च नान्तिमस्मृतिरेव च ॥
देहावसाने मोक्षं च पूर्णार्थं गुरुमाश्रय ॥

Colophon:

— — —

803

Sl. No. 39103 — प्रपन्नपारिजातः — Ms. No. P. 272/1

Beginning:

वन्देऽहं वरदार्यं तं वत्साभिजन भूषणम् ।
भाष्यामृतप्रदानाद्यस्संजीवयति मामपि ॥
आचार्यर्यमपादेभ्यो नमस्यासतन दधे ।
यदासंज्ञवशात्पुंसां मनः पद्मं प्रबुध्यते ॥

End:

कार्पण्याचितबन्धमूलफलका विश्वासकीलाचिता
याच्ञाबन्धुराकृत्यकृष्टिवशगा निक्षेपसंक्षेपणी ।
संसारार्णवतारणाय विहिता संव्यासात्मनौ स्ताभीभां (?)
अच्छिद्रामथपारमिष्णुमभयास्सद्योधिरूढा जानाः ॥
अशेषापेक्षितं यत्र परितो जायते सताम् ।
प्रपन्नपारिजाताख्यः प्रबन्धः कथितो भुवि ॥

इति फलोदयपद्धतिः ।

Colophon:

प्रपन्नपारिजातः समाप्तः ॥

804

Sl. No. 39104 — प्रपन्नपारिजातः — Ms. No P. 626/5

Beginning:

लक्ष्मीचक्षुरनुध्यानात् तत्सारूप्यमुपेयुषे ।
नमोऽस्तु मानवपुषे वेदवेदिविपन्मुषे ॥

रजो रजःप्रशमनं प्रपद्य पदयोस्सताम् ।
प्रपन्नपारिजाताख्यप्रबन्धाय यतामहे ॥

End :

श्रीश्रीशयोः परिजने निदानादीनि सर्वशः ।
देहावध्यनुवृत्तानि नासमृम्युदिनानि च ॥

Colophon :

— — —

805

Sl. No. 39109 प्रपन्नामृतम् Ms. No. P. 6947

Beginning :

रामानुजदयापात्रं × वेदान्तदेशिकम् ॥
लक्ष्मीनाथ ॥ यो नित्यमच्युता मातापिता ॥
भूतं सरश्च ॥ नाथं पङ्कजनेत्र × ॥
श्रीमत्सौम्योपयन्तृ ॥ महार्यो × ॥
प्रपन्नामृतदातारं चम्पकेशगुरुं भजे ॥
मिथ्यावादिमदान्ध ॥ कौशिकान्वय ॥
अधीतानि च शास्त्राणि ॥ इन्दिरारमणं—

End :

गोविन्दपादसरसीरुहषट्पदाय
रामानुजार्यकरुणापरिवर्धिताय ।
कूरेशवंशतिलकाय महात्मकाय
श्रीभट्टदेशिकवराय नमो नमस्ते ॥

Colophon:

इति श्री प्रपन्नामृते रामानुजचरित्रे भट्टार्यवेदान्तिसंवादे रामानुजार्य
दिव्यावतारकथनं नाम पञ्चदशशततमोऽध्यायः ॥
श्रीशैलरेश × कटाक्षलेशात् ॥

806

Sl. No. 39110 | प्रपन्नामृतम् | Ms. No. P. 7542/1

Beginning :

श्रीरङ्गे वसतो महाविभवतो लोकोत्तरान् सन्ततं
श्रीमल्लक्ष्मणयोगिनो यतिपतेः श्रीशेषमूर्त्यात्मनः ।
तस्यासन् शरदां शतं च विदितं सम्यग्गता विंशति-
स्सर्वं विष्णुमयं प्रदर्शितवतः सत्यं वचो नैगमम् ॥

End :

श्रीमद्भागवतार्चनं भगवतः पूजाविविधेरुत्तमं
श्रीविष्णोरवमाननात् गुरुतरं श्रीवैष्णवोल्लङ्घनम् ।
तीर्थादच्युतपादजात् गुरुतरं तीर्थं तदीयाङ्घ्रिजं
तस्मान्नित्यमतन्द्रितो भव सतां तेषां समाराधने ॥

Colophon:

इति श्री प्रपन्नामृते रामानुजचरिते परमदशायां शिष्य जनाय चतुस्सप्ततिवाक्योपदेशो नाम पञ्चषष्टितमोऽध्यायः ॥

807

Sl. No. 39111 | प्रमाणसङ्ग्रहः | Ms. No. P. 268

Beginning :

श्रीमति वैष्णवे पुराणे पञ्चमेंऽशे षष्ठेऽध्याये —

वृन्दावनं भगवता कृष्णेनाक्लिष्टकर्मणा ।
शुभेन मनसा ध्यातं गवां वृद्धिमभीप्सता ॥

End :

आरोपितो विमानं तत् भरतः सत्यविक्रमः ।
राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥

तं समुत्थाप्य काकुत्स्थः चिरस्याक्षिपथं गतः ।
अङ्के भरतमारोप्य मुदितः परिषस्वजे ॥

Colophon :

नीडामङ्गलं रघुनाथाचार्य सङ्गृहीतं स्वहस्तलिखितम् ॥

808

Sl. No. 39112 **प्रमाणसंग्रहः** Ms. No. P. 614

Beginning :

एवं सर्वस्मात्परे भगवति तदितरसामान्यबुद्धिरपि प्रत्यवायहेतुरिति स्मर्यते ।

ये तु सामान्यभावेन मन्यन्ते पुरुषोत्तमम् ।
ते वै पाषण्डिनो ज्ञेयाः सर्वधर्मबहिष्कृताः ॥
यस्तु नारयणं देवं सामान्येनाभिमन्यते ।
स याति नरकं घोरं यावच्चन्द्रदिवाकरम् ॥

End :

श्रीभरद्वाज × पञ्चरात्रंमहद्दिव्यं शास्त्रं श्रुतिविभावनं विशेषेणाधिगन्तव्यम् गीतं भगवता स्वयम् ।

वेदवेद्यः स भगवान् कृपया परयाच्युतः ।
चतुर्विधमिदं प्राह सर्वेषां हितकारणादित्यादि ॥
अथ चेतनस्वरूपादिकं निरूप्यते × पाराशर्यस्मृतौ
देहेन्द्रियमनःप्राणधीभ्यीन्यो ज्ञानसंश्रयः ।

Colophon :

— — —

809

Sl. No. 39113 **प्रमाणसंग्रहः** Ms. No. P. 617/1

Beginning :

श्रीपराशरः—

विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम् ।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ॥
आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्य सर्वभूतस्थमच्युतं पुरुषोत्तमम् ॥

एवं नानाविधैश्शब्दैरेक एव त्रिविक्रमः ।
वेदेषु सपुराणेषु गीयते पुरुषोत्तमः ॥

हरिवंशे--

प्रकृत्याः प्रथमो भाग × देवी यशस्विनीति ।

Colophon :

— — —

810

Sl No. 39114 प्रमाणसङ्ग्रहः Ms. No. P. 3795/1

Beginning :

श्रीमति वैष्णवेपुराणे पञ्चमेंऽशे षष्ठेऽध्याये—

बृन्दावनं भगवता कृष्णेनाक्लिष्टकर्मणा ।
शुभेन मनसा ध्यातं गवां बृद्धिमभीप्सता ॥

ततस्तत्रातिरूक्षेऽपि घर्मकाले द्विजोत्तम ।
प्रावृट्काल इवोद्भूतं नवशष्पं समन्ततः ॥

End :

न त्वामिच्छाम्यहं द्रष्टुं रामेण निहतं शरैः ।

तत्र मन्दोदरीप्रलापे—

तमसःपरमो धाता शङ्खचक्रगदाधरः ।
× नित्यश्रीरजेयः शाश्वतो ध्रुवः ॥

Colophon :

— — —

811

Sl. No. 39115 प्रमाणसङ्ग्रहः Ms. No. P. 3799/5

Beginning :

माण्डूक्योपनिषदि—

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।

बालकाण्डे--

बाल्यात् प्रभृति सुस्तिग्धो लक्ष्मणो लक्ष्मिवर्धनः ।
रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः ॥

सर्वप्रियकरस्तस्य × पि शरीरतः ।

End:

महाभारते राजसूये दानधर्मोदाहरणे धर्मसूनुं प्रति भीष्मः—

सर्वे वदोः सर्वविद्याः सशास्त्राः
सर्वे यज्ञाः सर्वयज्याश्च कृष्णः ।
विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये
तेषां राजन् सर्वयज्ञाः समाप्ताः ॥

× सप्तविंशे ×

Colophon:

— — —

812

Sl. No. 39116 **प्रमाणसङ्ग्रहः** Ms. No. P. 4350

Beginning:

मा × तस्य भगवत्परत्वमविवादं अत्रोच्यते—

वेदे रामायणे पुण्ये भारते भरतर्षभ ।
आदौ मध्ये तथान्ते च विष्णु × ॥

× व्यासायामिततेजसे ॥
यस्य प्रसादाद्वक्ष्यामि नारयाणकथामिमाम् ॥

तथा च श्री रामायणे—

End:

महाजालसमाकृष्टान् जालन् म × निवोद्धतान् ।
महाजालसमाकृष्टान् पश्य जन्तून् सुदुःखितान् ॥

निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः ।
भित्वैनां च कुतो याति नैतां छिन्दन्ति दुष्कृताम् ॥

End :

इति प्रमाणसङ्ग्रहे चतुर्थः आश्वासः ॥

813

Sl. No. 39117 प्रमाणसङ्ग्रहः Ms. No. P. 9554/4

Beginning :

× रुद्रः संहारकारकः ॥—

सभापर्वणि—

सनत्कुमारं रुद्रं च सप्तर्षींश्च तपोधनान् ।
पूर्वमेवासृजद्ब्रह्मा तथा लोकांस्तथा प्रजा इति ॥

End :

नास्ति नक्षत्रसंबन्धः न निमित्तपरीक्षणम् ।
श्रद्धैव कारणं पुंसां अष्टाक्षरपरिग्रहे ॥

इत्यादि ॥

Colophon:

प्रमाणसंग्रहस्सम्पूर्णः—

814

Sl. No. 39118 प्रमाणसङ्ग्रहः Ms. No. P. 10547

Beginning :

× प्रमाणानानि प्रदर्श्यन्ते ।
प्रबन्धेऽस्मिन् × प्रथमं तावत् श्रियः ॥

पतिर्नारायण एव सर्वस्मात्पर इति × स्मृतीतिहासपुराणेषु-प्रतिपाद्य इत्युच्यते ॥ +

End :

शास्त्रसद्भक्तिमफलतस्य × मणिशोभितम् ।
कुलस्त्री चा + + ॥

+ हीनस्य जतिश्शस्तपजन्तपः ।
अप्रमाणस्येवदेहस्य मण्डनं लोकरञ्जनमित्यादि ।

Colophon :

× तप्रमाणसङ्ग्रहे भगवद्भैभखण्डः समाप्तः ।

प्रमणसङ्ग्रहः सम्पूर्णः । कार्तिकैमासं ३० एळुतिमुडिञ्जदु ।

815

Sl. No. 39119 प्रमेयमाला Ms. No. P. 789

Bginning :

नमः श्रीविष्णुचित्तार्यपदपङ्कजपांसवे ।

रामानुजमुनीन्द्रोक्तिरहस्यज्ञानहेतवे ॥ १ ॥

प्रगुणीकृतमन्मार्गं भज.मः पुरुषं परम् ॥ २ ॥

जगतामुपकाराय जातं यतिवरात्मना ।

सच्चेतोमधुकरबृन्दसेवनीयां

सौरभ्यं श्रुतिशिरसमादधानाम् ।

वत्सानां कुलपतिरद्भुतामकार्षीत्

अम्लानां वरदगुरुः प्रमेयमालाम् ॥ ३ ॥

मीमांसायां विधिप्राप्तत्वरागप्राप्तत्व विवेकार्थं अध्ययन-

End :

आलोकनेन तेषां तु शुध्यन्ते भानुदर्शनात् ।

लग्नं वानुपपन्नं वा यः श्राद्धे भोजयिष्यति ॥

रेतोमूत्रपुरीषादीन् स पितृभ्यः प्रयच्छति ॥

Colophon:

इति श्रीवत्सकुलतिलक श्रीवरदसूरिविरचितायां प्रमेयमालायां यति-लिङ्गसमर्थने तृतीयः स्कन्धः ॥

816

Sl. No. 39121 प्रमेयमाला Ms. No. P. 1754/3

Beginning :

नमः श्रीविष्णुचित्तार्यपादपंकजपांसवे ।

रामानुजमुनीन्द्रोक्तिरहस्य ज्ञानहेतवे ॥

जगतामुपकाराय जातं यतिवरात्मना ।
प्रगुणीकृतसन्मार्गं भजेम पुरुषं परम् ॥

\+ + +

मच्चेतो मधुकरबृन्दसेवनीयां
सौरभ्यं श्रुतिशिरसस्समादधानाम् ।
वत्सानां कुलपतिरद्भुतामकार्षी-
दम्लानां वरदगुरुः प्रमेयमालाम् ॥

End:

तद्दर्शनादिति । अनाविष्कु × × ×
स अतस्त्रैवर्णिकानामेव विधिनिषेधशास्त्रकिङ्कराणां ब्रह्मविद्याधिकार इति सिद्धम् ॥

Colophon:

इति वत्सकुलतिलक वरदराजसूरिविरचिता समाप्ता प्रमेयमाला ॥

817

Sl. No. 39123 प्रश्नोपनिषद्भाष्यम् Ms. No. C. 4689/18

Beginning:

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया ।
अंजनाचलशृंगारमंजलिर्मम गाहताम् ।

\+ सुकेशाच भारद्वाज इति । (?) भरद्वाजस्य अपत्यं पुमान् भारद्वाजः । नामतस्सुकेशा शिबेरपत्यं शैब्यः ।

End:

एवं अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्—भेदव्यपदेशाच्चान्यः सुषुप्त्युत्क्रान्त्योर्भेदेन उभयेपि हि भेदेनैनमधीयत इत्यादिन्यायः प्रकुप्येयुरित्यलं प्रपञ्चेन ॥

Colophon:

प्रश्नोपनिषद्भाष्यं समाप्तम् ॥

818

Sl. No. 39125 प्रार्थनापारिजातम् Ms. No. P. 6024

Beginning:

श्रीरङ्गराजगुरुपुङ्गवमस्मदार्यं
रामानुजोत्तरपराङ्कुशमस्य मान्यान् । ×
अत्यन्तसाक्षात्स्वपदमुखादापि । (?)
ार्थनापारिजाताय प्रबन्धाय यतामहे ॥

End:

× निश्चित्य परिगृह्यताम् ।
मत्कृतिस्तद्बलादेव लभते साधुतामसौ ॥

वेदान्तद्वयदेशिकेन्द्रकरुणावाराशिराकाशशी
श्रीमत्संयमिसार्वभौम × श्रीदुग्ध × ।
× कल्पद्रुराकल्पमभ्य
सद्भाग्यधनस्सतामभयदः रेजे गुरुः ॥

Colophon:

इति श्रीमत्तिरुवरङ्गमाण्डान् तिरुमलै रङ्गराजमहादेशिकतनूजस्य त × × कदैवतस्य श्रीनिवासदासस्य कृतिषु प्रार्थनापारिजातः परिपूर्णः ॥

819

Sl. No. 39127 ब्रह्मतर्कस्तवखण्डनम् Ms. No. P. 4794

Beginning:

ब्रह्मतर्कस्तवस्येह दूषणं क्रियते मया ।
अस्मदाचार्य + ॥

उच्चावचैरुपनिषद्वचनप्रकाण्डै-
रुःमी त तिगणैरुपबृंह्मगैश्च ।
यत्सादरं समुदितं यमिनामुपास्यं
तद्ब्रह्म केशव भवानिति निश्चितं हि ॥

अस्यार्थः — उच्चावचैरनेकभेदैः । सदेव सौम्येदमग्र आसीत् ।
आत्मा वा इदमेक एवाग्र आसीत् ।

End :

परात्मानमीशानं तमसा रुद्ररूपिणम् ।
इति वाराहे ।

× रुद्र यच्चेदं ब्राह्म कर्म स्यात् ।
× दिष्योपपसेव्यते ॥

त × द्रमिति विख्यातम् × ।
कनिष्ठादिदं नृणां × ॥

× तपसा युक्तं केवलं नाम ।
× नृणामिह लोके परत्र चेति ॥

Colophon :

— — —

820

Sl No. 39128 ब्रह्मपदशक्तिवादः Ms. No. B. 733

Beginning :

गदितं गङ्गाधरपुरवास्तव्यैर्वात्स्यराघवाचार्यैः ।
भावप्रकाशिकायां दोषदुर्बलमपि व्युदस्यामः ॥

बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्यार्थः ।
इति ब्रह्मशब्दार्थविवृतिभाष्यम् ।

End :

अत्र सिद्धान्तश्लोकः —

व्यासार्याणां बृहत्त्वं गुण इति फणितैर्वेदचूडागुरूणां
सारावल्यां स्फुटोक्तेः बृहदमितगुणं गाहते ब्रह्मशब्दः ।
ज्यायस्त्वं सर्वतो वा गुणजमितरथैव एषां बृहत्वा-
दित्येवं रङ्गामानुजगुरुकरुणा सङ्गिनस्सङ्गिरन्ते ॥

Colophon :

— — —

821

Sl. No. 39130 ब्रह्मपदशक्तिवादः Ms. No. P. 5628/3

Beginning :

मुरहरचरणाब्जध्यानधारां विधाय
प्रथितयतिपतिश्रीपादपद्मं प्रणम्य ।
विशदतममनन्ताचार्यवर्यः प्रसिद्धां
प्रकटयति विविक्तां ब्रह्मशब्दस्य शक्तिम् ॥

इह तावत् ब्रह्मशब्दस्य प्रवृत्तिनिमित्तं विचार्यते—

End :

तादृशजन्माद्यधिकरणटीकावाक्यं च सोपपत्ति × इत्यलमति विस्तरेण ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon :

इति ब्रह्मपदशक्तिवादस्समाप्तः ॥

822

Sl. No. 39132 ब्रह्मपदशक्तिवादः Ms. No. P. 3081

Beginning :

रघुवंशदुग्धजलधौ जातं सन्तानमाश्रये कमपि ।
अधिकोन्नतेरपि यतो विनतैरग्र्यं फलं करग्राह्यम् ॥

श्रीश्रीनिवासयोगीन्द्रचरणाम्बुरुहद्वयम् ।
ध्यात्वा श्रीकृष्णतातेन ब्रह्मशब्दार्थ उच्यते ॥

ब्रह्मशब्दो हि ब्रुवतेरतेर्यौणादिकेन कर्त्रर्थम × न् प्रत्ययेना × गमसहितेन ॥

Colophon :

जन्माद्यधिकरणभाष्ये बृहतेर्धातोरित्यस्य × न् प्रत्यया × स्य रूढिसहकृतस्येति × यां पूरणमवि × अर्थापत्तिसह कृयोग-लभ्यश्च स्वार्थिकात् × इत्यलं पल्लवितेन ॥

Colophon :

लक्ष्मीनाथ × तातार्यदेशिकवंश्येन कृष्णतातेन ब्रह्मपदार्थ
विचारः कलितो विदुषा × भवेत् ॥

823

Sl. No. 39135 | ब्रह्मपदशक्तिवादः | Ms. No. C. 1165

Beginning :

अखिलभुवनबन्धोन्मोचने बद्धदीक्षं
प्रकृतिमनपहाय स्वेच्छयेहावतीर्णम् ।
वृषगिरिशिखरस्थैस्सर्वदा पूज्यमानं
तमपि पुरुषमीडे कान्तया नित्यजुष्टम् ॥

नत्वा यतिवर चरणौस्स्मृत्वानन्तार्यपादुकाधूलीः ।
ब्रह्मपदशक्तिवादं तनुते श्रीशैलयोगिराजसुधीः ॥

End :

तस्मात्सिद्धं ब्रह्मशब्दो योगवृत्त्या बृहत्त्वे सति बृहद्गुणकत्वे च सति बृह्मणत्वमेव निमित्तीकृत्य परमपुरुषमेव प्रतिपादयति सहस्रानमपाठबलायात रूढिवृत्त्या तु श्रियः पतित्वं निमित्तीकृत्य तमेव परमपुरुषं प्रतिपादयती त्वनिमित्ततो भगवदनन्यग एवायमिति सर्वमङ्गलम् ॥

Colophon :

श्रीश्रीनिवासदासेन श्रीभूतपुरवासिना ।
योगिराजेन रचितो वादार्थोऽयं विजृम्भताम् ॥

824

Sl. No. 39137 | ब्रह्मपदशक्तिवादः | Ms. No. B. 548

Beginning :

श्रीमद्रङ्गाधिराजस्य नन्दकांशेन यो दशाम् ।
रक्षार्थमवतीर्णं श्रीरङ्गराजगुरुं भजे ॥

यद्वेदान्तगुरुःस्वतो भगवता विश्राणिताज्ञाप्यकृत्
सिद्धान्तान्तरबाह्यतां प्रकटयन्निश्रेयसाभ्यर्थिनाम् ।

× श्रीनिवासः परं ब्रह्मेत्येषा श्रीभाष्यपद्धतिः ।
तत्कण्टकोन्मीलनन्तु निगमान्तगुरुर्व्यधात् ॥

नायं मान्यतमं यदाक्तविदधत् × दिति ख्यापितं
तस्य श्रीवृषभूधरेश्वरतदोदास्येन धन्या वयम् ॥

End :

तथा च नियन्तृनियाम्ययोस्स्वरूपोचितममाशक्तस्य प्रवृत्तिप्रवर्तनमेवेति तात्पर्यात् । अतोऽशक्ताधिकारिकत्वेनैव भक्तितः प्रपत्तेः व्यावर्तनमिह विवक्षितं तेन यथाधिकारं भक्तिप्रपत्योरुभयोरपि यथाधिकारं स्वरूपोचित्यमेव वास्तवमिति सिद्धम् ॥

इत्थं च तत्त्वहितयोरस्मदुक्तप्रकारयोः ।
आचार्यसूक्त्यनुसृता वनुयोगस्समाहितः ॥

Colophon :

- — —

825

Sl. No. 39138 ब्रह्मपदार्थः Ms. No. P. 3644/4

Bginning :

यो वै तां ब्रह्मणो वेद आत्मा तेनावृतां पुरीम् ।
तस्मै ब्रह्म च ब्रह्मा च आयुः कीर्ति × ददुः ॥

अत्राप्राकृतस्थानविशेषावस्थितं परब्रह्मभूतं पुरुषोत्तमं श्रीनारायणं ज्ञातवतः तदेकनिष्ठस्य तच्चरणपरिचरणलक्षणपरमपुरुषार्थैकप्रवणमानसस्यातिमहोदारपरमपुरुषप्रसादेन पुरुषार्थसिद्धिरपि भवतीत्युच्यते—इति प्रसिद्धिवन्निर्देशेन ब्रह्मज्ञानिनो × व भवमनेकप्रमाणसिद्धमावेद्यते ॥

End :

शीलकरुणावात्सल्यरसनिष्यन्दिविलोचनविलोकनेनैवात्यन्तार्द्रापराधानामपि ह्रीति लेशविरहेण समाश्रयणं सम्भवतीति सरोजनयन इत्यस्याभिप्रायः ।
एत × रामो वः ॥

Colophon:

—

826

Sl. No. 39139 — ब्रह्मपदशक्तिविचारः — Ms. No. P. 10598/1

Beginning :

श्रुतप्रकाशिकायां ब्रह्मत्वं स्वरूपतो गुणतश्चाश्रयणीयम्गुणतो ब्रह्मत्वं च सद्वारकमित्युक्तत्वाभात्रे सति संयुक्तत्वम्। अस्मन्मते ब्रह्मगुणानामपि द्रव्यत्वात् विभुत्वाच्च—

End :

स्वाधिकरणवृत्तित्वसंबन्धावच्छिन्न स्वनिष्ठावच्छेदकताकप्रतियोगिताक भेदवत्त्वसंबन्धेन × × अन्यतरवैशि ष्ट्यविरहादित्यादिकं स्वयमूह्यम् ॥

Colophon :

— — —

827

Sl. No. 39142 — ब्रह्मविद्याविजयः — Ms. No. P. 6564/2

Beginning :

सम्मतं तस्य तु प्रधानत्वं सर्वथा मण्डलेशत्वं विष्णुरूपत्वं तेजःप्रधर्षि तदेवस्तुतेन तादृशमहातेजःप्रशमनं सप्तमीतिथिप्रियतया तस्यां पूजनीयत्वं च षडिंशोऽध्याये प्रपञ्चितम् ॥

End :

अत्रायं पुरुषः स्वयज्योतिः प्राणेषु हृद्यन्तज्योतिः इत्यादिः यद्वा भोग्य जातं स्वार्थतया × पदविवरणमेवेदम् । हर हति अनुहरतेऽनूद्यमानेऽजिति सोपपददाज्विधीयते निरुपपदं चेदं न च पचाद्यच ×

हरशब्दस्य दर्शनेन पचाद्य ×

Colophon :

इति ब्रह्मविद्याविजये देवतान्तरस्यान्तरादित्यवेद्यत्वभङ्गः ॥

828

Sl. No. 39143 **ब्रह्मविद्याविजयः** Ms. No. C. 4689/23

Beginning :

अथ क एते सन्तः । धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति × महात्मा स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं ब्रह्म हतो महान्तमित्यादि श्रुतिप्रतीत भगवच्चिह्नलक्षिता इति ब्रूमः ।

End :

विद्याब्धिपारदृश्वा च गुणवान् गुणवत्सलः ।
कृतज्ञो मधुरालापः पापकर्मपराङ्मुखः ॥

सत्यवांच्छौचनिलयः सुस्वावो विजितेन्द्रियः ।
रणांकणे कृतां नाहास्संख्याकांश्च सदाजिरे ॥

कामिनीकामिकेळिज्ञः युवापि स्थविरः प्रियः ।
धर्मदापितकोशश्च समृद्धबलवाहनः ॥

सुभगश्च × ।

Colophon :

— — —

829

Sl. No. 39146 **ब्रह्मसूत्रवार्तिकोद्ग्राहिणी** Ms. No. P. 3398

Beginning

श्रीनिवासं गुरुं नत्वा वेङ्कटेश्वरमव्ययम् ।
अविरोधं वदिष्यामि वेदान्तार्थप्रसिद्धये ॥

वैखानसान्वयजसुन्दरनाथसूनु-
वेदान्तसारमतुलं कृतवान् वृषाद्रौ ।
यत्कर्म षण्मतविसारिकवीश्वराणां
संसेवितं सुरमुनीश्वरलालितञ्च ॥

+ अथातो ब्रह्मजिज्ञासा । जन्माद्यस्य यतः । सङ्गतिविषयसं-

शयानाहुः ।

End :

तदुक्तं मनसैषु ग्रहा गृह्यन्त इति । इत्यादौ विधिपारायणात विधिर्न सम्भवति । तदसम्भवाच्च तदन्वयोऽपि न सम्भवति इत्याशंक्य अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्वं—

Colophon :

— — —

830

Sl. No. 39155 ब्रह्मसूत्रविषयवाक्यदीपिका Ms. No. P. 9568/2

Bginning :

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया ।
अञ्जनाचलश्रृङ्गारमञ्जलिर्मम गाहताम् ॥

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
भाष्योदाहृतवेदान्तवाक्यार्थस्सम्प्रकाश्यते ॥

विस्तरोपनिषद्वाप्यप्रवेशाक्षमचेतसाम् ।
अनुग्रहेण साफल्यं कृतिरेषा प्रपत्स्यते ॥

जन्माद्यस्य यतः । भृगुवल्ल्यां श्रूयते यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति–

End :

यान्येतानि देवक्षत्राणि इन्द्रावरूण इत्यादिदेवतादेवः । स्पष्टम् ।

क्षेमाय यः करुणया क्षितिनिर्जराणां
भूमावजृम्भयत भाष्यसुधामुदारः ।
वामगमाध्वगवदावदशूलपाणिः
रामानुजस्स मुनिराद्रियतां मदुक्तिम् ॥

Colophon :

इति श्रीरङ्गरामानुजमुनेः कृतिषु भाष्योपयुक्तोपनिषद्वाक्यविवरणं समाप्तम् ॥

831

Sl. No. 39164 ब्रह्मसूत्रवृत्तिः Ms. No. P. 4330/B

Beginning:

श्रियः कान्तोऽनन्तो वरगुणगणैकास्पदवपु-
र्हताशेषावद्यः परमप × वाङ्मनसयोः ।
अभूमिर्भू × नतजनदृशामादिपुरुषो
मनस्तत्पादाब्जे परिचरणसक्तं भवतु मे ॥

प्रणम्य शिरसाचार्यांस्तदादिष्टेन वर्त्मना ।
ब्रह्मसूत्रपदान्तस्थवेदान्तार्थः प्रकाश्यते ॥

अत्रेयं वेदविदुषां प्रक्रिया—अचिद्वस्तुनः स्वरूपतः स्वभावतश्चात्यन्त विलक्षस्तदात्मभूतश्चेतनः प्रत्यगात्मा । + अथातो ब्रह्मजिज्ञासा ॥ ब्रह्ममीमांसविषयः ॥

End:

मामुपेत्य +

इदं ज्ञानमुपाश्रित्य मम साधर्म्यगोचराः । (?)
सर्गेऽपि नोपजायन्ते प्रळये न व्यथन्ति च ॥

इति शब्दादेव एनं कदाचित् नावर्तयतीत्यवगम्यते । सूत्रावृत्तिस्तु शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥

Colophon:

इति श्री भगवद्रामानुजविरचिते वेदान्तदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

832

ब्रह्मसूत्रवृत्तिः Ms. No. P. 3270/3

Sl. No. 39171

Beginning:

समस्तचिदचिद्वस्तुशरीरायाखिलात्मने ॥
श्रीमते निर्मलानन्दोदन्वते विष्णवे नमः ॥

परमपुरुषप्रसादात् वेदान्तसारः उद्ध्रियते । अथातो ब्रह्मजिज्ञासा ॥
अत्रायमथशब्दः आनन्तर्ये वर्तते ॥

End :

आविर्भूतापहतपाप्मत्वादिगुणः अनवधिकातिशयानन्दं परं ब्रह्मानु भवति । न च पुनरावर्तत इति च निश्चीयते इति सर्वं समञ्जसम् ॥

Colophon:

इति भगवद्रामानुजविरचिते वदान्तसारे चतुर्थाध्यायस्य चतुर्थः पादः ॥

833

Sl. No. 39176 ब्रह्मसूत्रवृत्तिः Ms. No. P. 2195/1

Beginning :

पाराशर्यो दयालुः जयति बहुविधान् वेदमार्गप्रतीपान्
सम्यक् × गर्वसर्वज्ञवैस्तैः ।
ब्रह्मण्यैश्वर्यभूते गुणगणविततिं हन्तुकामान् कुतर्कैः
कस्तैरुलङ्घ्यमायाविततविरचितैः न्यायमार्गप्रहीणैः ॥

वेदापहारिणं दैत्यं मीनरूपी निराकरोत् ।
तदर्थहारिणः सर्वान् व्यासरूपी महेश्वरः ।

\+ \+ \+

पाराशार्यजयोऽस्माभिः व्याप्यते च सतां मुदे ॥ (?)

End :

यत्र त्रयो वनादौ ब्राह्मणानामावसथस्थले ब्राह्मणस्यान्वेषणं कर्तुमुचितं तत्र गत्वैनं प्राप्नुहीत्यर्थकेन तस्य ब्राह्मणत्वस्फुटीकरणात् । सूत्रे उत्तरग्रहणं पूर्वसूत्रे उपक्रमगताः हेतवः विवक्षिताः इति ज्ञापनाय ॥

संस्कारमर्शात् × तदभावभिलापाच्च ॥

Colophon:

— —

834

Sl. No. 39179 **ब्रह्मसूत्रवृत्तिः** Ms. No. B. 316/2

Beginning :

उपासात्रैविध्यप्रसङ्गात् आश्रितत्वाचान्यत्रापि ब्रह्मलिङ्गवशात् प्राणशब्दस्य ब्रह्मणि वृत्तेः । इहापि हिततमोपासादिब्रह्मलिङ्गयोगात् ब्रह्मोद्देश एवायमिति गम्यत इति ॥

End :

एतेन पादचतुष्टयोक्तन्यायकलापेन वेदान्तेषु जगत्कारणप्रतिपादनपराः सर्वे वाक्यविशेषाः चेतनाचेतनविलक्षणसर्वज्ञशक्तिब्रह्मप्रतिपादनपराः व्याख्याता व्याख्याता इति पदाभ्यासः परिसमाप्तिद्योतनार्थः ॥

Colophon :

इति श्रीवाधूलकुलतिलक श्रीनिवासार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते प्रथमस्याध्यायस्य चतुर्थः पादः ॥ समाप्तश्चाध्यायः ॥

835

Sl. No. 39181 **ब्रह्मसूत्रवृत्तिः** Ms. No. P. 1072

Beginning :

अतसीगुच्छच्छायमञ्चितोरस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥

अथातो ब्रह्मजिज्ञासा ॥ परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिश्श्रोत्रियं ब्रह्मनिष्ठम् । तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्वतो ब्रह्मविद्याम् । अस्मिन् वाक्ये ब्रह्मप्राप्तिसाधनज्ञानेच्छोः न्यायसिद्धानुवादेन गुरूपसदनं विधीयते ।

End :

एवं उपक्रमोसंहारादिभिः भगवत्परत्वावगमात् बहूपनिषत्श्रुतयोगार्थसाधारणाभ्यस्तनारायणशब्दानुरोधेनैव नानार्थसाधारणैकैकोपनिषत्पठितयोगथशिवादिशब्दानां नेयत्वाच्च ॥ उपनिषदो भगवत्परत्वं सिद्ध्यति ॥

Colophon :

इति श्री रंगरामानुजमुनिसार्वभौमरचितायां शास्त्रदीपिकायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

836

Sl. No. 3918? ब्रह्मसूत्रवृत्तिः Ms. No. P. 4787/2

Beginning :

वेदान्तयतिराजाख्ययतिना वेदविन्मता ।
नैशद्याय धियो ब्रह्मसूत्राणां वृत्तिरिष्यते ॥
हरिः ओम् । अथातो ब्रह्मजिज्ञासा ॥

अथ धर्मविचारानन्तरं अतः कर्मविचारस्य कृतत्वाद्धेतोः ब्रह्मजिज्ञासा ब्रह्मविचारः कर्तव्यः ।

End :

अनावृत्तिरशब्दादनावृत्तिरशब्दात् । न च पुनरावर्तत इति शब्दात् श्रुतेः पुनरुद्धारो नास्तीत्यवगम्यते । सूत्रावृत्तिः शास्त्रपरिसमाप्त्यर्थति सर्वं समञ्जसम ।

Colophon :

श्रीमद्वादिभीकृत्कुलजलधिविधोर्वेङ्कटाचार्यवर्या-
लज × नेन वेदान्त्युपपदयतिराजाख्ययोगीश्वरेण ।
वृत्तौ × सूत्र्यामगमिनि गमनं वेङ्कटार्यप्रसादा-
दाविर्भावं गुणानां तनुश्रुतिकलयन् लक्ष्णेंऽघ्रिस्तुरीयः ॥
सूत्रवृत्तिः सम्पूर्णा ॥

837

Sl. No. 39186 ब्रह्मसूत्रवृत्तिः Ms. No. P. 628/6

Beginning :

श्रीशैलवंशाबुधिपूर्णचन्द्र-
माचार्यदीक्षितगृहीतसमस्तशास्त्रम् ।
ख्यातं दिशासु महनीयगुणाम्बुराशिं
वन्दामहेऽण्णयवराभिधदेशिकेन्द्रम् ॥ १ ॥

भ्राता यस्य + श्रीनिवासार्यवर्यः ।

प्रायच्छत् + श्रीनिवासात्मना ॥

वेदन्तार्थं शिखासणि + श्रीनिवासाभिधम् ॥

प्रपद्ये तत्त्वमार्ताण्डध्वान्तविध्वंसनं शुभम् ।

यत्प्रसादन्निरस्ताभूच्चन्द्रिका माध्वजीवनी ॥

जगज्जन्मस्थेमा × ॥

इह खलु परमकारुणिको भगवान् बादरायणः

अतः शास्त्रमनारम्भरणीयमिति प्रत्यवस्थानात् सङ्गतिः ॥

ओं शास्त्रयोनित्वात् ॥

अदृष्टं ब्रह्म सर्वस्य त्रष्टि(?)ति प्रागुदीरितम् ।

End :

अतोऽस्मदुक्तप्रकारादेव पूर्वोत्तरपक्षौ युक्तौ सूत्रार्थश्चेति दिक् ॥

परापरः पुरुषयो ब्रह्मेति प्रतिपादितम् ।

तस्याकाशत्वमांशक्य ब्रह्मत्वमिह साध्यते ॥

ओं दहर उतरेभ्यः ॥

Colophon :

— — —

838

Sl. No. 39189 ब्रह्मसूत्रवृत्तिः Ms. No. B 142/2

Beginning :

जगज्जन्मस्थेमाप्ययनियमनामेयमहिमा

नतत्राताभीतिप्रदमृदुलकारुण्यमहिमा ।

त्रयीशृङ्गाभङ्गप्रगुणगुणसर्वस्वगरिमा

रमानेता चेतःपदमिदमुपैतु प्रतिपदम् ॥

त्रयीमयीं + उभौ ॥

त्रयीशिखा + सुदर्शनं भावये ॥

पुरा सुरारेः + दिशेदसौ ॥

अर्के गुणाकार + वेङ्कटाध्वरिणसिद्धगुणं प्रणौमि ॥

अद्वैतशुष्कतरु + वेङ्कटाध्वरिणमिद्धगुणं प्रणौमि ॥
समुन्नयन् + तम्मणणयार्यं गुरुवर्यमाश्रये ॥
चन्द्रिकोदीरिता दोषा अलग्ना इति साधये ॥
तत्र प्रमेयार्थप्रतिज्ञा परमादिमसूत्रम् — अथातो ब्रह्मजिज्ञासा ॥

End :

इति श्रीशैलकुलतिलकश्रीनिवासतातयार्यतनूभवेन लक्ष्माम्बा गर्भशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षितकटाक्षवीक्षाशिक्षितमीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयदीक्षिताचार्यानुग्रहगृहीतचतुस्तन्त्रनियन्त्रितमानसेन श्रीनिवासविदुषा विरचिते तत्त्वमार्ताण्डे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

द्युभ्वाद्यायतनं स्वशब्दात् ॥ आधीयते–यस्मिन् द्यौः । द्युपृथिव्याद्याधारत्वेन श्रुत आत्मा किं जीव उत परमात्मेति संशयः । यद्यप्यदृश्यत्वाधिकरणे एतत्प्रकरणस्य परमात्म—

Colophon:

— — —

839

Sl. No. 39190 ब्रह्मसूत्रवृत्तिः Ms. No.BS. 211

Beginning :

× परता दर्शिता । तथपि नाड्याधारत्वमनःप्राणसम्बन्धित्वबहुधाजायमानत्वादिभिः स्पष्टजीवलिङ्गैः प्रकरणविच्छेदशङ्कायां तत्तल्लिङ्गान्यथासिद्ध्या प्रकरणस्य ब्रह्मपरतासमर्थनान्न विरोधः ।

End :

ध्वान्तच्छेदकपावकालिपततनुत्रय्यात्समग्र्यान्वित-
स्तय्याशासु सहस्रधा प्रसृमरस्तत्त्वार्थबोधक्षमः ।
मोक्षापेक्षिजनाध्वदर्शनपटुर्मोहापहात्मोदयो
मार्ताण्डः श्रुतिशृङ्गभाग्विजयतां क्षेमाय भूमा सताम् ॥

Colophon :

इति श्रीशैलकुलति[illegible]सर्वतन्त्रस्वतन्त्रश्रीनिवासतातयाचार्यनन्दनेन लक्ष्माम्बागर्भविविक्तशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षितकटाक्षवीक्षा

शिक्षितमीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयदीक्षितानुग्रह गृहीताचतुस्तन्त्र नियन्त्रितमानसेन श्रीनिवासविदुषा विरचिते तत्वमार्ताण्डे प्रथमस्याध्यायस्य चतुर्थपादः ॥

840

Sl No. 39191 ब्रह्मसूत्रवृत्तिः Ms. No. B. 227

Beginning;

श्रियः पतिश्चिन्मयसद्गुणोदयः
त्रयीशिरस्सन्ततिचिन्तितावधिः ।
परिस्फुरद्वादविरोधशातनः
प्रसीदतां मे हरिरिष्टसिद्धये ।।

उक्ताहारे त्रयीशृङ्ग. + विशोध्यते ।।

एवं प्रथमेनाध्यायेन प्रतिपादितस्य—

End:

निर्दुष्ट इति सर्वं समञ्जसम् । त्रयीमयपुरन्ध्रिका + सतां प्रीतये ॥ १ ॥
गम्भीरे यतिसार्वभौम × हृष्यन्तु च ।। २ ।।
इति मितमतिना मया × सन्तु हृष्टाः ।। ८ ।।

Colophon:

इति श्रीशैलकुततिलक सर्वतन्तस्वतन्त्र + +
श्रीनिवासविरचते तत्वमार्ताण्डे द्वितीयस्याध्यायस्य चतुर्थपादः ॥

841

Sl. No. 39193 ब्रह्मसूत्रवृत्तिः Ms. No. C. 2399

Beginning:

अशेषचिदचिद्वस्तुरक्षाशिक्षैकलक्षणम् ।
समस्तसुगुणावासं श्रीनिवासमुपास्महे ।।

ब्रह्मायोगव्यवच्छेदः प्रथमे पाद ईरितः ।
अन्ययोगव्यवच्छेदः त्रिपाद्यामधुनोच्यते ॥

End:

प्रसिद्धाः सर्वत्र प्रबलफलभोगेष्वधिकता
दृगारूढाः प्रौढाः प्रगुणबहिरन्तर्नियमने ।
परीक्षासंलक्ष्यक्षरचरितवैश्वानरदशो
यशोभिः शोभन्ते सदसि बहिरी वेङ्कटविभोः ॥

Colophon :

इति श्रीशैलकुलतिलकश्रीनिवासतातार्यतनूभवेन + श्रीनिवासविदुषा विरचिते तत्त्वमार्ताण्डे प्रथमाध्यायस्य द्वितीयः पादः ॥

842

Sl. No. 39194 ब्रह्मसूत्रवृत्तिः Ms. No. C. 2400

Beginning

अस्पष्टजीवलिङ्गानामुक्तो ब्रह्मसमन्वयः ।
इदानीं स्पष्टलिङ्गानां समन्वय यथोच्यते ॥

End :

यन्नामरूपघटनापटुना कृतं तत्
किन्नाम तेन बलिनो भवितात्र कार्यम् ।
यद्रक्षणक्षमकरी बहिरीकुलेन्द्रोः
श्रीवेङ्कटप्रभुमणेः करुणात्र नो चेत् ॥

End :

इति श्रीशैलकुलतिलक श्रीनिवासतातार्यतनूभवेन + श्रीनिवासविदुषा विरचिते तत्त्वमार्ताण्डे प्रथमाध्यायस्य तृतीय पादः सान्तिमगमत् ॥

843

Sl. No. 39195 ब्रह्मसूत्रवृत्तिः Ms. No. C. 4556

Beginning :

जगज्जन्मस्थेमाप्ययनियमनामेयमहिमा
नमत्राताभीतिप्रदमृदुलकारुण्यपटिमा ।

त्रयीशृङ्गाभङ्गप्रवणगुणसर्वस्वगरिमा
रमानेता चेत:पदमिदमुपेतु प्रतिपदम् ॥

+ + + +

साध्यते ब्रह्मसूत्राणां सङ्गतासङ्गतार्थता ।
राद्धान्तयोस्स्वपरयोः श्रीनिवासकृपावशात् ॥

End :

दहरप्रकरणे एष सम्प्रसादोऽस्माच्छरीरात्समुत्थायेति तस्यैव निर्दिष्टप्रतिनिर्देशकेन तच्छब्देन परामर्शादिति तदिदमाशङ्कते । इतरपरामर्शात्स इति चेदिति । तत्रोत्तरं । नासम्भवादिति ॥

Colophon:

३९ पत्रे—

इति श्रीशैलकुलतिलक श्रीनिवासताताचार्यतनूभवेन लक्ष्माम्बा ग शुक्तिमुक्तामणिना + + श्रीनिवासविदुषा विरचिते तत्वमार्तण्डे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

844

Sl. No. 39197 **ब्रह्मसूत्रवृत्तिः** Ms. No. P. 3420/1

Beginning :

निर्दोषानन्तकल्याणगुणपूर्णाय शेषिणे ।
जगतां श्रीनिवासाय परस्मै ब्रह्मणे नमः ।

श्रीहयवक्त्रमुपासे + वस्तुत्वम् ॥

श्रीमत्श्रीवाससूरिः कविकथकघटाकुम्भकुट्टाकभाव
+ + स जीयात् ॥
+
+

श्रीमच्छ्रीवाससूरिपदपाथोजरेणुना ।
श्रीवासेन ब्रह्मसूत्रतात्पर्यार्थः प्रकाश्यते ॥

End :

ब्रह्मण: पुरुषार्थत्व × सूत्रार्थः । इत्थं च जगज्जन्मादिकारणं ब्रह्म निरतिशयपुरुषार्थतया शास्त्रप्रमाणकत्वा जिज्ञासाविषय इति सिद्धम् ॥

Colophon :

— — —

845

Sl. No. 39199 ब्रह्मसूत्रवृत्तिः Ms. No. B. ‸21

Beginning :

एवं जिज्ञासितव्यस्य ब्रह्मणः सांख्याद्यभिमतप्रधानादिविलक्षणत्वं प्रतिपादयितुं आरभते भगवान् सूत्रकारः ईक्षतेर्नाशब्दमित्यादिना । ननु कथं उक्तरूपस्य ब्रह्मणः प्रधानादिशङ्काविषयत्वम् । तथापि—

End :

तापनीय्यप्रत्यभिज्ञया भगवति मुमुक्षूपास्यत्वपर्यवसानाय प्राणशब्द घटितं वाक्यं निरूपयति ! पावनात्मकं लिखितम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

Colophon :

रङ्गलक्ष्मणयोगीन्द्रपदाम्बुरुहषट्पदा ।
लिखिता श्रीनिवासेन ब्रह्मविद्याख्यकौमुदी ॥

846

Sl. No. 39200 ब्रह्मसूत्रवृत्तिः Ms. No. C. 547

Beginning :

निर्दोषानन्तकल्याणगुणपूर्णाय शेषिणे ।
जगतां श्रीनिवासाय परस्मै ब्रह्मणे नमः ॥
श्रीमत्श्रीवाससूरीन्द्रपदपाथो[illegible]गुना ।
श्रीवासेन ब्रह्मसूत्रतात्पर्यार्थः प्रकाश्यते ॥

End :

सर्ववेदान्तानामपि ब्रह्मणि समन्वयसिद्धेः किमनेनानपेक्षितविस्तारेण × वसूत्रार्थः ॥

इत्थं च जगज्जन्मादिकारणं ब्रह्म निरतिशयपुरुषार्थतया शास्त्रप्रमाणकत्वात् जिज्ञासाविषयः, इति सिद्धम् ॥

Colophon :

— — —

847

Sl. No. 39203 ब्रह्मसूत्रवृत्तिः Ms. No. A. 342

Beginning :

हेषारवैर्यः श्रुतिबृन्दनिर्भरैः
स्वीयां व्यनक्ति स्वरसोदितां पुरा ।
निश्श्वासपङ्क्ति निखिलामपि त्रयी-
मश्वाननः पातु स वश्चिरं हरिः ॥

श्रेयसां निधिमिव श्रियः पतिं
प्रेप्सतां प्रियहिताध्वदर्शिनी ।
लक्ष्मणार्यहृदयानुसारिणी
लिख्यते नयमयूखमालिका ॥

अथातो धर्मजिज्ञासेत्यारभ्य अनावृत्तिः शब्दादितिपर्यन्त—

End :

चैतन्यानि हि मुक्तौ प्राक्सङ्कुचितानि कर्मगुणैः सङ्कोचकप्रमाणाद्व्याप्तिं यान्तीति सिद्धान्तः ।

॥ जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥

Colophon :

इति श्रीमद्भारद्वाजकुलतिलकजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनोरप्पयदिक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे चतुर्थस्याध्यायस्य द्वितीयः पादः ॥

848

Sl. No. 39206 ब्रह्मसूत्रव्याख्या Ms. No. C. 2346

इह खलु साङ्गसशिरस्कस्वाध्यायाध्ययनमात्रेण अध्येतॄणां वेदार्थ निर्णयासम्भवेन तन्निर्णयाय जैमिनिबादरायणाभ्यां कर्मदेवतापरदेवताविषय-भेदेन त्रिकाण्डमीमांसारब्धा । +

तत्रेदमादिमं सूत्रं अथातो ब्रह्मजिज्ञासा ।

End :

तथा × तेन प्रतिपाद्यमानममानवमावर्तं नाद्य × ते ॥ न च पुनरावर्तते न च पुनरावर्तते । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते इति । आदिशब्दात् मुक्तः कदापि नावर्तयति इत्यवगम्यते ॥

[सर्वतन्त्रस्वतन्त्रेण विजयीन्द्राख्यभिक्षुणा ॥
एवं रामानुजाचार्यभाष्यरीतिः प्रदर्शिता ॥]

Colophon :

सर्वतन्त्रस्वतन्त्रेण विजयीन्द्रभिक्षुणा रामानुजाचार्यभाष्यरीति प्रदर्शिता ॥

849

Sl No. 39207 ब्रह्मसूत्रव्याख्या Ms. No. P. 3593/B

Beginning :

प्रणम्यानन्तकल्याणगुणं श्रीपुरुषोत्तमम् ।
श्रीभाष्यमततस्तन्त्रे व्याससूत्रार्थचन्द्रिकाम् ॥

अथातो × अतः कर्मफलानामनित्यत्वाद्धेतोः अथ कर्मज्ञानानन्तरं ब्रह्मणः पुरुषोत्तमस्य जिज्ञासा इष्यमाणं ज्ञानम् । तच्च विज्ञाय प्रज्ञां कुर्वीत ।

End :

शब्दश्च स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तत इति । मामुपेत्य पुनर्जन्म + मे मतम् इत्युक्तेरतिप्रियं नावर्तयिष्यतीत्यनावृत्तिः सिद्धा । द्विरुक्तिः समाप्तिद्योतिकेति सर्वमुप पन्नम् ॥

स्वान्तानि कुमुदानीव वोधयन्ति सतां सदा ।
सूत्रार्थचद्रिका जीयाच्छेषकेशवधीमता ॥

Colophon :

इति श्रीभाष्यानुसारिसूत्रार्थचन्द्रिकायां चतुर्थाध्यायस्य चतुर्थः पादः समासश्चाध्यायो ग्रन्थः ॥

850

Sl. No. 39209 ब्रह्मसूत्रवृत्तिः Ms. No. P. 2918/2

Beginni

ओं अथातो ब्रह्मजिज्ञासा । परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं ब्रह्मनिष्ठं ब्रह्मविद्याम् । इति एतत्सूत्रविषयवाक्यम् । बस्तुतः सिद्धपरं सत्यं ज्ञानमनन्तं ब्रह्मे—

End :

उभयोः प्रदेशयोः ब्रह्मप्रदे × भक्त्युपाध्यवच्छिन्नब्रह्मप्रदेशाभावात् सङ्कर एव । ब्रह्मणो निरवयवत्वेन खण्डनानर्हत्वात् ॥

Colophon:

इति सूत्रार्थसंग्रहे द्वितीयाध्यायस्य तृतीयः पादः ॥

851

Sl. No. 39120 ब्रह्मसूत्रवृत्तिव्याख्या Ms. No. P. 2781/3

Bginning :

× हिरण्यगर्भ इत्यद्याविति × परायणं महाधियमिति × लिङ्गेन श्रियः पतित्वेन नारायणस्यैव × णोपानिषदः षड्विधतात्पर्य लिङ्गोपेततया विष्णुपरत्वम् । अत्र नमः इति भक्त्यर्न्भूत × समस्त चिदचित्पदेन—

End:

यावन्नाम्नो गतं देवादिनाम्नो गोचरः इत्यर्थः । अस्मिन्नपि पादे परं जैमिनिरित्यादौ किञ्चित् प्रलपितं केनचित् × यनि परब्रह्मण एवोपादानावस्थान्तरत्वे × अप्रतीकालम्बनान्—

Colophon :

इति किडाम्बिकुलतिलकात्रेयाहोवलसूरिणा विरचिते वेदान्तसाराख्य श्रीमच्छारीरकमीमांसाभाष्यव्याख्याने चतुर्थाध्यायस्य ितीयः पादः ॥

852

Sl. No. 392 12 ब्रह्मसूत्रसहस्रनामभाष्यम् Ms. No. B 189

Beg .ing ;

श्रीमन्नारायणं शेषं तार्क्ष्यसेनेट्सुदर्शनान् । ×
अथे तत्र यमित्याप्य प्रापकत्वाक्षरत्वतः ॥ (?)
विश्वं विष्णुः परीक्ष्येति सद्व्याप्तिगुणपूर्वतः ।
जन्मेति जीवनकृतेः वषट्कारो यथेत्यतः ॥
भूतभव्यभवद्वृध्या भूतभव्यभवत्प्रभुः ॥

End :

अहत्यामवनीशानश्रीरङ्गेशाज्ञया कृतम् ।
भाष्यं नामसहस्रस्य ब्रह्मसूत्रैर्विवेचनम् ॥
सूर्यादध्ययने रथध्वनिवशाल्लग्नेषु वर्णेष्वपि
प्राग्वेदेतरयाज्ञवल्क्यकथितो वेदोपि वादोचितः ।
वेदानन्त्यवशाद्विचित्रगुणतानन्त्यादवन्त्यां महे ×
मद्वाणी च यतीशभाष्यसरणेरूनैव सा नैव किम् ॥

Colophon :

इति श्री भगवत्सुदर्शनकृतौ ब्रह्मसूत्रसहस्रनामभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

शास्त्रं च परिसमाप्तम् ॥

853

Sl. No. 39213 ब्रह्मसूत्रानुक्रमणी Ms. No. P. 3644/2

Beginning

अथातो ब्रह्मजन्मादिशास्त्रतत्त्वान्वयात् ।
ईक्षानन्दान्तराकाशात एव ज्योतिरित्यपि ॥

प्राणस्तथा दशकश्च प्रथमे चरणे मताः ।
सर्वत्वात्तान्तरोन्तर्याम्यदृश्यत्वादिरित्यपि ॥

End :

सङ्कल्पादेव वा भावं जगद्व्यापारमन्तिमे ।
षट्सङ्ख्याकाधिकरणं तुरीयाध्यायतुर्यगम् ॥
अक्षोर्म्याशाहिकाष्टाद्रिरदमुनिवसूर्म्यद्रितत्वादिशकर्य-
क्षैरक्षैः प्रयाजैरिह भवति रसैः पादरीतिप्रवन्धः ।
सौत्री सङ्ख्याशुभाशीरधिकतिगणना चिन्मयी ब्रह्मकाण्डे
तादर्थ्येऽनन्तरत्वेऽप्यथ करणमिदानल्पसारप्रकल्प्या ॥

Colophon :

— — —

854

Sl. No. 39214 ब्रह्मसूत्रानुक्रमणी Ms. No. P. 953/1

Beginning :

सूत्रविवरणसुखग्रहणाय सङ्क्षेपेणोपन्यस्यते—
तत्र प्रथमाध्याये प्रथमपादे प्रधानपुरुषावेव जगत्कारणतया वेदान्ताः प्रतिपादयन्तीत्याशङ्क्य सर्वज्ञं सत्यसङ्कल्पं निरवद्यं समस्तकल्याणगुणाकरं,

End :

चतुर्थे च × अर्चिरादिना परं ब्रह्मोपसम्पद्य स्वस्वरूपभूतज्ञानादिगुणाविर्भावपूर्वकानन्तमहाविभूत्यनवधिकातिशयानन्तब्रह्मानन्दापुनरावृत्तिरूप इति शारिरकशास्त्रेणोक्तं भवतीति ॥

Colophon·

— — —

855

Sl. No. 39215 ब्रह्मसूत्रानुक्रमणी Ms. No. P. 10716/4

Beginning :

रङ्गलीलविभाधारोऽर्चा × त्रो भूरमाधिपः । (?)
सुखेन भवतात्पूर्णो धियि निद्राशया स्फुरन् ॥ १ ॥

सप्तम्यन्ताधिकरण × करैः क्रमात् ।
वर्णाः पूर्वाधिकरणे सूत्रसंख्या प्रबोधतः ॥

End :

द्वितीयध्यायप्रथमपादे– ३६
द्वितीयपादे– ४२
तृतीयपादे– ××
चतुर्थपादे– १९
तृतीयाध्यायप्रथमपादे– २७
चतुर्थाध्याय चतुर्थपादे सूत्राणि २२
× × ष्टसूत्राणि ।
शुभाशीः अथ संख्या चिन्मयी १५६ ॥

Colophon:

— — —

856

Sl. No. 39216 ब्रह्मविद्याविजयः Ms. No. P. 1914/3

Beginning :

कृतिविलक्षणे अवबोधरसे ज्ञानन्दैकरसे त्वयि सभेदः त्रिगुणप्रवृत्तभेदः न भवेत् न स्यात् । सत्वतदिगुण भेदप्रयुक्तब्रह्मरुद्रादिभेदस्तु प्रकृतिसम्बन्धमादाय गौणः इति ध्येयम् ।

End :

स्वीयपरकीय विभागो न स्यादित्यर्थः । अत्र अज × :र्धनिमित्त युज इति प्रकृतिशरीरकात् स्थिरचरजातयः स्युरिति स्थास्नुजंगमात्मक प्रपञ्चोत्पत्तिप्रतिपादनात् ॥

Colophon :

— — —

857

Sl No. 39217 **ब्रह्मोपादनत्वसमर्थनम्** Ms. No. P. 3443/2

Beginning;

× भिः परमाणुभिः द्व्यणुकादिक्रमेण कारागुणपूर्वक एव तत्र रागोदय × दप्रमाणाभावात्। तथा च सितासित × प्रत्येक × नमपि चित्ररूपं विशेषणगुणं—

End :

'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः'। अस्यार्थः—

मनुष्याः शास्त्राधिकारयोग्याः तेषां सहस्रेषु कश्चिदेव सिद्धय ×

Colophon :

— — —

858

Sl. No. 39219 **भक्तिरत्नावली** Ms. No. C. 435/17

Beginning

ये मुक्तावपि निःस्पृहाः प्रतिपदं प्रोन्मीलदानन्ददाः
यानास्थाय समस्तमस्तकमणिं कुर्वन्ति यं स्वे वशे।
तान् भक्तानपि तां च भक्तिमपि तं भक्तप्रियं श्रीहरिम्
वन्दे सन्ततमर्थयेऽनुदिवसं नित्यं शरण्यं भजे॥

End :

इत्येषा बहुयत्नतः कृतवता श्रीभक्तिरत्नावली
तत्प्रीत्यैव तथैव संप्रकटिता तत्कान्तिमाला मया॥ +
वाराणस्यां महेशस्य संनिधौ हरिमन्दिरे।
भक्तिरत्नावली सिद्धा सहिता कान्तिमालया॥

Colophon :

इति श्री पुरुषोत्तमचरणारविन्दकृपामकरन्दबिन्दुप्रोन्मीलितविवेक × परहंस विष्णुपुरीग्रथितायां श्री भागवताम्बुधिश्रीभक्तिरत्नावल्यां त्रयोदशविरचनं सम्पूर्णम्॥

859

Sl. No. 39220 — भगवत्कथाश्रवणमहिमा — Ms. No. P. 6154/2

Beginning :

भगवत्कथाश्रवणविषये---

वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति हि ।
वक्तारं पृच्छकं श्रोतॄन् तत्पादसलिलं यथा ॥
नैषातिदुस्सहा क्षुन्मां त्यक्तोदमपि बाधते ।
पिबन्तं त्वन्मुखम्भोजात् च्युतं हरिकथामृतम् ॥

End :

निवृत्ततर्षैरुपगीयमानात्
भवौषधात् श्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात् ॥

Colophon:

— —

860

Sl. No. 39221 — भगवत्परिचर्याक्रमः — Ms. No.P. 9601

Beginning :

अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्ततिग्मांशुजाले ।
निरवधिकरुणाब्धौ वेदचूडागुरौ मे
भवतु परमभक्तिः सर्वतन्त्स्वतन्त्रे ॥
श्रीपाञ्चरात्ररक्षोक्तः प्रपन्नानां महात्मनाम् ।
भगवत्परिचर्यायाः क्रमः संगृह्यतेऽधुना ॥

End :

भगवच्चरणारविन्दयोः विन्यस्तशिरस्कस्तमेव माधवं हृदि ध्यायन् कीर्तयन् सुखं शयानो निद्राविच्छे × × प्रसक्ते पुनरानिद्रागमात् तमेव ध्यायेत् कीर्तयेच्च । एवं वर्तमानस्य सर्वः कालोऽप्यवन्ध्यो भवति ।

सर्वे व्यापाराः कैङ्कर्यरूपा भवन्ति । सर्वोप्यानुषङ्गिकभोगः क्रिडाशुगक्षीरास्वादन्यायेन स्वामिभोगशेषभूतो भवतीति भगवत्कैङ्कर्यैकरतेः परमैकान्ति + स्थितोऽयमायुश्शेषकाल इति सर्वं निरवद्यम् ॥

Colophon :

— — -

861

Sl. No. 39224 भगवत्परिचर्याक्रमः Ms. No. P. 1187/b

Beginning :

श्रीमान्वेङ्कट + सदा हृदि ॥
जयति सकलविद्या + यतीन्द्रः ॥
प्रणामं लक्ष्मणमुनिः + श्रतिम् ॥
सम्यङ्न्याय + विष्णवे ॥
शंखिने चक्रि + कृष्णात्मने नमः ॥
सारथ्यमर्जुनस्य × कृष्णात्मने नमः ॥
श्रियः पतिः निखिलहेयप्रत्यनीककल्याणैकतान—

End :

यत्र योगेश्वरः कृत्स्नस्योच्चावचेनावस्थितस्य चेतनस्याचेतनस्य च वस्तुनो ये ये स्वभावयोगाः तत्र श्रीः विजयः भूतिः नीतिश्च एते ध्रुवा निश्चला इति मे मतिः ।

Colophon:

इति भगवद्रामानुजविरचिते श्रीमद्गीताभाष्ये अष्टादशोऽध्यायः ॥
अन्तिमषट्के श्लोकाः ॥ २८५ ॥

62

Sl. No. 39227 भगवद्गिताभाष्यव्याख्या Ms. No. P. 2958

Beginning :

यतिपरिबृढो यद्गीतानामदर्शयदञ्जसा
निगमपरिषन्नेदीयांसं × माशयम् ।

जननपदवीयातायातश्रमापहरां धियं
जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः ॥

End :

शुद्धादेशवशंवदीकृतयतिक्षोणीशवाणीशत
प्रज्ञातल्पपरिष्कृतश्रुतिशिरःप्रासादमासेदुषी ।
नित्यानन्तविभूतिसन्निधिसदासामोददामोदर
द्विलालिङ्गनदौर्ललित्यललितोन्मेषा मनीषाऽस्तु मे ॥
तत्त्वं यत्प्रणवे × खगाह्वत ॥

Colophon :

इति कवितार्किकसिंहस्य × वेदान्ताचार्यस्य कृतिषु भगवद्रामानुजविरचितश्रीमद्गीताभाष्यटीकायां अष्टादशोऽध्यायः ॥

863

Sl. No. 39228 भगवद्गीताभाष्यव्याख्या Ms. No. B. 1206/1b

Bginning ;

ಹದಿನಾರನೆ ಅಧ್ಯಾಯವು ಅವತರಿಕೆ ।
ಮೇಲಿನ ಮೂರು ಅಧ್ಯಾಯಗಳಿಂದ ಸೇರಿಯೂ ಪ್ರತ್ಯೇಕವಾಗಿ ಯೂ ಇರುವ ಪ್ರಕೃತಿಪುರುಷಗಳಯಾಥಾತ್ಮ್ಯವನ್ನು ಅವುಗಳಿಗೆ ಸೇವೆ ಯುಂಟಾಗುವುದು ಬಿಡುವುದು

End :

ಅವನ ಶ್ರೀ ಪಾದಗಳನ್ನೇ ನಂಬಿರುವ ಧನುರ್ಧಾರಿಯೂ ಅರ್ಜುನನು ಎಲ್ಲಿ ಪ್ರಕಾಶಮಾನವಾಗಿರುವನೊ ಆ ಸ್ಥಳದಲ್ಲೇ ಲಕ್ಷ್ಮಿಯೂ, ವಿಜಯವು, ಸಂಪತ್ತು ಶಾಶ್ವತವಾಗಿರುವುದೆನ್ನುವುದು ನನ್ನ ಸಿದ್ಧಾಂತವು.
जयति सकलविद्यावाहिनीजन्मशैलो
जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥

Colophon :

ಶ್ರೀ ಭಗವದ್ರಾಮಾನುಜವಿರಚಿತ ಶ್ರೀ ಮದ್ಗೀತಾಭಾಷ್ಯದ ಕರ್ಣಾಟಕ ವ್ಯಾಖ್ಯಾನ ದಲ್ಲಿ ಹದಿನೆಂಟನೇ ಅಧ್ಯಾಯ ಮುಗಿಯಿತು. ।

864

Sl. No. 39229 भगवद्गीताभाष्यसंग्रहः Ms. No. A. 262/2

Beginning:

श्रीमद्यामुनमुनिवररामानुजयोगिवेदचूडार्यान् ।
कलये किल यैर्गीता हरिणा गीता भोग्यतां नीता ॥

इह खलु भगवान् + श्रीमद्भाष्ये व्याचक्रे । तत्तात्पर्यं श्लोकारूढं कुर्वन् इदमपि श्रीमद्भागवतकैङ्कर्यमिति तथा क्रियते—

End:

श्रीः—राज्यादिभोग्यसमृद्धिः, विजयः—शत्रुनिरासः, भूतिः—ऐश्वर्यम्, उत्पन्नायाः समृद्धेः उत्तरोत्तराभिवृद्धिरूपं भवनम् नीतिः अर्थशास्त्रजन्यकर्तव्यनिश्चयचोदिता धर्माविरुद्धा वृत्तिः, ध्रुवा निश्चिता इति मम मति—समीचीनबुद्धिः ॥

Colophon:

श्रीशैलबुक्कपत्तनयेल्लाच्चान्दासविलिखितोऽध्यायः ।
श्रीमद्गीताभाष्यार्थसंग्रहे अष्टादशो वृत्तः ॥

865

Sl. No. 39230 भगवद्गिताव्याख्या Ms. No. P. 722/4

Beginning:

श्रुतिशिखरसमधिगम्यं शोभितमूर्धन्यबर्हिबर्हचयम् ।
मायागोपकिशोरं मनसा वाचा ममात्मना कलये ॥
× वेदान्तसारतमार्थं प्रकाशयाञ्चकार—

End:

ताश्च सर्वाः ध्रुवाः—निश्चलाः इत्येव मे—मम मतिस्सञ्जाता तव तु नैवं मतिरस्तीति भावः ॥

Colophon:

इति श्रीगीतार्थसंग्रहे अष्टादशोऽध्यायः ॥

866

Sl. No. 39231 भगवद्गीताव्याख्या Ms. No. P. 968/2

Beginning

अस्य श्री गीताशास्त्रमहामन्त्रस्य + कलये ॥

वेङ्कटवरदाचार्यः स जयति शान्त्यादिचिदचिद्वस्तुविशेषी ।

श्रीभूनीला × परमकारुणिको भगवान् वेदान्तसारतममर्थं प्रकाशयाञ्चकार । एवंरुपभगवत्प्रवृत्तिं जानन्नपि धृतराष्ट्रः प्रबलतरपापवासना प्रमुष्टविवेकः सुयोधनविजयबुभुत्सया सञ्जयं पृच्छति । धृतराष्ट्र उवाच —

End :

यत्र यस्मिन् पक्षे योगीश्वरः कृष्णो वर्तते यत्र पक्षे धनुर्धरः करधृत × तत्र तस्मिन् पक्षे श्रीः राज्यादिभोग्यसमृद्धिः विजय × मतिः सञ्जाता तत्र तु नैवं मतिरस्तीति भावः । अत्र विद्या राज × केशवम् । मायां न सेवते भद्रं ते × इति ग्रन्थद्वयोक्तं सञ्जयधृतराष्ट्रयोः परस्परवैलक्षण्यं मे इत्यन × तार्यः ॥

Colophon :

इति श्री गीतार्थसङ्ग्रहे (अष्टादशोऽध्यायः) ॥

867

Sl. No. 39232 भगवद्गीताव्याख्या Ms. No. C. 670/1

Beginning;

सञ्चिन्तयेद्भगवतश्चरणारविन्दं

वज्रांकुशध्वजसरोरुहलाञ्छनाढ्यम् ।

उत्तुङ्गरक्तविलसन्नखचक्रवाल-

ज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥

धर्मक्षेत्रे इति । हे सञ्जय ! धर्मक्षेत्रे- धर्मानुष्ठानोपयोगिशिष्टसेव्यभूते कुरुक्षेत्रे कुरुर्नाम पाण्डवधार्तराष्ट्रणां कूटस्थो राजा । तस्य क्षेत्रम् ॥

End :

यत्र यस्मिन् पक्षे योगेश्वरः— कृष्णो वर्तते यत्र पक्षे धनुर्धरः—करकृतगाण्डीवः पार्थः— अर्जुनः वर्तते तत्र- तस्मिन् पक्षे श्रीः राज्यादिसमृद्धिः विजयः शत्रुनिरासः भूतिरैश्वर्यं नीतिश्च ध्रुवा निश्चला इत्येवं मतिः सञ्जाता तव तु नैवं मतिः अस्तीति भावः ।

इति ग्रन्थतयोक्त सञ्जयधृतराष्ट्रयोः परस्परवैलक्षण्यमित्यत्र विवक्षितं रोचयते । यदि श्रीकृष्णार्जुनावस्मिन् समये प्रसादनीयौ तवेति फलितार्थः ।

Colophon:

868

Sl. No. 39235 भगवद्गीतार्थसंग्रहः Ms. No. P. 1590/2

Bginning:

इति श्रीमद्यामुनाचार्यविरचिते भगवद्गीतार्थसङ्ग्रहे अष्टादशोऽध्यायः ॥

श्रीयःपतिः अखिलहेयप्रत्यनीककल्याणैकतानः स्वेतरसमस्तचिदचिद्वस्तु शेषी श्री भूमिनीळादिदिव्यमहिषीभिः सह नित्यसूरिभिः अनवरतमभिष्टूमान चरणकमलः + विजयवुभुत्सया सञ्जयं पृच्छते धृतराष्ट्र उवाच—धर्मक्षेत्रे ।

End:

निर्मानमोहाः देहात्माभिमानरूपमोहरहिताः जितसङ्गदोषाः निर्जितविषयासक्त्याख्यदोषाः, अध्यात्मनिष्ठाः आत्मज्ञाननिरताः विनिवृत्तकामाः विशेषेण निवृत्तात्मव्यतिरिक्तकामाः गच्छन्ति— प्रप्नुवन्ति ॥

C olophon:

— — —

869

Sl. No. 39245 भगवद्गीतार्थसंग्रहरक्षा Ms. No. P. 3430/4

Beginning:

मानत्वं भगवन्मतस्य महतः पुंसस्तथा निर्णय-
स्तिस्रःसिद्धय अत्मसंविदधीशा × श्रयाः ।
गीतार्थस्य च संग्रहः स्तुतियुगं श्री श्रीशयोरित्ययम्
यद्ग्रन्थाननुसन्दधे यतिपतिस्तं यामुनेयं नुमः ॥

श्रीमद्वेंकटनाथेन यथाभाष्यं विधीयते ।
भगवद्यामुनेयोक्तगीतासंग्रहरक्षणम् ॥

End:

सा × सारथीयवचसां श्रीयामुनेयोद्धृतं
विस्पष्टैरितिवेंकटेश्वरकविः व्याचष्ट भाष्याक्षरैः ।

यद्वादेषु कुदृष्टिबाह्यकुहनाकोलाहलस्पन्दिभि-
जंघालैश्च × घणघणैर्विद्राणनिद्रा दिशः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्य + द्वेंकटनाथस्य वेदान्ता-
चार्यस्य कृतिषु गीतार्थसंग्रहरक्षा सम्पूर्णा ॥

870

Sl. No. 39251 गीतासङ्ग्रहरक्षासारः Ms. No. P. 5619/1

Beginning :

धीमाध्वीके हयग्रीवहंसजुष्टेऽतिपाण्डरे ।
पुण्डरिके मम मनश्चञ्चरीकः प्रवर्तताम् ॥
यथाभाष्यं कृतं येन गीतासङग्रहरक्षणम् ।
श्रीमद्वेङ्कटनाथं तं वन्दे वेदान्तदेशिकम् ॥

End:

एते प्रोक्ताः प्रधानार्था गीताध्यायेषु सूरिभिः ।
कर्मयोगस्तपस्तीर्थदानयज्ञाः सुसंयमाः ॥
वेदाभ्यासो ज्ञानयज्ञः शमहोमार्चनानि च ।
आवर्त्योऽन्वहमेष्वेको नित्यनैमित्तिकाङ्गतः ॥
धीयोगस्त्वस्मृतेर्धीरा सोऽपि साङ्गः स्वकर्मभिः ।
कैवल्यैश्वर्यमोक्षाणां हेतुस्साध्याः स्वधर्मतः ॥
भक्तिः सा च प्रीतिरूपा ध्यानं विष्णोःस्फुटं ध्रुवम् ॥
+ + +
नारायणेन मुनिना कृतं गीतार्थमङ्गलम् ।
आशास्तेयोऽन्वहं सोऽपि भवेन्मङ्गलभाजनम् ॥

Colophon:

इति सङग्रहरक्षोक्तसारनिष्कर्षसंग्रहः ।
नारायणयतीन्द्रेण श्रीवत्साङ्कन निर्मितः ॥

871

Sl. No. 39248 **भगवन्नामचिन्तामणिः** Ms. No. P. 5254

Bginning:

तत्र चोदनालक्षणोऽर्थो धर्मः इति श्रुपतिर्यालोचनया बलवदनिष्टाननुबन्ध्यलौकिकश्रेयस्साधनत्वं धर्मलक्षणमवगम्यते । तच्च सामान्यतो विशेपतश्च भगवन्नाम्नां—

End:

अनुसरणमष्टाङ्गयोगसापेक्षतया बहुयत्नसाध्यं नामकीर्तनं × पारसाध्यमिति + द्वयोस्तरतमभावोपपत्तिः । कीर्तनसकृत्त्ववचनानि सकृत्कीर्तनमपि मुक्त्यै प्रभवति कि × भक्त्यारम्भविरोधि—

Colophon:

— — —

872

Sl. No. 39250 **भागवतपादधूलिवैभवम्** Ms. No. P. 2 380/6

Beginning:

इदानीं भागवतपादपांसुपाथोवैभव उच्यते ।
न वेत्त्यसौ भागवतप्रभावं
यदङ्घ्रिजा रेणुकणाः सरन्तः ।
क्ष:पिशाचान् ग्रहभूतरोगान्
प्रज्ञोपमा दिक्षु पलाययन्ति ॥

End:

पादोदकं भगबतो लब्धं भागवतस्य वा ।
तिष्ठन्नेवाथवाऽऽसीनः पिबेत् शुद्धिश्च नापरा ॥

वाराहे—
पिबेत् पादोदकं यस्तु वैष्णवानां ममापि वा ।
तत्र नाचमनं कुर्यात् यथा सोमे द्विजोत्तमाः ॥

Colophon:

— — —

8873

Sl. No. 39251 **भागवतवैभवम्** Ms. No. P. 2380/7

Beginning :

अथ भागवताराधनवैभवस्य अवश्यकर्तव्यत्वमधीयते । इतिहास समुच्चये—

किं दानैः किं तपोभिर्वा किं यज्ञैः विधिवत् कृतैः ।
सर्वं संपत्स्यते पुंसां विष्णुभक्ताभिपूजनात् ॥

End :

अप्यर्चयित्वा गोविन्दं तदीयान् नार्चयन्ति ये ।
न ते विष्णोः प्रसादस्य भाजनं डाम्भिका जनाः ॥

भरद्वाजः—

गृहे भागवतान् प्राप्तान् अज्ञानाद्योऽवमन्यते ।
नष्टश्रीको भवेत्सद्यः क्षीणायुःपुण्यसञ्चयः ॥

Colophon :

— — —

8874

Sl. No. 39252 **भागवतवैभवम्** Ms. No. P. 1364/76

Beginning :

स्वर्गतानां च सर्वेषां कर्तव्यं वैष्णवोत्तमैः ।
अलाभेषु तु विप्रेषु वैष्णवेष्वप्यशक्तितः ॥

\+ + +

आकारत्रयसम्पन्नो महाभागवतोत्तमः ।

End :

महापापं चातिपापं पातकं चोपपातकम् ।
प्रासङ्गिकं नरः कृत्वा नरकान्याति दारुणान् ॥

Colophon :

— — —

875

Sl. No. 39255 | भेददर्पणम् | Ms. No. P. 621/2

Beginning :

चिदचिद्विजातीयमद्वितीयं गुणार्णवम् ।
अशेषशेषिणं शेषशायिनं तमुपास्महे ॥

भेदाभेदश्रुतिव्रातजातसन्देहसन्तताः ।
भेददर्पणमादाय निश्चिन्वन्तु विपश्चितः ॥

End :

+ प्रत्यक्षादिबहुप्रमाणासिद्ध श्रुतिस्मृति शतावगतस्सूत्रकारैरापादचूडं मवगतो मुक्तिहेतुज्ञानविषयतया परमार्थ एवेति सर्वमवदातम् ॥

+ + + +

श्रीमत्त्रैय्यन्तसीमायुगलविभजनाखण्डपाण्डित्यभूमा
षट्तन्त्रोदन्तदन्तावलवलनसृणीर्बोभुवत्सूक्तिधामा ।
श्रीशैलाख्यान्वयेन्दुस्सुगुणगुणनिधिः सर्वतन्त्रस्वतन्त्रः
कारुण्यात्सन्निधत्तां मम हृदि सततं श्रीनिवासार्यवर्यः ॥

Colophon:

तारणाब्दे भाद्रमासे कृष्णे वसुदिने शुभे ।
आत्रेयश्रीनिवासार्यो व्यलिखद्भेददर्पणम् ॥

876

Sl. No. 39256 | भेददर्पणम् | Ms. No P. 4689/28

Beginning :

करणता विरोत्स्यत इत्येतावता तत्कल्पनं विनापि तेन तदुपपत्तौ तत्कल्पनावैयर्थ्यादन्यथातिप्रसंगात् । अतोपमानान्तरविरोधादेव प्रतीतार्थत्याग इतीहापि नाभेदं अपरोक्षनिरोधिनं श्रुति विधीयीते ।

End :

विशिष्टाभदस्था श्रुतिरगणि तत्वंपदयुता
विरुत्तयथा भेदप्रमितिरपनीत श्रुतिशतैः ॥

स्वरूपाभेदोक्तिं तदिदमुपरुन्धेऽखिलतनुः
परस्वात्मा मुक्तिं सुमतिभिरुपास्यश्शुभगुणः ॥

Colophon :

इति श्रीशैलकुलतिलक श्रीनिवासाचार्यविरचितं भेददर्पणं नाम प्रकरणं सम्पूर्णम् ॥

877

Sl. No. 39257 भेदधिक्कारन्यक्कारः Ms. No. P. 5448/2

Bginning ;

श्रेयः परं दिशति यस्य कटाक्षलेशः
भास्वानिव प्रकटयत्यपि तत्त्वजातम् ।
तं कौशिकान्वयपयोनिधिपूर्णचन्द्रं
श्री श्रीनिवासगुरुमन्वहमाश्रयामः ॥ +
मानैः प्रसिद्धविभवैः परजीवभेदैः
प्रत्यर्थिभङ्गकरगायमहागुरून्नः ॥

End ;

इति कुशिककुलाब्धेः पूर्णचन्द्रस्य विद्व-
न्मदकलभहरेः श्रीवादचूडार्यनाम्नः ।
पदसरसिजमित्रो भागिनेयश्च तस्य
व्यतनुत नरसिंहो न्यक्क्रियां धिक्क्रियायाः ॥
श्रीवत्सवंश्येन कृतो नृसिंहार्येण भूतले ।
न्यक्कारो भेदधिक्कारग्रन्थस्यास्तु जयावहः ॥

Colophon :

— — —

878

Sl. No. 39261 भेदधिक्कारन्यक्कारः Ms. No. P. 5117/2

Beginning :

नमस्ते भव्यरूपाय कल्याणगुणसिन्धवे ।
मम स्वरूपभूताय विनताभाग्यराशये ॥

कर्मब्रह्मात्मकं शास्त्रं येन संरक्षितं कलौ ।
तं देशिकवरं मूर्ध्ना प्रणमामि पुनः पुनः ॥
श्रीनिवासगुरोर्लब्धवेदान्तद्वयसम्पदा ।
रच्यते देवराजेन बिम्बतत्त्वप्रकाशिका ॥
बिम्बैक्ये प्रतिबिम्बस्य वादिविप्रतिपत्तितः ।
संशये तन्निरासोऽत्र सन्नियोगाद्विधीयते ॥

अत्र प्राञ्चः—

End :

एतन्मतनिरासार्थं श्रुतप्रकाशिका वाक्यं प्रवृत्तम् । सम्भवस्थले क्वचित्प्रकरणप्रक्रिययापि + मूलस्य तस्य सर्वथा त्यागो न संयुक्त इति भाष्यकाराशयः इति श्रुतप्रकाशिकानिष्कर्षः । इति ख्यातित्रयनिरूपणम् ।

Colophon :

इति श्री भारद्वाजकुलतिलकस्य + श्रीनिवासगुरुकृपालब्धविविधवेदान्तार्थस्य श्री देवराजस्य कृतिषु मध्वमताध्वनिरोधिन्यां बिम्बतत्त्व प्रकाशिकायां असाधारणभङ्गः द्वितीयः ॥

879

Sl. No. 39262 मध्वाध्वभङ्गः Ms. No. P. 3327

Beginning :

शास्त्रयोनित्वात् । यतो वेत्यादिवाक्यं जगत्कारणत्वेन ब्रह्मप्रतिपाद यतीति वेदान्तानां ब्रह्मणि प्रामाण्यं सम्भवतीत्युक्तमयुक्तम् । ब्रह्मणो माना न्तरगम्यत्वेन तत्र वेदान्तानामप्राण्यसम्भवात् । +

End :

नन्वेवमत्रैव प्रकरणे उद्गात × उद्गीथमन्वायत्तेति प्रकृत्य कतमा सा देवतेति प्रश्ने आदित्य इति होवाच × वर्णिद्ध वा इमानि ×

Colophon :

— —

880

Sl. No. 39263 महाभारततात्पर्यरक्षा Ms. No. A 623

Beginning :

आम्नायशिखरश्लाघ्यषाड्गुण्यपरिपूरितः ।
देवकीपुण्यसंघातः पातु नः पार्थसारथिः ॥
संरक्षणाय जगतामितिहासरत्नं
यो दर्शयन्निरममीत परं मुकुन्दम् ।
द्वैपायनस्स भगवानमलां मनीषां
तन्वीत नो मधुरिपोरपरावतारः ॥

End :

गीतोपनिषद्भगवत्तारतम्यपरेत्येतदनवद्यम् । अतश्शिवपारम्याभ्युपगमे तद्विरोधो दुष्परिहारः । तथा च पञ्चमाम्नायस्सकलो भगवत्परः । स एवातः परोस्माकमिति सर्वं समञ्जसम् ॥

Colophon :

— — —

881

Sl. No. 39264 माण्डूक्योपनिषद्भाष्यम् Ms. No. C. 4689/19

Beginning

अतसीगुच्छसच्छायमंचितोरस्थलं श्रिया ।
अंजनाचलशृंगारमंजलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
मुण्डकं विदुषां प्रीत्यै व्याकरिष्ये यथामति ॥

End :

औंकारः ओमित्याक्रियमाणः एवंरूपः येन विदितः ज्ञातः स मुनिः नेतरः किन्तु स जनः जननमरणादिना परिवर्तत इत्यर्थः । मुनिस्तु मुच्यत इति भावः । स मुनिर्नेतरो जन इति द्विरुक्तिरुक्तसर्वप्रमेयावधारणर्था उपनिषत्समाप्त्यर्था च ॥

Colophon :

इति परमहंसपरिव्राजकश्रीवत्सांकमुनिकृतौ ण्पड्क्योपनिषद्भाष्ये चतुर्थः खण्डः । माण्डूक्योपनिषद्भाष्यं समाप्तम् ॥

882

Sl. No. 39265 **माण्डूक्योपनिषद्भाष्यम्** Ms. No. P. 8632

Beginning;

जाग्रत्स्वप्नसुषुप्त्यादेरनवस्था प्राणिनां यतः ।
चतुर्व्यूहपरं ब्रह्म तदनन्तमुपास्महे ॥ १ ॥
विद्यारण्यमुनीन्द्रेण माधवानन्दयोगिना ।
माण्डूक्योपनिषद्रूपमेतावदिति दर्शितम् ॥

End :

+ मेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवं तुरीयं पादं मन्यन्ते स आत्मा विज्ञेय इत्युत्तरतापनीयेऽप्येवंविधानि वाक्यानि श्रूयन्त इति तदनुसारेणापि माण्डूक्यस्य भगवत्परत्वमङ्गीकार्यम्। तापनीयद्वयस्य च नृसिंहपरत्वेन न देवतान्तरपरत्वमिति × रप्यभ्युगन्तव्यमित्यास्तां तावत् ॥

Colophon :

इति श्रीवाधूलवरदचार्यमुखाम्बुरुहात् श्रुताशेषवेदार्थस्य हस्तिगिरिनाथात्मजस्य श्रीमन्नारयणदासस्य कृतिषु माण्ड्क्योपनिषद्व्याख्याने द्वितीयः खण्डः ॥

8 3

Sl. No. 39266 **मायावदशतदूषणी** Ms. No. C. 747

Beginning

श्रीमल्लक्ष्मणदेशिको गुणनिधिर्वादीभपञ्चाननः
संसारार्णवतारकश्च कृपया स्वांघ्रिप्रपन्नव्रजनान् ।
सद्विद्यापगजन्मभूमिशिखरी पाषण्डनैशोष्मगुः
मायावाददवाग्निरार्तशरणो वर्वर्ति सर्वोपरि ॥

श्री श्रीनिवासदासेन नत्वा श्रीवेङ्कटं गुरुम् ।
मायावादनिरासार्थं क्रियते शतदूषणी ॥
सदेव सोम्य इदमग्र आसीत् ।

End:

श्रुतेर्मुक्तस्य ब्रह्मसाम्य एव स्वारस्यमित्यलं दिष्टहतमुद्गराघातेनेति। एवं सहस्रावधिदूषणानि सन्ति। मया तु स्थालीसिक्थन्यायेन दिङ्मात्रमुक्तमिति।

आलोड्य देशिकग्रन्थान् विचार्य च पुनः पुनः।
दूषणानां शतं दत्तं केवलाद्वैतदर्शने॥

Colophon

इति श्रीमन्नारायणचरणनलिनद्विरेफाणां वादीभकेसरिणां श्रीमद्रदान्ताचार्याणां चरणारविन्दमधुपेन श्रीनिवासदासेन रचिता शतदूषणी समाप्तिमगमत्॥

884

Sl. No. 39270 मिथ्यत्वानुमाननिरासः Ms. No. P. 9603/1

Beginning:

कवेरतनयातटीं कलयतीन्द्रनीलत्विषा
करेधृतशरासना कमलमन्दिरा सुन्दरा।
कटाक्षतरळापगा कमलकोरकाकारित-
प्रणम्रजनतावलिः प्रदिशतु श्रियं देवता॥
वन्देथ लक्ष्मीनरकेसरीन्द्रान्
प्रणम्य सर्वानपि देशिकेन्द्रान्।
करोमि कञ्चित्कमलासखस्य
प्रीत्यै प्रयत्नं प्रथितार्थ × ॥

विमतं मिथ्या दृश्यत्वादित्यनुमितौ पक्षतावच्छेदकं ब्रह्म प्रमातिरिक्ताबाध्यत्वे सति असद्विलक्षणत्वे सति चिद्भिन्नत्वमिति ब्रह्मानन्दः। अत्र च शुक्तिरूप्ये-

End:

न च अभिन्नविषयकनुमितिसामग्रीबलबाधनिश्चय एव न सम्भवतीति कथ × ति वाच्यम्। वह्निव्याप्यस्य यत्रानुमितिः तत्र × वह्न्यनुमितेः अव्यवहितक्षणे शक्तिमत्परामर्शसत्वात्। न च कार्यकाले विद्यमानशक्तिमत्व परामर्शस्य हेतुत्वाङ्गीकारान्न दोषः॥

Colophon·

— — —

885

Sl. No. 39271 **मुण्डकोपनिषद्व्याख्यानम्** Ms. No. P. 8631

Beginning :

अखिलोपनिषद्वाक्यैः विहितं यदुपासनम् ।
विमुक्तये मुमुक्षूणां तस्मै भगवते नमः ॥
वाधूलश्रीनिवासार्यश्रीमुखाम्बुरुहात् श्रुतः ।
मुण्डकोपनिषद्वाक्यतात्पर्यार्थो विलिख्यते ॥

End :

प्रकृतमुण्डकोपनिषदध्यायनाङ्गमिति प्रतिपादानात् सर्वैरपि सर्वैरपि भाष्यकारैस्तथा व्याख्यानाच्च । एवं तत्त्वहितपुरुषार्थाननुपदिश्य विद्या सम्प्रदायवर्तकान् × षरमर्षीन् नमस्करोति नमः परमऋषिभ्यो नमःपरम र्षिभ्य इति । आदरातिशयद्योतनाय उपनिषत्समाप्तिद्योतनाय वा द्विरुक्तिः ॥

Colophon :

इति वाधूलवरदार्यस्य कृतिषु मुण्डकोपनिषट्टीकायां षष्ठः खण्डः ॥

886

Sl. No. 39274 **मुमुक्षुदर्पणम्** Ms. No. P. 511/2a

Beginning

वेदोक्तेन निवृत्तिधर्मनिवहेनाराध्यते यस्स्वयं
नानादेवतनुः प्रवृत्तिसुकृतव्रातेन वर्णादिभिः ।
स्वाचारोक्तिसदुक्तिभिस्तदुभयान् धर्मान् सदा पालयन्
तत्तत्कर्मकृते तदर्हफलदः पायात्स मां माधवः ॥

End :

स्वीयाभिः स्संस्क्रियाभिः प्रशममुखगुणैरन्विता येऽत्र तेषां
मोक्षस्स्यात्संस्क्रियाभिः कतिभिरपि युतानां च तैरेव स्यात् ।
कृत्स्नाभिस्तैर्विना चेन्नभवति हि हरौ भक्त्यभावेन तैर्वा
स स्यात् भक्तापचारो सतत इह भक्तिर्हरौ चास्तिचेतसा ॥

Colophon :

इति श्रीवैष्णवदासानुदासेन ब्रह्मदेशवज्ञीपुरार्येण विरचिते मुमुक्षुदर्पणे पाञ्चकालिकाह्निकः प्रथमः परिच्छेदः ॥

इति श्रीवाधूलवरदार्यस्य कृतिषु मुण्डकोपनिषट्टीकायां षष्ठः खण्डः ॥

887

Sl. No. 39275 मुमुक्षुदर्पणव्याख्या Ms. No. P. 511/2b

Beginning:

अच्युतादेशतो वाचि मुमुक्षोर्धर्मसंग्रहः ।
येन × नेच तं नत्वा तद्व्याख्यार्येण तन्यते ॥

इह तावत् श्रीवैष्णवदासानुदासो ब्रह्मदेशपुरार्यनामा मुमुक्षुदर्पणाख्यं स्मृतिसङ्ग्रहं चिकीर्षन् आदौ इष्टदेवताप्रार्थनारूपं मङ्गलं श्लोकतो निबध्नाति— वेदेनेति ॥

End:

एवं च सम्भवत्स्वीयसात्क्रियाणां कृ × धानशमदमादिगुणानां हरिभक्तियुक्तानां भक्तानपचारिणां सर्वेषां संमूर्च्छितानामेव मोक्षहेतुकत्वमुक्तं भवति ॥

रङ्गिश्लाधितवङ्गिवंशजगुरोर्वंशोत्थनल्वार्यभू-
नैनारार्यसुतेन वत्सकुलजात् श्री श्रीनिवासात् गुरोः ।
अत्रेयादपि लब्धसंस्कृतिवरोपायादिनाध्यापित-
स्संमोदाय मुमुक्षुदर्पण इह स्वार्थेऽपि भूयादयम् ॥

Colophon:

— — —

888

Sl. No. 39277 मोक्षकारणतावादः Ms. No. P. 3039/2

Beginning:

मुक्तिप्रदं मुररिपुं मुनीब्रन्दवन्द्यं
मोहच्छिदं शाठरिपुं च सदाऽभिवन्द्य ।
श्रीमाननन्तगुरुरुज्वलयुयुक्तितत्त्वं
मोक्षैकहेतुविषयं तनुते विचारम् ॥

इह तावत् मोक्षस्य मुख्यसाधनं विचार्यते । मोक्षो नाम स्वसामानाधिकरण्य स्वसमानकलीनत्वोभयसंबन्धेन—

End :

अनवरतभावनावशात् ध्यानव्यक्तिषु लौकिकविषयता संभवतीति पूर्वमेवोक्तम् । तथा च विशिष्टविषयकध्यानत्वेन हेतुत्वे न काप्यनुपपत्तिरित्यन्यत्र विस्तरः ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितः वादार्थोऽयं विजृम्भताम् ॥

Colophon :

— — —

८८९

Sl. No. 39279 मोक्षकारणतावादः Ms. No. P. 3672/3

Beginning;

अञ्जनमदभञ्जनमपि चित्सूरञ्जितं कलयन् ।
अञ्जनविधूरदृगञ्जनमञ्जनगिरिरञ्जनं भजेऽहम् ॥

अत्र तावन्मुक्तिशक्तिर्विचार्यते । तदिदं सर्वसंप्रतिपन्नं संसारनिवृत्तित्वमेव मुक्तिशब्दशक्यतावच्छेदकमिति ।

End :

तथ च मुक्तिमोक्षादिशब्दानां कैवल्यादिष्वपि मुख्यतायाः पाद्मोत्तर खण्डादिसिद्धत्वेन तत्र सर्वत्रानुगतमनतिप्रसक्तञ्च यथोक्तमेव तदुपपन्नतरमिति सर्वं समञ्जसम् ।

Colophon :

श्रीवाधूलमहाचार्यचिन्नासन्तानजन्मना ।
श्री श्रीनिवासदासेन कृतेयं कृतिरेधताम् ॥

८९०

Sl. No. 39280 मोक्षकारणतावादः Ms. No. P. 5614/4

Beginning

प्रपञ्चजनिरक्षणप्रलयकेलिलोलायितं
प्रपन्नजनरक्षणप्रथितवैभवोद्भासितम् ।
प्रणन्तृचतुराननप्रथमनाथमुख्यान्वितं
प्रणौमि परमं श्रियः प्रणयि तन्महः शाश्वतम् ॥

End :

नन्वेवं श्रीशभक्ताश्रयणरुचिजुषां मुक्तिसिद्धौ विवादा-
न्नास्तीति त्वार्थनिष्ठाविधिमहिमकथानिष्फला भाति मैवम् ।
आपो मेध्याः स्वभावादपि दहनयुताः किंपुनस्तेन सन्तः
स्नानं शंसन्ति चोष्णैरिति सुवचनवद्वाव्यमेतत्सुधीभिः ॥ +

त्रय्यन्तोदन्तचित्तोज्ञतरमतये साध्ववेक्ष्योक्तमर्थम् ॥

Colophon :

— — —

891

Sl. No. 39281 यतीन्द्रमतदीपिका Ms. No. P. 1260/3

Beginning :

श्रीवेङ्कटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम् ।
कृष्णेन साकं यतिरत्नमीडे स्वप्नेऽपि दृष्टान्मम देशिकेन्द्रान् ॥

यतीश्वरं प्रणम्याहं वेदान्तार्यं महागुरुम् ।
करोमि बालबोधाय यतीन्द्रमतदीपिकाम् ॥

End :

इति विशिष्टाद्वैतवादिनां दर्शनमिति सिद्धम् ॥
इति विविधविचित्रं मानमेयप्रकाशं
घनगुणगुरुणवन्दा + नोक्तमादाय शाश्वत् ।
यतिपतिमतदीपं वेदवेदान्तसारं
स भवति मतिमान्यस्सत्कटाक्षैकलक्षः ॥

Colophon :

इति श्री वाधूलकुलतिलकस्य प्रथमदासेन श्रीनिवासदासेन श्रीवेङ्कट-गिरिनाथपदकमलसेवापरायणस्वामिपुष्कर × श्री गोविन्दार्यसूनुना विरचितायां यतिपतिमतदीपिकाख्यायां शार[illegible]परिभाषायां × श्रीनिवासराघवदासेन लिखितायां अद्रव्यपरिच्छेदो नाम दशमोऽवतारः ॥

892

Sl. No. 39285 यतीन्द्रमतदीपिका Ms. No: P: 7124

Beginning :

श्रीवेङ्कटेशं करिशैलनाथं
श्रीदेवराजं घटिकाद्रिसिंहम् ।
कृष्णेन साकं यतिराजमीडे
स्वप्ने च दृष्टान्मम देशिकेन्द्रान् ॥
यतीश्वरं प्रणम्याहं वेदान्तार्यमहं गुरुम् ।
करोमि बालबोधाय यतीन्द्रमतदीपिकाम् ॥

श्रीनारायण एव चिदचिद्विशिष्टाद्वैतं तत्त्वम् । भक्तिप्रपत्तिभ्यां प्रसन्नः स एवोपायः ॥

End :

अतः चिदचिद्विशिष्ट + नारायण एव एकान्ततत्त्वमिति विशिष्टाद्वैतवादिनां मतमिति सिद्ध म्॥

इति विवधविचित्रं मानमेयप्रकाशं
घनगुणगुरुदासेनोक्तमादाय शास्त्रात् ।
यतिपतिमतदीपं वेदवेदान्सारं
स भवति मतिमान्यः सत्कटाक्षैकलक्ष्यः ॥

Colophon :

श्रीवाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन श्रीवेंकटगिरिनाथ पदकमलसेवापरायेणन्दाचार्यसूनुना श्रीनीवासदासेन विरचितायां यतीन्द्रमत दीपिकायमद्रव्यपरिच्छेदो नाम दशमोऽवतारः ॥

Extra information :

स्वप्ने श्रीवेंकटेशस्य सन्निधौ कृपया स्वयम् ।
श्रीगन्धभयहस्तस्य प्रादान्मम महागुरुः ॥

893

Sl. No. 39289 रविमण्डली Ms. No. A. 770

Beginning :

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणां सकलमीष्टतदु पायतदाभासविवेकाय + वेदार्थनिर्णयाय वेदान् व्याचिख्यासुः

जैमिनेश्शिष्यस्य लोकानुग्रहशीलनां + तन्मुखेन सूत्रानि कारयित्वा भगवद्रामानुजाचार्यैः भाष्यकारैः सम्यक् व्याख्यातम् । + सुखबोधाय सूत्रभाष्यक्रमेण प्रकाश्यन्ते—

अथातो ब्रह्मजिज्ञासा इति ॥

End :

न चैवं प्रसिद्धगायत्रीरूपं विहाय × चित्केन त ूपेण सदृशग्रहणे सर्वत्र गवाश्चतुष्पात्त्वेऽपि क्वचिदौत्पादिकी गोर्द्विपात् उत्पत—

Colophon :

— — —

894

Sl. No. 39280 **रहस्यत्रयम्** Ms. No. P. 701

Beginning

मुमुक्षोश्चेतनस्य स्वरूपोपायपुरुषार्थयाथात्म्यप्रतिपादकतया रहस्यत्रयं ज्ञातव्यम् ।

रहस्यत्रयमित्येवं श्रीमदष्टाक्षरो मनुः ।
द्वयं च चरमश्लोकः कथ्यते तत्त्वदर्शिभिः ॥

End :

भरन्यासानन्तरं शोचसि चेत् फलसिद्धौ विलम्बः स्यात् । अतः मयि न्यस्तभरेण त्वया शोको न कर्तव्यः इति भावः ॥

Colophon :

— — —

Extra information :

लोकाचार्य कृतस्य द्रविडभाषात्मकस्य रहस्यत्रयाख्यस्य ग्रन्थस्य संस्कृतानुवादात्मकोऽयम् ॥

895

Sl. No. 39291 **रहस्यत्रयकारिका** Ms. No. P. 7240/1

Bginning :

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसन्तारपोतकम् ॥
अस्मद्गुरुं तदाचार्यान् परमान् ि जनपि ।
रामानुजार्यं करुणावात्सल्यवरुणालयम् ॥

रहस्यत्रितयार्थोऽयं चिन्त्यते दृढताप्तये ।
रहस्यत्रितयं ज्ञेयं चेतनेन मुमुक्षुणा ॥
ज्ञातव्यमखिलं तस्य यस्मादत्राभिधीयते ॥

End :

इति पक्षद्वयं सम्यग्दर्शितं च यथाश्रुतम् ।
मत्प्राप्त्यर्थं तथोक्तेषु त्यक्त्वा साधनतां मयि ॥
निवेशयाहं निष्पापं कुर्यां त्वं मा कृथाश्शुचम् ।
इति श्रीचरमश्लोकसङ्ग्रहार्थो विचिन्तितः ॥
सन्तः श्रीमूलमन्त्रोक्तस्वाकारत्रयवेदिनः ।
गीतान्त्यार्थद्वयोक्तार्थमहाविश्वासशालिनः ॥
श्रीशानेकेष्टकैङ्कर्यसिद्धै त्यक्तान्यसाधनाः ।
मन्त्ररत्नश्रुतश्रीशपदपद्मैकसाधनाः ॥
उत्तमाङ्गं स्वापादाब्ज मालभिर्भूषयन्ति मे ॥

Colophon :

— — —

896

Sl. No. 39293 रहस्यत्रयसारजीवातुः Ms. No. P. 3861

Beginning :

प्रपद्ये जगदानन्दकन्दल × ।
वन्दनीयमनिन्दितैः ॥
कलयाम्यस्मदाचार्यान् तदाचार्यां स्तथापरान् ।
प्रपद्ये कमलां देवीं कमलेक्षणवल्लभाम् ॥
× चेतनस्य रहस्यत्रयार्थो ज्ञातव्य इति आचार्याः प्रत्यवदन् ।

End :

आचार्यप्रबन्धेषु यदुपपादितम्, यच्चास्मदाचार्याः उपदिदिशुः, एतत्
सर्वं समुद्धाय संगृह्यास्माभिरुक्तमिति विदांकुर्वन्तु सन्तः ॥

नमश्शठारिमुनये निखिलागमवेदिने ।
नमामि श्रीनिवासं तं श्रीवेङ्कटनिवासिनम् ॥
यत्कारुण्यैकदेशेन × सनायते ॥
इत्थमाचार्यवर्येण सम्प्रादयप्रदर्शितान् ।
अर्थान् प्रकाशयामास श्रीमन्नारायणो मुनिः ॥

Colophon :

इति परमहंसपरिव्राजकाचार्यणद्राविडवेदान्ताचार्यपादपद्मरसिक श्रीशठारियोगीन्द्रपदाम्बुजभृङ्गेण श्रीमन्नारयणयतिना विरचिते रहस्यदीपापरनामधेये रहस्यत्रयजीवातौ तृतीयः परिच्छेदः ॥

897

Sl. No. 39297 रहस्यत्रयसंग्रहः Ms. No. P. 9376

Beginning :

धियः स्वयंप्रकाशत्वं मुक्तौ स्वाभाविकं यथा ।
वद्धे कदाचित्संरुद्धं तथात्रापि नियम्यते ॥
उपयुक्तेषु वैशद्यं त्रिवर्गनिरपेक्षता ।
करणत्रयसारूप्यं इति सौख्यरसायनम् ॥

End :

इति यतिराजमाहानसपरिमळपरिवाहवासनां पिबत ।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसम्प्रदायसुधाम् ॥
रहस्यत्रयसारोऽयं वेंकटेशविपश्चिता ।
शरण्यदम्पतिविदां सम्मतस्समगृह्यत ॥

Colophon :

इति रहस्यत्रयकारिकाः सम्पूर्णाः ॥

898

Sl. No. 39299 रहस्यत्रयसंग्रहः Ms. No. C. 4690/6

Beginning :

प्रकृत्यात्मभ्रान्तिर्गलतिचिदचिद्वि[illegible]गधिया
तथा जीवैशैक्यप्रभृतिकलहस्तद्विसजनात् ।

अतो भोक्ता भोग्यं तदुभयनियन्तेति निगमै-

र्विभक्तं नस्तत्त्वत्रयमुपदिशन्त्यक्षतधियः ॥

End :

रहस्यत्रयसारोऽयं वेंकटेशविपश्चिता ।

शरण्यदंपतिविदां सम्मतस्समगृह्यत ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्यकृतिषु रहस्यत्रयसारे निगमनाधिकारो द्वात्रिंशः ॥

४९९

Sl. No. 39301 **रहस्यत्रयकारिकाव्याख्या** Ms. No. P. 5414/2

Beginning :

प्रणौमि प्रणवस्यार्थौ दम्पती जगतां पती ।

नाभीपङ्कजनीडस्थवेधःकीरगिरोत्सुकौ ॥ +

आत्रेयश्रीनिवासार्यसुतोऽहं वरदः कविः ।

रहस्यत्रयसारस्य व्याकुर्वे कारिकां क्रमात् ॥ +

+ तत्र भगवान् वेदान्ताचार्यो निखिलजगदुज्जीवनाय श्रीरहस्यत्रयसाराख्यं मोक्षशास्त्रं प्रणिनाय ।

End :

तस्मादिहामुत्र च तत्पादौ-आचार्यपादौ शरणमिति देशिका यामुनाद्यो विदुः । अत्र परत्र च नित्यं यदीयचरणौ शरणं मदीयमित्यभिदधुः । तस्मादाचार्यचरणावेव शरणमिति सर्वदा न्यस्तभरैः सुखेन वर्तितव्यमिति भावः ॥

Colophon :

इति श्रीमदात्रेयवरदार्यचरणाम्बुजचञ्चरीकस्य तत्सुतश्रीनिवासार्यकरुणैकलीवितस्य वरदकवेः कृतौ कारिकादर्पणे सम्प्रदायप्रदिभागस्तुरीयः ॥

900

Sl. No. 39303 रहस्यत्रयसारकारिकाव्याख्या Ms. No. P. 626/ 13

Beginning:

श्रीरहस्यत्रयसारे उक्ता याः संग्रहकारिकाः ।
संक्षेपतस्तास्सत्प्रीत्यै व्याख्वास्यामि यथाश्रतम् ॥
स्वतन्त्रेति । अत्र लोके । उभौ प्रपन्नौ ज्ञेयौ । कुतः ?
स्वतन्त्राङ्गप्रपत्तिभ्यां—

End:

वर्णाश्रमधर्माणां भावः—सद्भावः अभावः—अनाचरणं च एतदुभयमपि प्रपत्तेरङ्ग नेष्यते । अङ्ग न भवतीत्यर्थः—

Colophon:

— — —

901

Sl. No. 39304 रहस्यत्रयसारङ्ग्रहः Ms. No. P. 7425/1

Beginning:

श्रीविष्णुचित्तपदपङ्कजससंगमाय
चेतो मम स्पृहयते किमतः परेण ।
नो चेन्ममापि यतिशेखरभारतीनां
भावः कथं भवितुमर्हति वाग्विधेयः ॥
परमाचार्यमुद्दिश्य विष्णुचितोऽब्रवीन्मतम् ।
प्राचामार्यवर्याणां यतीन्द्रपदसेविनाम् ॥

End:

तथा च मे बश × नुभवो विसंभ × भागधेय वशात् भगवदुपासनमस्ति चेत् × ब्रह्मप्राप्तिरिति सर्वं समञ्जसम् ।
विमलमतिविशेषाद्वीक्ष्य हेया पुमर्था
स्थिरविनिहितबुद्धिर्यस्तु कैवल्य मुक्तौ ।
पुनरपि च भवेत्सा संस्मृतिस्तस्य काले
हरिभजनविपाकात् मुक्तिरेवाथवा स्यात् ॥

Colophon:

इति रहस्यत्रयसारसङ्ग्रहे चरमश्लोकाधिकारस्समाप्तः ॥

902

Sl. No. 39305 रहस्यत्रयसारसङ्ग्रहः Ms. No. C. 991

Beginning;

श्रियः पतिं तत्पदपङ्कजस्पृहा-
तृणीकृतात्यं पतिरोवरं तथा । (?)
तदीयमाहानसिकस्य पौत्रजं
गुरुं श्रितं श्रीश्रुतिमौलिदेशिकम् ॥

End:

नमः उर्वनुभावेभ्यः कृपया मां विद्यया जनपितृभ्यः ।
हयवदनासनरसनश्रीमत् परकालदेशिकेन्द्रेभ्यः ॥
इति चरमश्लोकाधिकारः ॥

Colophon:

इति श्रीमन्निगमान्तदेशिकपदसरोजमिलिन्दायमानमानसेन वाधूलान्वय-यज्जन्मना श्रीरङ्गाचार्येण विरचितो रहस्यत्रयार्थसंग्रहः (समाप्तः) सम्पूर्णः ॥

903

Sl. No. 39306 रहस्यत्रयसाराधिकारार्थसंग्रहः Ms. No. P. 5417/15a

Beginning:

प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञादायं दिशन्तु दयाधनाः ।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-
श्रमपरिहरश्रद्धाशुद्धाशया दिशन्तु मम देशिकाः ॥

End:

आस्तिक्यवान्निशितबुद्धिरनभ्यसूयः
सत्सम्प्रदायपरिशुद्धमनाः सदर्थः ।
सङ्केतभीतिरहितः सतृणेष्वसक्तः
सद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥

Colophon:

904

Sl. No. 39307 रहस्यत्रयसराधिकारार्थसंग्रहः Ms. No. C. 65/1

Bg ..ing :

इह खलु भगवान् कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः श्रीमान् वेङ्कटनाथाचार्यः वेदान्ताचार्यवर्यः रहस्यत्रसाराधिकारार्थ संग्रहेण शिष्यबुद्धिसमाधानं कुर्वन् + ज्ञानं प्रार्थयते ।

आभगवत्तः प्रथितामनघां आचार्यसन्ततिं वन्दे ।
मनसि मम यत्प्रसादात् वसति रहस्यत्रयस्य सारोऽयम् ॥

End :

उक्तमेवार्थं विविच्य दर्शयति—

स्तिक्यवान् निशितबुद्धिः अनभ्यसूयः
सत्सम्प्रदायपरिशुद्धमनाः सदर्थी ।
सङ्केतभीतिरहितः सतृणेऽष्वसक्तः
सद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥
सन्मार्गमनुविधास्यतीति सर्वं समञ्जसम् ॥

Colophon :

इति कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु रहस्यत्रयसाराधिकारार्थसंग्रहव्याख्या सारसंग्रहः समाप्तः ॥

905

Sl. No. 39310 रहस्यत्रयसाराधिकारार्थसंग्रहः Ms. No.P. 3645/2

Beginning :

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥
श्रीमद्वरदनाथेन वेदान्ताचार्यसूनुना ।
रहस्यत्रयसारार्थसंग्रहोऽयं प्रकाश्यते ॥

सदाचार्यकटाक्षेण शरणागतस्य रहस्यत्रयसारार्थो नित्यभोग्य इति सत्वोत्तरणां सम्प्रदाय × रहस्यत्रयमिति श्रीमदष्टाक्षरो द्वयं चरमश्लोकश्च कथ्यते ।

End :

स एव हि सिद्धोपायनिष्ठः स चार्चिरादिमार्गेण परमपदं प्राप्नोति भगवदनुसारिभिः कैङ्कर्यकलापैस्सर्वतो विलसतीनि समञ्जसमेतत् ॥ +

वरुणनिलयकन्यावल्लभस्यैव पादे
शरणवरणवाणीतत्पराणां नराणाम् ।
चरणमनितराणां निर्मलं निर्ममानां
शरणमिह परत्राप्यन्वहं नः प्रतीतः ॥

श्रीमत्त्रैय्यन्तसिद्धान्तदेशिकेन्द्रस्य सूनुना ।
रहस्यत्रयसारार्थो वरदार्येण वर्णितः ॥

Colophon :

इति निखिलकवितार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापर-नाम्ना वेदान्ताचार्येण विरचिते रहस्यत्रयसारार्थसङ्ग्रहे चरमश्लोकाधिकारस्तृ-तीयः ॥

906

Sl. No. 39312 रहस्यत्रयसारार्थसङ्ग्रहः Ms. No. P. 5415

Beginning :

पद्मानायकपादपद्मयुगळे पर्यायभागोन्मना
चेतो मे चिरपक्षपातविरहादास्वादमासीदतु ।
अध्यात्मश्रुतिसिद्धदुग्धलहरीसञ्चारसम्भाविते·
हंसश्रीरधिगम्यते सुकृतिभिर्यत्रोल्लसद्वृद्धिभिः ॥

श्रीमद्वरदनाथेन वेदान्ताचार्यसूनुना ।
रहस्यत्रयसारार्थः सङ्ग्रहेण प्रकाश्यते ॥

सदाचार्यकटाक्षेण शरणागतस्य रहस्यत्रयार्थो नित्यभोग्य इति सत्वो-त्तराणां सम्प्रदायः ।

End :

तस्माद्भवन्तमनवद्यमनन्तपारं
सर्वाधमीश्वरमखण्डवि × र्णधिष्ण्यम् ।
निर्वाणधीरहमिह वृजिनाभितप्से
नारायणं नारसखं शरणं प्रपद्ये ॥

Colophon :

इति श्रीविश्वामित्रकुलोद्भूतेन निखिलतार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापरनाम्ना वेदान्ताचार्यसूनुना विरचिते रहस्यत्रयसारार्थसङ्ग्रहे श्रीमच्चरमश्लोकाधिकारः सम्पूर्णः ॥

907

Sl. No. 39318 **रहस्यत्रयसारावलिः** **Ms. No. B. 1084**

Beginning :

श्रीमद्भिर्देशिकेन्द्रैः यदभिहितमभूत् सम्प्रदायार्थजातं
सारेऽत्यन्तं गभीरे सुकुशलमतिभिः सेव्यमान × ।
× रचयाम्युद्धुरां स्रग्धराभिः ॥
पापिष्ठःक्षत्रबन्धुर्निरवधिकमहापुण्यकृत्पुण्डरीकः—सम्प्रदायोऽविगेयः ।

End :

पश्चात्तापात् विरमात् कृतदुरिततते: निष्क्रियौन्मुख्यलाभात्
तत्पूर्त्या चापराधाः प्रशममुपगताः पादशो यान्ति सर्वे ।
पूर्वत्रान्यत्र कल्पे नियतपरिणतेरेव निर्वेदभाजां
व्यावर्त्ये तारतम्येऽप्यनधिगतभिदा न्यासविद्याऽघहन्त्री ॥

Colophon :

इत्यपराधपरिहाराधिकारः ॥

908

Sl. No. 39320 **रहस्यमञ्जरी** **Ms. No. P. 3648/2**

Bginning :

सौम्यजामातृयोगीन्द्ररहस्यामृतवर्षिणी ।
रहस्यमञ्जरी रम्या राजते नितरां भुवि ॥
अन्तर्बहिश्चेति श्रुत्या ह्यणोरन्तर्विभोर्बहिः ।
विष्णोः श्रुता या व्याप्तिस्तां श्रुतिराह च स्फुटम् ॥
अणोरणीयान् महतो महीयानि.. विस्तरात् ।
समवायः कथं वा स्यात् एकत्रैव विरुद्धयोः ॥

End :

श्रीकौशिकाधीशवरप्रदार्य
लब्धात्मनाप्तेन नतार्तिहन्त्रा ।
भाग्येन सम्यग्लिखिता रहस्य-
मञ्जर्यसौ सन्मधुकृत्यमोक्त्रा ॥

भेदस्स्वामिकृपाफलान्यगतिषु श्रीव्याप्त्युपायत्वयो-
स्तद्वात्सल्यदयानिरुक्तिवचसोः न्यासे च तत्कर्तरि ।
धर्मत्यागविरोधयोस्स्वविहितन्यसाङ्गहेतुत्वयोः
प्रायश्चित्तविधौ तदीयभजनेऽणुव्यप्ति(?)वलयोः ॥

Colophon :

रहस्यमञ्जरी पूर्णा ॥

९०७

Sl. No. 39323 रहस्यत्रयाष्टश्लोकीविवरणम् Ms. No. P. 3667/1

Beginning :

अस्तुश्रीवेङ्कटार्याङ्घ्रिसेवाहेवाकवन्मनः ॥
यदन्ते बासिनां स्वान्तं त्रय्यन्ते भासते स्वयम् ॥

\+ + +

अत्र खलु तत्रभवान् भट्टपराशरपादोऽस्मदनुजिघृक्षया स्वयमष्टश्लोकध रहस्यत्रयं व्यवृणोत् ।

\+ + +

End :

पुनरनुचिन्तनस्य दृढाध्यवसायहेतुत्वं द्योत्यते । यावदध्यवसायदार्ढ्यं स्मर्तव्यं भगव × भावः । अस्मीत्यनेननामुमेव गीतासारभूतचरम श्लोकानुसंधानपरः. मद्व्यतिरिक्तस्तु गीतापठनपरा इति भावः ।

Colophon:

श्रीनिवासार्यशिष्येण श्रीमद्राघवसूरिणा ।
श्रीभट्टपादनिर्दिष्टं व्याख्यातं श्लोकमष्टकम् ॥

910

Sl. No. 39324 रामानुजदशाक्षरी Ms. No. P. 1988/10

Beginning :

शुक्लाम्बरधरं वि·णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

श्री गोविन्दकैङ्कर्यरूपं कृपामात्रप्रसन्नार्यस्य श्रीमतो रामानुजार्यस्य प्रसादेन मम सर्वाभीष्टसिद्ध्यर्थं अष्टोत्तरशतसंख्यया भगवद्रामानुजदशाक्षरीमहामन्त्रजपं करिष्ये इति संकल्प्या ॥ अस्य विस्तरः ॥

End :

कृपामात्रप्रपन्नार्यकृपामात्र प्रसीद मे ।
कृपापात्रमहं तेऽन्यत् कृपापात्रं विमृश्यताम् ॥
इति तत्प्रसादं प्रार्थयेत् ॥

Colophon :

— — —

911

Sl. No. 39326 रामानुजसिद्धान्तपदवी Ms. No. P. 7569/3

Beginning :

यत्सङ्कल्पवशाद्भवन्ति जगतां सर्गोपसर्गादयः
यद्भक्तिन्यसनेऽधिकारिषु पृथक्सर्वार्थसंपादके ।
यस्याज्ञापरिपालनेन सुखिनः शम्भुस्वयंम्वादयः
श्रीमानस्तु स मे हृदि श्रितजनत्राणैकदीक्षो हरिः ॥

निगमविवादभाव × लोकहितैकरतिः ॥

व्यासार्य एष हृदमेऽस्तु तत्वोपायपुमर्थ ॥

घण्टावतारमुनये + ॥

नमस्कृत्य सदाचार्यम् भक्तिनम्रेण मौळिना ।
श्रीरामनुजसिद्धान्तपदवी लिख्यते मया ।
अत्रायं वेदविदां सम्प्रदायः ॥

End :

आदित्यपुराणोक्तानामपि शिवनामसहस्राणां अनुपादेयत्वमेव। शिष्ट-परिग्रहाभावात्। बहुष्वपि तेषु वाक्यशकलस्यापि शिष्टैर्ग्रन्थज्ञैः ग्रन्थेषु कुत्राप्य—

Colophon :

— — —

912

Sl. No. 39328 रामनुजसिद्धान्तपदवी Ms. No. P. 2002

Bginning:

× भक्तिवैराग्यसम्पदे ।
श्रीरङ्गनाथगुरवे भूयाद्भूरिनमस्क्रिया ॥

इत्थं स्वानुष्ठितोगायप्रीतेन परमात्मना ।
दीयमानां स्वदासाय वक्ष्ये फलपरम्पराम् ॥

End:

इति शास्त्रमहापथं प्रपन्नाः
कुस्मृतिच्छन्नकुदृष्टिचोरशून्यम् ।
अचिरेण पुरीं भजन्त्ययोध्या-
मनघार्थाभरणाञ्चिता महान्तः ॥

श्रीरामानुजशास्त्रपद्धतिमिमां दुर्वादिनः कन्दकान्
दूरीकृत्य समीचकार विदुषां श्रीरङ्गनाथो मुदे ।
इत्येवं कथयन्ति हन्त कतिचित्तां सर्वकर्ता स्वयं
चक्रे निष्प्रतिघां स एव जगतां नेतेति सन्तो विदुः ॥

इति श्रीवत्सकुलतिलक + सप्तमं तत्त्वविशोधनपर्व ॥

Colophon:

इति श्रीवत्सकुलतिलक श्रीनिवासार्यसूनोः श्रीरङ्गनाथस्य कृतिषु श्री रामानुजसिद्धान्तपदव्यां रक्षाकवचभागो द्वितीयः ॥

913

Sl. No. 39331 रामनुजसिद्धान्तपदवी Ms. No. P. 802/3

Beginning :

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥
नमस्कृत्यास्मदाचार्यान्भक्तिनम्रेण मौलिना ।
श्रीरामानुजसिद्धान्तपदवी लिख्यते मया ॥

End :

\+ इति महापथं प्रपन्नाः कुस्मृतिच्छन्नकुदृष्टिचोरशून्यम् ।
अचिरेण पुरीं भजन्त्ययोध्यामनर्घार्थभरणाञ्चिता महान्तः ॥
श्रीरामानुजशास्त्रपद्धतिमिमां दुर्वादिनः कण्टकान्
दूरीकृत्य समीचकार विदुषां श्रीरङ्गनाथो मुदे ॥
इत्येवं कथयन्ति × जगतां नेतेति सन्तो विदुः ॥

Colophon :

इति श्रीवत्सकुलतिलक श्रीनिवासार्यसूनोः श्रीरङ्गनाथस्य कृतिषु रामानुजसिद्धान्तपदव्यां सप्तमं तत्त्वविशेषादिशोधनं पर्व ॥

914

Sl No. 39332 रामानुजसिद्धान्तविजयः Ms. No. P. 2566

Beginning;

निखिलजगदधीशं निर्गताशेषदोषं
श्रितजनकृतमोदं सूरिसंसेव्यपादम् ।
करिगिरितटभाजं सर्वदेवाधिदेवं
वरदमहमुपासे वाञ्छितार्थाभिवृद्ध्यै ॥

End :

निरञ्जनः परमं साम्यमुपैति इति श्रुत्या ब्रह्मतुल्यानन्दयोगस्सम्भवति ।
तथाप्यस्मिन् वाक्ये स्वत एवापरिच्छिन्नानन्दत्वं न कीर्तितं (?)

Colophon :

— — —

915

Sl. No. 39333 रामानुजसिद्धान्तविजयः Ms. No. B. 161

Beginning :

पूर्वाध्यायोक्तभगवद्धेतुत्वस्थैर्यसिद्धये ।
परोक्तदोषतत्पक्षनिरासः क्रियतेऽधुना ॥

प्रथमाध्याये चिदचिद्विलक्षणं निरस्तनिखिलविधापुरुषार्थगन्धं समस्त-कल्याणगुणपरिपूर्णं सर्वान्तरात्मभूतं परब्रह्म वेदान्तवाक्यैर्जगत्कारणतया प्रतिपाद्यत इत्युक्तम् ।

End :

तथा च ज्ञानानीत्यारभ्य चरमसूत्रपर्यन्तं एकमधिकरणमेवेति । श्रीभगवद्रामानुजसिद्धान्तो निष्कण्टको विजयत इति सिद्धम् ॥

Colophon :

श्रीमद्भगवद्रामानुजसिद्धान्तविजये द्वितीयाध्यायस्य तृतीयः पादः ॥

916

Sl. No. 39336 रामानुजसिद्धान्तसङ्ग्रहः Ms. No. P. 3648/1

Beginning :

वाधूलवरदाचार्यवात्स्यश्रीनिधिदेशिकौ ।
संश्रये श्रीवराहं च श्रुतकल्पकशाखिनम् ॥

रामानुजार्यसिद्धान्तसङ्ग्रहोऽयं प्रकाश्यते ।
तत्त्वबोधाय बालानां गुरूक्तैर्लक्ष्यलक्षणैः ॥

'ब्रह्मविदाप्नोति परम्' 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिभिः —

End :

ननु कथं प्रमेयत्रैविध्यनिरूपणं सामान्यविशेषसमवायानां विद्यमानत्वा-दिति चेत् न । संस्थानातिरिक्तजातेर्निराकृतत्वात् नित्यद्रव्याणामपि-

स्वासाधारणधर्मेणैव परस्परव्यावृत्त्युपपत्तौ तद्गतविशेषाख्यपदार्थान्तराङ्गीकारे प्रमाणाभावात् । समवायस्य निराकृतत्वाच्च त्रिविधमेव प्रमेयमिति × निरवद्यम् ॥

Colophon :

इति श्रीनिवासार्यविरचिते रामानुजसिद्धान्तसङ्ग्रहे प्रमेयपरिच्छेद-स्समाप्तः ॥

917

Sl. No. 39337 — रामानुजसिद्धान्तसारः — Ms. No. P. 3419

Beginning :

× मुखेन प्रबलोपदेशद्रष्टृत्वेन योगदशा × साक्षात्कृततया उपद्रष्टृत्वेन चेति सम्प्रदायस्थितिः । श्रीशठकोपमुनेः श्रीविष्वक्सेनादात्म विद्यावाव्याप्तिः । × ननु आचार्यवंशो ज्ञेय इति आचार्यवंशस्य ज्ञेयत्व-मुच्यते ॥

End :

जयन्तीमात्रपारणस्य दिवा निषेधे अवैष्णवस्यापि दिवापारणं दिवा न कर्तव्यं स्यादित्यास्तां तावत् । अनुशासनभागः समाप्तः ॥

आस्तिक्यवान्निशितबुद्धिरनभ्यसूयः
सत्संप्रदायपरिशुद्धमनाः सदर्थी ।
सङ्केतभीतिरहितः सतृणेष्वसक्तः
सद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥

Colophon :

इति श्री रङ्गरामानुजकृतिषु श्रीरामानुजसिद्धान्तसारसङ्ग्रहः समाप्तः ॥

918

Sl. No. 39338 — रामानुजसिद्धान्तसारः — Ms. No. P. 7569/4

Beginning :

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया ।
अञ्जनाचलशृङ्गारं अञ्जलिर्मम गाहताम् ॥
लक्ष्मीवल्लभपर्यन्तां नत्वा गुरुपरम्पराम् ।
श्रीरामानुजसिद्धान्तसारः सम्यक्प्रकाश्यते ॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥
नमोवाकः— नम इत्युक्तिः ॥

End :

वैष्णवगृहस्थप्रणामादेर्न प्रसक्तिः ॥ वर्णा × दिषु ×
पूर्वेषां प्रणामान × स्त्वम् नैव च क्रमः — ×
इति वा उपपत्तिः इति ॥

Colophon :

— — —

919

Sl. No. 39340 **रामानुजसिद्धान्तसारः** Ms. No. P. 4817

Beginning :

नीलोत्पलदलश्यामं निर्मलानन्दरूपिणम् ।
निर्हेतुककृपायुक्तं नित्यं सेवे रमापतिम् ।
वात्स्येन वरदाचार्यविदुषा विदुषां मुदे ।
श्रीरामानुजसिद्धान्तः सम्यक्कु संगृह्यतेऽधुना ।

End :

अद्वैतहानिश्च । यदि मिथ्या तदा प्रपञ्चमिथ्यात्वासिद्धिः ।
मिथ्यात्वस्य बाधितत्वात् । न च सत्यत्वस्य सत्यत्वे त्वबाधः । प्रत्यत्क्व
× त्वस्य सत्यत्वे × त्वप्राप्त्या तत्स्थापनमेव भवति ।
× य प्रपञ्चो नाम भेदः स च प्रमाणतः ×

Colophon :

— —

920

Sl. No. 39341 **रामानुजसिद्धान्तसारः** Ms. No. P. 6032

Beginning :

श्रीरामानुजसिद्धान्तरत्नाकरसुधांशवे ।
नमो वेदान्तगुरवे दुर्मतध्वान्तभानवे ॥

वेदान्तगुरुनिर्णीते श्रीरामानुजदर्शने ।
सर्वसारेऽप्यसारत्वदुर्वादोऽत्र निरस्यते ॥
द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुः
द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यकालौ ॥

End :

तथा च श्रीमद्रामानुजसिद्धान्त एव सारस्वतसार इति सर्वं समञ्जसम् ।
रामानुज सिद्धान्तो जयति श्रुतिशेवधिः ।

Colophon :

— — —

921

Sl. No. 39342 रुद्रपदार्थविवरणम् **Ms. No. P. 1880/8**

Beginning :

रुद्रोऽग्निः कर्मकाण्डे श्रुतिभिरभिहितो × द्रशब्द
स्तत्रैवास्मिन्निरुक्तस्तनुयुकळः प्रोक्तमत्रैव तस्य ।
एकाघोराशिवाद्या नमकचमक × युग्मान् प्रशान्तिः
प्रीतिश्चोक्ता तयोस्तत्कथमपि न शिवस्यास्ति तत्रावकाशः ॥

End:

गायत्र्यां भर्गशब्दश्शिवपर इति × तो धीमहीति
ध्यानं कर्माभिकांक्षे प्रतिवदति तथा तत्परं तत्परं च ।
षष्ठ्यन्तौ द्वौ च शब्दौ कथमित्र घटतस्तन्मते तेन सान्तो
भर्गश्शब्दोऽत्र तेजःपर इति मुनिभिर्निस्सपत्नो निरुक्तः ॥

Colophon :

— — —

922

Sl. No. 39 343 रुद्रोत्पत्तिरहस्यम् **Ms. No. P. 6151**

Beginning :

रुद्रोत्पत्तिः—विष्णुपुराणे अष्टमे—
कथितस्तामसस्सर्गः ब्रह्मणस्ते महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥

कल्पाक्षावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः ॥

प्रादुरासीत्प्रभोरङ्के कुमारो नीललोहितः ॥

End :

नान्यः कश्चित्तदन्तर्यामी, सोऽव्यतिरिक्तः अन्तर्यामिश्चान्तरं प्राविशत् । सोऽहं नित्यानित्यब्रह्माहं प्राविशत्प्रत्यञ्चोऽहमुदञ्चोऽहं —

× धन्योऽहं गार्हपत्योऽहमिति श्रुतिः ॥

देवतानां यथा विष्णुः वेदानां प्रणवो यथा ॥

Colophon :

923

Sl. No. 39344 लक्ष्मीपुरुषकारः Ms. No. A. 412

Beginning :

आरभ्य स्वगुरोरा च भगवत्तोऽखिलान् गुरून् ।

प्रणम्य तत्त्वनिष्कर्षः क्रियते विदुषां मुदे ॥

श्रीसूक्तमपि पुंसूक्तसंमितं तत्त्वनिर्णये ।

तथाहि भगवच्छास्त्रे व्यक्तं तदुपबृंहितम् ॥

शक्रानुयुक्तया देव्या प्रोच्यते जगतां हितम् ॥

End :

अनादिः परमेशो यः शक्तिमान् पुरुषोत्तमः ।

इतीत्थं शक्तिमत्त्वेन विशिष्टस्तत्रैव संनिधिः ॥

तत्रैव खल्वहिर्बुध्न्यसंहितायां बहुस्थले ।

लक्ष्मीपरः शक्तिशब्दः संदृष्टोऽत्रापि तत्परः ॥

Colophon :

— — —

924

Sl. No. 39345 लक्ष्म्युपायत्वदीपः Ms. No. B. 563

Beginning :

उपायत्वमुपेयत्वमिव व्यासज्यवृत्तिकम् ।

ययोरेकं विजयतेऽदित्या तौ दम्पती श्रये ॥

वेदान्तद्वयसारार्थो विदितो यत्प्रसादतः ।
परकालगुरोस्तस्य पदाब्जं शरणं भजे ॥

End :

तदेवं लक्ष्म्याः पुरुषकारत्ववदुपायत्वस्यापि श्रुतिस्मृतिभगवच्छास्त्रसम्प्रदायसिद्धतया पुरुषकारप्रपदनपूर्वकलक्ष्मीविशिष्टभगवच्चरणारविन्दशरणागत्यैव मोक्षसिद्धिरिति निष्कण्टकोऽयं घण्टापथः ।

Colophon :

श्रीमच्छ्रीशैलतातप्रवरगुरुपदे न्यस्तरक्षाभरस्सन्
सम्यक्प्राप्तागमान्तद्वय इह परकालाख्यसद्देशिकेन्द्रात् ।
श्रीमच्छ्रीशैलवंशांबुधिविधुनरसिंहाख्यतातार्यसूनुः
तेने श्री वेङ्कटार्यः सुजनहिततमं लक्ष्म्युपायत्वदीपम् ॥

925

Sl. No. 39346 लक्ष्म्युपायत्वविमर्शः Ms. No. P. 626/10

Bginning :

कर्मज्ञानमुपासनं च शरणव्रज्येति चावस्थितान्
सन्मार्गानपवर्गसाधनविधौ—
सम्यग्वीक्ष्य शरण्यसारथिगिरामन्ते रमन्ते बुधाः ॥

End :

संकल्पमात्रमेवाङ्ग श्रुतमाचरणं पुनः ।
अनङ्गमाज्ञया प्राप्तं न संकल्पनिबन्धनम् ॥

Colophon :

— — —

926

Sl. No. 39347 लक्ष्म्युपायत्वविमर्शव्याख्या Ms. No.. 626/11

Beginning :

कर्मज्ञानमुपासनञ्चेत्यादि । बुधाः—बुद्धिमन्तः ज्ञानिनश्च कर्म—कर्मयोगः ज्ञानं—ज्ञानयोगः उपासनं-भक्तियोगः शरणव्रज्या—शरणागतिः

End :

अतोऽनन्यपरानेकश्रुतिस्मृत्यनुसारतः ।
पत्नीविशिष्ट एवैकः प्रपत्तव्य इहोदितः ॥

Colophon :

— — —

927

Sl. No. 39350 वराहचरमश्लोकप्रकरणम् Ms. No. P. 8528/4

Beginning :

अहं शिष्या च दासी च भक्त्या च त्वयि माधव ।
मत्कृते सर्वजन्तूनां लघूपायं वद प्रभो ॥
स्थिते मनसि सुस्वस्थे शरीरे सति यो नरः ।

End :

धातुसाम्ये स्थिते स्मर्ता विश्वरूपं च मामजम् ।
ततस्तं म्रियमाणं तु काष्ठपाषाणसंनिभम् ॥
अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥

Colophon :

— — —

928

Sl No. 39351 वादकिरणावलिः Ms. No. C. 2401

Beginning :

कौण्डिन्यवंशाब्धिसुधामयूखं
अहोबलाचार्यगुरोस्तनूजम् ।
त्रय्यन्तयुग्मार्थविचारदक्षं
श्री श्रीनिवासार्यमखेन्दुमीडे ॥

\+ वादिविजयाय किरणवलिः ॥

ओं जन्माद्यस्य यतः । अत्र च यतो वेत्यादिवाक्यं विषयः ।

End :

अतो भूतपृथिवीशरीरहृदयानां न पादत्वमिति तन्न गायत्रीशब्दस्य परब्रह्मपरत्वे ए + विहितटाबन्तस्य चतुष्प × अनुपपत्तेः । चतुष्पदेत्य—

929

Sl. No. 39353 वादित्रयखण्डनम् Ms. No. P. 2406/1

Beginning

End :

प्रदिशतु परिहृतदोषंप्रज्ञानन्दादिगुणगणोपेतम् ।
कमलाभूषितवक्षःकल्याणं नः चिरन्तनं धाम ॥

परापरतत्त्व याथात्म्यादि वेदनपूर्वक स्वाधिकार कर्मानुष्ठानपरिकरपरि-कर्मितः—

End:

आर्यजनसंमतानां धर्मज्ञसमयानुसारिणां पाषण्ड शाक्य शुण्डाल मण्डल खण्डनप्रचण्डविक्रमाणां पुरुषसिंहानां शुद्धान्तसिद्धान्तिकानां सकालोपनिषदुप बृंहितमिदमनुसरन्तो क्षुद्रयन्तः सर्वत्र विजयध्वम् ॥

इत्थं त्रय्यन्तसिद्धान्तदुग्धसिन्धुसुधामिमाम् ॥

Coplohon :

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ता-चार्यस्य कृतिषु वादित्रयखण्डनं सम्पूर्णम् ॥

930

Sl. No.39354 विजयार्थपत्रम् Ms. No. A. 9731

Beginning :

कुटिलनखाग्रोत्पाटितहिरण्यकशिपुदरोदरग्रीवः ।
भक्तावने विनिद्रो मुग्धश्रीनरहरिर्जयति ॥

यथा सूर्यस्य प्रकाशेन सम्पूर्णान्धकारस्य नाशो जायते तथा दीपप्रकाशेन सम्पूर्णाधकारनाशो न जायते ।

End :

अत एव समर्था भवन्ति । एतस्मात्कारणादेव भगवत्कृपाजन्यज्ञानस्य वक्तारो भवेयुरेतन्नवप्रश्नानामुत्तरं कृत्वा विजयं कुर्युः ।

हरिप्रपन्नविदुषा बृन्दावननिवासिना ।
नृभाषायां कृतं पत्रं विजयार्थमिदं नृणाम् ॥
विश्वेषां सुखवेधाय भक्तानां प्रीतये शुभम् ।
नवप्रश्नैर्युतं शास्त्र प्रमाणघटितैर्मुदा ॥
ये वैभागवता × दिवौकसाम् ॥

Colophon :

समाप्तमिदं विजयार्थपत्रम् ॥

931

Sl. No. 39355 **विजयीन्द्रपराजयः** Ms. No. A. 84

Beginning :

इन्दिरामन्दिरोरस्कं इन्द्रनीलनिभं शुभम् ।
भावये कुमतिध्वान्तविनिवर्तकभावनम् ॥
जयति विविधविद्वद्गर्वभङ्गप्रचण्डः
कविकथकमृगेन्द्रः सर्वतन्त्रः स्वतन्त्रः ।
शतमिविमतभाविग्रन्थसंदर्भवीर्यैः
फणितिभिरचलाभिः मद्गुरुर्देशिकेन्द्रः ॥

. . . .

End :

अत्यन्ततहेयमाध्वानां सिद्धान्ते मानबाधिते ।
निरासाय विचारेपि विरमस्वाथमन्मनः ॥
यतिना परकालेन विजयीन्द्रः पराजितः ।
रामानुजमतेऽप्येवमनुसारत्वोक्तिगर्वितः ॥

जयतु विविधविद्वद्दर्वभङ्गप्रचण्डः ×
फणितिभिरचलाभिः मद्गुरुर्देशिकेन्द्रः ॥

Colophon:

सम्पूर्णोयं ग्रन्थः ॥

932

Sl. No. 39358 | विधिसुधाकरः | Ms. No. B. 384

Beginning:

श्रीमद्रामानुजार्यः श्रुतिशिखरशिखाधाविमेधाविलासं
प्रोद्याद्व्याहारगुम्भैर्विदलितकुमताडम्बरं तं भजामि ।
यद्भाष्याम्भोधिगर्भप्रसृमरसुमहायुक्तिवीचीविहाराः
वेलान्तैर्विक्षिपन्ती प्रतिकथकघटादूषणालीतृणानि ॥
शेषार्यवंशवार्धीन्दुरनन्ताचार्यकोविदः ।
नत्वा नाथादिमाचार्यान् चक्रे विधिसुधाकरम् ॥

विधिनिषेधार्थवादरूपेण—

End:

तादृशभावरूपगुणविशिष्टोपासनेष्वभावरूपाणां गुणानामन्वयस्य च प्रतिपादनात् + पदाहवनीयन्यायेन दृष्टान्तस्य पर्युदासाधिकरणोदाहरणस्य च सार्थक्यमिति सर्वं समञ्जसम् ॥

Colophon:

— — —

933

Sl. No. 39360 | विरोधनिरोधः | Ms. No. A. 14067/1

Beginning:

व्य × गेयं प्रणतेरुपेयं
श्रुत्यन्तगेयं सुरभागाधेयम् ।
श्रेयोऽभ्युपेयं चिदचित्स्वकायं
ब्रह्माद्वितीयं प्रणमाम्यमेयम् ॥

\+ + +

इह खलु भगवान् सूत्रकृत् विचिचारयिषितं शास्त्रं कारणब्रह्मैक विषयं प्रदिदर्शयिषुः ब्रह्म जिज्ञास्यं प्रतिज्ञाय तल्लक्षणं च जगत्कारणत्व मुपादिक्षत् अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यत इति +

End:

यदि तु ब्रह्मातिरिक्तकृत्स्नविषयत्वाद्वा विषयता तर्हि तद्वदेव जीव-विषयताप्यस्तु, कुतस्तत्रार्धजरतीयाश्रयणमुन्मादविलसितमेव कण्ठोक्तभेद निर्देशशतविरुद्धमन्यथासिद्धसूचनकुशकाशावलम्बनमभेदमुपजीव्य भेदवाद्युपह-सनमुन्मादविलसितमित्यलमनेनोन्मत्तचित्तजनसम्भाषणदोषेणेति दिक् ॥

Colophon:

इति श्रीशैल श्रीनिबासविराचिते विरोधनिरोधे तुर्यो निरोधः ॥

934

Sl. No. 39361 **विरोधनिरोधः** Ms. No. P. 4802

Begining:

श्रीमद्वेङ्कटना × नन्दयाम्यहम् ।
श्रीपक्षायी × शेषत्वज्ञाननिर्मलान् ॥

\+ अथ लक्ष्मणाचार्यसिद्धान्तनिष्णातविष्णुभक्तजननासीरवीरः वरदाचार्यः × अस्मत्तातपादैरगस्त्यभाषया प्रणीतमध्यात्मविद्भिरवधार्यं रहस्यत्रयसारार्थविरोधपरिहारमशेषदेशवासिनामपि परशेषत्वज्ञानरसिकानां सङ्ग्रहणसिद्धये नानोपबृह्मणनिपुणनिरूपितनिगमसंस्कृतया संस्कृतभाषया सम्य-गनुकथयामि । तथाहि—

End:

एवमुक्तप्रकारेणावश्यमेव वेद्येष्वर्थेषु केषांश्चिच्छङ्काशंकुनिरासे शिष्टा नामपि निश्शेषनिरासार्थमाचार्यग्रन्थेषु तेष्वनवरतानुसन्धानपरायणैः नारायण परायणैर्भवितव्यमिति सर्वमवदातम् ॥

मुक्तिं शिष्यकरस्थयामि मुरधीर्भक्तिं व्यवस्थापये
तद्भक्तेषु च कारयामि नियतं भक्तं समस्तं जनम् ।
राजन्यानपि रञ्जयामि समये रामानुजार्योक्तिभिः
सर्वारीनपि साहसेन विजयी धि × र्करीमि क्षितौ ॥

Colophon :

— — —

935

Sl. No. 39326 विरोधवरूथिनीप्रमाथिनी Ms. No. P. 2790

Beginning :

श्रीशेषक्ष्माभृदीशे स्थिरचररचनास्थापनाक्षेपदक्षे
श्रुत्यन्तात्यन्तदीपे भगवति विनतत्रातरक्षैकदीक्षे ।
विद्यापद्यानवद्यानुभवशुभगुणग्रामनिस्सीमभूम -
न्यस्तु प्रस्तुत्यदस्तप्रतिहतिरतुला भक्तिरात्यन्तिकी नः ॥
दुर्मेधोग्रथिता या च विरोधानां वरूथिनी ।
तस्याः प्रमाथिनीं कुर्वे सिद्धान्तर्थप्रबोधिधिनीम् ॥

End:

ननु पुराणवक्तुरितिकल्पनमनुकरोतीत्युक्तम् । तत्तु उन्मादविलसितम् । सङ्कोचविकासशब्दार्थयोरुभयाभ्युगतयोर्वैलक्षण्यस्यावेदितत्वेन उक्तोतपालम्भाप्रवृत्तेः । तथाऽपि व्यावहारिकसत्तायाः ×

Colophon :

— — —

936

Sl. No. 39363 विरोधिपञ्चाशत् Ms. No. C. 4527

Beginning

देहात्माभिमानोऽसह्य इति श्रीराममिश्रपरमाचार्यस्य द्वयोपदेशाननतरं तस्मिन् मम कर्तव्यं किमिति पृच्छति विरोधिनः पञ्चाशाच्च परिहरन् वर्नथाः इत्यवोचत् ।

End :

एतत्सर्वं परमैकान्तिनोऽस्याधिकारिणोऽवश्यपरिहरणीयम् । एवं सूरिभिरुक्तं श्रुत्वा महाचार्योऽप्यत्यन्तं भीतोऽभवत् ॥

Colophon :

— — —

937

Sl. No. 39365 विवादार्थसग्रहः Ms. No. P. 4343/3

Beginning :

पञ्चाशत्कोटिभिस्स्यान्तिमतमनितलं योजनानां तथा हि
स्याज्जम्बूद्वीपमेकं नियुतमुदधिना तावता वेष्टितं तत् ।
प्लक्षद्विपो रसे × णधिततिताव × क्ष × स्थिनासौ
द्वीपाद्वैगुण्यभाजस्त्वस × गुदधिभिस्संवृता एवमेव ॥

End :

द्विविधाचार्यदृष्टार्थरीतिरित्थं यथामति ।
वाक्येन रङ्गनाथेन दिङ्मात्रेण प्रदर्शिता ॥

Colophon :

इति श्रीवत्सकुलतिलकश्रीनिवासाचार्यसूनोः श्रीरङ्गनाथस्य कृतिषु विवादार्थसङ्ग्रहः सम्पूर्णः ॥

938

Sl. No. 39366 विवादार्थसग्रहः Ms. No. B. 80

Beginning :

भगवत्तत्त्वविज्ञानभक्तिवैराग्यसम्पदे ।
श्रीरङ्गनाथगुरवे भूयात् भूरिनमस्क्रिया ॥
अष्टादशार्थविषये द्रविडप्रबन्ध-
व्याख्यातृभिर्गुरुभिरुक्तमिहार्थभेदम् ।
श्रीभाष्यमुख्ययतिभूमिपतिप्रबन्ध-
वाक्यानुसारि कथितं प्रविभज्य वक्ष्ये ॥

End :

द्विविधाचार्यदृष्टार्थरीतिरित्थं यथामति ।
वात्स्येन रङ्गनाथेन दिङ्मात्रेण प्रदर्शिता ॥

Colophon :

इति श्रीवत्सकुलतिलक श्रीरङ्गनाथसूनोः श्रीरङ्गनाथस्य कृतिषु विवादार्थसङ्ग्रहः सम्पूर्णः ॥

939

Sl. No. 39369 विवादार्थसग्रहः Ms. No. P. 3797/1

Beginning :

अष्टादशार्थविषये द्रमिडप्रबन्ध-
व्याख्यातृभिर्गुरुभिरुक्तमिहार्थभेदम् ।
श्रीभाष्यमुख्ययतिभूमिपतिप्रबन्ध-
व्याख्यातृभिश्च कथितं प्रविभज्य वक्ष्ये ॥

End :

ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ।
सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥
इति च्यवनधर्मत्वोक्त्या कैवल्यस्य नश्वरत्वमुक्तमिति सर्वं समञ्जसम् ॥

Colophon :

— — —

940

Sl No. 39370 विवादार्थसग्रहः Ms. No. P. 5602/24

Beginning ;

× कृपां निर्हेतुकां केचिद्विष्णोरन्ये सहेतुकाम् ।
अस्ति मुक्तौ तारतम्यन्नेति केचित्प्रचक्षते ॥
कर्म ज्ञानं च भक्त्यङ्गं उपायः × ।
× स्वसामर्थ्यात् आहुरन्ये विशुद्धतः ।
लक्ष्म्या × तां केचित् नेति केचित्प्रचक्षते ॥

End :

× ष्ववर्णाश्च प्रपन्ना श्रेयसामपि ।
इ × केचित्ततो × तु पूज्या मुक्तेर × ॥
× णुष्वणुर्भवे × पूर्णेनेति × ।
× × ॥
कैवल्यं विरजापारे इत एवेति केचन ।
एवमष्टादशस्थानेष्वाहुर्भेदं विचक्षणाः ॥

Colophon :

— — —

941

Sl. No. 39372 विवादार्थसंग्रहः Ms. No. P. 9011/8

Beginning :

अथ भेदः प्रतिपाद्यते—

स्वामिकृपा निर्हेतुका, सहेतुका ।

फलं कैङ्कर्यम् । स्वगतस्वीकारनिष्ठानाम्, स्वार्थकैङ्कर्यम् । परगत-स्वीकारनिष्ठानाम् परार्थकैङ्कर्यम् ।

अन्यगतिः प्रपत्तिव्यतिरिक्तोपायः स तु भक्तिरेव ।

End :

भागवतविषये प्रवृत्तिनिवृत्तिवैषम्यम् ।
अणुव्याप्तिः अन्तर्व्याप्तिः नान्तर्व्याप्तिः ॥
कैवल्यम् नित्यं, अनित्यम् × विरजाधस्तादुपरि इति भेदाः ॥

Colophon :

— — —

942

Sl. No. 39373 विवादार्थसंग्रहः Ms. No. A. 9520/3

Beginning :

अष्टादशार्थविषये द्रमिडप्रबन्ध-
व्याख्यातृभिर्गुरुभिरुक्तमिहार्थभेदम् ।

श्रीसाप्यमुख्ययतिभूमिपतिप्रबन्ध
व्याख्यातृभिश्च कथितं प्रविभज्य वक्ष्ये ॥
द्रमिडाचार्यदृष्टार्थं पूर्वं वक्ष्ये यथामति ।
संस्कृताचार्यदृष्टार्थं पश्चात्सद्भिर्नियोजितम् ॥

End :

× ष्टास्त्रयो भक्ताः फलकामा हि ते मताः ।
सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ॥
इति च्यवनधर्मत्वोक्त्या कैवल्यस्य नश्वरत्वमुक्तमिति सर्वं समञ्जसम् ॥

Colophon :

— — —

943

Sl. No. 39374 विशिष्टाद्वैतकीर्तनम् Ms. No. P. 1996/1

Beginning :

वेङ्कटेशाय विविधचिदचिद्वस्तुरूपिणे ।
रामानुजाय गुरवे नमो मुक्तिप्रदायिने ॥
आदौ नारायणोऽप्येकः तस्माज्जाताश्च प्राणिनः ।
ब्रह्मादिसर्वभूतानि इति श्रुत्या प्रकीर्तितम् ॥

End :

चण्डालं वापि मद्भक्तं नावमन्येत बुद्धिमान् ।
अवमन्येत मूढात्मा प्रयाति नरकं ध्रुवम् ॥

Colophon :

वाधूलरामानुजाचार्यपदाश्रयणशालिना ।
श्रीनिवासेन रचितं विशिष्टाद्वैतकीर्तनम् ॥
शुक्लाब्दे फाल्गुने मासे श्रीनिवासेन की × ।
शुक्लाब्दे पौषमासे तु चालिङ्गराजश्च शासने ।
जगन्नाथो लिलेखाशु एतत्सङ्कीर्तनं मुदा ॥

944

Sl. No. 39375 **विशिष्टाद्वैतकीर्तनम्** Ms. No. P. 1996/2

Beginning:

वेंकटेशाय विविधचिदचिद्वस्तुरूपिणे ।
रामानुजाय गुरवे नमो मुक्तिप्रदाय च ॥
आदौ नारयणोऽप्येक: × ज्ञाताश्च प्राणिन: ।
ब्रह्मादिसर्वभूतानि श्रुतिस्मृतिषु कीर्तितम् ॥

End:

सर्वोत्तमं मतमिदं योऽपि कोऽपि समाश्रयेत् ।
चण्डलम्लेच्छहूणाश्च ते वै मोक्षपदं व्रजेत् ॥

Colophon:

शालीवाहनशकाद्बे सहस्तादुत्तरे गते ।
शतसप्तनवत्येके शुक्लाद्बे फाल्गुने तथा ॥
वाधूलरामानुजाचार्यपदाश्रयणशालिना । +
श्रीनिवासेन रचितं विशिष्टाद्वैतकीर्तनम् ॥

945

Sl. No. 39377 **विशिष्टाद्वैततत्त्वनिष्कर्ष:** Ms. No. P. 1364/75

Beginning:

कृपां निर्हेतुकां केचित् विष्णोरन्ये सहेतुकाम् ।
अस्ति मुक्तौ तारतम्यं नेति केचित्प्रचक्षते ॥

End:

द्रव्याद्रव्यप्रभेदा मितमुभयविधं तद्विदस्तत्त्वमाहु:
द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक्पराक्च प्रथममुभयथा तत्रजीवेशभेदात्
नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहु: ॥

Colophon: — — —

946

Sl. No. 39378 विशिष्टाद्वैतप्रकरणम् Ms. No. P. 119

Beginning :

× षग्रहाधीनग्रहत्वेन तत्र तादृशावच्छेदकविशेषाभावेन तल्लक्षणस्या सम्भवदूषितत्वात् । अवच्छेदकान्तरसत्त्वे वा तस्यैव लक्षणत्वेनैतल्लक्षणवैय्यर्थ्यात् । अतः संशयत्वानधिकरणज्ञानत्वं वाच्यम् । न च धर्म्यंशे अव्याप्तिः । अस्मन्मते धर्मिज्ञानस्य संशयभिन्नत्वात् । परमते अवच्छेदकभेदेन संशयत्वतदभावयोरेकत्र सत्त्वात् ।

End :

व्याकरणादिन्यायोपबृंहितं व्याकरणस्मृतिभिरेव प्राकृतादिशब्दानां-साधुत्वमितरेषां वाचामनादित्वमिति निर्णीततया श्रुत्या तत्प्रतिपादने ×—

Colophon :

— — —

947

Sl No. 39379 विशिष्टाद्वैतसारः Ms. No. P. 4726/4

Beginning :

भाष्यकृद्भट्टनाथादिसूरिसूक्तिसुधारसैः ।
जगत्सञ्जीवन × वेकायुर्विवर्धकैः ॥
अज्ञानतमसामूढे कैवल्यवरदर्शके ।
एष दिष्टकृते नीव्या तद्विवेकारुणोदयः ॥
नित्यं पञ्चाग्निविद्याजं ब्रह्मानुभववर्जितम् ।
स्वात्मानुभूत्येकवेषं कैवल्यं स्यात्सतां मते ॥

End :

तथा च ब्रह्मशेषत्वसिद्धिः पंचाग्निवेदिनाम् ।
आत्मज्ञानानुकूलत्वाधायकत्वेन केवलम् ॥
तच्छेपत्वतथात्वं च केवलं वस्तुसत्तया ।
न ज्ञातत्वेन तत्सिद्धा तेषां तज्ज्ञनहीनता ॥

Colophon :

— — —

948

Sl. No. 39380 विशिष्टोपायतास्मृति Ms. No. P. 1873/1

Beginning :

श्रेयःपदं तव पदं विपदन्तरायं
ध्यायन्ति ये शुभधियो विधियोगभाजः ।
तेषामशेषभवदोषमुषां वृषाङ्क-
पङ्केजसंभवमुखाः सुखमर्थ ॥

End :

इत्थं विनिश्चितमतिः गुरुशिक्षातात्मा
पादौ द्वयोर्हि युवयोश्शरणं प्रपद्ये
अन्यादृशां मुदमुदस्यत × वेन
पूजामकार्षमतिहर्षमिमां क्षमस्व ॥

Colophon :

इति श्री लवंश्येन श्रीनिवासविपश्चिता ।
निर्मिताः विदुषां प्रीत्यै विशिष्टोपायतास्तुतिः ॥

949

Sl. No. 39381 विशिष्टोपायस्तुतिविवृत्तिः Ms. No. P. 1873/1

Beginning :

त्र्ययन्तचिन्तितानन्तकल्यागुणशालिनि ।
ब्रह्मणि श्रीनिवासे मे भक्तिरस्तु विनिस्तुला ॥
स्वेनैव निर्मितामिष्टां विशिष्टोपायतास्तुतिम् ।
प्रणम्य स्वगुरून् सर्वान् व्याकुर्वे विदुषां मुदे ॥

End :

विशिष्टोपायताभिमानविशेषनिमित्तत्वख्यापनायेति सर्वं समञ्जसम् ॥
कविकथकसिंह + हारिणां प्रमदम् ॥

आचार्यदीक्षितकाक्षनिबद्धबुद्धिः +
श्रीशस्तुतिं व्यवृणवं स्वकृतां कृतार्थः ॥

Colophon :

इति श्रीशैलश्रीनिवासविरचिता स्वकृतविशिष्टोपायतास्तुतिविवृति सम्पूर्णा ॥

950

Sl. No. 39383 विष्णुतत्त्वनिर्णयः Ms No. P. 7443/1

Beginning :

× यति मामपि ।
श्रीमद्रामानुजयतिवरैर्यामुनाद्यैर्मुनीन्द्रै × दिर्वाक्यै
र्व्यक्ताभिश्रुतिविततिभिस्तद्द्वयं संक्षिपामः ।
अत्रैवं विचार्यते—

End :

वेदान्तसङ्ग्रहे × निर्णये च सुव्यक्तमुक्तम् । अतः श्रीमन्नार यण एव × क्षुविजिज्ञास्यं परं ब्रह्मेति सुस्थितम् ॥

Colophon :

इति श्रीवत्सकुलतिलकवरदराजार्यकृतिषु विष्णुतत्त्वनिर्णयः समाप्तः ॥

951

Sl. No. 39384 हरिगुणमौक्तिकमाला Ms. No. P. 470/2

Beginning :

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । जन्माद्यस्य यतः इति श्रुतिसूत्राभ्यां + नारायणपदसमर्पितनारायणरूपविशेषे सदादिपदानां पर्यवसानमिति निखिल-निगमशिखरंमुखरित + नारायण एव जगज्जन्मादिकारणं ब्रह्मेति निष्कण्टकोऽयं पन्थाः ।

ननु सदेवेत्यादिकारणवाक्यश्रुतसद्ब्रह्म +

End:

अथ द्विनवतितमी कक्ष्या—

वेदानां मिथोविरोधादप्रामाण्ये प्रसक्ते वेदोऽखिलो धर्ममूलमिति × वगमत्वेन यथाश्रुते अस्मा ×

Colophon:

— — —

952

Sl. No. 39385 **विष्णुपारम्यनिर्णयः** Ms. No. P. 627/1

Beginning:

समुद्यत्कस्तूरीतिलकसमुदञ्चन्मुखरुचिम्
किरीटः प्रागल्भ्यस्फुरित परमैश्वर्यविभवम् । (?)
रमापादाम्भोजद्वितयगतलाक्षारसलसद् -
भुजामध्यं नित्यं मनसि कलये रङ्गनिलयम् ॥

अथ प्रपञ्चितभगवत्कारणत्वमसहमानस्य परस्य प्रक्रिया निराक्रियते । यदाह कश्चित् × न विष्णोः परमकारणत्वं सिध्यतीति विष्णोरपिजनकीभूतस्य परमशिवस्य सर्वैश्वर्यमुमुक्षूपास्यत्वकारणत्वप्रतीतेः । तथाहि ।

End:

पुराणोत्कर्षप्रतिपादकानेकाप × श्रवणात् । यदपि वस्तुसामर्थ्येन औचित्यलक्षणे ×

Colophon

— — —

953

Sl. No. 39386 **विष्णुपारम्यनिर्णयः** Ms. No. P. 716

Beginning:

यतो वा इमानि भूतानि जायन्ते जन्माद्यस्य यतः इत्यादिश्रुतिसूत्र-निगदितं कृत्स्नजगज्जन्मादिकारणत्वमेव परब्रह्मणो लक्षणम् । + वैदिकानुसारिणी सरणिः । शैवास्तु शिव एव परं ब्रह्मेति सङ्गिरन्ते । तथाहि—

End :

+ इतिबाधकाभावत् । साधकसद्भावात् × मेन्दिरायमाण
एव सर्वकर्ता परं ब्रह्म चेति अशेषमतिमङ्गलम् ॥

Colophon :

— — —

954

Sl. No. 39387 विष्णुपारम्यनिर्णयः Ms. No. P. 743/10

Beginning :

नारायणस्य सर्वस्मात्परत्वमुच्यते —

सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
वेदाशास्त्रात् परं नास्ति न दैवं केशवात्परम् ॥
आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥

End :

तमाराध्य हरिं देवं मुक्तिमप्यतिदुर्लभाम् ।
× परं स्थानं × यमाराध्य जगत्पतिम् ॥
प्राप्य यज्ञपतिम् × त्वमाराधय सुव्रत ।
यज्ञशो यज्ञपुरुषो योगेशः परमः × ॥
× यदा × जनार्दने ।
वसिष्ठशक्र × यद्यदिच्छसि ॥
त्रैलोक्यान्तर्गतं स्थानं किमु × त्तमोत्तमः ॥

Colophon :

इति विष्णुपारम्यपरप्रमाणाकरः ॥

955

Sl. No. 39389 विष्णुपारम्यनिर्णयः Ms. No. P. 1868/2

Beginning :

निजपदलोकने सति नृणां
इतरैस्सुकृतैरलमिति बोधमादधि वा ।

अभयमुद्रिकया कनकसभासि
करवै पुरवैरिमहास्थिररोग
हारिकरुणाभरणं शरणम् ॥

जन्मस्थेमलयं + — +
विष्णोः परत्वे वेदानां अपि तात्पर्यमूचिरे ।
संक्षेपेण तन्निरासप्रकारोऽत्र प्रदर्श्यते ॥

End:

यदाग्नेयादिवाक्येष्वज्ञा × मपि यत्किञ्चित्पदार्थ लक्षकत्वे तत्प्रापकं × दार्थलक्षकत्वे तत्प्रापकं × दार्थलक्षकत्वे तत्प्रापकं यत्किञ्चित्प्रमाणं सम्भवतीति तेषामप्यनुवादिता × सत्या सकलमीमां × प्रसङ्गात् अन्योन्याश्रयापत्तेश्च । रुद्र शब्दस्य × —

Colophon:

— — —

956

Sl. No. 39391 **विष्णुपारम्यनिर्णयः** Ms. No. P. 4905

Beginning:

श्रुतिस्मृतिपुराणेषु विदुषामप्यगोचरम् ।
शशशृङ्गमिवाभाति परतत्त्वान्तरं तव ॥

यत्तु मूर्तित्रयातिरिक्तं परशिवशब्दितं परतत्त्वान्तरं जगत्कारणमिति मतं तत्तु निर्भित्ति चित्रम् ।

End:

ध्रुवत्वसनातनत्वयोः साहचर्यात् व्यक्तं उपस्थितत्वस्य च प्रतिपादनेनोपबृंहणबलेन तस्यान्यजन्यत्वायोगेन अव्यक्तभगवदादिशब्दैः प्रतिपादितस्य नारायणस्यैवादिकारणत्वसिद्धिः ॥

Colophon:

957

Sl No. 39392 **विष्णुपारम्यनिर्णयः** Ms. No. P. 6111/1

Beginning :

श्रीमद्धर्मपुरीशार्यरङ्गेशगुरुविग्रहम् ।
हयग्रीवमिमं वन्दे वैदिकामृतमीश्वरम् ॥

अखिलनिगमसंततविनुतचरणकमलः परमात्मा नारायण एवेत्याह भगवान् भाष्यकारः ॥

नारायणपरं ज्योतिः आत्मा नारायणः परः ॥

End :

यदस्य पारे रजसः शुक्रज्योतिरजायत । विश्वकर्मणः समवर्तताधि × प्रजापतिश्चरति । प्रजापते ब्रह्मकोशं प्रपद्ये । ओं प्रपद्ये । स तत्र पर्येति । उत्तमः पुरुषस्त्वन्यः । जक्षन् क्रीडन् × सम्पद्या- विर्भावः स्वेन × —

Colophon :

— — —

958

Sl. No. 39394 **विष्णुपारम्यनिर्णयः** Ms. No. P. 10528/6

Beginning :

योऽसावकारवाच्यो वै विष्णुर्नारायणो हरिः ।
स एव पुरुषो नित्यः परमात्मा महेश्वरः ॥

तस्यांशभूतमैश्वर्यं यस्मिन् कस्मिंश्च वर्तते ।
तस्मिन् ईश्वरशब्दो हि प्रोच्यते मुनिभिस्सदा ॥

निरुपाधीश्वरत्वन्तु वासुदेवे प्रतिष्ठितम् ।
आत्मेश्वर इति प्रोक्तो वेदवादैस्स नारायणः ॥

End :

प्राप्यं ब्रह्म समस्तशेषिपरमं प्राप्ताहमस्योचितः
प्राप्तिर्दायधनक्रमादिह मम प्राप्ता च तत्सूरिवत् ।

हन्तेमामतिवृत्तवानहमहं मत्याहम × श्रयः
सेतु × प्रतिशेषसम्पदिभरन्यासस्तु शिष्यते ॥

Colophon :

— — —

Extra inf rmation :

ग्रन्थारम्भे—

वेदे भूरिप्रयोगाच्च × शर्ङ्गिणे ।
वरं सर्पगृहे वासो वरं वह्नेश्च भक्षणम् ।
न वरं हरिभक्तातां परिभाविगृहे स्थितिः ॥

इति दृश्यते ॥

ग्रन्थान्ते च—

यस्यात्मबुद्धिः कुणपे त्रिधातुके
स्वधीः कलत्रादिषु भौम इज्यधिः ।
यत्तीर्थबुद्धिश्च जले न कर्हिचित्
जनेष्वभिज्ञेषु स एव गोखरः ॥

इति पद्यमेकं दृश्यते ॥

959

Sl. No. 39395 **विष्णुपारम्यनिर्णयः** Ms. No. A. 758

Bginning:

एवं च सकलमहाजनपरिग्रहोन्मीलितदृढतरप्रामाण्यवैष्णवादिभिः पुराणैरितिहासैश्च भारतादिभिः ऐककण्ठ्येन सर्वाः श्रुतयो भगवत्परतयोपबृंहण-गोष्ठीवहिष्ठतया निखिलनिगमशिखरमुखरितनिजमहिमा भगवान्नारायण एव जगज्जन्मादिकारणं कारणं ब्रह्मेति सिध्यतीति निष्कण्टकोऽयं घण्टापथः ॥

End :

तस्मान्नारायणस्यैव परब्रह्मत्वं श्रुतिस्मृत्योस्तात्पर्यविषयोऽर्थ इति वैदिक सदशिखामणीनां शुकशौनकपराशरपाराशर्यादीनां अस्मदाचार्याणां च सिद्धान्तरहस्यमिति सर्वं समञ्जसम् ॥

960

Sl. No. 39398 | विष्णुपारम्यनिर्णयः | Ms. No. C. 3673

Beginning :

पाञ्चरात्रस्थितास्तस्य परभावे धृतक्षमाः ।
विष्णोः परत्वे वेदनामपि तात्पर्यमूचिरे ॥
तन्निर्वासप्रसारोऽयं संक्षेपेण प्रशस्य ते ।
शिवतत्त्वविवेकेयः प्रपञ्चेनोपपादितः ॥
ते खल्वेह यतो वा इमानि भूतानि--तद्ब्रह्मेति—

End :

अहमेव परंज्योतिः परमात्मा सःविभुरिति लिंगपुराणे ब्रह्माणं प्रति भग द्वचनात् नारयणस्यैव परब्रह्मता प्रतिपादकतायैवास्य मन्त्रस्य उपबृह्मणेन व्याधिकारेण तत्पुरुषकल्प योगाश्च तस्मान्नारयणः परं ब्रह्मेति । अत एव बहृवृचब्राह्मणं अग्निर्वैदेवनामवमो विष्णुः परमः पदान्तरेण सर्वाः अस्यार्थे इति ॥

Colophon :

— — —

961

Sl. No. 39399 | विष्णुपारम्यनिर्णयः | Ms. No. P. 3853

Beginning;

श्रीपराशरभट्टार्य + भूयसे ॥
वन्दे गोविन्दतातौ मुनिमथमनवैलक्ष्मणाह्वं महान्तं
ध्यायेयं यामुनार्यं श्रीपतिं संश्रयेऽम् ॥

जातो लक्ष्मणमिश्रसंश्रयनात् श्रीवत्सचिह्नान्निधेः
भूयो भट्टपराशेरति गणितः श्रीरंगभर्त्रा स्वयम् ।
श्रीरंगपति (?) प्रसाद भृषयः श्रीरंगनाथाह्वयः
श्रीरंगेश्वरकारितो विवृणुते नाम्नां सहस्र हरेः ॥
संसरोऽयमपण्डितो भगवति—

End :

न ते यान्ति पराभवं न ते यान्ति पराभवमित्यावृत्त्या पूरयति ॥

अस्माकमत्र च परत्र च सर्वदुःखं
उन्मूल्य संपदमशेषविधां विधाय ।
श्रीरङ्गराजमहिषी स च वैष्णवानां
संगं सुखं सह जयेन सदा क्रियास्त्वाम् ॥

Colophon :

सहस्रनामभाष्यं समाप्तम् ॥

962

Sl. No. 39403 विष्णुसहस्रनामभाष्यसंग्रहः Ms. No. P 6121

Begin ing:

× रूढो भगवद्गुणदर्पणे ॥
प्रमाणैः प्रतिपन्नार्थ × भिनूरुचते ॥
× स्वाभाविकानवधिकातिशय—

End:

प्रमाणैः प्रतिपन्नार्थः भगवद्गुणदर्पणे ।
यथासारं दिव्यनाम्नां मितो × रनूदितः ॥

Colophon

श्रीमच्छ्रीरंगराजार्यचरणाब्जावतंसिनः ।
रंगरामानुजमुनेः कृतिरेषा विभाव्यताम् ॥

963

Sl. No. 39404 विष्णुसहस्रनामव्याख्या Ms. No. P: 5695/1

Beginning:

वन्दारुबृन्दारकमिन्दिरेशं
वन्दे मुकुन्दं वि × सुन्दरास्यम् ।
मन्दस्मितं कुन्दसमानदन्तं
नन्दात्मजं नन्दितगोपबृन्दम् ॥

विष्णोः प्रीतिकरं समस्तफलदं नित्यायताञ्चेतसि ।
पुराणकृष्णाख्यकविः प्रसादात् गुरोः परं कारिकया तनोति ॥

End :

पा × रलं प्रपन्नानां भक्तानाञ्चापि नित्यशः ।
आस × ख्येयान्यमर्यादसमाख्यान्यात्मा ॥
सर्वत्र सर्वदा सर्वप्रकाराश्रितरक्षणे ।
दीक्षितान्युचितान्यान्य × ॥

यस्य स वै नित्यं सर्वप्रकरणास्वयः ।
द्वादशान्तो मणामन्त्रस्सर्वा × शकः ॥ (?)

Colophon :

श्रीशैलावंशकलशांबुधि ×
तातयार्य गुरुपौत्रकृते तु विष्णोः ।
नाम्नां सहस्रविवृत्तौ × ।

964

Sl. No. 39405 हरिगुणमौक्तिकमाला Ms. No. B. 294

Beginning :

श्रीहयवक्त्रमुपास्य श्रीमच्छ्रीशैलदेशिकाकारम् ।
श्रीमन्नामसहस्रप्रमितगुणैस्संस्तवति रंगेशम् ॥
भट्टपराशरपादव्याख्यामेवानुसृत्य निरवद्याम् ।
संगृह्णाति दशानामर्थान् प्रतिपद्यमत्र संज्ञानाम् ॥

End :

इत्थं पद्यैश्शतेन क्रमसुगमदशव्याक्रियाचातुरीकैः
श्रीमन्नाम्नां सहस्रं व्यवृणुत ललितैश्श्रीनिवासो विपश्चित् ।
तेषामेषां समर्थैश्श्रवणपठनयोर्धारणे च प्रसन्न-
स्सद्यो दद्यात् पुमर्थाननवधिककरुणाशेवधिश्श्रीसहायः ॥
श्रीशैलदेशिकेन्द्रश्रीपादपाथोरुहैकशरणेन ।
हरिगुणमौक्तिकमाला रचिता तत्प्रीतिमादधातुतराम् ॥

Colophon :

इति त्रय्यन्तदेशिकजैत्रध्वजायमानसत्सम्प्रदायमुघाद्यनेकप्रबन्धनिर्माण धुरन्धरश्रीमद्वाजपेययाजितिरुवरङ्गमाण्डान् तिरुमलै श्रीशैलदेशिकतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतिषु हरिगुणमौ[illegible]कमाला सम्पूर्णा ॥

965

Sl. No. 39406 वेदान्तकारिकावली Ms. No. P. 1260/2

Beginning :

श्रीमद्रमाधवोपेतां नत्वाचार्यपाम्पराम् ।
कुर्वे लक्षणसिद्धान्नकारिकां कारिकावलीम् ॥ १ ॥
मानमेयविभेदेन पदार्थो द्विविधो मतः ।
मानं प्रत्यक्षानुमानशब्दभेदात् त्रिधा भवेम् ॥ २ ॥

End :

समर्पयेऽस्मत्कृतकारिकावलीं
तदङ्गुलीसंख्यनिरूपणाढ्याम् ।
यः श्रीमच्छठमर्षणान्वयपयःसिन्धोः इवेन्दुर्महा-
नण्णार्यस्समभूदभूषि च चतुस्तन्त्रीवचःकान्तिभिः ।
तस्यासौ तनयः समर्जितनयः श्रीवेङ्कटार्यस्सूधीः,
श्रुत्यन्तान्वयकारिकालिमतनोत्प्रीत्यै महत्यै सताम् ॥

Colophon :

इति श्री शठमेर्षणान्वयपयोधिचन्द्रमसः षड्दर्शनीपारदृश्वनोऽण्णयार्य-सोमपीथिनः तृतीयतनूभवेन बुच्चिवेङ्कटाचार्येण निजाग्रजश्रीवासतातयार्यकरुणा परिणाहलब्धनिगम + विरचितायां वेदन्तकारिकावल्यां गुणनिरूपणं नाम दशमं प्रकरणं समाप्तम् ॥

966

Sl. No. 39407 वेदान्तकारिकावली Ms. No. P. 5424

Beginning :

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहसमाप्तये ।
वेदान्ताचार्यचरणद्वन्द्वमन्तर्निदध्महे ॥

श्रीमद्रमाधवोपज्ञं नत्वाचार्यपरम्पराम् ।
कुर्वे लक्ष्मणसिद्धान्तकारिकां कारिकावळीम् ॥
मानमेयविभेदेन पदार्थो द्विविधो मतः ।
मानं प्रत्यक्षानुमानशब्दभेदात्त्रिधा भवेत् ॥

End :

गुरुत्वस्यापि शक्तित्वात् नाधिक्यं क्वापि विद्यते ।
कर्मणामपि शक्तित्वं केचिदाहुर्मनीषिणः ॥ २०४ ॥
पदार्थान्तरतामन्ये प्राहुर्वेदान्तवेदिनः ।
प्राचीनग्रन्थपदवीमनुसृत्य यथामति ॥
विशिष्टाद्वैतसिद्धान्तफक्किकेयं निरूपिता ॥ २०५ ॥

Colophon :

— — —

967

Sl. No. 39408 वेदान्तकौस्तुभः **Ms. No. P. 429**

Beginning :

प्रणामाः मम गाहन्तां श्रीरङ्गगृहमेधिनम् ।
लक्ष्मीः प्रियतमा यस्य पुत्रा विधिशिवादयः ।
अन्यत्रेश्वरताभ्रान्तिं वारयन्तमिवात्मनाम् ।
पाणीव श्रीरङ्गराजस्य सराम्यभयमुद्रितम् ॥

End :

अतः अपवर्गार्थिनां भगवानेव सेव्यः, न ब्रह्मरुद्रादिदेवतान्तरमिति वज्रलेपायते ॥

एवं विष्णुः परः सेव्यः + प्रीतये सत्कृतिम् ॥

Colophon :

इति × सुकृतपरिपकवेदान्ताचार्यानुजश्रीमदादिवराहाचार्य तनयस्य + निजहृदयकमलविहरमाणश्रीरङ्गराजप्रेरितस्य + वेदान्ताचार्यस्य कृतिषु वेदान्तकौस्तुभे देवतान्तर × षेधो नाम अधिकारः समाप्तः ॥

968

Sl No. 39409

वेदान्तकौस्तुभः

Ms. No. P. 762

Beginning;

प्रणाममवगाहन्तां श्रीरङ्गगृहमेधिनम् ।
लक्ष्मीः प्रियतमा यस्य पुत्रा विधिशिवादयः ॥
+ + ॥
वक्षस्स्थले रङ्गपतेः + काचन कल्पवल्ली ॥
सत्तर्कादि + कौस्तुभो वाङ्मयोऽयम् ।
जीयाल्लक्ष्मीरमण + देशिकांश्चास्मदीयान् ॥

इह खलु भगवान् श्रियः पतिः × कृष्णद्वैपायनरूपेणावतीर्य वेदोक्तमितिकर्तव्यतासहितं शारीरकशास्त्रं निबबन्ध ।

End:

भगवानेव सेव्यः। न + देवतान्तरमिति वज्रलेपायते ॥
एवं विष्णोः + इति सर्वं समञ्जसम् ।
चिराय स्वदतां + तद्धि मङ्गलम् ॥

Colophon :

इति श्रीवत्सकुलजलधिकौस्तुभ-वैदिकसार्वभौम-वेदान्तदेशिकसंप्रदाय प्रवर्तकपरवस्तु-वेङ्कटदेशिकसुकृतपरिपाकवेदान्ताचार्यानुजश्रीमदादिवराहाचार्य-तनयस्य तच्चरणारविन्दचञ्चरीकस्य तत्प्रसादलब्धब्रह्मविद्यावशंवदस्य कोनेरुय-म्बागर्भसंभवस्य निजहृदयकमल × —

969

वेदान्तकौस्तुभः

Ms. No. P. 9040

Sl. No. 39411

Beginning :

प्रणामा मम गाहन्तां श्रीरङ्गगृहमेधिनम् ।
लक्ष्मीः प्रियतमा यस्य पुत्रा विधिशिवादयः ॥
अन्यत्रेश्वरताभ्रान्तिंवारयन्तमिवात्मनाम् ।
पाणिं श्रीरङ्गराजस्यस्मराम्यभयमुद्रितम् ॥
यतिपतिमुखा देशिकाश्चास्मदीयाः ॥

इह खलु भगवान् श्रियः पतिः

End :

विश्वस्मा इन्द्र उत्तर: क उते महिम्नः × स्त्पूर्वेऋषयो तमापु: इत्यादिमन्त्रबलेन इन्द्रस्यापि परभावसिद्ध्यापातात् ।

श्वेताश्वतरोपनिषदश्च + अतः शिवपरभावः निष्प्रमाणिकः इति सिद्धम् ॥

Colophon :

इति श्रीवत्सजलधिकौस्तुभ × आदिवराहाचार्यतनयस्य कोनेट्य म्बागर्भसम्भवस्य वेदान्ताचार्यस्य कृतिषु वेदान्तकौस्तुने शिवपारम्यनिरासाख्यः द्वितीयाधिकारः ॥

970

Sl. No. 39413 वेदान्तकौस्तुभः Ms. No. C· 1722

Beginning :

इह खलु भगवान् श्रियः पतिः स्वभावतो निरस्तनिखिलदोषानवधिका सङ्ख्येयकल्याणगुणः सर्वेश्वरः परमकारुणिकः +ताननुग्रहीतुकामः श्रीमतः पराशरात् कृष्णद्वैपायनरूपेणावतीर्य वेदोक्तं इतिकर्तव्यतासहितं शारीरकशास्त्रं निबबन्ध ।

End:

यत्तु बालकाण्डे शिवनारायणयोः समरसन्नाहे—

"अधिकं मेनिरे विष्णुमिति" + इत्याद्युदाहृतरामायणवचनै-रेव भगवतः परब्रह्मत्वसर्वान्तर्यामित्वादे + भगवति पर्यवसानस्यैवोचित-त्वेन शिवे पर्यवसानासम्भवात् स्ववचनविरोध्यर्थपरत्वसम्भवे तद्विरुद्धार्थपा ×

Colophon :

१३३तमे पत्रे—

इति श्रीवत्सकुलजलधिकौस्तुभस्य वैदिकसार्वभौमवेदान्तदेशिक-सम्प्रदायप्रवर्तकपरवस्तुवेङ्कटदेशिकसुकृतपरिपाकवेदान्ताचार्यानुज श्रीमदादि-वराहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य तत्प्रसादलब्धब्रह्मविद्यावैशद्यस्य कोनेटयम्बागर्भसम्भवस्य निजहृदयकमलविहरमाणश्रीरङ्गराजप्रेरितस्य वेदान्ता-चार्यस्य कृतिषु वेदान्तकौस्तुभे शिवपारम्यनिरासाख्यो द्वितीयोऽधिकारः सम्पूर्णः ॥

971

Sl. No. 39415 **वेदान्तकौस्तुभः** Ms. No. P. 358

Beginning :

श्रीमान् स श्रेयो मे वितनोतु
गौतमसतीदाम्पत्यसन्धायकः ।
यतिवरनिगमान्तगुरुप्रणामः
श्रुतिशिखरवर्तनीयाभ्याम् ॥
मतिमथितनिगमजलधेः
लब्ध्वा वेदन्तकौस्तुभाख्यमणिम् ।
श्रीशैलराघवार्पित
मनुगृह्णातु श्रियासमं शौरिः ॥

End :

यथा मिथ्यार्थः स्वरूपं न स्यात् तथा मिथ्यात्वादेवस्वरू पसापेक्षणापि न स्यात् । आश्रितादिविज्ञादिपदानां स्वरूपे लक्षणा च स्यात् । + अश्रुतादिपदा ×

Colophon :

— — —

972

Sl. No. 39416 **वेदान्ततत्त्वसारः** Ms. No. B. 405/1

Beginning :

अष्टवर्षोपनीतस्य स्वाध्यायग्रहचोदानात् ।
अधीतसाङ्गसशिरोवेदार्थापातबुद्धितः ॥
तन्निर्दिधारयिषया यथाधीतप्रवर्तने ।
कारयित्वा जैमिनिना धर्मशास्त्रं स्वशिष्यतः ॥

End :

जन्मादिसूत्रं नाद्यं स्यादुद्दिष्टस्य हि लक्षणम् ॥
उक्तं तद्ब्रह्मजिज्ञासासूत्रं अत्रैव सङ्गतम् ॥

[विजयाब्दे पुष्यमासे पञ्चम्यामरुणोदये ।
वेदान्ततत्त्वसाराख्यं सीतारामेण लेखितम् ॥

Colophon :

इति श्रीवेदान्ततत्त्वसाराख्यः ग्रन्थः ॥

973

Sl. No. 39418 वेदान्ततत्त्वसारः Ms. No. C. 52

Beginning :

अथ वेदान्ततत्त्वसारो लिख्यते—

सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं इत्यत्राद्वितीयशब्देन सजातीयादिभेदशून्याङ्गीकारे कथं तादृशस्य जगद्व्यापारः ? मायाङ्गीकारेण चेत्, किं तदानीं निर्विशेषज्ञानमात्रस्वरूपं ब्रह्म—

End :

तत्त्वं नारायणः परः इत्यादि श्रुतिस्मृतिभिः नारयणस्यैव परतत्त्वं दिव्यकल्याणगुणयोगेन सगुणत्वं प्राकृतहेयगुणराहित्येन निर्गुणत्वमिति विषयभेदवर्णनेन एकस्यैवावगमात् ब्रह्मद्वैविध्यं दुर्वचं इति दिक् ।

Colophon :

इति श्रीमद्रामानुजार्यविरचितः वेदान्ततत्त्वसारः सम्पूर्णः ॥

974

Sl. No. 39422 वेदान्ततत्त्वसारः Ms. No. P. 5019/1

Beginning :

त्र्यन्तचिन्तकस्स्वान्तपरिचर्याय वेधसे ।
नरेशाय शेषाय गुरवे करवै नमः ॥
कर्मब्रह्मात्मकं शास्त्रमेकं लोकहितं यतः ।
तत्र कर्मविचारः प्राक् वृत्तः षोडशलक्षणः ॥
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसत्फलैः ।
अतिदेशतयाभ्यूहबाधतन्त्रप्रसङ्गनैः ॥

End :

स्वरूपाविर्भवस्त्वाद्ये पश्चाद्‌ ब्रह्मविभक्तता ।
तृतीयतत्प्रकारोक्तिस्समस्त[illegible]

शरीरत्वाशरीरत्वसङ्गतिः पञ्चमोदिता ।
अ × प्यसाररूपत्वं षष्ठे सम्यगुदीरितम् ॥
चिन्मयी शब्दतन्न्यायैस्सर्वं शास्त्रं समाहितम् ॥

Colophon

इति श्री शैलवंश्येन श्रीनिवासविपश्चिता ।
निर्मिता विदुषां प्रीत्यै वेदान्तन्यायमालिका ॥

975

Sl. No. 39423 वेदान्तमुक्तकश्लोकाः Ms. No. P. 7262/3

Be ginni

साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम् ।
मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥
उत्तारयति संसारात् तदुपायप्लवेन तु ।
गुरुमूर्तिः स्थितः साक्षात् भगवान् पुरुषोत्तमः ॥

End :

आशैलादद्रिकन्याचरणकिसलयन्यासधन्योपकण्ठात्
आरक्षोनीतसीतामुखकमलसमुल्लासहेतोश्च सेतोः ।
आ च प्राच्यप्रतीच्यक्षितिधरयुगलादर्कपद्मावतंसात्
मीमांसाशास्त्रयुग्मश्रमविमलमना मृग्यतां मादृशोऽन्यः ॥

Colophon :

— — —

976

Sl. No. 39430 वेदान्तमुक्तकश्लोकाः Ms. No. .P 3594

Beginning :

एवं वेदान्ततात्पर्यं देशिकानां प्रसादतः ।
वर्णितं मुनिमु × नाम् ॥
तथा हि—तद्भावोद्ग्राहिणीभिस्ते श्रुतिभिर्न्यायबन्धुभिः ।
श्रुतीनां पुरुषो भावं निरणैषुस्समन्ततः ॥

ते मुनयः श्रुतीनां भावं विजयचतुष्टये प्रदर्शितैर्न्यायैर्न्यायान्तरसचिवैरुपोद्ब-लिताभिः सर्वासां श्रुतीनां भगवति तात्पर्यबोधिकाभिः श्रुतिभिः निरचिन्वन् ।

End :

निन्दन्ति ये भगवतः ×

स्थिरतरा अपि यान्ति नाशम् ॥

इत्यादि श्रीपाञ्चरात्रे वासुदेवं तनूत्प्रपन्नं निन्दन्तं द्विजा ध
विवासयन् खरारोहं कृत्वा भूपो न पापभाक्—इत्यादि बहु द्रष्टव्यमिति ॥

इति विजयोल्लासे सतां लक्षणम् ।

Colophon :

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्याभिधेयेन रामानुजदासेन विरचिते वेदान्तविजये विजयोल्लासः पंचमः ॥

977

Sl. No. 39433 वेदान्तसुक्तकश्लोकाः Ms No. C. 4388

Begnning :

द्वैतोपनिषदा सार्धं श्रुतयोऽद्वैतगोचराः ।
घटन्तु श्रुतिसंयुक्तास्सद्विद्यामनुरुन्धते ॥
द्वैतश्रुतिभिश्चिदचिदीश्वरभेदप्रतिपादने विशेषणविशेष्यभेदः प्रतिपाद्यते ।

End :

एवं विदित्वातिमृत्युमेति । नारायणं महाज्ञेयं ब्रह्मविद्यामाप्नोति परं परमे व्योमन् सोऽश्नुते सर्वान्कामान् सह ब्रह्मणेत्यर्थस्संगृह्यते । + विद्यामित्ये तदुक्तमिति सर्वं समंजसम् ।

Colophon :

इति श्रीवाधूलकुलतिलक श्रीनिवासपादसेवासमधिगत × महाचार्यापरनामकरामानुजदासेन विरचिते वेदान्तविजये अद्वैतविद्याविजयस्तुरीयः ॥

978

Sl. No. 39435 वेदान्तविजयमङ्गलदीपिका Ms. No. P. 2771

Beginning

महाचार्यकृपापात्रमनीषाभूषमानसम् ।
सौदर्शनगुरुं वन्दे सौशील्यादिगुणोज्ज्वलम् ॥

विजये निगमान्तानां शुभां मङ्गलदीपिकाम् ।
तनुते तत्प्रकाशाय सुदर्शनगुरुः सुधीः ॥

End :

श्रीमद्रामानुजार्यप्रमुखगुरुवरप्राप्तवेदान्तसिद्धान्
सर्वश्रुत्यन्तवाक्यानुगुणसुललितान् सम्यगालोच्य सर्वान् ।
अर्थानाचार्यवर्यः शुभगुणजलधिः सर्वविद्वत्प्रबुद्धचै
व्याकुर्वन् वेदमौलेर्विजयफणितिना वर्धते श्रीमहार्यः ॥

Colophon:

इति श्रीं वाधूलकुलतिलक श्रीमहाचार्यचरणारविन्दसेवासमधिगतसकलशास्त्रहृदयेन श्रीमद्वाधूलसुन्दरजामातृदेशिकसूनुना श्रींसुदर्शनगुरुणा विरचितायां वेदान्तविजयमङ्गलदीपिकायां अद्वैतविद्याविजयोपन्यासः सम्पूर्णः ॥

सम्पूर्णा वेदान्तविजयमङ्गलदीपिका ॥

979

Sl No. 39438 | वेदान्तसारसंग्रहः | Ms. No. P. 8536

Beginning :

मिथुनं विश्वनिदानं निरस्तहेयं प्रशस्तहेयं प्रशस्तगुणधाम ।
शरणं करुणासदनं प्रपन्नभोग्यं प्रसीदतात्किमपि ॥
गुरुकरुणावरुणालयतरङ्गविस्फूर्तिविधुतभवतापः ।
श्रीरङ्गराजदासः श्रुत्यञ्चलसारसङ्ग्रहं तनुते ॥
जैमिनिमुनिना निगमप्रामाण्यादौ स्थिरीकृते भगवान् ।
मीमांसते श्रुतीनां नयभेदैर्बादरायणस्तु शिरः ॥

End :

उपासीनो विद्याविभवविधुताशेषनहनः
पुमानर्चिर्मुख्यैः परममुपनीतः पदमसौ ।
अनन्यार्हः प्रादुर्भवत्कमलभूमा शुभगुणं
रमाकान्तं शान्ताद्भुतकनदुद × तमंयते ॥

Colophon :

इति सारसङ्ग्रहकारिकायां चतुर्थस्य तृतीयः पादः ॥

980

Sl. No. 39439 वेदान्तहृदयम् Ms. No. P. 6110

Beginning:

श्रीमद्भाष्यकृदाकारदिव्यकञ्चुकभूषितम् ।
जीयात्तुरङ्गवदनं वेदान्तहृदयं महत् ॥
निखिलप्रपन्नजन × दिविविलासं वेदान्तहृदयं परं बृंहणीयः पतिरेव ॥
यो रसः सोऽपाम् । अन्तरतः कूर्मं सर्पन्तम् । तमब्रवीत् ॥

End :

केशो ब्रह्माच्युतोग्रा भवविभवलयाद्युक्तभावा यतः सु-
मेनासौ केशवोऽभूत् परमखनिलयः कार्यकारणस्य(?)
स्वेच्छायत्राब्धिशायी हरिरिह विधिरुद्रान्तरसो निदानं
साम्येकोक्तीर्नपक्षतिरभवदतः केशवाख्यप्रभावात् ॥

इत्यादि द्रष्टव्यम् ॥

Colophon :

इति श्रीहयवदनावतारभगवद्भाष्यकारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाल अप्प कोंडाजार्यस्य कृतिषु वेदान्तहृदयं सम्पूर्णम् ॥

981

Sl. No. 39440 वेदार्थसंग्रहः Ms. No. P. 878/1

Beginning :

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
नित्यानन्तकल्याणनिधये विष्णवे नमः ॥

परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति त-
त्परोपाध्यालीढं विवशमशुभस्यास्पदमिति ।
श्रुतिन्यायापेतं जगति विततं मोहनमिदं
तमो येनापास्तं स हि विजयते यामुनमुनिः ॥ ×

\+ + +

अशेषजगद्धितानुशासनपर ति निकरशिरसि समधिगतोऽयमर्थः ॥

End :

भक्त्या च धृत्या च समाहितात्म
ज्ञानस्वरूपं परिपश्यतीह ॥

धृत्या समाहितात्मा भक्त्या पुरुषोत्तमं परिपश्यति । साक्षात्करोति । × तीत्यर्थः । भक्त्या त्वनन्यया शक्य इत्यनेनैकार्थ्यात् । भक्तिश्च ज्ञानविशेष एवेति सर्वमुपपन्नम् ॥

सारासारविवेकज्ञा गरीयांसो विमत्सराः ।
प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसङ्ग्रहः ॥

Colopoinn :

इतिं श्री भगवद्रामानुजविरचितः वेदार्थसङ्ग्रहः समाप्तः ॥

982

SI. No. 39441 वेदार्थसंग्रहव्याख्या Ms. No. . P 8676

Beginning :

वरदं द्विरदाद्रिशेखरं
कमलाया दयितं दयानिधिम् ।
सकलार्थिजनाथितप्रदं
प्रणमामि प्रणतार्तिहारिणम् ॥

श्रोतृबुद्धिसमाधानार्थं आदौ प्रतिपाद्य संक्षेपश्च क्रियते । तत्र इष्टदेवतोपासनरूपमङ्गलाचारः स्वपक्षस्थापनप्रपपतिपाद्यसंक्षेपश्च क्रियते श्रौत अर्थश्च प्रथमश्लोकेन ।

End :

तदानीमपि चिदचिद्विशिष्टमेव ब्रह्म इत्यभिप्रायेण परितार उच्यते । ब्रह्मैव इत्यादिना एवमवस्थितम् इत्यल एवंशब्दार्थभूतप्रकारहाय इति ।

Colophon : —

983

Sl. No. 39451 वेदार्थसंग्रहव्याख्या Ms. No. P. 3595/2

Beginning :

वरदं द्विरदाद्रिशेखरं
कमलाया दयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं
प्रणमामि प्रणतार्तिहारिणम् ॥
कृत्वानवद्यं निगमान्तभाष्य-
न्निराकृतं येन भयं श्रुतीनात् ।
प्र × रितानां बहुश्रुतैस्तं-
रामानुजं योगिनमाश्रयामः ॥

अशेषेत्यादि श्लोकद्वयेन आरीप्सितप्रकरणाविघ्नपरिसमाप्त्यर्थं मङ्गळमाचरति—

End :

वेदार्थसङ्ग्रहसुधां वेदाब्धेर्य उदाहर ।
रामानुजाय मुनये परस्मै भगवते नमः ॥
वेदार्थसङ्ग्रहव्याख्या विहितेयं यथाश्रुतम् ।
वेदव्यासापराह्वेन श्रीसुदर्शनसूरिणा ॥

Colophon :

इति हरितकुलतिलकश्रीवाग्विजयिदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदराजीय्यपादसेवासमधिगतवेदार्थसङ्ग्रहतात्पर्यै सुदर्शनसूरिणा विलिखिता तात्पर्यादीपिका समाप्ता ॥

984

Sl. No. 39455 वैकुण्ठगद्यव्याख्या Ms. No. P. 9092/3

Beginning :

गद्यद्वयोक्तगमनिकयैव श्रीवैकुण्ठगद्यमपि गतार्थाभिप्रायम् ।
एतयोः स्वानुष्ठानोक्तिमुखेन शिष्यशिक्षणं कृतम् । तस्मिंस्तु उपदेशमुखेनेति विशेषः । अत्र यदादौ मितगद्याधिकारे पठ्यते यामुनार्य × सन्दर्शयाम्यहम् ॥

End :

द्वयवचनसाधनानां द्विः प्रयोगानपेक्षे
मुषितनिखिलदोषे मुक्त्युपाये स्थितानाम् ।
अमृतमिव पयोधेः आसमेतद्यतीन्द्रात्
व्यवृणुत मितगद्यं वेङ्कटेशः सुमेधाः ॥

Colophon :

इति श्री वेदान्तदेशिकस्य कृतिषु रहस्यरक्षायां मितगद्याधिकारः द्वितीयः ।

985

Sl. No. 39456 वैष्णवाधिक्यनिर्णयः Ms. No. P. 8795/1

Bginning :

× स्राणि तपस्तप्यति यो नरः ।
नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यते ॥
अनन्यदेवताभक्ता ये मद्भक्ता जनप्रिय × ।
विष्णुभक्ति ममायुक्तान् श्रौतस्मार्तप्रवर्तकान् ॥

End :

अहंब्रह्मभुवनाल्लोकाः पुनरावृत्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥
संसारा + विषयाक्रान्तचेतनाम् ।
विष्णुस्तोत्रं विनान्यत्किंचिदस्ति परायणम् ॥

Colophon :

— — —

986

Sl. No. 38458 वैष्णवाधिक्यनिर्णयः Ms.. No. P. 2409/3

Beginning :

जिज्ञासोर्विषयः फलं च विपुलं यस्य स्वरूपं मह-
त्सत्यं ज्ञानमनन्तनिर्मलगुणं नित्यानवद्योन्नतम् ।

तद्ब्रह्मेत्यभिधीयमानमनिदंपूर्वैर्वचोभिःपरं
वस्त्वाविष्कुरुतां शुभानि कमलानित्यानुषक्तं मम ।।

ओं अथातो ब्रह्मजिज्ञासेति प्रतिज्ञातजिज्ञास्यभावस्य ब्रह्मणो लक्षणं जगज्जन्मादिकारणत्वं भावं भगवता बादरायणेनोक्तं जन्माद्यस्य यत इति ।

End :

तदध्यानाच्च परमार्थविषयादलौकिकाभ्युदयसिद्धिरित्यस्मदाचार्याणां पराशरपाराशर्यप्रभृतीनां च सिद्धान्तरहस्यमिति ।

Colophon :

इति व्यावहारिकत्वखण्डनं समाप्तम् ॥

987

Sl. No. 39456 वैष्णवाधिक्यनिर्णयः Ms. No. . 3046/2

Beginning :

जिज्ञासोः विषयः फलं च विपुलं यस्य स्वरूपं महत्
सत्यं ज्ञानमनन्तमङ्गलगुणं नित्यानवद्योन्नति ।
तद्ब्रह्मेत्यभिधीयमानमनिदंपूर्वैर्वचोभिः परः
वस्त्वाविष्णु × कमला नित्यानुपङ्गंमम ॥
अथातो ब्रह्मजिज्ञासेति प्रतिज्ञा ।

End :

अस्मदाचार्याणां पराशरपाराशर्यप्रभृतीनां च सिद्धान्त इति रहस्यम् ॥

विलासः पुण्याना × सनकलाबोधजलधेः
विरक्तेरास्थानं विहरणपदं देशिकगिरम् ॥
सुतस्तातार्यस्य श्रुतगरिमगम्भीरमहिमा
सतां भूमामाविह विजयते वेङ्कटगुरुः ॥

Colopnon :

इति श्रीमच्छठमर्षणकुलतिलक— श्रीताताचार्यनन्दस्य — श्रीमदण्णयार्यस्य कृतिषु व्यावहारिकत्वखण्डनसारः सम्पूर्णः ॥

९८८

Sl. No. 39460 वैष्णवाधिक्यनिर्णयः Ms. No. P. 6823/1

Beginning :

जिज्ञास्यो विषयः फलं × यस्य स्वरूपं महत्
सत्यज्ञानमनन्तमङ्गलगुणं नित्यानवद्योन्नति ।
तद्ब्रह्मेत्यभिधीयमानमनिदंपूर्वैः वचोभिः परं
वस्त्वाविष्णुरुतांगुहानि कमलानित्यानुषक्तं मम ॥

अथातो ब्रह्मजिज्ञासेति + व्यावहारिकमेव विश्वस्य सत्यत्वं—

End:

अस्मदाचार्याणां पराशरपाराशर्यप्रभृतीनां च सिद्धान्तरहस्यमिति ॥
असितं चिकुरे सितं दृगन्ते
मृदुलं वर्ष्मणि मोहनं विलासे ।
निगमस्तुतमस्तु मे पुरस्तात्
मुनिगेयं मुरवैरिभागधेयम् ॥

Colophon :

इति श्रीमच्छठमर्षणकुलतिकश्रीमदण्णयार्यस्य कृतिषु व्यावहारिकत्वखण्डनसारः सम्पूर्णः ॥

९८९

Sl. No. 39571 वैष्णवाधिक्यनिर्णयः Ms. No.P. 3098

Beginning:

समाहारस्साम्नां प्रतिपदमृचां धाम यजुषा
लयः प्रत्यूहानां लहरिचिततिर्बोधजलधेः ।
कथादर्पक्षुभ्यत्कथककुलकोलाहलभवं
हरत्वन्तर्ध्वान्तं हयवदनहेषाहलहलः ॥ +

वादाहवेषु निर्भेत्तु वेदमार्गावदूषकान् ।
प्रयुज्यतां शरश्रेष्ठो निशिता शतदूषणी ॥

तत्र तावच्छास्त्रारम्भे—

विचारविषयत्वेन सूत्रकृद्यदसूत्रयत् ।

परोक्ता ब्रह्मशब्दस्य वृत्तिरत्र निरस्यते ॥

End :

सकलवेदशाखाप्रवर्तनाधिकृतत्वात् क्वचिदपि प्रमाणविरुद्धार्थादर्शनात् परिग्रहातिशयाच्च ॥

अतस्तदुक्तेषु सूत्रेषु यत्र क्वचित् प्रमाणविसंवादे यथाकथञ्चित् समाधातव्यम् । न चास्ति विसंवाद इति दर्शितमिति ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां ब्रह्मसूत्रस्वारस्यभङ्गवादःषट्षष्टिः ॥

९९०

Sl. No. 39481 शतदूषणीव्याख्या Ms. No. P. 761

Beginning :

श्रुतिनिरवसितप्रयुक्ततर्कापशदकुमन्त्रहत +

जयति गुरुरुदारः श्रीनिवासार्यनाम ॥

हयमुखेति । अवसीदतां पथ्यमित्यन्वयः । तेभ्य इति संप्रदानमध्याहार्यम् ॥

End :

अत मण्डशब्दो वपनार्थक इत्यर्थः । स्वारसिकेति । वशब्दस्य विकल्पे स्वरसत्वात् मुण्डः शिखीवेत्यादिषु तदङ्गीका मुण्डत्वस्या[म]स्यत्वं दर्शितमित्यर्थः ॥

Colophon :

इति श्रीवाधूलकुलतिलकश्रीनिवसाचार्यपादसेवासमधिगतपरांवरतत्त्वयाथात्म्येन महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां यतिलिङ्गभेदभङ्गः चतुष्षष्टितमः स्कन्धः ॥

प्रतिचण्डवादि श्रीनिवासमहागुरुम् ॥

991

Sl. No. 39482

शतदूषणीव्याख्या

Ms. No. P 934

Begining :

तुरगवदनतेजोबृंहिताश्चर्यशक्तिः
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।
जगति गुरुरबाधां वेदचूडार्यसंज्ञां
अनितरजनलभ्यां लम्भितो रङ्गभर्त्रा ॥
क्व वेदान्ताचार्यः क्व च पुनरहं क्वास्य धिषणा
परिच्छेदातीता क्व मम मतिरेषाल्पविषया ।
क्व गम्भीरा तद्गीः मृतुपृथुकानामिव वचः
परं तद्भक्तिर्मां त्वरयति गिरां तस्य विवृतौ ॥
(अत्र मामित्युक्ता महाचार्याः)

End :

न च बाधविषयता, निरुक्तरूपेण स्वजन्यत्वात् । वाक्यप्रत्यक्षस्य विषयतारूपेणैव तज्जन्यत्वात्—

Colophon :

[इति श्रीरामानुजदासविरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां अविधेयज्ञानभङ्गश्चतुर्थस्कन्धः]

992

Sl. No. 39484

शतदूषणीव्याख्या

Ms. No. P. 2058

Beginning :

श्रीमन् वेङ्कट + सदा हृदि ॥
विश्वं बिभ्रति वीर्यखण्डितमहादैन्ये समस्तात्मनि
ज्योतिर्मण्डलभासितत्रिभुवने सर्वं स्वतो द्रष्टरि ।
अस्तु श्रीनृहरौ स्वभीतिविहितस्वाज्ञानिलार्कानले
श्रीमत्याश्रितमृत्युभङ्गचतुरे धर्मे सदा ब्रह्मणि ॥
+ क्व वेदान्ताचार्यः क्व च पुनरहं +
परं तद्भक्तिर्मां त्वरयति गिरां तस्य विवृतौ ॥
चिकीर्षितस्य ग्रन्थस्य + भगवन्तं प्रार्थयते समाहार इति ॥

End :

ननु वयं व्युत्पत्यन्तरं स्वीकुर्मः, किन्तु क्लृप्तव्युत्पत्यनुरोधेन प्रकृते-र्बाधलक्षकत्वमिति सामानाधिकरण्यस्य बाधार्थतेति शङ्कते— तथापीति ॥ व्युत्पत्यन्तरकल्पनेऽपीत्यर्थः । तथाप्यन्तत इत्यन्वयः । तत्र हेतुरित्यन्तः ।

Colophon :

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्व-याथात्म्येन तदेकदेवतेन तच्चरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां बाधार्थ सामानाधिकरण्यभङ्गो द्वात्रिंशत् स्कन्धः ॥

993

Sl. No. 39485 शतदूषणीव्याख्या Ms. No. P. 2774

Beginning :

ज्ञानाङ्कुरशिवङ्कराः कलिमलप्रोल्लाससर्वंकषाः

काणादप्रमुखकल्पितकथाकूलङ्कषाः पञ्चषाः ।

व्याकुर्वन् यदि भूपतेरिह कृतीरुज्जीवयन्मादृशा-

नाकल्पं करुणालयो विजयतां श्रीश्रीनिवासो गुरुः ॥

पुनरिति स्वविषयाविद्याश्रयत्वे व्याघातः प्रदर्श्यते । +

End :

स्वारसिकेति वाशब्दस्य विकल्पस्वरसत्वान्मुण्डश्शिखी वेत्यादिषु तदङ्गीकारे मुण्डत्वस्यामुख्यत्वं दर्शितमित्यर्थः ॥

Colophon :

इति श्रीवाधूलकुलतिलक + रामानुजदासेन विरचितायां शत-दूषणीव्याख्यायां चण्डमारुताख्यायां यतिलिङ्गभेदभङ्गश्चतुष्षष्टितमः स्कन्धः ।

994

Sl. No. 39486 शतदूषणीव्याख्या Ms. No. P. 4331/1

Beginning :

महादैन्ये समस्तात्मनि

ज्योतिर्मण्डलभासी इवने सर्वस्वतेरदुष्टरी । (?)

अस्तु श्री × ह्यौ स्वभीति विहितस्वता × लाका

× धीर्मे सदा ब्रह्मणि ॥

प्रायश्छादयितुं विनम्य जनतानानापराधशतां

वात्सल्यैकवंशवदेन कुहनानिद्रादधद्धर्ष्मणा ।

धाम्ना स × रङ्गेशयं काशय-

लक्ष्मीभूमिनिषेव्यमाणचरणं तत्त्वं परं मन्महे ॥

\+ श्रीनिवासगुरुवेषमहं भजामि ॥

वेदान्ताचार्योक्तिभावं भवदुरितहरं कृत्स्नशो नेश्वरोऽहं

वक्तुं बोद्धुं च हे × पारं क्रमेत ।

अज्ञातव्याक्रियायां तदपि शिरसि मे बिभ्रतोऽध्यासनेधां

सूक्ष्मार्थेष्वादधानस्समुपकरणैः श्रीनिवासार्यचेतः ॥

End :

वस्तुतस्तु स्ववत्वेन तात्पर्यम् । किन्तु आरोपाश्रयत्वमात्रे अन्यविषयारोपस्यापि दोषत्वात् । अध्यासस्य सविषयत्वाद्रागमध्यस्यतीत्युक्तम् । अन्यारोपस्यापि दोष ×

Colophon :

अष्टमे पत्रे—

इति वाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमाधिगतपरावरतत्व याथात्म्येन ~देकदेवतेन तच्चरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषिणीव्याख्यायां चण्डमारुताख्यायां × शब्दवृत्तिनिरूपणं नाम प्रथमः स्कन्धः ॥

995

Sl. No. 39487 शतदूषणीव्याख्या Ms. No. P 5797

Beginning :

आदौ हंसोऽथ मत्स्यस्तदुपरि समभूत् सैन्धवः कन्धरायां

भूयो नारायणात्मा पुनरपि भगवद्व्यास × ।

नाथार्यो यामुनार्यस्तत इह भगवत्संयमीन्द्रस्तदेत-

त्सर्वं श्रीवेदचूडागुरुवरवपुषा सार्थयन्नः परोऽव्यात् ॥

End :

सत्प्रतिपक्षस्य लक्ष्यत्वे अभावविशिष्टव्यापकसामान्यत्वाभावसमानकालीनाभावविशिष्टवद्धटव्यावृत्तिरप्यशक्या स्यादिति युक्तेः तुल्यत्वात् — तथाप्येत–

Colophon :

— — —

996

Sl No. 39495 **शतदूषणीव्याख्या** Ms. No. P. 2032

Beginning;

श्रियै सततमस्तु मे भुजगराजशैलाधिपः
श्रियं वहति वक्षसा श्रितजनैकरक्षाकरः ।
दयासहचरस्सदा विहितवाजिवक्त्राकृतिः
जगज्जननरक्षणक्षपणकेळिदीक्षागुरुः ॥

+ प्रारिप्सितग्रन्थस्य + निबध्नाति समाहार इति ।

End :

सत्यस्यैव सतः प्रयोजयातना सत्यस्य अन्यथा घटपदेऽध्यस्तजडपदस्य भ्रान्तिजनकस्य वक्तृदोषाभावात् प्रामाण्यप्रसङ्गात् । तस्मात् वेदस्यासत्यत्वे सत्यब्रह्मसिद्धिः न स्यादित्यकामेनापि सत्यत्वमभ्युपेयमित्याह सत्यादेवेति ॥

Colophon :

इति शतदूषणीव्याख्यायां असत्यात् सत्यसिद्धिभङ्गः त्रिंशः ॥

997

Sl. No. 39497 **शतदूषणीव्याख्या** Ms. No. P. 10106

Beginning :

आदौ हंसोऽथ मत्स्यस्तदुपरि समभूत्सैन्धवः कन्धरायां
भूयो नारायणात्मा पुनरपि भगवद्व्याससरूपः शठारिः ।
नाथार्यो यामुनार्यस्तत इह भगवत्संशयमीन्द्रस्तदेत-
त्सर्वं श्रीवेदचूडागुरुवरवपुषा सार्थयन्नः परोऽव्यात् ॥ १ ॥

व्याख्या स्वप्रबन्धान् विशदमविकलैर्वाजपेयादीयज्ञैः
+ + + प्यनुष्ठाय भूयः ।
श्रीशं सन्तोषयिष्यन् श्रुतिशिखरगुहः यन्मयः प्रादुरासीत्
श्रीमच्छ्रीशैलसूरिस्स जयति × रामानुजाख्यः ॥
अधिशतदूषणीटीकां कुर्वे दृश्यत्वहेतुभङ्गस्य ।

End :

सदधिष्ठानकेति अबाध्यत्वोपधिविशेष्यकेत्यर्थः । आवश्यकेनार्थ क्रियाकारित्वेनाळीकव्यावृत्तेन सन् घट इत्यादिप्रत्ययोपपत्तेरुक्ताबाध्यत्वं माध्यमिकेन नस्वीक्रियते । न चैवं तन्मते शून्यभावना व्यर्थेति वाच्यम् ।

Colophon :

— — —

998

Sl. No. 39498 शतदूषणीव्याख्या Ms. No A. 728

Beginning :

आदौ हंसोऽथ मत्स्यस्तदुपरि समभूत्सैन्धवः कन्धरायां
भूयो नारायणात्मा पुनरपि भगवद्व्यासरूपी शठारिः ।
नाथार्यं यामुनार्यस्तत इह भगवत्संयमीन्द्रस्तदेत-
त्सर्वं श्रीवेदचूडागुरुवरवपुषा सार्थयन्नः परोऽव्यात् ॥ १ ॥
श्रीमत्कृष्णक्षितीन्द्रे जगदिदमवति श्रीमहीशूरपुर्यां
विद्वद्व्रातामराद्रौ निरुपधिकदयौदार्यचातुर्यसिन्धौ ।
तल्लब्धाभीष्टतृप्तान् दशशतकिरणः श्रीनिवासोदयाद्रे-
रुद्भूतश्चन्द्रिकायाः प्रसराभिभवन् हन्ति दुस्तर्कमोहम् ॥ ६ ॥

End :

सिद्धिचन्द्रिकयोरुक्तो बाधोद्धारोऽपि सर्वशः ।
मूलवाक्यैस्स्वरसतः प्रतिक्षिप्त इति स्फुटम् ॥
ज्ञापनायात्र ग्रन्थपङ्क्तिरेव विलिख्यते । अत्रोक्तं सिद्धौ–

Colophon : — —

999

Sl. No. 39500 शरणागतपरिपालनम् Ms. No. P. 7155/3

Beginning :

बलवीर्यविनाशनः ।
करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम् ॥

रामोक्तिः —

पूयन्ते हयमेधेन महापातकिनोऽपि हि ।
शरणागतहन्तारः न त्वेव रजनीचर ॥

End :

शरणं हि प्रपन्नानां तवास्मीति च वादिनाम् ।
प्रसादं पितृहन्तॄणां अपि कुर्वन्ति साधवः ॥

Colophon :

— — —

1000

Sl. No. 39502 शरणागतिगद्यभाष्यम् Ms. No. P. 7391/1

Beginning:

प्रख्यातश्रुतविभवान् गुरूनशेषान्
प्रश्रित्य प्रणयति वेङ्कटेशसूरिः ।
लक्ष्मीशप्रपदनवैभवप्रतिष्ठां
रागान्धप्रशमकरीं रहस्यरक्षाम् ॥ १ ॥

लक्ष्मीपतेर्यतिपतेश्च .... मन्त्रसारः ॥ २ ॥

End :

इति शरणागतिगद्यं श्रीरङ्गेशसलपनरूपम् ।
व्यवृणुत देशिकदृष्ट्या विमृश्य निश्चित्य वेङ्कटेशकविः ॥

वितमसि निगमान्ते विभ्रता देशिकत्वं
कृतिभिरनुमतेन क्षेन्वुध्या मयैवम् ।
यतिपतिपृथुगद्यव्याक्रियायां यथावत्
कथितमकथितं च क्षम्यतां नस्सयूथ्यैः ॥

Colophon :

इति कवितार्किकसिंहस्य + वेदान्ताचार्यस्य कृतिषु रहस्यरक्षायां पृथुगद्याधिकारः प्रथमः ॥

1001

Sl. No. 39504 शरीरवादः Ms. No. P. 3074/3

Beginning :

श्रीकान्तकान्तपदपङ्कजसौरभश्री-
पारीणचित्तनिभषट्चरणः प्रवीणः ।
श्रीलक्ष्मणार्यमभिवन्द्य शरीरवादं
सारार्थसङ्गतमनन्तसुधीर्विधत्ते ॥

इह तावच्छरीरशब्दप्रवृत्तिनिमित्तं विचार्यते — शरीरपदप्रवृत्तिनिमित्त भूतं शरीरत्वं हि न तावज्जातिः — तत्साधकप्रमाणाभावात् ।

End :

तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति गत्यागतिप्रतिपादक ति भ्याश्च शरीरनिष्ठोत्क्रान्त्यादिरूपक्रियानुकूलकृतेरेवात्मनि बोधेऽपि क्रियावत्त्वस्या-बोधात् + अधिकमन्यत्र विवेचितम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon :

— — —

1002

Sl. No 39508 शारीरकन्यायकलापसङ्ग्रहः Ms. No. B. 560

Beginning

जगद्भारः सुविन्यस्तस्सेनेशे यत्र विष्णुना ।
तस्यावतारमपरं सेनानाथगुरुं भजे ॥

प्रणम्य रामानुजसंयमीश्वरं
प्रबोधहेतुं हृदयाम्बुजन्मनः ।
करोमि तद्दर्शनमार्गगोचरं
शारीरकन्यायकलापसंग्रहम् ॥

End :

मुक्तस्य भोगः खलु साम्यशब्दा-
न्निर्वोढता स्याद्भुवनस्य तद्वत् ।
नैतत्परस्यैव तथात्वशब्दात्
भोगानुभूतिः सगुणस्य तस्य ॥

आविर्भवत्स्वरूपत्वं परानुभवरूपणम् ।
मुक्तस्य रूपनिष्कर्षः सत्यसङ्कल्पता तथा ॥

स्वेच्छया सर्वसम्भोगो मोक्षस्य च फलोदयः ।
इत्येवमर्थजातं स्यात्पादेनानेन चिन्तितम् ॥

Colophon :

इति सेनानाथीये न्यायकलापः सम्पूर्णः ॥

1003

Sl No. 39512 शारीरकसङ्गतिः Ms. No. P. 4918

Beginning :

वाधूलरत्नवरदार्यकृपात्तभाष्य × रघुनाथगुरुं प्रपद्ये ॥
वाधूलान्वयराकेशं × वरदार्यमहं भजे ॥

प्रसीदन्तु ममाचार्याः × ।
ब्रह्मसूत्रपदार्थानां लेखनोद्यतचेतसः ॥

बृहद्व्याघ्रपुरे वासं भजता दास्यजीविना ।
यथामति विलिख्यन्ते रघुनाथेन संग्रहात् ॥

End :

परब्रह्मणो नारायणस्यैव जगत्कारणत्वप्रतिपादका इति व्याख्याताः । व्याख्याता इति पदाभ्यासः अध्यायसमाप्तिद्योतकः ॥

Colophon :

इति श्रीवत्सकुलकलशोदधिपूर्णचन्द्रेण वाधूलकुलतिलकवरदगुरुकृपालब्धबोधेन श्रीमद्रघुनाथाचार्येण विरचिते शारीरकशास्त्रसंगतिसारसंग्रहे प्रथमस्याध्यायस्य चतुर्थः पादः ॥

1004

Sl. No. 39513 शारीरकसङ्गतिः Ms. No. B. 363

Beginning :

वाधूलरत्नवरदार्यकृपात्तभाष्य-
तत्त्वार्थमद्भुतगुणर्धिमगाधबोधम् ।
रामानुजार्यकरुणाप्तरहस्यबोधं
श्रीमद्वरेण्यरघुनाथगुरुं प्रपद्ये ॥

End :

तस्मादितरमतानामसामञ्जस्या[illegible]षवत्त्या निर्दोषो ब्रह्मकारणवादो न केनाप्यविचाल्य इति सिद्धम् ॥

Colophon :

इति श्रीवाधूलकुलतिलकवरदगुरुकृपालब्धवेदान्तविज्ञानेन वत्सवंश कलशोदधिपूर्णचन्द्रेण श्रीरघुनाथार्येण विरचिते शारीरकशास्त्रसङ्गतिसारसङ्ग्रहे द्वितीयस्य द्वितीयः पादः ॥

1005

Sl. No. 39515 शारीरकसङ्गतिः Ms No. P. 4787/1

Beginning :

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणामुपादित्सित जहसितो × नित्य तत्साधनानां त्य।ज्योतपादेयविवेका × तमस्सदसती च विवेक्तुमिशो मानं प्रदीपमिव कारुणिको ददाति। इत्युक्तप्रकारेण ×

End :

सूत्र × श्शास्त्रपरिसमाप्तं द्योतयतीति एवं पञ्चचत्वारिंशदधिक-पञ्चशतिसंख्यासंख्यात सूत्रप रेप्कृते शारीरकसंग्रहाख्ये × पञ्चाधिकर-णानि स ग्रहेण प्रदर्शितानीति सर्वं समञ्जसम् ॥

Colophon :

इति शारीरकसङ्ग्रहे चतुर्थाध्यायस्य चतुर्थः पादः ॥

1006

Sl. No. 39516 शारीरकसङ्ग्रहः Ms. No. . P 5632/1

Beginning :

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणामुपादिदिंसितजिहासितेष्टानिष्टप्राप्तिपरिहारतत्साधनानान्त्याज्योपादेयविवेकार्थं + तदर्थ-विषयज्ञानञ्चोत्पादयत् —

End :

कदाचिन्मुक्तस्यापि पुनरावृत्तिस्सम्भवतीत्याशङ्क्य इममानवमावर्तं नावर्तन्त इत्यनावृत्तिश्रवणादाश्रितव्यामुग्धस्य × भगवतस्तन्निवर्तनसङ्कल्प सम्भवाच्च मुक्तस्य न पुनरावृत्तिरित्युपसंहृतम् ॥

Colophon :

इति श्रीभाष्याधिकरणसारसङ्ग्रहस्समाप्तः ॥

1007

Sl. No. 39517 शारीरकसग्रहः Ms. No. P. 5390/3

Beginning :

पुरुषार्थोऽतः शब्दादिति बादरायणः ।

अङ्गिचिन्तानन्तरं अङ्गचिन्तेति पादसङ्गतिः । विद्याया अङ्गित्वे सति हि तदङ्गस्य चिन्त्यता । अतस्तस्या अङ्गित्वं पृथक् निरूप्यते +

End :

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च । सत्यसङ्कल्पस्य मुक्तस्य ऐश्वर्यं जगत्सृष्ट्यादि परमपुरुषासाधारणं सर्वेश्वरत्वमपि उत तद्रहितं केवलं परमपुरुषानुभवविषयमिति चिन्त्यत इति सङ्गतिः ।

Colophon :

— —

1008

Sl. No. 39519 शारीरकैककण्ठ्यम् Ms No. P 1990

Beginning:

शारीरकैककण्ठ्यं शमधनचित्त समर्पितौत्कण्ठ्यम् ।
शठरिपुसूक्ते × रम्यमुनिर्यः समाः शतं जीयात् ॥

शारीरकद्रमिडवेदशिरस्सुदीप्तं
स्वाभाविकस्वगुणरत्नचयं रमेशम् ।
हस्त्यद्रिमूर्ध्न्यनिशमाश्रितरक्षणैक-
दीक्षं व्रजामि शरणं रमणं यतीन्द्रोः ॥

End:

जयतु वकुलधारी देशिको देशिकानां
जयतु यतिवरार्यो मायिमत्तेभसिंहः ।
जयतु कलिजिदार्यो व्याससंज्ञो विपश्चित्
जयतु जयतु नित्यं वेङ्कटाचार्ययुग्मम् ॥

Colophon:

इति श्रीमद्वाधूलकुलतिलकयोः काञ्चीयतीशजनिभूमिकृतावतारयोः श्रीमद्वेङ्कटदेशिकयोः अहेतुककृपालब्धोभयवेदान्तहृदयेन श्रीकाञ्चीवरवरयोगिना रामानुज × शारीरकैककण्ठ्यं समाप्तम् ॥

1009

Sl. No. 39520 शास्त्रारंभसमर्थनवादः Ms No. P. 3039 7

Beginning:

श्रीमद्रामानुजार्यं श्रुतिशिखर[illegible]धापिमेधाविलासैः
प्रोद्यद्व्याहारगुम्भैः विदळितकुमताडम्बरं तं भजामि ।
यद्व्याख्याम्भोधिगर्भप्रसृमरसुमहायुक्तिवीचीविहाराः
वेलान्ते विक्षिपन्ति प्रतिकथकघटादूषणाळीतृणानि ॥

मत्त्वा पूर्वगुरूणां शास्त्रारंभविचारं अनन्तार्यः ।
शास्त्रारम्भार्था चतुस्सूत्री इति सिद्धान्तः ॥

End :

क्षत्रियवैश्य + ब्रह्महा भवति । आग्निर्वै दीक्षितः । तस्मादेनं नोपस्पृशेदिति शास्त्रसिद्धोत्कर्ष इत्यादिः तदधिगम उत्तरपूर्वाघयोः इत्यधिकरणटीकायां प्रपञ्चितम् ।

Colophon :

— — —

1110

Sl. No. 39523 शास्त्रारम्भसमर्थनम् Ms No. P. 5438

Beginning :

अनन्तं विबुधेड्यम् तं अनन्तगुरुमाश्रये ।
मदीयहृत्तमश्छेदी यदीयन्यायभास्करः ॥
हेतवे सर्वजगतां हेयपापाब्धिसेतवे ।
शान्ताय यादवगिरौ कान्तायास्तु नमः श्रियः ॥
मत्वा पूर्वगुरूणां सरणिं शेषार्यवंशवार्धीन्दुः ।
शास्त्रारम्भविचारं तनुते कुतुकादनन्तार्यः ॥

End :

तद्विचाररूपं शास्त्रमारम्भणीयमतः सद्विद्याया उपासनतात्पर्यकत्वमेव समन्वयसूत्राभिप्रेतमित्याहुः ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon :

— — —

1111

Sl. No. 39526 शेषत्वनिर्णयः Ms. No. P. 6150

Beginning :

तस्य यज्ञवराहस्य विष्णोरमिततेजसः ।
प्रणामं येऽपि कुर्वन्ति तेषामपि नमो नमः ॥

विष्णोर्देवादिदेवस्य जगद्धातुः प्रजापतेः ।
यैः प्रणामः कृतस्तेभ्यो नमस्तेभ्यः पुनः पुनः ॥

End :

कैङ्कर्यनित्यनिरतैर्भवदेकभोगैः
नित्यैरनुक्षणनवीनरसार्द्रभावैः ।
नित्याभिवाञ्छितपरस्परनीचभावैः
मद्दैवतैः परिजनैस्तवसंगसीय ॥

Colophon :

— — —

1112

Sl. No. 39527 | शेषत्वोपपत्तिः | Ms. No. P. 9576/1

Beginning :

× ब्रह्मभिन्नध्वंसाप्रतियोगिस्वरूपवत्वम् । चिदचित्पदार्थसाधारण-शेषत्वं च स्वान्यनिष्ठस्वप्रयुक्तातिशयविषयकेच्छाप्रयोज्यव्यापारवत्वम् ।

End :

अचेतनेषु च स्वान्यघटादिनिष्ठस्वप्रयुक्तजलाहरणायोग्यतादिरूपातिशयविषयकतत्कर्तृनिष्ठेच्छाप्रयोज्यव्यापारवत्वं दण्डचक्रादिष्विति दण्डादीनां शेषत्वोपपत्तिः । शाण्डिल्यस्मृतौ —

\+ \+ \+

सायुज्यं प्रतिपन्ना ये निवृत्तास्तु तपस्विनः ।
किङ्करा मम ते नित्यं भवन्ति निरुपद्रवाः ॥

Colophon :

— — —

1113

Sl. No. 39528 | शैववैष्णवम् | Ms. No. C. 4704/8

Beginning :

× साम यजुरेव च ।
गतिर्भर्ता सुहृत्साक्षी निवासश्शरणं सुहृत् ।
प्रभवः प्रलयस्थानं निदानं बीजमव्ययम् ॥ (?)
इति वचनैः उपबृंहितार्णवं तत्रैव वाक्यान्तराणां—

End :

स्मृतीतिहासपुराणभगवच्छास्त्रद्युपबृंहणैश्च सर्वासामुपनिषदां नारायण-परभाव एव तात्पर्यविश्रान्तेः वज्रलेपायितत्वात् देवतान्तरपरभाव एव दो (?) वैदिकैः बहिष्कार्य इति सिद्धम् ॥

Colophon :

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसम्प्रदाय-प्रवर्तकपरवस्तुवेङ्कटेशदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रवेदान्ताचार्य × ॥

1114

Sl. No. 39529 **श्रीतत्त्वसिद्धाञ्जनम्** Ms. No. P. 2573/ 1

Beginning :

श्रीरङ्गनाथगुरुपादसरोजहंसं
वेदान्तदेशिकपदाम्बुजभृङ्गराजम् ।
श्रीमद्यतीन्द्रशठकोप × लम्बं
वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये ॥
अस्येशानेति निस्सीमसमृद्धिं यामधीमहे ।
ईशो यः पौरुषे सूक्त उक्तस्तौ दम्पती भजे ।

End :

इत्थमाचार्यदिव्योक्तिसंवादैरेव तद्गिराम् ।
दर्शिता स्वरसात्रेति भारो नास्मासु कश्चन ॥
मनस्विनो विमृश्यैतदेनदेवेति साधवः ।
प्रसीदन्तु दयेता × दम्पती च जगत्पती ॥

Colophon :

इति श्रीमद्वेदान्तरामानुजमुनेः कृतिषु श्रीतत्त्वसिद्धाञ्जनं सम्पूर्णम् ॥

1115

Sl. No. 39530 **श्रीतत्त्वसिद्धाञ्जनम्** Ms. No. P. 3753

Beginning :

यया साध्यं हरिस्सर्वं सृजत्यवति हन्ति च ।
तां वन्दे जगदीशानां श्रियं शीलादिमण्डिताम् ॥

प्रणम्य देशिकान् सवन् ज्ञानवैराग्यभूषणान् ।
श्रियश्च सर्वहेतुत्वमोक्षदत्वादि वर्ण्यते ॥

यद्यपि श्रियश्च भगवद्विशेषणतया जगन्निदानत्वं भोगापवर्गप्रदान सामर्थ्यं चाचार्यप्रबन्धेष्वेवोपपादितं तथाप्यर्वाचीनोक्तिभिर्व्याकुलितमिव लक्ष्यते। परोक्तिनिरासनेन आचार्यसूक्तिदृढीकरणायायं ग्रन्थ आरभ्यते ।

End:

ऐश्वर्यमक्षरगतिं परमं पदं वा संसृत्यक्षरेत्युक्तमैश्वर्यार्थिनां स्थितमि ति विष्णुपुराणोक्तब्रह्मलोकपर्यन्तस्थानमेवौचित्यादभिधीयन्ते । तस्मादैश्वर्यार्थि नां प्राप्यस्थानाप्राप्यपरमस्थानादर्वाचीनप्रदेशो केवलानां विष्णुपुराणोक्तामृतं स्थान मित्युक्तं भवति । एवं केवलानां प्राप्यस्थानस्य प्रति–

Colophon :

— — —

1116

Sl. No. 39531 श्रीतत्त्वसिद्धाञ्जनम् Ms. No. P· 5400

Beginning:

अस्येशानेति निस्सीमसमृद्धि × यामधीमहे ।
ईशो यः पौरुषे सूक्त उक्तौ तौ दम्पती भजे + ॥
श्रीश्रीशौ मिळितावेव जगद्धेतुविमुक्तिदौ ।
प्रपत्तव्यौ चेति गद्यभाष्य (?) सारादिषूहितम् ॥
तत्र नानामतिक्षोभतिमिरौघैरुपप्लुते ।
आलोकसिध्यै श्रीतत्वे सिद्धाञ्जनमुदञ्च्यते ॥

End :

ईदृक्संशयविच्छेदस्तस्मिन् दृष्टे नष्टो भवत्विति ।
यदिह रहस्यं विवृतं यच्च न्यूनं वचोऽधिकं यद्वा ।
कृपया तदिदं क्षमतां देवो देव्यौ च देशिकास्सन्तः ॥

Colophon :

नारायणेन मुनिना श्रीवत्साङ्कविपश्चिता ।
सैषा पुरुषकारस्य मीमांसा निर्मिता मिता ॥

1117

Sl. No. 39564 **श्रीभाष्यमङ्गलदीपिका** Ms. No P. 6192

Beginning :

भूयाद्देवे जगल्लीले शठकोपे च सद्गुरौ ।
शेमुषी भक्तिपर्याया भूयसे मङ्गळाय नः ॥
भाष्यमङ्गळपद्यार्थाः श्रुताः शश्वद्गुरोर्मुखात् ।
कृतप्रवचनाश्चैषां स्थेम्ने पुनरियं कृतिः ॥
श्रतप्रकाशिकोक्ता ये विवृतास्तत्त्वटीकया ।
दश तानाद्यपद्यार्थान् संगृह्यान्यो स (?) वर्ण्यते ॥

End :

आत्मनित्यत्वमिन्द्रियनानात्वं विषयस्थैर्यं गुणगुणिभेद इत्याद्यर्थज्ञान-मिति । एकमन्त्रस्य नानार्थाविनियोगवशा यथा तथा लोकेऽपि तात्पर्यादिति सर्वं समञ्जसम् ॥

Colophon :

श्रीवत्सवंशतिलकश्रीनिवासेन दर्शिता ।
देवदेशिकभक्तानां प्रीत्यै मङ्गलदीपिका ॥

1118

Sl. No. 39565 **श्रीभाष्यवार्तिकम्** Ms. No. P. 6042

Beginning :

आरभ्य स्वगुरोरा च भगवत्तोऽखिलान् ।
नत्वा शारीरकन्यायसंग्रहोऽयं वितन्यते ॥ १ ॥
आद्या तत्र चतुस्सुत्री शास्त्रोपोद्घात इष्यते ।

End :

उपेयता च त्रिशेया परस्य ब्रह्मणः खलु ॥ २७९ ॥
आद्यद्विकेन तत्रेत्थम् कारणत्वं प्रपञ्चितम् ।
प्रपञ्चयिष्यते चान्यत् उत्तरेणोभयञ्च तत् ॥ ३२८ ॥

Colophon :

— — —

1119

Sl. No. 39568 श्रीभाष्यवार्तिकम् Ms. No. P. 9069

Beginning:

रामानुजार्यपादाब्जसुरभीकृतमानसम् ।
अत्र्यन्ववायजलधिं क्रतुनाथमहं भजे ॥
प्रणम्य लक्ष्मणार्यस्य भाष्ये त्रय्यन्तगोचरे ।
गम्भीरेऽतिनिगूढानां नयानां तु प्रकाशने ॥
प्रयत्नः क्रियते बुद्ध्या तत्प्रसादसमुत्थया ।
यथाश्रुतं यथाशक्ति मेघनादारिणा मया ॥

End:

श्रुतिस्मृतिशतैः परमात्मप्रसादादेव बन्धनिवृत्तिरिति सिद्धम् । फलमत उपपत्तेः इत्यत्र सूत्रकारैरपि फलसिद्धिः अत एवेत्युक्तम् । न च ब्रह्मात्मैक-विज्ञानस्य मिथ्यात्वं जीवस्य ब्रह्मणश्च ×

Colophon:

— — —

1120

Sl. No. 39569 शतदूषणीव्याख्या Ms. No. P. 9232

Beginning:

श्रीमदात्रेयनाथार्यान् गुरून्नः परमान् गुरून् ।
श्रीरामप्रमुखान् वन्दे श्रीमद्रामानुजं मुनिम् ॥
कृष्णद्वैपायनं व्यासं सांगाम्नायप्रवर्तकम् ।
सर्वज्ञमञ्जनासूनुं जानकीनायकप्रियम् ॥
प्रणम्य लक्ष्मणार्यस्य भाष्ये त्रय्यन्तगोचरे ।
\+ + +
गम्भीरेऽतिनिगूढानां नयानां तु प्रकाशने ॥
प्रयत्नः क्रियते बुद्ध्या तत्प्रसादसमुत्थया ॥

End:

तद्वाक्योदितकल्याणगुणाकरत्वं ब्रह्मणः प्रतिपाद्यत इति भाष्यकारोक्तः न राद्धान्ते पादभेदकोपाधिस्वीकारः इत्यलमनेन ॥

Colophon :

इत्यात्रेयनाथसूरिसूनुना मेघनादारिणा विरचिते श्रीमद्रामानुजीयोत्तरमीमांस भाष्यनयप्रकाशने प्रथमस्याध्यायस्य द्वितीयः पादः ॥

1121

Sl. No. 39572 ब्रह्मसूत्रभाष्यव्याख्या Ms. No. P. 5004

Beginning :

वागादिभिर्गुरून् प्राप्य नाथार्यादीन् कृपालयान् ।
रामानुजं यतिवरं जितारिं पवनात्मजः ॥
लक्ष्मीं बक्षसि बिभ्राणं हयास्यं च तमोऽपहम् ।

\+ \+ \+

यतो वेदान्तभाष्येषु गुरुभावप्रबोधने ॥
नयप्रकाशिके प्रायो न्यायमार्गप्रदर्शिताः ॥

\+ \+ \+

नयप्रकाशिकोक्तार्थाविरो(?)दाद्यस्तिवर्णिताः ।
भाष्यार्थास्तु यदि क्वापि ज्ञेया वैकल्पिता इति ॥

End :

तत्र श्रुतत्वादित्याद्युक्तिः हेत्वभिधानपरा जीवमुख्यप्राणलिंगान्नेत्यंशोप्येवं-विधविषयचोद्यपरः. नोपासनात्रैविध्यादिति हेतूक्तितत्परिहारपरेत्यभिप्रायदाह एतदिति अधिकरणार्थमुपसंहरति अत इति ।

Colophon :

इति श्रीमदात्रेयनाथसूरिसुनुमेघनादारिविरचिते श्रीमद्रामानुजीयोत्तर मीमांसाभाष्यभावप्रबोधने प्रथमस्याध्यायस्य प्रथमः पादः ॥

1122

Sl. No. 39576 — श्रीभाष्यव्याख्या — Ms. No. P. 2048

Beginning

स जयति यतिराजमुनिः करुणाजलधिः क्षमापरिष्कारः ।
करिशैलकृष्णमेघः कांक्षितवर्षी यदर्पितैस्तोयैः ॥
स्वतस्सिद्धं शुद्धस्फटिकमणिभूभृत्प्रतिभटं
सुधासध्रीचीभिः द्युतिभिरपतापत्रिभुवनम् ।
अनन्तैस्त्रय्यन्तैरनुविहितहेषाहलहलं
हताशेषावद्यं हयवदनमीडीमहि महः ॥
प्रणम्य वरदाचार्यं वादिहंसाम्बुदावपि ।
त्रय्यन्तसूत्रभाष्यार्थतत्त्वटीका विधीयते ॥

End:

घटादिष्वपि तथाभावे कथं द्रव्यैक्योपपादनमित्याह—अत्रापीति । निपुणतरं परोक्तप्रतीतिबलानुसारेण अहिकुण्डलवदास्ते × न × धीत इत्यादिवच्च कार्यस्य सत्यत्वे ×

Colophon:

— — —

1123

Sl. No. 39581 — श्रीभाष्यव्याख्या — Ms. No. P. 1395

Beginning :

शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ।
बहिरन्तस्तमच्छेदि ज्योतिर्वन्दे सुदर्शनम् ॥
येनाव्याहतसङ्कल्पं वस्तु लक्ष्मीधरं विदुः ।
सम्यङ्न्यायकलापेन महता भारतेन च ॥ +
अविस्तृताः सुगम्भीरा रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥ +
सौकर्याय बुभुत्सूनां सङ्कलय्य प्रकाश्यते ॥

एवं प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचार-सिद्धमिष्टदेवतोपासनरूपं मङ्गलं श्रौतमाचारति — अखिलेत्यादिश्लोकेन ।

End :

सामग्रीवैकल्यप्रतिपादनमुखेन परिहरति तदिदमित्यादिना । परमपुरुष-शब्देनोपेयं वरणीयतेत्यादिनोपायमनादीत्यादिना निवर्त्यमनधिगतेत्यादिना परपक्षनैर्मूल्यं न्यायानुगृहीतेत्यादिना स्वपक्षसमूलतामर्थतोनेकविद्वत्परिग्रह ×

Colophon :

— — —

1124

Sl. No. 39591 श्रीभाष्यव्याख्या Ms. No. C. 1773

Beginning :

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥

\+ \+ \+

अविस्तृतास्सुगम्भीरा रामानुज × गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥
श्रीरङ्गेशाज्ञया लब्धव्याससंज्ञं सुदर्शनम् ।
वाचा विजयिनः पुत्रं भाष्यभक्तिरचूचुरत् ॥
गुरुभ्योऽर्थःश्रुतश्शब्दैस्तत्प्रयुक्तैश्च योजितः ।
सौकर्याय बुभुत्सूनां संकलय्य प्रकाश्यते ॥

End :

एवं नामरूपव्याकरणप्रकार उक्तः । ततः किं प्रस्तुतस्येत्यत्राह— अत एवमिति । अत्र उदाहृतश्रुतिवाक्यादेवं परमात्मपर्यन्तनामरूपव्याकरण प्रतिपादनात्सर्वशब्दानां परमात्मपर्यन्तत्वे मानं दर्शितं देहवाचिशब्देष्वाकृति-नयसञ्चरणेन परमात्मपर्यन्तत्वमुपपादयिष्यन् शरीरत्वाक्षेप —

Colophon :

— — —

1125

Sl. No. 39592 श्रीभाष्यव्याख्या Ms. No. C. 1774

Beginning :

× कवाक्यं दर्शयति किञ्चेति। ततः किमित्यत्राह एवं चेति। न केवलमात्मशब्देन शरीरत्वं गम्यते। अपि तु शरीरत्वं शरीरलक्षणेन सह कण्ठोक्तं चेत्याह। तथा च श्रुत्यन्तराणीति। अन्तः प्रविष्टः शास्तेति सर्वात्मशब्दविवरणं विशेषणद्वये नृपनभोव्यावृत्तिः भगवतो नियन्तृत्वकथनात् तदेकनियाम्यत्वं शरीरलक्षणमुक्तं भवति।

End :

एवं जगतस्तदधीनत्वतत्कार्यत्वादिप्रतिपादनमुखेन अतादधीन्यतत्कार्यत्वादिव्युदसनात् ब्रह्मैककारणत्वं स्थिरीकृतं चतुर्थपादेनेति। अयं च विभागस्सम्प्रदायसिद्धत्वात् उपपन्नत्वाच्चानुसन्धेयः॥

Colophon :

इति श्रीहारितकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदाचार्यपादसेवासमधिगतभगवद्रामानुजमुनिविरचित-शारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विरचितायां श्रुतप्रकाशिकायां प्रथमस्याध्यायस्य चतुर्थः पादः॥

1126

Sl. No. 39595 श्रीभाष्यव्याख्या Ms No. A. 164

Beginning :

वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम्।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम्॥
वेदान्तसूत्रभाष्यार्थमाचार्योपासनात् श्रुतम्।
गिरा दीपिकयेवाहं दर्शयिष्ये यथामति॥

आरीप्सितग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनार्थं इष्टदेवतोपासनरूपं मङ्गलं श्रुत्या कुर्वन् आर्थं प्रतिपाद्यं संक्षेपतः श्रोतृबुद्धिसमाधित्सया दर्शयति अखिलेति।

End :

एतद्विरुध्यमानतर्कपरिहारश्चोक्तया दिशा नेयः । मितगम्भीरभाष्ये सर्वं गह × तमनुसन्धेयम् । तदवगाहमानैः स्वपक्षस्थापनपरपक्षप्रतिक्षेपौ सुकरावित्येतदभिप्रायेणेतिसर्वं समञ्जसमित्युक्तम् ।

Colophon :

इति हरितकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेनश्रीमद्वरदराजार्यपादसेवासमधिगतभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रदीपिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः । इति समाप्तोऽध्यायः । समाप्तमिदं शास्त्रम् ॥

1127

Sl. No. 39597 श्रीभाष्यव्याख्या Ms. No. P. 641

Beginning :

श्रीनिवासे वृषाद्रीशे जगज्जन्मादिकारणे ।
भक्तिर्भवतु नोऽनन्ते श्रुत्युद्दीतिविमुक्तिदे ॥
पाराशर्यं मुनीन्द्रं तं गुरुवर्यमुपास्महे ।
विशिष्टाद्वैतलक्ष्मीशपारम्यादिप्रकाशकम् ॥
अर्वाचीनद्वैतभाष्यभेदनेन निजं मतम् ।
श्रीभाष्यश्रीरहस्यार्थतत्त्वप्रज्ञावतां वरम् ।
श्रीशैलपूर्णमपरं श्रीनिवासगुरुं भजे ॥

End :

अक्षयं ह वै इत्यादिना कर्मफलानामप्यक्षयत्वश्रवणात् इत्याशङ्कां च परिहरति चातुर्मास्यादिति तद्यथेहेत्यादि वाक्यादिति शेषः । त × क्षयफलश्रवणस्य का गतिरित्यत्राह । अपेक्षितमिति । अधिकरणार्थमुपसंहरति । विशिष्टहेतौ विशेषणविशेष्यांशयोः सिध्युपादानादित्यर्थः । सङ्गतिरत्न अधिकरणानां सप्तविधा ॥

Colophon :

— — —

1128

Sl. No. 39600 श्रीभाष्यव्याख्या Ms. No. P. 1834

Beginning :

स्मृत्यनवकाशेति । प्रथमद्वितीयाध्याययोः सङ्गति × संगृह्णाति प्रथमेऽध्याय इत्यादिना । अदिशब्दोऽनुमानपरः । प्रधानं यद्यप्यानुमानिकम्। तथापि प्रत्यक्षपृथिव्याद्यानुरूप्याद्धि तत्कारणमनुमीयत इति —

End :

तस्मान्नानन्दवैकल्यम् । अपि तु तत्पौष्कल्यमेव । भोगमात्र × तां देवतां सर्वाणि भूतान्यवन्ति न ह्येवंविदं सर्वाणि भूतान्यवन्ति तेन + छागो वा मन्त्रवर्णात् इतिन्यायात् सामान्येनावगतं साम्यं भोगसाम्ये दृष्टे— -

Colophon :

— — —

1129

Sl. No. 39601 श्रीभाष्यव्याख्या Ms. No. P. 2273

Beginning :

× भेदद्विकभेदः भवतीति । भुवनं कार्यवर्गः अखिलदान्वित भुवनपदेन विपुलाविपुलसकलकार्यग्रहणम् । अकारोपक्रमत्वाय निखिले- त्यनुक्तिः । अकारो हि विष्णुवाचको मङ्गलार्थः ।

End :

एवं व्याख्याता इत्यर्थः । व्याख्याता व्याख्याता इत्युक्ते व्याख्यता शब्दस्य अव्याख्यातशब्दस्य च समासेन एकपदे सति सर्ववाक्यविशेषाणां व्याख्यातत्वमुक्तं न स्यादिति तद्व्युदासार्थमसमस्ततया पृथक्पदत्वं ज्ञापयन्नभ्यासस्य प्रयोजनमाह व्याख्याता इति ।

Colophon :

इति श्रीरहस्यत्रयारव्याख्याकरणविख्यातवैभवघनगिरिश्रीनिवासार्यकरुणाविषयेण तन्नायकतत्पात्रगुरुपरकरुणाविशेषलब्धतत्त्वत्रयविवेकेन वरदार्यज्ञलमुनिवरपदकमलसीमाश्रयणमहिम्ना सञ्जाततत्त्वजातपुमर्थयाथात्म्यविज्ञानेन श्रीमद्वरददेशिककटाक्षैकलक्ष्यतामुपगतेन कविकथककण्ठीरवचरणयुगल विन्यस्तसमस्तभरेण परकालयतिना लिखितायां श्रुतप्रकाशिकासंग्रहमितप्रकाशिकायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

1130

Sl. No. 39604 श्रीभाष्यव्याख्या Ms. No. A. 682

Beginning :

वन्दे × भाय कुन्देन्दुधवलस्मितम् ।
मन्देतरधनप्रख्यं तं देवममराधिपम् ॥
× रास्तिनिखिलाहितम् ।
श्रीनिवासताताचार्यगुरुमहं भजे ॥

इह खलु भगवान् रामानुजमुनिः सकलजनानुग्रहाय बोधायनादि पूर्वाचार्यमत —

End :

अहं निर्दुःखस्सुखी स्यामिति हि प्रतीतिः तस्य पुरुष × स्वो नाशः कथं पुरुषार्थः पुरुषार्थान्तरं वा कथमर्थयितुस्तस्याभावे पुरुषार्थो भवेत् । इत्यादि बहुतरं प्रपञ्चितं श्रुतप्रकाशिकायां तत्रैव द्रष्टव्यम् ॥

Colophon :

इति लघुभावप्रकाशिकाख्यायां श्रीमत् भाष्यटीकायां चतुस्सूत्री ॥

1131

Sl. No. 39605 श्रीभाष्यव्याख्या Ms. No. P. 3048

Beginning :

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥

इह खलु भगवान् भाष्यकारः कुमतिकलु × तं शारीरकशास्त्रं लोकानुजिघृक्षया पूर्वाचार्यमतानुसारेण व्याचिख्यासुः भाष्यनिर्माणौपयिक- शारीरकार्थतत्त्वज्ञानस्य 'यस्य देवे परा भक्तिः + भगवद्भक्त्याशीरूपं मङ्गलमाचरति— अखिलेत्यादिना ॥

End :

चान्यभिन्नत्वस्य सत्यत्वमिथ्यात्वौदसीनत्वात् अत एव देशपरिच्छिन्नत्वं वा कालपरिच्छिन्नत्वं वा वस्तुपरिच्छिन्नत्वं वा हेतुरित्यपि निरस्तम् । × यद्यपि प्रमाणसम्बन्धार्ह × रूपसतो नानुवृत्तत्वं तथापि × प्रमाण-

तथापि × णमाणसम्बन्धा त्व × प वृत्तत्वात्परमार्थ त्वाच्च सिद्धसाधन× —

Colophon:

— — —

1132

Sl. No. 39606 **श्रीभाष्यश्रुतप्रकाशिकाव्याख्या** Ms. No. P. 3072

Beginning:

आनन्दमयोऽभ्यासात् ॥

प्रत्यगात्मन्यवतरति कारणत्वबुद्धिरित्यर्थः । अस्मिन्नधिकरणे जगत्कारणं जीव इति पूर्वपक्षीकृत्य तदतिरिक्तं ब्रह्मेति सिद्धा × तदपि आनन्दमयो जीवः परमात्मा वेत्येव ।

End :

आनन्दाभूतवाक्यानामतत्परत्वमिति × दाभूतवाक्यानां परमाणुवादिपरत्वभाव इत्यर्थः । इन्द्रियाणामपि तच्छरीरत्वमुक्तमिति स्थानादिव्यपदेशाच्चेति सूत्र इतिभावः ।

Colophon :

इति श्रीमत्तातार्यचरणारविन्दचञ्चरीकस्य श्रीमद्वरदविष्णुसूरेः कृतौ श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकायां प्रथमस्य चतुर्थः पादः ॥

1133

Sl. No. 39607 **श्रीभाष्यश्रुतप्रकाशिकाव्याख्या** Ms. No. B. 143

Beginning;

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

स्मृत्यनवकाशेति । प्रत्यक्षादिप्रमाणगोचरादिति । न च साङ्ख्याभिमतस्य कथं प्रत्यक्षगोचरत्वमिति शङ्क्यम् । कार्यावस्थायां प्रत्यक्षत्वसम्भवात् ।

End:

उक्तार्थबाधकत्वेनेति भाष्योपन्यस्तैरेव न्यायैः परोत्प्रोक्षितानां उत्प्रेक्षिष्यमाणानां च प्रमाणतर्काभासानां परिहारस्सुगम इति भावः ।

Colophon :

इति श्रीताताचार्यचरणारविन्दचञ्चरीकस्य वरदविष्णुसूरेः कृतौ श्रुत-प्रकाशिकाव्याख्यायां भावप्रकाशिकायां चतुर्थस्याध्यास्य चतुर्थपादः। समाप्त-श्चाध्यायः ॥

1134

Sl. No. 39609 श्रीभाष्यश्रुतप्रकाशिकाव्याख्या Ms. No. P. 751

Beginning :

आनन्दमयोऽभ्यासात् ॥—

प्रत्यगात्मन्यवतरन्ती बुद्धिरिति। कारणत्वबुद्धिरित्यर्थः। ननु नास्मि न्नधिकरणे जगत्कारणत्वं जीव इति—

End :

ततश्च चिदचि लक्षण्यसाधनेन संवादनिरपेक्षप्राज्ञत्वादेरेव हेतूकरण संभवेन तत्र शाखान्तरसंवादस्य हेतूकरणासंभवादिति भावः॥

Colophon :

इति श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकयां प्रथमस्याध्यायस्य तृतीयः पादः॥

1135

Sl. No. 39614 श्रीभाष्यश्रुतप्रकाशिकाव्याख्या Ms No. B. 257

Beginning :

अतसीगुच्छसच्छायं अञ्चितोरस्थलं श्रिया।
अञ्जनाचलशृङ्गारं अञ्जलिर्मम गाहताम्॥

प्रारिप्सितस्य ग्रन्थस्य अविघ्नेन परिसमाप्त्यर्थं च स्वाचार्यस्य वरदगुरोः इष्टदेवतारूपं + मुपगच्छति—वरदं द्विरदाद्रीशमिति॥

End :

मधुत्वमापादयन्ति ते रसाः मधुत्वेनैकीभूताः तत्र मधुनि विवेकं न न लभन्ते। कथ अमुष्य वकुलस्य रसः न चूतस्य रसः एवं सत्येकीभूता अपि प्रजा न विवेकं लभन्त इत इत्यर्थः॥

आनन्दमयोऽभ्यासात्॥

Colophon :

1136

Sl. No. 39615 श्रीभाष्यश्रुतप्रकाशिकाव्याख्या Ms. No. P. 5238

Beginning :

वन्देहं वेङ्कटाधीशं वात्सल्यादिगुणाकरम् ।
वारिजासनया सार्धं वाञ्छितार्थप्रदं नृणाम् ॥

श्रुतप्रकाशिकां श्रुत्वा गुरोः समरपुङ्गवात् ।
वाधूलश्रीनिवासेन क्रियते तूलिका मया ॥

End :

तस्य निर्दोषत्वसाधकलिङ्गग्राहिणः तल्लिङ्गव्याप्तिग्राहिणः षड्विधतात्पर्य लिङ्गग्राहिणः प्रत्यक्षस्य तेषां तात्पर्यलिङ्गानां च शास्त्रेणैव बाधोपगमान्मूलोच्छेदत्वं इति क्रियावैषम्यं त्रयमुपपादयिष्यन् पूर्वपक्षमनुवदति—

Colophon :

— — —

1137

Sl. No. 39616 श्रीभाष्यश्रुतप्रकाशिकाव्याख्या Ms. No. P. 2961

Beginning ;

× ज्ञानुतातुमेवात्यतीत्यादिकं (?) न गृह्यते तच्च दर्शनसमानाकारत्वं च न तु ज्ञानत्वादिकमिति भावः । × न्द्रियकत्वमेव × त्यथाभिप्रायेणाशंकते न चैतदिति यथा चाक्षुषत्वमति—

End :

पूर्ववृत्त इत्युक्त तदा न भवतीति सृष्टो वा भेद इति × तान्यसदित्यादिभाष्यसाशेषविशेषत्वादि × ग्रन्थेन पौनरुक्त्यमाशंक्य विवरणोपादि × मर्दानां संग्रहेण पुनः प्रतिपादन × विषयकसंस्कार × प्रयोजकतया सकलमेवेत्याशयेनाह उपाय इत्यादिना—महापूर्वपक्षस्समाप्तः ।

Colophon :

महापूर्वपक्षस्समाप्तः ॥

1138

S No. 39617 श्रीभाष्यश्रुतप्रकाशिकाव्याख्या Ms. No. P. 2960

Beginning:

प्रणम्य देवराजार्यं मीमांसाद्वयवेदिनम् ।
तापनीयरहस्यादिनिष्णातहृदयं सदा ॥
श्रुतप्रकाशिकामेव भजस्व श्रवणादिभिः
इति तैर्देवाजार्यैरनुशिष्टोऽहमादितः ॥

End:

ननु ज्ञानपदस्य ल्युडन्तत्वेन कृदन्तत्वात् इदमपि प्रतिप्रसवस्यैवो × नापवादस्य भवितुमहतीति शङ्कते—यद्यपीति। तथापीति। न कृद्योगवहिता—न कृद्योगे ऽति विहिता। अतो × षष्ठी कृद्योग—

Colophon:

— — —

1139

Sl. No. 39620 श्रीभाष्यश्रुतप्रकाशिकाव्याख्या Ms. No. P. 3112

Beginning:

प्रणम्य देवराजार्यं मीमांसाद्वयवेदिनम् ।
तापनीयरहस्यादिनिष्णातहृदयं तथा ॥
श्रुतप्रकाशिकामेव भजस्व श्रवणादिभिः ॥
\+ + +
प्रारीप्सिताविघ्नपरिसमाप्त्यर्थं—

End:

परिहारप्रकारं दर्शयति—विस्तीर्णामित्यादि। अन्नत्येष्विति चेतनव्यावृत्तिः। अद्यतनेति दीर्घायुःकृतयुगजन्मव्यावृत्तिः ॥

Colophon:

— — —

1140

Sl. No. 39621

श्रीभाष्यव्याख्यश्रुतप्रकाशिका

Ms. No. P. 7364

Beg ..ing ;

× दाषगन्ध-

मापन्नबन्धुमनुरूपदयानुबन्धम् ।

अपादचूडमनुभूय तुरङ्गवक्त्र-

माकल्पवेलममृताप्लुतमस्तु चेतः ॥

वरदगुरुमुखानां देशिकानां प्रसादात्

करबदरसमानं प्राप्य वेदान्तसारम् ।

कलयति निगमान्ते मन्दशङ्कानिरासं

विबुधजनमुदे श्रीचम्पकेशो विपश्चित् ॥

रामानुजार्यराद्धान्तपरिष्कारहृदम्बुजाः ।

वेदान्तकण्टकोद्धारमनुगृह्णन्तु सज्जनाः ॥

अधिगतसाङ्गसशिरस्कस्वाध्यायापातप्रतीतानां तत्स्थिरफलकर्मब्रह्मावबोधः कर्ममीमांसासमधिगकर्मकल × भाव × सादितनिर्वेद × कश्चिद्विपश्चि × मीमांसायामधिकरोतीति महानयं घण्टापथः ।

तत्र नवीनाः × अत्रेयं कण्टकोद्धाररीतिः । अध्ययानात् प्राक् न कथञ्चिदपि प्रव्रजिनं सं × दहरेवेति वाक्यं तत्र प्रमाणम् ।

End :

नाथार्ययामुनयतीन्द्र सुदर्शनादि-

वेदान्तदेशिकमहार्यमुखा महान्तः ।

सम्यक् जयन्तु शरदामयुतं सहस्रं

स्वोदन्तवाधितकुदृष्टिजनप्रलापाः ॥

× प्रतिकथकधुरीणप्र × प्रणीत-

पटिमनीत्याप्राप्तनिर्द्वन्द्वसीमा ।

× रदनामा देशि × लपशोधेरक्ष

× कोपि चन्द्र × ॥

शारीरकप्रवचने भगवान्यतीन्द्र-

स्साक्षा × रिशजिताङ्घ्रिसरोजं × रलक्ष ×

Colophon :

इति हारीतान्वयपारिजातरा × नुजार्यसमरपुङ्गवाचार्यकारुण्य कवित्वसत्ताककौशिकवरदाचार्यचरणारविन्दविन्यस्तात्मभरस्य चम्पकेश्वरस्य कृतिषु वेदान्त कण्ठको × प्रथमसूत्रपरिशो—

1141

Sl. No. 39625 श्रीभाष्यश्रुतप्रकाशिकाव्याख्या Ms. No. P 2597/1

Beginning :

श्री शुद्धसत्वगुरुणा कलिताद्भुताकृतिम् ।
वेङ्कटेशं कुलधनं श्रीभूगुरुयुतं भजे ॥ (?)
श्रीमान् रामानुजाचार्यो जगज्जीवातुरेधताम् ।
श्रीयादवाद्रिमाहात्म्ये साक्षाच्छेष इति श्रुतः ॥
नमस्कुर्वन्ति सत्वस्थाः विमतस्थाश्च व × ते ॥
× स्वस्य बुद्धिं तदात्मजः ॥
कुरुते लक्ष्मणो हृद्यां गुरुभावप्रकाशिकाम् ।
चम्पकेशार्यकलितां गुरुतत्त्वप्रकाशिकाम् ।
सङ्कलय्य करोम्येनां गुरुभावप्रकाशिकाम् ॥

End :

एतेन विशेषित इति दर्शयति यमेव यः प्रयातीत्यादिता । यद्वा व्यक्तो वर इत्युक्त इति निर्देशः । पूर्वोक्तरत्यभिज्ञार्थमिति भावः । अत्राक्षरपरमः-गतिशब्दयोः —

Colophon :

— — —

1142

lS. oN. 39630 श्रीभाष्यश्रुतप्रकाशिकव्याख्या Ms. No. P. 3143/2

Beginning:

आनम्य श्रीमहाचार्यं श्रियं श्रीवेङ्कटेश्वरम् ।
यतीन्द्रदासदासेन क्रियते भाष्यदीपिका ॥

श्रियः पतिः परमकारुणिको भगवानखिलचेतनोज्जिजीविषया आदौ तावन्मत्स्यरूपेणावतीर्य + भगवान् भाष्यकारः सदसद्विवेचनचतुरः पूर्वाचार्यविरचितप्राचीनमेव सन्मार्गं निष्कण्टकीकुर्वन् शारीरकशास्त्रं व्याचिख्यासि । प्रारीप्सितस्य + मङ्गळमाचरति — अखिलेत्यादि ॥

End :

भेदादीनामिति आदिशब्देन उत्पत्यादयः भेदादयो नानुभूतिधर्माः- अनुभाव्यत्वात्, रूपादिवत् इति पूर्वोक्तनानात्वा—

Colophon :

— — —

1143

Sl. No. 39632 | श्रीभाष्यव्याख्या | Ms. No. A. 654

Beginning:

जयतु जयतु नित्यं श्रीनिवासो वृषाद्रौ
जयतु जयतु नित्यं भाष्यकृद्भूतपुर्याम् ।
जयतु जयतु नित्यं सर्वतन्त्रस्वतन्त्रो
जयतु जयतु नित्यं वादिकण्ठीरवार्यः ॥ +
श्रुतप्रकाशिका गुर्वो × शिकाम् ।
संगृह्य सुखबोधाय श्रीभाष्यार्थो विलिख्यते ॥

End :

यत इत्यादिना आत्मदीपधर्मभूतज्ञानप्रभासाधारणं साक्षात्परम्परया वा स्वव्यवहारानुगुण्यमिह प्रकाशशब्दार्थः । दीपस्य तमोविरोधिस्वरूप-मौज्वल्यं प्रकाशः ।

Colophon :

— — —

1144

No. 39634 | श्रीभाष्यव्याख्या | Ms. No. P. 1179/1

Beginning :

लोके पुंसां मानाधीनमेयतत्त्वार्थावधारणानां हानोपादानविषयानिष्टेष्ट तत्साधनानामपरोक्षार्थतद्धेतुरूपे अर्थे अभिधानैकप्रमाणके + तत्र च व्याख्येयानि ब्रह्मसूत्राणि तेषां च कानिचिद्विरुद्धान्यविरुद्धानि व्याख्यानान्तराणि सन्ति तत्राविरुद्धव्याख्यनेष्ववर्वाचीनपुरुषाणामतिगहनविस्तृततया अवधारणा शक्तेः तत्प्रवेशाय स्वदेशिकमतानुसारेण भगवान् भाष्यकारो व्याख्यातुमारभते, ग्रन्थोपक्रमे —अखिलेत्यादिना ।

End :

अध्यासानामनेकत्वात्तद्धेतुभूतदोषाणां अनन्तत्वमभ्युपगन्तव्यं स्यात् ।
न चतुर्थः अनुपपन्नत्वादिति चेत्तत्राह–दे ×

Colophon :

— — —

1145

Sl. No. 39637 श्रीभाष्यटीका Ms No. A. 900

Beginning :

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥

ಸಮಸ್ತ ಭುವನಂಗಲ ಸೃಷ್ಟಿಸ್ಥಿತಿಸಂಹಾರಾದಿಗಳನ್ನು ಲೀಲೆಯಾಗಿ ಉಳ್ಳವನು
ನಮಸ್ಕರಿಸಿದ ಹಲವು ಭಕ್ತರುಗಳನ್ನು–

End:

ಅತ್ಯಂತ ವಾತ್ಸಲ್ಯದಿಂದಲೂ ದೋಷದಿಂದಲೂ ಆಕರಣಭೂತವಾದ
ಅಹಂಕಾರವಿಲ್ಲದವನಾಗಿ ಸಂವಿತ್ತಿನ ಉಪಲಬ್ಧಿಗೆ ಒಂದು ಕಾರಣವೂ ಇಲ್ಲ । ಆದ್ದ-
ರಿಂದ ಅಹಂಕಾರಕ್ಕೆ ಜ್ಞಾತೃತ್ವವಾಗಲಿ ಹಾಗೆಯೇ ಉಪಲಬ್ಧಿಯಾಗಲಿ ಇಲ್ಲ ।

Colophon :

— — —

1146

Sl. No. 39639 श्रीभाष्यसारः Ms. No. P. 1211/1

Beginning :

सम्यङ्न्यायकलापेन + विष्णवे ॥
ऐकतन्त्र्ये विमन्यन्ते विमन्यन्ते कर्मब्रह्मविचारयोः । (?)
बहुधा वादिनो यस्मात् तस्मान्निर्णय उच्यते ॥
पूर्व + व्यपदेशात् इति सूत्रेण—

End :

अवच्छेद्यावच्छेदकभाव इति सिध्यति। किञ्च यदाश्रयस्य यद्धर्मत्वं भूयो दृश्यते स तद्धर्मावच्छेदक इति न ब्रूमः —

Colophon :

— — —

1147

Sl. No. 39640 श्रीभाष्यसारार्थसंग्रहः Ms. No. P. 3797/3

Beginning :

स्वशेषाशेषतत्त्वाय नियन्त्रे निर्मलात्मने।
सर्गस्थित्यन्तलीलाय श्रीमते विष्णवे नमः॥
यत्सूक्तिः सुधियां सूते कर्मब्रह्मविवेचनम्।
श्रुतश्रीभाष्यसारार्थः सङ्ग्रहेण प्रकाश्यते॥

End :

मुक्तः षट्कोदितः केचित् सूत्रमन्त्यं विदुः पृथक्।
शब्दात् सङ्कल्पतः कर्मनाशाङ्गावृत्तिरित्यपि॥
किन्तु संख्यातिरेकः स्यादिति सर्वं समञ्जसम्॥

Colophon :

इति श्रीवत्सकुलतिलकस्य श्रीवत्साङ्क श्रीनिवासस्य कृतिषु सारार्थसङ्ग्रहः सम्पूर्णः॥

1148

Sl. No. 39641 श्रीभष्यसारार्थसंग्रहः Ms. No. B. 780/5

Beginning :

वेदान्तद्वयसारार्थान् संगृह्य परिपाल्य यः।
पात्रेभ्यः प्रददौ वात्स्यः श्रीशैलेशं तमाश्रये॥
स्वशेषाशेषतत्त्वाय नियन्त्रे निर्मलात्मने।
सर्गस्थित्यन्तलीलाय श्रीमते विष्णवे नमः॥
यत्सूक्तिः—

End :

शब्दात् सङ्कल्पतः कर्मनाशाङ्गाघृत्तिरित्यतः ।
किन्तु सङ्ख्यातिरेकः स्यादिति सर्वं समञ्जसम् ॥
गुरुप्रसादसंप्राप्तभाष्यसारेण निर्मिते ।
सारार्थसंग्रहेऽध्यायः पूर्णः पूर्णफलोज्वलः ॥

Colophon :

इति श्रीवत्सकुलतिलकस्य श्रीवत्साङ्कश्रीनिवासस्य कृतिषु सारार्थ संग्रहः सम्पूर्णः ॥

1149

Sl. No. 39642 श्रीभाष्यसिद्धान्तसारः Ms. No. P. 189

Beginning :

आनन्दमयोऽभ्यासात् ॥

आनन्दमयाधिकरणे ब्रह्मविदाप्नोति परं, तदेषाऽभ्युक्ता, सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद निहितं गुहायाम् । × य एवं वेद, इत्यादितैत्तिरीयोपनिषत्प्रथमप्रश्नवाक्यैः कर्मवश्यात् त्रिगुणात्मनः प्रकृतिसंसर्गनिमित्त नानाविधानन्तदुःखसागरनिमज्जनेन—

End :

अहं हि सर्वभूतानां भोक्ता च प्रभुरेव च ।
प्रभुरिति—फलदायीत्यर्थः ।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।
यान्ति मद्याजिनोऽपि माम् । इति भगवद्गीतासु प्रतिपादि ×
नम ×

Colophon

मध्ये मध्ये—

'इति श्री लक्ष्मीपतिदेशिकगुरुचरणारविन्दमकरन्दमधुव्रतस्य श्रीमद्रामानुजविरचितश्रीभाष्यादिप्रबन्धप्रवचनैकधुरन्धरस्य श्रीरङ्गनाथकुमारस्य श्रीरङ्गनाथस्यात्यन्तसौम्यशीतलकृपाकटाक्षसुधाप्रवाहपरित्राण.श्रीमत्सीमन्तकुमारेण श्रीभाष्य श्रीरङ्गाचार्येण सङ्गृहीते श्रीभाष्यसिद्धान्तसारे'—

इत्यादि दृश्यते ॥

1150

Sl. No. 39646 **श्रीभाष्यार्थचिन्तनम्** Ms. No. P. 5 13/1

Beginning :

कार्यकारणभावो यः कर्मब्रह्मविचारयोः ।
किञ्चिद्विचार्यते तत्र सूरिणा शठवैरिणा ॥

इह खलु भगवान् भाष्यकारः शारीरकमीमांसाभाष्ये अथातश्शब्दयोः प्रयोगप्राचूर्येण आनन्तर्यप्रयुक्तहेतुभावयोः स्वारस्यात्—

End :

हृद्रङ्गे स्वीयदिव्यानवधिकदया × विधत्ते ।
विद्वद्रामानुजार्ये राचितवति कृपां श्रीमहाचार्यनुन्ने ॥
हयमुखपदाम्भोजद्वन्द्वार्चनैकपरायणो
यतिपतिकृतश्रीमद्भाष्यार्थचिन्तनतत्परः ।
शठरिपुगुरुः विद्वद्रामानुजार्यसुतस्सुधीः
समलिखदिहाक्षेपं सन्तःसमादधतां द्रुतम् ॥

Colophon :

— — —

1151

Sl. No 39648 **श्रीभाष्योपन्यासः** Ms. No. P. 3644/1

Beginning :

वाधूलश्रीमहाचार्यतनयं तत्पदाश्रयम् ।
तत्प्राप्तोभयवेदान्तं श्रीनिवासगुरुं भजे ॥ +

श्रियः पतिः परमकारूणिकः भगवान् सर्वेषां पुरुषाणामुपादित्सितजिहासितेष्टानिष्टतत्साधनानां त्याज्योपादेयविवेकार्थं हर्तुं × दसती विवेक्तुमीशो मानं प्रदीपमिव कारुणिको ददातीत्युक्तप्रकारेण × र्थविषयज्ञानञ्चोत्पादयान् । तच्च ज्ञानं नारायणात् समुत्पन्नं कृतयुगे स्थितमिति कृतयुगे तेनैवाकारेणावर्तिष्ट ।

End :

अनावृत्तिरित्यत्र भगवत्स्वातन्त्र्यान्मुक्तस्य पुनरावृत्तिस्सम्भवतीति आशङ्क्य इममानवमावर्तं नावर्तन्त इत्यादिनानावृत्तिश्रवणादाश्रितव्यामुग्धस्य भगवतस्तन्निवर्तनसङ्कल्पाभावान्मुक्तस्य पुनरावृत्तिर्न सम्भवतीत्युपसंहृतम् ॥

Colophon :

इति महाचार्यकृतिषु श्रीभाष्योपन्यासे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

1152

No. Sl. 39650 श्रीरङ्गगद्यभाष्यम् Ms. No. P. 3028/2

Beginnnig :

चिदचित्परतत्त्वानां तत्त्वयाथार्थ्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ॥
श्रीमल्लक्ष्मणमुनिना शिष्यहितैकाग्रचेतसा कथितम् ।
मितगद्यममृतसारं व्यक्तं व्याख्याति वेङ्कटेशकविः ॥

End :

तत्र यावदात्मभाविकैङ्कर्यकरणाय सङ्कल्पित इत्यर्थः । एवमन्यदपि सर्वं सुसङ्गतमिति ।

द्वयवचनधनानां द्विप्रयोगानपेक्षे
मुषितनिखिलदोषे मुक्त्युपाये स्थितानाम् ।
अमृतमिव पयोधेरात्समेतद्यतीन्द्रात्
व्यवृणुत मितगद्यं वेङ्कटेशः सुमेधाः ॥

Colophon :

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्तचार्यस्य कृतिषु रहस्यरक्षायां मितगद्याधिकारो द्वितीयः ॥

1153

Sl. No. 39652 श्रीरङ्गगद्यभाष्यम् Ms. No. P. 9092/2

Beginning:

श्रीमल्लक्ष्मणमुना शिष्यहितैकाग्रचेतसा कथितम् ।
मितगद्यममितसारं व्यक्तं व्याख्याति वेङ्कटेशकविः ॥

अत्र द्वयार्थानुसन्धानरसिकेन भगवता भाष्यकारेण बृहद्द्वयव्याख्यातमपि द्वयम् —

End :

शरणागतितत्फलविशेषा: सन्दर्शिता: ।
यदत्र सङ्ग्रहेणोक्तं अनुक्तमपि किञ्चन ।
बृहद्ब्रह्मविद्याधिकारे तत् व्यक्तं प्रत्यवमृश्यताम् ॥

Colophon :

— — —

1154

Sl. No. 39653 श्रीविशिष्टपरत्वनिर्णयः Ms. No. P. 6029

Beginning :

लक्ष्मीतन्त्रे—

इति ते कथिताः सन्ति उपायाः × ।
शृणूपायं च × सर्वत्यागसमायासे धर्मान् परित्यज्य सर्वानुच्चावचाङ्गकान् ।

संसारानलसन्तप्तो मामेकं शरणं व्रजेत् ॥
अहं हि शरणं प्राप्तनरेणानन्यचेतसा ।
प्रापयामि तदात्मानं निर्धूताखिलकल्मषम् ॥

End:

एतदेवाभिप्रेत्य ब्रह्मणि श्रीनिवास इति भाषितम् । तत्र च सत्यवादी यद्यङ्गपञ्चकनिरूपितमपि श्रीनिवासत्वेन विशेषितमेव ब्रह्मविद्यावेद्यमित्युक्तं भवतीति श्रीमत्तत्त्वटीकायामनुगृहीतम् ।

ततश्च स्वतन्त्राङ्गप्रपत्योरपि आनुकूल्यसङ्कल्पाद्यङ्गपञ्चके स्वरूपफलसमर्पणगर्भभरसमर्पणरूपे च श्रीविशिष्टस्यैव नारायणस्य प्रतिसम्बन्धित्वं न तु केवलस्येति इदमेव भगवन्निगमान्तदेशिकहृदयसारसर्वस्वमिति निपुणैरनुसन्धेयमिति सर्वं समञ्जसम् ॥

Colophon :

— —

1155

Sl No. 39663 श्रीवैष्णवशब्दार्थः Ms. No. P. 4043

Beginning;

श्रीवैष्णवा इति पुरा निराहुर्य त्वदम्बुरुहः । (?)
तन्मयानुग्रहात्तेषां यथामति विविच्यते ॥

श्री वैष्णवा इति । विष्णोरिमे वैष्णव × । भगवदनन्यार्ह शेषभूता इत्यर्थः । श्रियः । अस्येशाना जगतो विष्णुपत्नी ।

End :

अहिर्बुध्नियो नियच्छतु । इत्यादिषु वाक्येषु श्रीशब्दस्य वेदपरत्वेन समर्थन × मञ्जसम् । अतश्च वेदविदो वैष्णवाः श्रीवैष्णवा इत्यर्थस्य सत्या × सर्वमनवद्यम् ।

Colophon :

आत्रेयवंशजश्रीलक्ष्मीनारायणार्यतनुजातेन ।
श्रीवैष्णवशब्दार्थः प्रपञ्चितोऽयं वरदार्येण ॥

1156

Sl. No. 39665 श्रीसूक्तभाष्यम् Ms No. P. 10101

Beginning :

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
तैत्तिरीयकवेदान्तविवृतिं करवाण्यहम् ॥

End :

सक्षात्परमपदाधिष्ठातृभूतपरमपुरुषचरणारविन्दवित्यैकर + सकल सुलभमिति श्रुतिस्मृतिपुराणसिद्धान्तः ।

श्रीनदालक्ष्मी × सर्वशास्त्रार्थनिर्णये ।
श्रीसूक्तभाष्ये वक्ष्येऽस्मिन् क्षमध्वं भूसुरोत्तमाः ॥

Colophon :

श्रीगोमठं रङ्गभट्टस्य श्रीसूक्तभाष्यं समाप्तम् ॥

1157

S No. 39668 श्रुतिगीतव्याख्या Ms. No. C. 4376/2

Beginning:

श्रुतयः ऊचुः जय जयेति अजां प्रकृतिं जहि विध्वंसय संसरतां चेतनानां प्रकृतिसम्बन्धं निराकुर्यादित्यर्थः ।

End:

सह रजांसीव यदन्तरा सावरणा × इति च यावन्ति संचरन्ति भवन्निधानाः त्वत्पर्यवसायिन्यः श्रुतयः श्रुततन्निरसनेन फलन्ति सफला भवन्ति समस्तचेतनसाजात्यनिरसनेन त्वद्वैलक्ष्यण्यं बोधयन्तीत्यर्थः ।

Colophon:

— — —

1158

Sl. No. 39674 षष्ठ्यर्थदर्पणम् Ms No. P. 7470/4

Beginning:

यत्तु श्रुतं हृदि × मृतं च
तत्तादृशीं शुभगतं नियतं × ।
× पार कृपानुकूलं
गोपालबालमतिवेलगुणं प्रणौमि ॥
यो मादृशां शुभदशां ×
रामानुजस्समुनिरस्तु ममार्थसिद्ध्यै ॥

End:

दूष्यता च तथाविधायोग्यसमुदायपरं वा नाश्रयितुं युक्तम् । × श्रीनिवास × गर्भमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षावरकरुणाकटाक्ष वीक्षाशिक्षितमीमांसाद्वन्द्व ×

Colophon:

इति श्रीनिवासविदुषा विरचितं षष्ठीदर्पणं समाप्तम् ॥

1159

Sl. No. 39675 षष्ठीदर्पणम् Ms. No. C. 929/1

Beginning :

लक्ष्मीचरणलाक्षैकलक्षणं शुभवीक्षणम् ।
शेषक्षितिधराध्यक्षमम्बुजाक्षमुपास्महे ॥
जिज्ञासादर्पणे चोक्तो जिज्ञासार्थविनिर्णयः ।
षष्ठीदर्पणमाधाय कुर्वे षष्ठ्यर्थनिर्णयम् ॥

इह तावद्ब्रह्मजिज्ञासेत्यत्र ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति षष्ठीसमासः श्रीभाष्ये दर्शितः । तत्र नेयं सम्बन्धसामान्ये षष्ठीति ॥

End :

एवं प्रसिद्धार्थपरतयैव सर्वनिर्वाहसम्भवेऽप्यप्रसिद्धार्थकल्पनमन्याय्यम् । रक्षायोग्यसमुदायपरत्वे सम्भवति यत्र प्रविष्टानां शब्देन व्यवहारो दूष्यता च तथाविधायोग्यसमुदायपरत्वं नाश्रयितुं युक्तम् ।

अतो यथोक्त एवार्थो युक्त इति दिक् ॥

Colophon :

इति श्रीशैलकुलतिलक श्रीनिवासाचार्यविरचितं षष्ठ्यर्थदर्पणं नाम प्रकरणम् ॥

1160

Sl. No. 39676 सङ्ग्रहवेदान्तरक्षा Ms. No. P. 5619/3

Beginning :

धीमध्वीकेहयग्रीवसञ्जुष्टे द्युतिपाण्डरे ।
पुण्डरीके मम मनश्चञ्चरीकः प्रवर्तताम् ॥

अथ प्ररीप्सितस्य वेदान्तनामस्तोत्ररूपस्य प्रकरणस्य विघ्नपरिपूरण प्रचयगमनार्थमेकस्मिन्नहोरात्रकालपञ्चकवि ागेन ॥

आद्यं कर्माभिगमनमुपादानं ततः परम् ।

इति विहितं भगवत्सेवनरूपमङ्गलमाचरन्नेव चिकीर्षितं प्रति जानीते उत्थाय योगादभ्येत्य—

End :

निरञ्जनः परमं साम्यमुपैति । सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चितेति । इति श्रुतेः मुक्तानन्दमहानन्दः मुक्तानामानन्दभूतस्व

महानन्दो यस्य स मुक्तानन्दमहानन्दः। स्वाश्रितानां स्वपदप्रापणेन यो महानानन्दः परमपुरुषस्य स एव मुक्तानामानन्दः परमफलित्वं परमपुरुषस्यैवेति भावः। + आधिगगपरिश्रान्ति नाङ्गधरैरतिवाह्य न सुखयति (?) निजच्छायादायि स्वयं हरिचन्दन इति च॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यस्य सर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यस्य श्रीवत्साङ्कश्रीमन्नारायणमुनीन्द्रस्य कृतिषु संग्रहवेदान्तरक्षायां चतुर्थस्याध्यायस्य चतुर्थः पादः॥

1161

Sl. No. 39677 — सगुणनिर्गुणश्रुतिनिर्वाहः — Ms. No. C. 2524/9b

Beginning:

केचित्सगुणनिर्गुणश्रुतिविरोधे निर्गुणश्रुतिबलेन सगुणश्रुतीः बाधन्ते तदनुपपन्नमिति मत्वा स्वयमबाधेनैव श्रुतिद्वयनिर्वाहमनुसन्धत्ते॥

End :

किञ्च अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामस्सत्यसंकल्प इति हेयगुणान् प्रतिविध्य सत्यकामत्वादिकल्याणगुणान् विदधती स्वयमेव व्यवस्थापयति इति सर्वमुपपन्नम्॥

Colophon :

— — —

1162

Sl. No. 39678 — सच्चरितदिव्यरत्नावली — Ms. No. P. 6035

Beginning:

श्रीभाष्यकारो मतभूषणं यं
प्राचीकशत्तस्य महान्ववाये।
सुदर्शनार्यस्य जयत्युदारः
श्रीरङ्गराजो गुरुसार्वभौमः॥

End :

श्री भाष्यकृत्स्वमतभूषणसंज्ञया यं
प्राचीकशद्वरसुतं प्रियभागिनेय्याः।

श्रीमत्सुदर्शनगुरोरनघान्ववाये
श्रीरंगराजगुरुरस्य जयत्यतुल्यः ॥

Colophon :

इति श्रीभगवद्रामानुजमतभूषणमाडपूशितिरुवरंगमाण्डान् श्रीमच्छ्रीरंग राजमहादेशिकतनुजेन तदेकदैवतेन तत्प्रसादलब्धवाजपेयाद्यनेकक्रतुयजन धन्यतावता श्रीशैलाचार्यदासेन विरचिता भगवन्निगमान्तदेशिकसच्चरितदिव्य रत्नावली संपूर्णा ॥

1163

S No. 39679 | सच्चरित्रपरित्राणम् | Ms. No. P. 1405

Beginning :

अथ परमैकान्तिनां नित्यकर्म उच्यते ।
परमैकान्तिस्वरूपमाह भरद्वाजः—
न्यस्ताशेषभरः श्रीशे यस्तु दास्यैकजीवितः ।
स एष परमैकान्ती । अन्यत्रापि —

End :

एकान्तिनं त्यजेच्छास्त्रघोषणाच्चेतसा सदा ॥
तथैव परमैकान्ती सोयं बुद्ध्या परित्यजेत् ॥
इतिं पाद्मवचनं इहानुसन्धेयम् ।

Colophon :

वीरराघवदासेन वाधूलान्वयजन्मना ।
सच्चरित्रपरित्राणं सतां सम्प्रीतये कृतम् ॥

1164

Sl. No. 39681 | सच्चरित्ररक्षा | Ms. No. P. 77

Beginning:

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
नृसिंह × चक्रादिलञ्छन
भूतस्सुभगवतश्चरणारविन्दे ।

तद्भुक्तभोगरसिकान् त्रिदिवेन्द्रवन्द्यान्
पुंसः प्रमाणशरणान् × सोद्वहामः ॥
यतिपतिचरणाम्भोरुहजःप्रभावेन सन्निवृत्तरजाः ।
विदधाति वेङ्का × रामिमां सच्चरित्ररक्षाम् ॥

End :

शमितभवभयानां शङ्खचक्रादिचिह्नै-
र्दिविषदधि × भून्मू × न्दिव्यतामूर्ध्वपुण्ड्रैः ।
उचितगुणगणानां प्रापणप्राशनाद्यै—
रयरहमनघानामस्मि पात्रं दयायाः ॥

Colophon :

इति कवितार्किकसिंहस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सच्चरित्र रक्षायां भगवन्निवेदितोपयोगाधिकारस्तृतीयः ॥

1165

Sl. No. 39687 सच्चरित्ररक्षा Ms. No. P. 9548/1

Beginning :

चक्रादिलाञ्छनभृतस्सुभगोर्ध्वपुड्रान्
न्यस्तात्मनोभगवत × शिरसा वहामः ॥
यति पतिचरणाम्भोरुहरजःप्रभावेन सन्निवृत्तरजाः।
विदधाति वेङ्कटेशः स्थिरामिमां सच्चरित्ररक्षाम् ॥
सद्भिर्धृतेषु सततं—

End :

अनुयागापरमिधानमनुदिनमनुविधेयमिति ॥
श्रीमद्वेङ्कटनाथेन सतामित्थं समर्थितम् ।
पावनं भगवद्भक्तप्रापणादिनिषेवणम् ॥

Colophon :

इति कवितार्किकसिंहस्य + कृतिषु सच्चरित्ररक्षायां भगव-
न्निवेदितोपयोगाधिकारः तृतीयः ॥

1166

Sl. No. 39689 **सच्चरित्ररक्षापरिष्क्रिया** Ms No P. 4405

Beginning :

नादूलसौम्यजामातृपौत्रं तत्पादसंश्रयम् ।
वेङ्कटार्यात्मजं वन्दे श्रीनीवासमहागुरुम् ॥

केनाप्यु × भूतभूद्रश्रुतिशिखरगुरोरद्भुतानुग्रहेण
प्रत्यर्थे प्रौढवादे द्विरदविदलनव्यग्र × वात्मा ।
श्रीरामध्वांक्षशिक्षा विधिविहिततृणन्यायतः कारितोऽहं
नैसर्गश्रीशदास्यव्यवसितहृदयो मैधृत्रः श्रीनिवासः ॥

× खलु कतिवचनश्रुतिस्मृतीतिहासपुराण × दूषयन्ति तदाभासनिरसनपूर्वकं सच्चरितपरिष्क्रिया क्रियते । तथाहि—

End :

तस्माद्देवतारूपकर्मप्रकारत्वविवक्षां विनाप्यव्यवस्थासिद्धेः तद्विवक्षायां सुदर्शनप्रतिष्ठाकर्मप्रकाशकत्वासिद्धेः किञ्च × शब्दस्य कर्मपर्यायत्वात् कर्म पवित्रमिति पवित्रेषु प्रतीतिःस्यात् ।

Colophon :

— — —

1167

Sl. No. 39690 **सच्चरित्रसुधाविधिः** Ms. No. P. 1169

Beginning :

श्रीशं श्रियं च सेनेशं शठारिं नाथयोगिनम् ।
पद्माक्षं राममिश्रं च यामुनं च मुनिं ततः ॥
श्रीमद्रामानुजमुनिं प्रणमामि पुनः पुनः ।
× × ×
वीरराघव × निह नैध्रुवः कुरुतेऽधुना ।
सच्चरित्रसुधानिधिं रघुवीरचोदित आदरात् ॥

End :

स्त्रीणां धर्मस्त्वेवमुक्तः यथामति मयाधुना ।
एते समीक्ष्य कर्तव्या स्त्रीभिरिष्टफलप्रदाः ॥
चतुर्दशशतैः श्लोकैः पञ्चविंशति संयुतैः ।
शतेन पञ्चविंशद्भिः श्लोकैः स्त्रीधर्म ईरितः ।
वत्सरे काल्युक्त्याख्ये युग्मे मासेन्दुवासरे ।
सप्तम्यां श्रीरामतारे च सच्चरित्रसुधानिधिः ॥
सीतारामः सर्वशक्तः सच्चरित्रसुधानिधिः ।
नैध्रुवश्रीनिवासार्यसूनुस्स्वयमकारयत् ॥

Colophon :

प्रेमेब्दे मासि गानज्ञे सेनतारे प्रवासरे ।
कृतः श्लोकैर्मठभयैः सच्चरित्रसुधानिधिः ॥

1168

Sl. No. 39691 सज्जनसंभवः Ms. No. A. 331/2

Beginning :

सर्वाधीश्वरलक्ष्मीशसपर्यानिरतात्मनाम् ।
सतां वैखानसाख्यानां सम्भवोऽत्र निरूप्यते ॥
इह खलु जगति कमलारमणारविन्दद्वन्द्वपरिचर्यापरायणानां परित्यक्त विधिशर्वाद्यर्वाचीनदेवतानां निखिलनैगमिकधर्मनिर्माण—

End :

श्रुतिस्मृतिपुराणोक्तसमीचीनार्थगोचरम् ।
सम्यक्ज्ञानं सदाभूयादाज्ञया श्रीमतो हरेः ॥
श्रीमद्वेङ्कटनाथेन श्रेयसां भूयसे सताम् ।
वेदान्तार्येण विवितस्सेत्थं सज्जनसम्भवः ॥

Colophon :

इति सर्वतन्त्रस्वतन्त्रस्य कवितार्किकसिंहस्य श्रीमद्वेङ्कटनाथस्य कृतिषु सज्जनसम्भवः समाप्तः ॥

1169

Sl No. 39692 सत्तात्रयखण्डनम् Ms. No. P. 3645/8

Beginning;

अत्रानादिदुरितसञ्चयवञ्चितहृदयाः मृषावादिनः केचिदाहुः-सत्यत्वं त्रिविधं—पारमार्थिकं व्यावहारिकं प्रातिभासिकञ्चेति ।

End :

विजरो विशोक इति वाक्यान्तरानुगुण्याच्च ।
अधिकन्तु भेदनिर्देशादित्यादिषु भेदशब्दानुपपत्तिप्रसङ्गाच्च ॥

Colophon :

— — —

1170

No. Sl. 39693 सत्सम्प्रदायनिष्कर्षः Ms. No. P. 6043

Beginning :

.× श्रीमदाम्नायमकुटीयुगलीगुरुम् ।
सत्सम्प्रदायनिष्कर्षः क्रियते महतां मुदे ॥
भगवता भाष्यकारेण 'ब्रह्मणि श्रीनिवासे'' ×

End :

एतच्च परिकरविभागाधिकारे भगवतैव विशदीकृतम् । तस्मादङ्ग पञ्चकसम्पन्नमेव प्रपदनं परमपुरुषार्थपर्यन्तसर्वाभिमतसाधनमिति निरवद्यमेतत् ॥

Colophon :

— — —

1171

Sl. No. 39696 सद्विद्याविजयः Ms. No. P. 649/2

Beginning:

वेद्यता ब्रह्मविद्याभिर्हरेरिति निरूपितम् ।
तेन तत्रैव जिज्ञासा सद्विद्याल × नी ॥

उक्तं भगवतस्सर्वविद्यावेद्यत्वम् । अतः स एव जिज्ञास्यः । जिज्ञास्यलक्षणमुक्तं—

यतो वा इमानीत्यादि—

End :

घटो निवर्तत इति व्यवहारप्रसङ्गः इति—तन्न—धात्वर्थविशिष्टे कर्तरि धात्वर्थरूपफलोपहिते व्यापारे वा वर्तमानत्वाद्यन्वयादिति ॥

इति सद्विद्याविजये अविद्यानिवृत्तिभ :

Colophon :

इति श्री वाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमासादितपरावरतत्त्वयाथात्म्येन + तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये सद्विद्याविजय × यः ॥

1172

Sl. No. 39697 सन्धानसेवा Ms. No. P. 2515/2

Beginning :

शुक्लाम्बरधरं + । यस्यद्विरद +। लक्ष्मीनाथ + ।

यो नित्यमच्युत + । चरणं पवित्रं विततं + ।

गृणाहि घृतवती + । शान्ताकारं भुजग + ।

ज्योतिश्चक्रधरं सरत्नकटकं कल्याणपीताम्बरं

भूम्यालिङ्गितमाश्रये सुमनस ांस्थित्यैव सर्वोत्करम् ।

भास्वत्पादजुषां दिशन्तमनिशं सारूप्यमत्युज्वलं

श्रीमद्ज्ञानजयेश्वरविभुं मेरुं परं ममहे ॥ (?)

End :

ಗೃಹಾಭ್ಯಂತರಕ್ಕೆ ಬಿಜಾವ ಮಾಡಿಸಿ ಕೊಂಡು ಹೋಗಿ ಅವಭೃಥ ಸ್ನಾನ ಮಾಡಿ ಸ್ತುಗು ಎಂಬ ಅರ್ಥವು. ರಾಜಾರಾಷ್ಟ್ರಗೆ ಸುಖವಂ ಪಾಲಿಸಲಿ ಎಂದು ಆಶೀರ್ವಾದ.

स्वस्ति प्रजाभ्यः—सुखिनो भवन्तु ॥

काले वर्षतु पर्जन्यः—सन्तु निर्भयाः ॥

कावेरी वर्धतां—वर्धताम् ॥

Colophon : —

1173

Sl. No. 39699 समासवादः Ms. No. B. 389

Beginning :

मुररिपुचरणसरोजं नत्वा स्तुत्वा च लक्ष्मणमुनीन्द्रम् ।
तनुते समासवादं विशदं कुतुकादनन्तार्यः ॥

इह तावत्सूत्रघटकीभूतस्य ब्रह्मजिज्ञासेति समासस्य प्रतिपाद्यार्थो विचार्यते ।

End :

पूर्वं सनर्थविशेष्यतापक्षं प्रतिपाद्य तदनन्तरं धात्वर्थविशेष्यतापक्षस्य प्रतिपादनेन प्रथमकल्प एव तेषां निर्भराङ्गीकारादिति सर्वमवदातम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon :

— — —

1174

Sl. No. 39701 समासवादः Ms. No. B. 530

Beginning :

श्रीमान्कृष्णः प्रपन्नानां फलदश्शरणं फलम् ।
प्राचामाचार्यवर्याणामिति सिद्धान्तपद्धतिः ॥

ननु शरणपदेनोपायत्वमुच्यते । उपायत्वं च भगवतः फलप्रदत्वमेव । अतः फलदश्चेति पदं निरर्थकं इति चेन्मैवम्—

End :

प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदं इति चोक्तम् । अतः भगवत्प्राप्तेरेव स्वरूपानुरुपपुरुषार्थतया कैवल्यस्य नित्यत्वेन परमपुरुषार्थत्वे सत्यपि स्वरुपाननुरुपपुरुषार्थत्वं सिद्धमिति ।

Colophon :

इति श्रीशैलकुलतिलक श्रीमद्वेंकटनाथतातसूरिविरचितायां सम्प्रदाय-चन्द्रिकायां सप्तमः प्रकाशः ॥

समाप्ता च सम्प्रदायचन्द्रिका ॥

1175

Sl. No. 39702 सम्प्रदायचन्द्रिका Ms. No. P. 926

Beginning:

श्रीमान् कृष्णः प्रपन्नानां फलदः कारणं फलम् ।
प्राचामाचार्यवर्याणामिति सिद्धान्तपद्धतिः ॥

ननु शरणपदेनोपायत्वमुच्यते । उपायत्वं च भगवतः फलप्रदत्वमेव । अतः फलप्रदत्वं निरर्थकमिति चेत् न शरणवरणाधिकारिणं प्रति भगवतः फलप्रदत्वव्यतिरेकेणोपायभावस्य दुरपह्नवत्वात् । तथाचोक्तं अहिर्बुध्निय संहितायां सप्तदशाध्याये —

End:

भूमविद्यायां प्रतिपादितः चिन्मात्रात्मोपासकः कश्चन पञ्चाग्निविद्योक्तप्रकृति विनिर्मुक्तात्मोपासकश्च न अचिन्मात्रात्मोपासककेवलमण्डलान्तर्गतस्थं न चार्चिरादिगतभावश्च वेदातदेशिकैः साधिते तदन्यकेवलस्य प्रकृतिविनिर्मुक्तात्मानुभवः + भगवदनुभवजनितप्रीतिकारितकैङ्कर्यप्राप्तिरेव उत्कृष्टमिति सिद्धम् ॥

Colophon:

इति सम्प्रदायचन्द्रिकायां सप्तमः प्रकाशः ॥

1176

Sl. No. 39703 सम्प्रदायदीपिका Ms. No. P. 4939

Beginning

श्रीमद्यादवशैलाग्रशेखरं सतगुण × ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥
वन्दे फणिप्रवर × श्रीभाष्यकारवरसौम्यमुनीश्वराख्यं
यत्संस्कृतद्रमिडसूक्तिभिरुदारभा'ाधनं भगवतः प्रकटीचकार ॥ (१)

End :

यं वायवे नमः । ओं नमो नारायणाय शोषयामि । × शुचये नमः । ओं नमो नारायणाय दा × यामि । × मृताय नमः । ओं नमो नारायणाय स्फालयामि । सुरभिमुद्रां प्रदर्शयेत् ॥

Colophon :

इति श्री सम्प्रदायदीपिकायां तृतीयः खण्डः ॥

1177

Sl. No. 39704 | सम्प्रदायरक्षा | Ms. No. P. 6022

Beginning :

× × ×

× × रङ्गराजगुरुं भजे ॥

यत्पादुकासेवकतैकभोगः पदेऽपि विष्णोः परमे × ।

श्रीमन्तमाम्नाय शिरोगुरुं तं

श्रेयोगुणाब्धिं शरणं प्रपद्ये ।

End :

आशु प्राप्तिः परिमितरसा जीवदेशेत्यनुगृहीतरीत्या भक्तप्रपन्नयोः प्रपत्तिष्वपि तत्तदुपाय × शावश्यंभावेन ×

Colophon :

— — —

1178

Sl. No. 39705 | सम्प्रदायसुदर्शनम् | Ms. No. B. 705

Beginning :

श्रीरङ्गराजगुरुपुङ्गवमस्मदार्य

रामानुजोत्तरपराङ्कुशमस्य मान्यान् ।

श्रुत्यन्तसूरियतिशेखरयामुनेयान्

नाथं शठारिमपि नौम्यथ दम्पती नौ ॥

\+ + +

असम्प्रदायतमसामपहत्यै श्रियः पतिः ।

प्रयोजयत्यमेयात्मा सम्प्रदायसुदर्शनम् ॥

End :

अपामेव भूतान्तरसंसृष्टानां आत्मनस्तु तत्परिष्वङ्गमात्रमिति चिदचितो-र्विवेकमभिधाय तद्य इत्थं विदुस्तेर्चिऽषमभिसंविशन्ति इमं मानव-मार्तं नावर्तन्त इति —

Colophon :

इति श्रीमदाण्डान् श्रीशैलवंशकलशोदधिकौस्तुभश्रीमच्छ्रीरङ्गराज महादेशिकतनूजस्य तदेकदैवतस्य श्रीनिवासदासस्य कृतिषु सम्प्रदायसुदर्शने सम्प्रदायचन्द्रिका षष्ठप्रकाशतिरस्कारिणी षष्ठी स्फूर्तिः ॥

1179

Sl. No. 39714 ब्रह्मविद्याविलासः Ms. No. C. 705

Beginning :

अनन्तकल्याणगुणाभिरामं
अनन्तभोगेशयमप्रमेयम् ।
अज्ञानविज्ञानशरीरजुष्टं
भजे जगत्कारणमद्वितीयम् ॥

कुमारतिर्मलाचार्यशर्मेति भुवि विश्रुतः ।
वेदान्तमार्गविशदामकरोन्मृदुलात्मिकाम् ॥

End :

शरं धनुषि सन्धाय धूर्जटिर्जगदीश्वरः ।
भगवत्तेजसा गुप्तः ददाह त्रिपुरं नृपेति ॥
श्रीमद्रामायणेऽप्युक्तं सर्वसंवादकं यथा —

Colophon :

— — —

1180

Sl. No. 39717 सात्त्विकादिपुराणविभागः Ms. No. P. 8168/1

Beginning :

एवं च सकलमहाजनपरिग्रहोन्नीतदृढतरप्रामाण्यवैष्णवादिभिः पुराणैरितिह सैश्च भारतादिभिरैककण्ठ्येन सर्वा श्रुतयोपबृंहिता इति तद्विरोधिनां राजसानां तामसानां च पुराणानां श्रुत्युपबृंहणगोष्ठीबहिष्ठतया निखिलनिगमशिखरमुखरितनिजमहिमा भगवान् नारायण एव जगज्जन्मादिकारणं ब्रह्मेति सिध्यतीति निष्कण्टकोऽयं घण्टापथः ।

तस्मान्नारायणस्यैव परब्रह्मत्वं श्रुतिस्मृत्योस्तात्पर्यविषयोऽर्थ इति वैकदिस × शिखामणीनां शुकशौनकपराशरपाराशर्यादीनामस्मदाचार्याणां च सिद्धान्त रहस्यं इति सर्वं समञ्जसम् ॥

Colophon:

— — —

1181

Sl. No. 39718 सात्विकादिपुराणविभागः Ms No. P. 9554/1

Beginning:

श्रीमान्वेंकटनाथार्यः × सदा हृदि ॥
परतत्त्वं च सर्वस्मात्परत्वं ब्रह्मणः परम् ॥
तेनान्यासमबुद्धेश्च दोषहेतुत्वमुच्यते ॥
विष्णोः स्वरूपमाहात्म्यादज्ञेयत्वं ततः परम् ।
ब्रह्मादीनां च सृज्यत्वं तेषां तस्य सहायता ॥

End:

पुरुषा राजसा ज्ञेया नानादेवतवादिनः ।
बाह्या निर्देवताश्चैव तामसाः परिकीर्तिताः ॥
रजस्तमोऽभिभूतानां ननु मोक्षः कथञ्चन ॥

Colophon:

इति सात्विकराजसतामसविभागः ॥

1182

Sl. No. 39719 सामानाधिकरण्यवादः (गुरुः) Ms. No. P. 3039/1

Beginning:

श्रीमद्यादवभूधराङ्कणलसन्मदारमिन्दीवर-
श्रेणीकान्तझरीपरीतवपुषं निध्याय नारायणम् ।
श्रीरामानुजसूचितश्रुतिशिखासिद्धान्तबद्धान्तरः
सामानाधिकरण्यसद्मनिकां ग्रथ्नात्यनन्तस्सुधीः ॥
इह खलु 'सर्वं खल्विदं ब्रह्म' 'अयमात्मा ब्रह्म' 'तत्त्वमसि' इत्यादि समानाधिकरण —

End :

परमात्मपरत्वेन मुख्यत्वसंभवात् गौणपरत्वाश्रयणं व्यर्थमिति चेन्न— चतुष्पदा षड्विधेति चतुष्पात्त्वषाड्विध्यकीर्तनावैयर्थ्याय तत्साहश्येन गौण-वृत्तेरेव तत्राश्रयणादिति दिक् ॥

Colophon :

इति गुरुसामानाधिकरण्यवादः ।
शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितः वादार्थोऽयं विजृम्भताम् ॥

1183

Sl. No. 39721 सामानाधिकरण्यवादःगुरुः Ms. No. P. 3039/6

Beginning :

श्रीरमणचरणयुगळं ध्यात्वा नत्वा च सम्यगाचार्यान् ।
सामानाधिकरण्ये वादं वितनोत्यनन्तार्यः ॥

इह खलु सर्वं खल्विदं ब्रह्म, तत्त्वमसि, अयमात्मा ब्रह्म इत्यादिसमा-नाधिकरणवाक्यार्थो विचार्यते ॥

End :

ब्रह्मादि × दस्य ब्रह्मशरीरत्वावच्छिन्ने लक्षणाग्रह × योग्यता-ज्ञानादीनां हेतुत्वस्य क्लृप्तत्वेन गौरवाभावात् । अधिकमन्यत्रानुसन्धेयम् ॥
शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon :

इति सामानाधिकरण्यवादार्थस्समाप्तः ॥

1184

Sl. No. 39722 सारदीपिका Ms. No. P. 7567/1

Beginning :

द्वितीये तु परार्धेते रिने त्वाचय सप्तमे (?) ॥
मन्वन्तरे वर्तमाने त्वष्टाविंशे चतुर्युगे ।

कलेरादौ जन्मयोगी शठकोप इति श्रुतः ।
मद्भक्तोऽहं भविष्यामि नेतुं द्रामिडतां श्रुतिम् ॥

End :

आचार्योक्तरीत्याऽऽचार्यानुग्रहेणैवायं प्रबन्धः पुष्करस्समाप्तः ॥
विवृतमिह रहस्यं वेदचूडार्यशिक्षा-
क्रमपरिणतबुध्या +
रामानुजो मुनिरमुं व्यलिखत्सुरक्षाम् ॥

Colophon :

इति श्रीमदहोबलशठकोपमुनिसांप्रदायिकश्रीनिवासमुनिचरणावलम्बिना कल्याणरामानुजमुनिना विरचितायां सकलरहस्यार्थसंग्राहकतया स्वकृत-सत्संप्रदायसाराख्यप्रबन्धव्याख्यायां सारदीपिकायां निगमनाधिकारः सप्तमः ॥

1185

Sl. No. 39723 सारनिष्कर्षः Ms. No. P. 4919/1

Beginning :

निर्विष्टं निगमान्तदेशिकदयाकल्लोलदिव्योक्तिभिः
निष्प्रत्यूहविसृत्वर + किं नः फलं शिष्यते ॥
मायामोहनिशात्यय + शरण्यः सताम् ॥
अध्यात्मशास्त्र + वेदान्तगुरवे नमः ॥
प्रणम्याम्नायमकुटीदेशिकं करुणानिधिम् ।
तत्सूक्तिसारनिष्कर्षः क्रियते तत्त्वविन्मुदे ॥
श्रीं × रपि ब्रह्मशब्देन योगरूढेन —

End :

अतः श्रुतेनैव धातुना शरणागतेरभिधानमभिमतं भगवतो निगमान्त देशिकस्येति निष्कण्टकोऽयं घण्टापथः ॥
अति कृपणोऽपि जन्तुः + संपदुपरुम्भनमात्महितम् ॥

Colophon :

इति श्री भगवद्रामानुजमतभूषणमाडपूशु तिरुवरङ्गमाण्डान् श्रीरङ्गराज देशिकतनुजेन तदेकदैवतेन तत्प्रसादलब्धवाजपेयाद्यनेकक्रतुयजनधन्यतावता श्रीशैलाचार्यदासेन विरचितः सारनिष्कर्ष :संपूर्णः ॥

1186

Sl. No. 39725

सारसंग्रहः

Ms. No. P. 1870/1

Beginning:

प्रपद्ये निरवद्यानां निषद्यां गुणसम्पदाम् ।
× तानां शठकोपमुनीश्वरम् ॥ +
उज्जिजीविषतां पुंसां रुचितोपायनिश्चयः ।
श्रुतिस्मृतिपुराणादिशो × ॥
श्रुतार्थमनानायैव सोऽयं मम समुद्यमः ॥ +
सूक्तिसंग्रह एव स्यात् प्रयोक्तॄणां मनोमुदे ॥ +
प्रकाशयामि तत्सोऽयं भगवर्दंप्रियवैभवम् ।
परं हिंतमिदं चेति प्राज्ञैस्संगृह्यतेतराम् ॥

End :

यतीन्द्रो रम्यजामाता देशिको दैवतं सताम् ।
स एव देवराजाख्यसौम्यजामा × करः ॥
आदेशाद्देशिकेन्द्राणां अकार्षीत्सारसङ्ग्रहम् ।
श्रीमच्छठारियोगीन्द्रपदपङ्कजषट्पदः ॥
श्रीमन्नारायणयोगी जीयादाचन्द्रतारकम् ॥

Colophon :

— — —

1187

सारसंग्रहः

Ms. No. P. 6049

Sl No. 39726

Beginning :

प्रपद्ये श्रीमदाम्नायमकुटीयुगलीगुरुम् ।
सत्त्वस्थानां प्रसादाय क्रियते सारसंग्रहः ॥
श्रीनिवासः परं ब्रह्मेत्येतच्छ्रीभाष्यसम्मतम् ॥

End :

त्रिशतीकारिका चेयं सारसङ्ग्रहरूपिणी ।
श्रीसारक्षीरवाराशेः सुधावत्सेव्यतां बुधैः ॥

कलिना मलिनोऽपि जन्तुरित्थम् +
कृपया केवलमन्वभूत्समग्रम् ॥

Colophon :

इति श्रीभगद्रामानुजमत × श्रीशैलाचार्यदासस्य कृतिषु सार-
सङ्ग्रहः सम्पूर्णः ॥

1188

No. Sl· 39728 सारसंग्रहव्याख्या Ms· No. P. 6050

Beginnnig :

आचार्यवंशमानम्य श्रीधरेणावतंसितम् ।
सारसङ्ग्रहरक्षेयम् क्रियते महतां मुदे ॥
श्रीमदाम्नायमकुटीयुगलीगुरुमिति ॥
यद्यपि श्रीरङ्गराजदिवाज्ञालब्ध—

End :

निवृत्तव्यापारतावचनं शरण्यस्यैवोपायान्तरवत् रक्षासङ्कल्पहेतुत्वश्चे-
त्येतदुभयमपि × पाद्यत इति ॥

Colophon :

सारसंग्रहरक्षा सम्पूर्णा ॥

1189

Sl· No· 39729 सारसर्वस्वम् Ms. No.P . 4919/7

Beginning:

श्रीसूक्तिसारसर्वस्वं निगमान्तगुरोरिदम् ।
प्रकाश्यते तत्प्रसादात् कारुण्यकलशाम्बुधेः ॥
श्रीमन्मलमन्त्राधिकारे—इह संग्रहतः श्रीमान्—

End :

इति न किञ्चित् सङ्करम् ॥
इत्थमव्यक्तभावानां [शुभार्था] × रनाविलम् ।
तात्पर्यं विशदीकृत्य सूक्तिभिर्निश्चलीकृतम् ॥

Colophon :

इति भगवद्रामानुजमतभूषणसाडपूशितिरुवरङ्गमाण्डान् श्रीमच्छ्रीरङ्गराज महादेशिकतनूजेन तदेकदैवतेन तत्प्रसालब्धवाजपेयाद्यनेकक्रतुयजनधन्यतावता श्रीशैलाचार्यदासेन विरचितं सारसर्वस्वं सम्पूर्णम् ॥

1190

Sl. No. 39733

सारार्थचतुष्टयम्

Ms. No. P. 272

Beginning :

× कपरिपूर्णशशिकोटि
श्रीधरमनोहरसटापादलकान्त ।
पालय कृपालय भवाम्बुनिधिमग्नं
मामसुरपरकाल नरसिंह नरसिंह ॥
पादकमलावनततपातकिजनानां
पावनपरायणपतेतत्रिवरकेतो ।
भावनपरायण पुराण परया मां
प हि कृपयैव नरसिंह नरसिंह ॥

End :

वक्ष्ये कैङ्कर्यवृत्तावित्येवं सत्यज्ञनिरूपणम् ।
नारायणपदैनैपा नमसा × उच्यते ॥
समन्वयविरोधाभ्यां फलं तस्य × साधनम् ।
वदतभीरंशैर्भाष्यस्य व्यज्यन्ते × अमीष्षटम् । (?)
इति वात्स्यन सूरिणा वरदाचार्येणवम्मिना ।(?)
रामानुजार्यस्वस्रीयपौत्रेण × प्रकाशिताः ॥

Colophon :

इति श्रीमत्सरार्थचतुष्टयं सम्पूर्णम् ॥

1191

Ms. No. P. 6122

सारार्थामृतवाहिनी

Sl No. 3973;

Beginning :

आरभ्य स्वगुरोरा च भगवतोदयान् गुरून् ।
प्रणम्य वर्ण्यते श्रीमत्साराराथामृतवाहिनी ॥
यथावत् तत्त्वविद्भिः नेदं सर्वैर्मुमुक्षुभिः ॥

End

घटायित्वार्चिराद्यैः × ॥
× खिलैर्द्विगुणैः ॥
× परमकल्याणैः सर्वैरपि शुभाश्रयैः ॥

Colophon:

— — —

1192

Sl. No. 39738 सिद्धान्तचन्द्रिका Ms. No. B. 381

Beginning:

× तं भुवनमखिलं विश्वं बिभर्ति
यत्सङ्कल्पाद्दुरितनिकरैः मुच्यते कोऽपि जन्तुः ।
सानुक्रोशस्समः ×
× × धत्तां मुकुन्दः ॥

विष्वक्सेनो भवतु शरणं स्यात्प्रसन्नश्शठारिः
+ + +
चित्तेऽस्माकं शमितकलुषः सन्निधत्तां यतीन्द्रः ॥

End

अज्ञः क्वाहं क्व च मम बलं स्थापने सत्पथस्य
क्वासौ धर्मः श्रुतिषु विहितः संसृतिध्वंसहेतुः ।
सासूयानामपि न हरिता (?) श्रोत्रभावो जनानां
वक्ता श्रोता निगमशिरसां देशिकः प्रीयतां मे ॥

Colophon:

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसम्प्रदाय प्रवर्तक × श्रीमदादिवरदाचार्यतनयस्य चरणारविन्दचञ्चरीकस्य कुम्भघोणनिवासस्य + वेदान्ताचार्यस्य कृतौ सिद्धान्तचन्द्रिकायां द्वितीयः परिच्छेदः ॥ सिद्धान्तचन्द्रिका समाप्ता ॥

1193

Sl. No. 39739 **सिद्धान्तचिन्तामणिः** Ms. No. P. 5

Beginning :

ध्येयं सतां सर्वपदाभिधेयं
मेयं श्रुतीनामपि भागधेयम् ।
सन्त्यक्तहेयं चिदचित्सकायं
ब्रह्माद्वितीयं प्रणमाम्यमेयम् ॥

\+ \+ \+

इह खलु भगवान् बादरायणो मुनिः —

End :

निमित्तमुपादनं चेति प्रामाणिकः पन्था इति सर्वमवदातम् ॥
अभिमतसकलार्थानर्थितेभ्यो ददद्भ्यः × ×
क्लक्षो लुप्तपरोक्तयुक्तिनिकरः भूयात्सतां प्रितये ॥

Colophon :

— — —

1194

Sl. No. 39741 **सिद्धान्नचिन्तामणिः** Ms. No. P. 652

Beginning :

ध्येयं सतां सर्वपदाभिधेयं
मेयं श्रतीनामपि भागधेयम् ।
सन्त्यक्तहेयं चिदचित्स्वकायं
ब्रह्म द्वितीयं प्रणमाम्यमेयम् ॥
यतिपतिमानमामि निगमान्तगुरुं
प्रणमाम्य × राश्रये मम पितामहमण्णगुरुम् ।
पितरमपि प्रणौमि मम भाष्यगुरून्
कमलानिलयमखीश्वरांत्सकरुण × कलये ॥
× सिद्धान्त चिन्तामनुभूय भूय-
स्सिद्धान्तिकं वर्त्म न ये विदन्ति ।

सिद्धान्तचिन्तमा × मेन मा दा
वादायते तत्वपदं विदन्तु ॥
इह खलु भगवान् बादरायणो मुनिरौपनिषदः पुरुष इत्यादि—

End :

तान्येव चायनं यस्य तेन नारयणः स्मृत इत्यादिनिर्वचनावगतसर्वो पादनत्वादिनिमित्तकनारायणदिशब्दस्य व्यपदेश इत्यादिकं सूक्ष्मया दृष्ट्यावगन्तव्यम् । एवमन्यान्यपि, प्रमाणानि भाष्यविद्भिरनुसन्धेयानि ब्रह्म जगतो निमित्तमुपादानं चेति प्रामाणिकः पन्था इति सर्वमवदातम् ॥

Colophon :

श्री शैलान्वयवंशमण्डनमणिः श्रीतातयार्याग्रणीः
लक्ष्माम्बा च सहाण्णयार्यमखिना प्रासूत यं सादरम् ।
तेन श्रीनिधिनामकेन विदुषा सिद्धान्तचूडामणिः
क्लृप्तो लुप्तपरोक्त्युक्तिनिकरो भूयात्सतां प्रीतये ॥

1195

Sl. No. 39744 श्रीसूक्तभाष्यम् Ms. No. P. 3347/1

Beginning :

× × णां मुनिः ॥
औनिषदः पुरुषः इत्यादि श्रौतासाधारणनिर्देशैः वेदान्तैकवेद्यतयावगतं परं ब्रह्माथातो ब्रह्मजिज्ञासेति , जिज्ञासार्थं प्रतिज्ञाय तदवच्छेदकापरिचये तस्याः दुरधिगमत्वात् तदवगमाय तद्विजिज्ञासस्वेति—

End :

कौण्डिन्यश्रीनिवासार्या × याप्यग्रजानुग्रहेण
श्रावं श्रावं यतिपतिवचसां भावमिष्टानुभावम् ।
ग्रन्थं सिद्धान्तचिन्तामणि ममुमतनोत् श्रीनिवासो विलासा-
देनं ग्रन्थं तु सन्त स × यः भूयः ॥
× कुलान्वयमौळिमण्डनमणितनयो योग्रणी
लक्ष्माम्बा च सहाण्णयार्यमखिना प्रासून यं सादरम् ।

तेन श्रीनिधिनामकेन × सिद्धान्तचिन्तामणिः
× रोक्तयुक्तिनिकरो भूयात्सतां प्रीतये ॥

Colophon :

श्रीशठमर्षणकुलतिलक + श्रीनिवासताचार्याणां × म्वागर्भशुक्ते + निवासदीक्षितकटाक्षलक्षित × र्येन + श्रीनिवासार्येण विरचितं सिद्धान्तचिन्तामणिर्नाम प्रकरणं समाप्तम् ॥

1196

Sl. No. 39745 सिद्धान्ताचिन्तामणिः Ms. No. P. 3690

Beginning

इह खलु भगवान् बादरायणमुनिः औपनिषदःपुरुष इत्यादि श्रौतासाधारण × शैः वेदान्तैकवेद्यततया अवगतं परं ब्रह्म अथातो ब्रह्म जिज्ञासेति जिज्ञास्यतया प्रतिज्ञाय तदधिगमाय तद्विजिज्ञासस्वेति श्रुतौ निर्दिष्ट —

End:

नारायणादिशब्दव्यपदेश इत्यादिकं सक्ष्मदृष्ट्या + तव्यम् ।
तेन श्रीनिधिनामकेन विदुषा सिद्धान्तचिन्तामणिः
क्लप्तो लुप्तपरोक्तयुक्तिनिकरो × ॥

Colophon :

× अण्णयार्यदीक्षितानुग्रदलब्धबुद्धिना प्रतिदिनप्रबन्धनिर्माणधुरन्धरेण श्रीनिवासार्येण विरचितं सिद्धान्तचिन्तामणिर्नाम प्रकरणं समाप्तम् ॥

1197

Sl. No. 39746 सिद्धान्तचिन्तामणिः Ms. No. P. 39 4

Beginning:

ध्येयं सतां सर्वपदाभिधेयं
मेयं श्रुतीनामपि भागधेयम्

सन्त्यक्तहेयं चिदचित्स्वकायं
ब्रह्माद्वितीयं प्रणमाम्यमेयम् ।
सिद्धान्तचिन्तामनुभूय भूयः
सैद्धान्तिकं वर्त्म न ये विदन्ति ॥

सिद्धान्तचिन्तामणिमेनमादौ
+ भेदनिपुणोऽपि षड्ङ्घिः निश्चलो भवत् नीरबन्धे ॥

इह खलु भगवान् बादरायणो मुनिः औपनिषदः पुरुष इति श्रि + तासाधारणनिर्देशैः वेदान्तवेद्यतयावगतं परब्रह्म अथातो ब्रह्मजिज्ञासेति ॥

End :

एवमन्यान्यपि प्रमाणानि भाष्यविद्भिरनुसन्धेयानीति ब्रह्म जगतो निमित्तमुपादानञ्चेति प्रामाणिकः पन्था इति सर्वमुदाहृतम् ॥

Colophon :

इति श्रीशैलबुक्कपत्तनकुलकलशपाथोराशिराकासुधाकरसर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्येण श्री श्रीनिवासाचार्येण विरचिते सिद्धान्तचिन्तामणिनामकं प्रकरणं समाप्तम् ॥

1198

Sl. No. 39747 सिद्धान्तचिन्तामणिः Ms. No. P. 6951

Beginning :

ध्येयं सतां सर्वपदाभिधेयं
मेयं श्रुतीनामपि भागधेयम् ।
सन्त्यक्तहेयं चिदचित्सकायम् (?)
ब्रह्मद्वितीयं प्रणमामि चिन्मयम् ॥
यतिपति + ये विदन्ति ॥
सिद्धान्तचिन्तामणिमेनमादौ
आदाय ते तत्त्वपदं विदन्तु ॥

End ;

प्रामाणिकः पन्था इति सर्वमवदातम् ॥
अभिमतसकलार्थान् + दयाधनाः ॥

कौण्डिन्यश्रीनिवासार्यकृपया + भूतयः ॥
श्रीशैलान्वयमौक्तिकमण्डन + सतां प्रीतये ॥

Colophon :

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिषद्यायितहृदयकमल श्रीमत्तातयार्यनन्दनस्य लक्ष्मणाम्बा + श्रीनिवासाचार्यस्य कृतौ दश प्रकरिण्यां सिद्धान्तचिन्तामणिर्नामोपादानतासमर्थनं प्रकरणं सम्पूर्णम् ॥

1199

Sl. No. 39748 सिद्धान्तपरिभाषाव्याख्या Ms. No. B. 778

Beginning :

विशुद्धविज्ञाघननस्वरूपं
विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये ॥

+ + + +

वरदार्यगुरोर्लब्धवेदान्तज्ञानसम्पदा ।
लिख्यते देवराजेन सिद्धान्तन्यायचन्द्रिका ॥

End :

न च सद्वारकं महदाद्यवस्थाश्रयत्वं ब्रह्मणोऽपि न सम्भवतीति वाच्यम् । लोके अद्वारकावस्थाश्रयस्यैव उपादानत्वदर्शनात् सद्वारकावस्थाश्रयस्य कुत्राप्यु पादानत्वादर्शनात् तथा विषयस्याप्युपादानत्वकल्पने तस्य परिभाषिकतापत्तेः इति आशंकायां परिणामादितिपञ्चमं सूत्रं प्रवृत्तं अद्वारकत्वसद्वा—

Colophon :

— — —

1200

Sl. No. 39749 सिद्धान्तन्यायचन्द्रिका Ms. No. P. 4726/1

Beginning ;

श्रीवाधूलमहाचार्यवरणद्वद्वन्भावितः ।
त्वमेव शरणं यामि सर्वथात्र परत्र च ॥

सिद्धान्तपरिभाष्यार्थान्सदाचार्यप्रकाशितान् ।
चिन्तयामीह सुदृढं तत्त्वयाथात्म्यसिद्धये ॥

End

ब्रह्मस्वरूपनिरूपकभूतानन्तत्वस्य सर्वान्तरात्मत्वगर्भत्वात् तस्य ब्रह्मस्वरूपनिरूपकत्वोक्तिरुपपन्नैवेति भावः ॥ १३ ॥

नन्वस्त्वेवं सर्वान्तरात्मत्वस्यापि ब्रह्मस्वरूपनिरूपकान्तर्गतत्वम् । तथापि तावन्मात्रस्य स्वरूपनिरूपकत्वोक्तिर्नोपपद्यत इत्यत आह सत्यत्वेत्यादिना । सत्यत्वान्तर्गतं ×

Colophon :

— — —

1201

Sl. No. 39750 सिद्धान्तप्रमेयमाला Ms. No. . P3143/1

Beginning :

नमःश्रीविष्णुचित्तार्यपदपङ्कजरेणवे ।
रामानुजमुनीन्द्रोक्तिरहस्यज्ञानहेतवे ॥ +
सच्चेतोमधुकरबृन्दसेवनीयां
सौरभ्यं श्रुतिशिरसस्समादधानाम् ।
वत्सानां कुलपतिरद्भुतं ह्यकार्षीत् —
दम्मवानां (?) वरदगुरुः प्रमेयमालाम् ॥
मीमांसायः विधिप्राप्तत्वरागप्राप्तत्वविवेकार्थमध्ययनविधिर्निरूप्यते—

End :

नरके रौरवे घोरे कर्मत्यागात् पतन्ति ते ।
तस्मात्तान् नालपेत्प्राज्ञः न निरीक्षेत वापि तान् ॥
आलोकनेन तेषान्तु शुध्यन्ते भानुदर्शनात् ।
नग्नं वानुपनीतं वा यज्ञार्थे भोजयेद्द्विजः ॥
रेतोमूत्रपुरीषाणि स पितृभ्यः प्रयच्छति ॥

Colophon :

— — —

Colophon :

इति यतिलिङ्गसमर्थने तृतीयः खण्डः ।

इति वत्सकुलतिकवरदसूरिविरचितातां सिद्धान्तप्रमेयमालायां यतिलिङ्ग-समर्थनम् ॥

1202

Sl. No 39752 सिद्धान्तरत्नावली Ms. No. B. 3264

Beginning :

वज्रध्वजांकुशरथाङ्गसरोजमुख्य-
साम्राज्यचिह्नलसिते निजहस्तपद्मे ।
अध्यक्षयन् जगदधीश्वरतामभीति-
मुदाञ्चिते दिशतु रङ्गपतिर्मुदं नः ॥ (?) +

तत्सूनुः पदवाक्यमानपदवीतत्वार्थसर्वस्ववित्
श्रीमद्वेङ्कटदेशिकाचनिगमश्रेणीशिखार्थस्थितिः ।
कुर्वे भागवताग्रगण्यहृदयालङ्कारसन्धायिनीं
तत्कारुण्यबलेन वेङ्कटसुधीः सिद्धान्तरत्नावलीम् ॥

इह खलु भगवान् बादरायणः --

End :

अतश्शिवस्य कर्मवश्यत्वाभावोऽजायमानो बहुधा विजायत इत्यादिभिः प्रमाणैस्सिध्य × पादितमिति भगवत्कारणत्वावेदकानां नायो × र्थे त्वप्रसक्तिगन्धोऽपीति निष्कण्ठकोऽयं घण्ठापथः ॥

Colophon :

इति श्रीशठमर्षणकुलतिलक + वेङ्कटनाथस्य कृतिषु सिद्धान्त रत्नावल्यां प्रमेमपरिच्छेदः ॥

1203

Sl. No. 39754 सिद्धान्तरत्नावली Ms. No. P. 1932/1

Beginning :

श्रीमदहोबलनृसिंहकवर्यहोबलाचार्यम् ।
कलयेऽहं मनसि सदा दूरितकलि × सेविताङ्घ्रयब्जम् ॥

कुर्वे भागवताग्रगण्यहृदयालङ्कारसन्धायिनीं
तत्कारुण्यबलेन वेङ्कटसुधीः सिद्धान्तमुक्तावलीम् ॥

End :

नचैवं स्यामित्यध्याहारापत्तिः दोषः । त्वत्पक्षेपि × त्यध्याहारस्य कर्तव्यत्वात् । विश्वजिदधिकरणन्यायेन आकाङ्क्षानुसारिणो अध्याहारस्य प्रामाणिकत्वाच्च ॥

इति श्री शठमर्षणकुलतिलक × निष्कण्टकोऽयं घण्टापथः ॥

Colophon :

इति श्री शठमर्षणकुलतिलक × वाजपेययाजिनो वेङ्कटाचार्यस्य कृतिषु सिद्धान्तरत्नावल्यां प्रथमः परिच्छेदः ॥

1204

Sl. No. 39755 सिद्धान्तरत्नावली Ms No. C. 1932/2

Begnining :

समुद्यत्कस्तूरीतिलकसमुदञ्चन्मुखरुचिं
किरीटप्रागल्भ्यस्फुरितपरमैश्वर्यविभवम् ।
रमापादाम्भोजद्वितयगतलाक्षारसलस-
द्भुजामध्यं नित्यं मनसि कलये रङ्गनिलयम् ॥

अथ प्रपञ्चितं भगवत्कारणत्वं असहमानस्य परस्य प्रक्रिया निराक्रियते ॥

End :

वेदान्तैः परमकारणत्वं भगवदसाधारणत्वेन अवगम्यत इति जन्माद्यस्य यत इति सूत्रोदितं जगज्जन्मादिकारणं परं ब्रह्म भगवन्नारायण इति सिद्धम् ॥

Colophon

इति श्री शठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिषद्यायितक × वेङ्कटाचार्ययज्वनः कृतिषु सिद्धान्तरत्नावल्यां तुरीयः परिच्छेदः ॥

ताताचार्यो यस्य तातः भूयसेऽस्तु ॥
गुणसन्द्रं × इ×मदित ॥
जयति जयति × मौलिमणिः ॥

1205

Sl. No. 39757 **सिद्धान्तरत्नावली** Ms. No. B. 1109

Beginning :

हयवदनहर्षहेषालहरी
जयतां निपीय यां सुधियः ।
प्रभवन्ति नित्यहृष्टाः
पराभावन्तीतरे च यथा ॥ +
पादाब्जे प्रणिधाय चेतसि तदीयानुग्रहप्रेरितः
श्रीवासस्तनुते सतामिहमुदे सिद्धान्तरत्नावलिम् ॥

End :

असंसर्गग्रहयुता ग्रहणस्मरण × ।
ज्ञानयोः सन्ततिरक्षावित्येवं समशेषयन् ॥
एककोटिकविज्ञानं निश्चयस्त्विति केचन ।
स्व × विपरीतार्थधीविरोधिमितिस्तु सः ॥

Colophon :

— — —

1206

Sl. No. 39758 **सिद्धान्तसंग्रहः** Ms. No. P. 4915/2

Beginning :

श्रीभाष्यकारसिद्धान्तरत्नाकरसुधांशवे ।
नमो वेदान्तगुरवे दुर्मतध्वान्तभानवे ॥
श्रीमत्सर्वार्थसिद्ध्यादिप्रबन्धेषु प्रपञ्चितम् ।
संगृह्यतेऽत्र सिद्धान्तः प्रसादाय विपश्चिताम् ॥
द्रव्याद्रव्यप्रबन्धेन द्विधा तत्त्वमुदीरितम् ॥
तत्र द्रव्यमवस्थावदन्यदद्रव्यमुच्यते ॥

End

न्यायसिद्धाञ्जनन्यायपरिशुद्ध्यादिषु स्फुटम् ।
यथोक्तमखिलं ज्ञेयं विद्वद्देशिकशिक्षितैः ॥

विदुषां परितोषाय कृतः सिद्धान्तसंग्रहः ।
प्रामादिकापराधन्तु क्षन्तुमर्हन्ति साधवः ॥ ५११ ॥
जयति यतिसार्वभौमः स जयति वेदान्तदेशिकः श्रीमान् ।
तदुभयहृदयगततत्त्वप्रवचनधुर्या जयन्ति भुवि सन्तः ॥ ५१२ ॥

Colophon :

इति श्रीभगवद्रामानुजमतभूषणमाडपूशुतिरुवमङ्गमाण्डान् तिरुमले श्रीरङ्गराजमहादेशिकतनयेन + श्रीशैलाचार्यदासेन विरचितः सिद्धान्तसंग्रहः सम्पूर्णः ॥

1207

Sl. No. 39761 सिद्धान्तसारः Ms. No. P. 6028

Beginning:

पत्युः सतां निगममौलिगुरोः पदाब्जे
नत्वा तदङ्घ्रिमकुरान्यतरानुबन्धात् ।
अन्यानपि श्रुतधनान् प्रणिपत्य मूर्ध्ना
सिद्धा × मुदाहरामः ॥
अष्टादशार्था भिद्यन्ते सिद्धान्तिष्वेकदेशिनाम् ।
तन्निरासाय महतां नियोगात्प्रयतामहे ॥

End :

बद्धकोटिप्रविष्टः कैवल्यनिष्ठः अस्ति चेत् परिपूर्णानुभवोऽपि स्यादेवेत्यलमधिकेनेति वदन्ति ॥

जयति यतिसार्वभौमो जयति स वेदान्तदेशिकः श्रीमान् ।
तदुभयवचनसारं निपीय तुन्दा जयन्ति भुवि सन्तः ॥

Colophon :

इति श्रीभगवद्रामानुजमतभूषण माडपूशुतिरुवरङ्गमाण्डान् श्रीरङ्गराज भट्टदेशिकतनूजेन तदेकदैवतेन तत्प्रसादलब्धवाजपेयाद्यनेकक्रतुयजनधन्य-तावता श्रीशैलदासेन विरचितः सिद्धान्तसारः × पूर्णः ॥

1208

Sl. No. 39762 सिद्धान्तसार Ms. No. C. 4480

Beginning :

पत्युस्सतां निगममौलिगुरोः पदाब्जे
नत्वा तदंघ्रिमकुटान्यतरानुबन्धात् ।
मान्यानपि श्रुतधनान् प्रणिपत्य मूर्ध्ना
सिद्धान्तसारमनवद्यमुदाहरामः ॥

तत्र स्वामिकृपया मुक्तिफलोपहिते संकल्पे जननीये साध्योपाय निरपेक्षत्वतत्सापेक्षत्वाभ्यां भेदो विवक्षितः ।

End

किंच कैवल्यं गतस्य निश्शेषकर्मक्षयोऽस्ति न वा ? न चेत्परिपूर्णानुभवाप्रयोजकर्मविशेषसत्वेन बद्धकोटिप्रविष्ट एवेति कैवल्यनिष्ठः । अस्ति चेत् परिपूर्णानुभवोऽपि स्यादेवेत्यलमधिकेनेति वदन्ति ॥

Colophon :

श्रीसिद्धान्तसारः सम्पूर्णः ॥

1209

Sl. No. 39765 सिद्धान्तसिद्धाञ्जनम् Ms. No. B. 902

Beginning :

श्रीयादवाद्रिनिलयं श्रितकल्पवृक्षं
नारायणं निखिललोकनिदानभूतम् ।
निस्सीमनिर्मलगुणं निरवद्यरूपं
नित्यं नमामि शिरसा सकलार्थसिद्धयै ॥

शेषार्यवंशाम्बुधिशीतरश्मिः
सुधीरनन्तार्य इति प्रतीतः ।
सिद्धान्तसिद्धाञ्जननामधेयं
प्रबन्धमेनं प्रकटीकरोति ॥

End :

निरुक्तसाध्यव्यापकत्वस्य बाधितत्वादिरूपोपाधौ सत्येव वैधर्म्याच्चेत्यस्यापि न विरोधः इत्याहुः ॥

सा च— पञ्चोपनिषत्प्रतिपाद्यानि पञ्चमहाभूतानि एकादशेन्द्रियाणीति षोडशतत्त्वात्मिका ॥

Colophon :

समाप्तिमगमत् ॥ (?)

1210

No. Sl. 39766 | सिद्धित्रयम् | Ms. No. P. 2778

Beginnnig :

प्रकृतिपुरुषकालव्यक्तमुक्ता यदिच्छा-
मनुविदधति नित्यं नित्यसिद्धैरनेकैः ।
स्वपरिचरणभोगैः श्रीमति प्रीयमाणे
भवतु मम परस्मिन् पूरुषे भक्तिभूमा ॥

विरुद्धमतयोऽनेकास्सन्त्यात्मपरमात्मनोः ।
अतस्तत्परिशुद्ध्यर्थमात्मसिद्धिर्विधीयते ॥

सम्मतं हि सर्वसमयेषु आत्मज्ञानं निःश्रेयसहेतुरिति श्रूयते ।

End :

स्वापादौ भासते नैवमर्थः संवेदनात्पृथक् ।
तेन संवेदनं सत्यं संवेद्योऽर्थः स्वनन्निति ॥
तदेतदपरामृष्टस्वबाधस्य जल्पनम् ।
सहोपलम्भनियमो येनैवं सति हीयते ॥

Colophon:

— — —

1211

Sl. No. 39767 | सुदर्शनमीमांसा | Ms. No. P. 3671

Beginning :

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः स × ॥

विप्रलिप्सवो दुर्बलबुद्धयो वा कतिचित् सिद्धान्तसारभूतमनाश्रमित्व मनादृत्य चरमाश्रमे स्थिताः परमहंसतां भावयन्तः —

End :

तत्तत्क्षेत्रेषु चक्रादिमुद्राधारणानुष्ठनादिदर्शनेन च श्रुत्या स्मृत्या सदाचारेण चक्रादिमुद्राधारणं सकलवैदिककुलैरनुष्ठेयमिति निरवद्यं सिद्धमिति भावः । संक्षेप इति । स्मृतीतिहासपुराण ×

श्रीमच्चक्रविलासमतनोत् श्रीमद्विपश्चिन्मुदे ॥

Colophon:

श्रीमन्नैध्रुवकाश्यपकुलतिलकवेदान्तवल्लभनन्दनवरदाचार्यसूनुना श्रीमद्वैदिकसार्वभौमसर्वतन्त्रस्वतन्त्रश्रीनिवासशठकोपसंयमीन्द्रदौहित्रस्य श्रीरामाख्यस्य विदुषः कृतिषु चक्रविद्याविलासाख्यायां सुदर्शनमीमांसाव्याख्यायां स्मृत्यर्थविचारो द्वितीयोऽङ्कः ॥

1212

Sl No. 39767 | सुदर्शनमीमांसा | Ms No. P. 3671

Beginning:

× शेषकारणं रजस्तमोदोषनाशनम् ।

सदैव रामानुजपादपङ्कजं स्मरामि × ॥

× तमर्थं सुपुष्कलं गहनम् ।

अनुसन्दधीमहे वयमक्लिष्टं ऋजुमुपपन्नं च ॥

तदाहुरिति । तद्वक्ष्यमाणं वाक्य × स्थिताः प्रष्टारः प्रतिवक्तारश्च ब्रह्मवादिनः आहुरित्यर्थः । तत्र कस्यचिच्छिष्यस्य प्रश्नवचनं दर्शयति —

End :

एवमुपबृंहणानुगृहीतत्वात् पृथिव्यप्सु प्रलीय × तन्मात्रादीनां यथोक्त एवार्थः × तन्मात्राणि च लयस्थानत्वेन नात्र विवक्षितानि ॥

Colophon :

[इति हरितकुलतिलकवाग्विजयसूनोः श्रीरङ्गराजदिव्याज्ञालब्ध वेदव्यासापरनामधेयस्य श्री सुदर्शनार्यस्य कृतौ सौबालोपनिषद्विवरणे प्रथमः खण्डः]

1213

Sl. No. 39770 **स्तोत्ररत्नभाष्यम** Ms. No. P 23

Beginning :

श्रीमद्यामुनमुनिना नाथसहायेन नाथवानस्मि ।

यद्वदनचन्द्रजनिता स्तोत्रसुधा भवति सुमनसां प्रीत्यै ॥

प्राप्यप्रापकभूते भगवति यामुनमुनेरयं प्रसृतः ।

दुरितानि हरति जगतां दयानुसन्धानसिन्धुपरिवाहः ॥

विमल + सङ्कलातदिस्थितम् ॥

स्तोत्ररत्नमिदं न्यस्तं आचार्यस्तुतिसम्पुटे ।

निधानमिव निस्सीमन्निर्विशन्तो विपश्चितः ॥

मङ्गलाचरणत्वेन ख्याता गुरुनमस्कृतिः ।

स्मृत्याचारानुसारेण स्तोत्रारम्भे विधीयते ॥

End :

बलवत् प्रथितप्रमाणदृष्ट्या

बहुमातव्यमिदं सदास्मदीयम ॥

उपनिषदुपदेश्यं स्तोत्रतात्पर्यमेत-

द्यतिपतिरथ × यामुनार्यस्य भव्यम् ।

अहमिह तु नियुक्तस्सद्भिराचार्यनिध्नै—

रधिगत × पर्ति व्या × न्वभूवम् ॥

स्वकमिह हरिदत्तं यामुनस्तोत्रवृत्या

व्यवृणुत निगमान्ताचार्यको वेङ्कटेशः ।

अगणि जगति सद्भिर्य्यस्समस्यासहस्रः

कविकथमृगेन्द्रस्सर्वतन्त्रस्वतन्त्रः ॥

Colophon :

इति कविताकिंकसिंहस्य वेदान्ताचार्यस्य कृतिषु यामुनस्तोत्रभाष्यं सम्पूर्णम् । रहस्यरक्षायां स्तोत्राधिकारश्चतुर्थः ॥

1214

Sl. No. 39776

स्तोत्ररत्नभाष्यम्

Ms. No. P. 7391/10

Beginning:

उत्तरङ्गदयापूरतरङ्गितदृगञ्चलः ।
तुरङ्गवदनोऽस्माकं तरङ्गयतु मङ्गलम् ॥
यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥
स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥
नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥ १ ॥
अत्र भगवान् यामुनाचार्यः अत्यादरेण भगवन्तं स्तोतुकामो भूत्वा

End:

श्लोकैस्तु सप्तदशभिः द्वयोत्तरपदद्वयम् ।
सत्वराधिगतिः प्रोक्ता चतुर्भिर्बन्धनाशनम् ॥
द्वाभ्यां शेषत्वकार्पण्ये शेषं मुक्तानुचिन्तनम् ॥

Colophon:

इति स्तोत्ररत्नव्याख्या नारायणमुनिसङ्गृहीता पूर्णा ॥
शुभं तदाभूमेमीन्यं सुस्वनयं कलिदनशकाब्देऽपि भगवद्रामानुजमुनि
विरचिते दातसूत्रभाप्यभाष्यमिदम् ॥ (?)

1215

Ms. No. B. 1082

स्वरूपदर्पणम्

Sl. No. 39778

Beginning:

रामानुजगुरोः मातृभगिनीतनुजायते ।
वैनतेयांशभूताय गोविन्दगुरवे नमः ॥ १ ॥

रामानुजगुरुं नत्वा शठारिं सैन्यपं श्रियाः ।

सौम्यजामातरं नाथं यामुतनञ्च रमासखम् ॥ २ ॥

स्वरूपदर्पणं स्वच्छं वीक्षन्तां सात्विका मुहुः ॥ ४ ॥

End :

रम्यसौन्दर्यसौगन्ध्यलावण्यादिगुणोत्करैः ।

श्री भूमिनीलाधिपतिः चिदचित्तत्त्वनायकः ॥

समस्तशब्दाभिधेयः सर्वदेहित्वहेतुना ।

सर्ववेदादान्तत्त्वज्ञैः वैकुण्ठपतिरीरितः ॥

रामानुजदयालब्धगुणरत्नविभूषिताः ।

स्वरूपदर्पणं स्वच्छं वीक्षन्तां सात्विका मुहुः ॥

Colophon :

इति वेदान्तरहस्ये ईश्वरप्रकरणं सम्पूर्णम् ॥

श्रीमत्त्रैऽयन्तसिद्धान्त + गोविन्दगुरवे नमः ॥

1216

Sl. No. 39780 हरिगुणमणिदर्पणम् Ms. No. P. 618

Beginning :

त्रयी सिद्धान्तशुद्धान्तशुद्धान्तःकरणान् गुरून् ।

प्रणम्या × नोमिक्षोः पक्षो विक्षोभ्यतेऽधुना ॥

ब्रह्मसाद्गुण्यनैर्गुण्यघटनैस्त्रिविधां त्रयीम् ।

एकदा वदतो निष्ठांस्त्रयीनिष्ठान् न मन्महे ॥

इह तावदचिन्त्यविविधविचित्ररचनास्पदस्थिरत्रसभेदभिदुरनिखिलजगज्जननरक्षण —

End :

इत्यादिभिर्वा ज्ञातत्वाविज्ञातयोः प्रतिपादनात्सर्वमिदमुपहितविषयम् अनुपहितं तु निर्गुणविषयमिति डिम्भप्रलपनानि भाष्यादिषु विस्तरेण निरस्तानि ।

वस्तुतस्तदनाक्षमलैङ्गमश्रौतस्मार्तं चेति निरूपितं भेददर्पणेऽस्माभिरिति सर्वमवदातम् ॥

Colophon :

इति हरिगुणमणिदर्पणं प्रकरणं सम्पूर्णम् ॥

1217

Sl. No. 39783 **हरिगुणमणिदर्पणम्** Ms. No. P. 5634/2

Beginning

ब्रह्मसाद्गुण्यनैर्गुण्यघटनैस्त्रिविधां त्रयीम् ।
एकधा वदतो निष्ठास्त्रयीनिष्ठान्न मन्महे ॥

इह तावदचिन्त्यविविधविचित्ररचनास्पदस्थिरत्रसभेदभिदुरनिखिलजगज्जननरक्षणक्षपणलीलादक्षिणं परं ब्रह्म प्रतिपादयन्त्यो यतो वा इमानि भूतानि जायन्ते + द्‍ब्रतद्ब्रह्मेत्याद्याः श्रुतयः तदुपयुक्तशक्तिसार्वज्ञसत्यसङ्कल्पादीन् गुणानाक्षिपन्ति; प्रक्षिपन्ति च तद्विरोधिनो हेयगुणान् ।

निरस्तसमस्तहेयसम्बन्धगन्धं अनवधिकगुणरत्नाकरं ब्रह्म सम्यगुपासीनाः तरन्ति दुस्तरं संसारमिति सार्वजनीनमेतत् ।

End:

अनुपहितविषयन्तु निर्गुणमिति डिम्भप्रलम्भानि भाष्यादिषु विस्तरेण निरस्तानि । वस्तुतस्तदनाक्षमलैङ्गमश्रौतमसार्तञ्चेति निरूपितं भेददर्पणेऽस्माभिरिति सर्वमवदातम् ।

दुरर्थमालिन्यनिवर्तनोज्वलं
विनिर्मलं सद्गुणदर्पणं हरेः ।
समर्पणादस्य कृतां कृतार्थतां
प्रन्थन्मृत्यामि यभशतुर्मतेः ॥ +

आचार्यदीक्षितवशान्निजाग्रजा-
ण्णार्यवर्यकृपयाप्युपजातबुद्धिः ।
यस्तत्वतोऽप्यचर्कविविधं नित्य (?)
प्रीत्यै तदस्तु महतामि ता × कानाम् ॥

Colophon :

इति श्रीशठमर्षणगोत्रतिरुकृश्रीनिवासताताचार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्ताफलेन कौण्डिन्यश्रीनिवासदीक्षितकटाक्षलक्षितभाष्यतत्वाथन निजाग्रजाणयाचार्यदीक्षितानुग्रहुलब्धबुद्धिना प्रतिदिनप्रबन्धनिर्माणधुरन्धरेण श्रीनिवासेन विरचितं हरिगुणमणिदर्पणं नाम प्रकरणं समाप्तम् ॥

1218

Sl. No. 39790 **हरिगुणनिश्श्रेणिका** Ms. No B. 1080

Beginning :

श्रीमत्पद्माक्षवक्षःस्थलनिलयतया स्फीतभूतानुविम्ब (?)

त्रातोद्भूतात्मकान्त्या भवभृदभिधया प्रस्तुतः कौस्तुभोऽसौ ।

प्रज्ञामालासुचित्रास्प × ×

× × दर्शयन्नूहर्षयेन्नः ॥ १ ॥

श्रीशैलश्रीनिवासेन कृतोल्लासेन निर्मिता ।

एषा हरिगुणश्रेणिनिश्रेणिःस्तात्सतां मुदे ॥ ५ ॥

End :

कौण्डिन्यश्रीनिवासाध्वरिवरकृपयाप्यग्रजानुग्रहेण

श्रावं श्रावं ससेवं यतिपतिवचसां सारमात्मानुसारम् ।

तद्बोधांचत्सुधाम्भोनिधिविविधपरीवाहकुल्यासकुल्यां

कल्याणोल्लासकल्याकृतिमकृत सतां प्रीतये श्रीनिवासः ॥ ८२ ॥

Colophon :

इति श्रीशैलश्रीनिवासार्यकृतिषु हरिगुणश्रेणिनिश्रेणी नाम कृतिस्सम्पूर्णा ॥

APPENDIX ii

Alphabetical Index of Authors

INDEX III

INDEX OF PUBLISHERS

(Infront of the publishers reffer to the seriel number of Ms)

38794 i V.G.M.
ii Ananda P. ress
38811 i V.G.M.
38668 ii V.G.M.
38877 iii V.G.M.
38896 Vaidhikavardhini Press
Kumbhakonam 1900
38941 V.G,M.
38960 V.G.M.
Annamalai University
Madras
38963 V.G,M.
38967 Brahmavadiu press
Madras 1913
38980 i V.G.M
ii Sri Vaishnava Sidhdanta
Prachara Sabha, Madras
38988 ,,
38995 V.G.M.
39004 ,,
39015 ,,
39051 V.G.M
39101 N.S.P. 1886
39308 N.S.P

39128 S.S,K
39147 pub–V, Krishnamachary
Kumbakonam
39182 ,,
39201 ,,
39222 R, G. M.
39232 Ananda press Madras
i V..G,M.
29281 Ananda press, Poona
39441 V.G.M. etc.
39463 i ,,
ii S.S.P.
39481 S.S.P.
39532 R.G.M. etc.
39574 Sri vaishnava Siddhanta
Prachara Sabha Madras 1938
39577 Ubhaya Vedantagranthamala
Madras etc'
39650 V.G.M
39681 ,,
39698 S.S.P.
39719 ,,
39739 ,,
39770 V.G M